आत्मस्वरूपभासनैकत्वरूपसमाधिः, तत्र मनः कृत्वा, चिन्मात्रे-ज्ञानमात्रे आत्मनि, मुख्यतः दर्शनज्ञानमय एव आत्मा, **उवउत्तो नाणदंसणगुणेहिं** इति वाक्यात् । ज्ञानस्वरूपे स्वद्रव्ये विश्रान्ति दधत् मग्न इति अभिधीयते-कथ्यते, इत्यनेन अनादितः अयं जीवः पुद्गलस्कन्धजवर्ण-गन्ध-रस-स्पर्श-शब्दादिषु मनोज्ञेषु स्वजनादिषु च भ्रमन् विकल्पकोटिकोटिं प्राप्त इष्टान् विषयानिच्छन्ननिष्टान् विषयाननिच्छन् वातोद्धूतशुष्कपलाशवद् भ्रमति । स च कदाचित् स्वपर-विवेकरूपं भेदज्ञानं प्राप्यानन्तज्ञानदर्शनानन्दमयं स्वीयं भावं स्वतया निर्धार्य, इदं विषयसङ्गादिकं न मम, नाहम् अस्य भोक्ता, उपाधिरेव एषा, नहि मम कर्त्तृत्वं भोक्तृत्वं ग्राहकत्वं च परवस्तूनाम्, मया हि स्वरूपभ्रष्टेनेदं विहितम्, सांप्रतं जिनागमाञ्जनेन जातस्वपर-विवेकेन तेषु रमणास्वादनं न युक्तमिति विचार्य स्वरूपानन्तस्वभावगुणपर्याय-स्याद्वादानन्तात्मनि विश्रान्तिं प्राप्तः, आत्मानमनन्तानन्दसंपन्मयं ज्ञात्वा, परमात्मसत्तास्वरूपे मग्नो भवति, स मग्नः अभिधीयत इति ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य आत्मानुभवमग्नः स कीदृग् भवति तदाह—

**यस्य ज्ञानसुधासिन्धौ, परब्रह्मणि मग्नता ।**
**विषयान्तरसंचारस्तस्य हालाहलोपमः ॥२॥**

यस्येति- यस्य[१]-जीवस्य अनादिविभावविरतस्य ज्ञानसुधासिन्धौ ज्ञानामृतसमुद्ररूपे परब्रह्मणि-परमात्मसमाधौ मग्नस्य (मग्नता) तस्य-जीवस्य विषयान्तरे-वर्णगन्धादौ, सञ्चारः-प्रवर्त्तनम्, हालाहलोपमः-महाविषभक्षणतुल्यः । यो हि अमृतास्वादमग्नः स विषमत्तुं कथं प्रवर्त्तते ? मालतीभोगमग्नो मधुकरः करीरादिषु न वसति एवं शुद्ध-निःसङ्ग-निरामय-निर्द्वन्द्व-स्वीयात्मज्योतिर्मग्नः अनन्तजीवोच्छिष्टेषु स्वयमनन्तवारभुक्तमुक्तेषु, वस्तुतः अभोग्येषु स्वगुणावरणहेतुभूतेषु, विषयेषु तस्य मनो न सञ्चरति, न प्रवर्त्तते इति तत्त्वम् ॥२॥

पुनस्तदेव द्योतयति—

**स्वभावसुखमग्नस्य, जगत्तत्त्वावलोकिनः ।**
**कर्त्तृत्वं नान्यभावानाम्, साक्षित्वमवशिष्यते ॥३॥**

स्वभावसुख० इति- स्वभावः-सहजं सुखं सहजात्यन्तिकं शश्वद-प्रतिपातादात्यन्तिकम्, व्यतिकीर्णसुखदुःखहेतुभावाद्यन्तरानपेक्षाद् ऐकान्तिकम्, तत्र मग्नस्य-तन्मयस्य, जगत्-लोकः तस्य तत्त्वं तद्धर्मम्, यथार्थतया विलोकिनः-दर्शनशीलस्य पुरुषस्य, अन्यभावानां-परभावानां रागादिविभावानां ज्ञानावरणादिकर्मणां बाह्यस्कन्धादाननिक्षेपाणां कर्त्तृत्वं न, किन्तु ज्ञायकस्वभावत्वात् साक्षित्वमेव, तत्र कर्त्तृत्वम्-एकाधिपत्ये क्रियाकारित्वम्, तत् जीवे जीवगुणानामेव, चेतनावीर्योपकरणकारक-चक्रोपकरणेन (चक्रोदाहरणेन) । यतो हि एकाधिपत्यक्रियाशून्यत्वेन धर्मादिद्रव्येषु न कर्त्तृत्वम्, जीवस्यापि कर्त्तृत्वं स्वकार्यस्य । न हि जीवः कोऽपि जगत्कर्त्ता, किन्तु स्वकार्य-परिणामिकगुणपर्यायप्रवृत्तेरेव कर्त्ता, न परभावानाम्, परभावानां तु कर्त्तृत्वे असदारोपसिद्ध्यभावादयो दोषाः,

१. तस्य B.1.2., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञाता लोकालोकस्य अत एव नायं परभावानां कर्त्ता, किन्तु स्वभाव-मूढाऽशुद्धपरिणतिपरिणतः अशुद्धनिश्चयेन रागादिविभावस्य, अशुद्ध-व्यवहारेण ज्ञानावरणादिकर्मणां कर्त्ता जातोऽपि स एव सहजसुखरुचिर-नन्ताविनाशिस्वरूपसुखमयमात्मानं ज्ञात्वा आत्मीयपरमानन्दभोगी, न परभावानां कर्त्ता भवति । किन्तु ज्ञायक एव । अत्र प्रस्तावना—अयं हि आत्मा स्वनिःसपत्न-सङ्गाङ्गितया स्वीयविशेषस्वभावानां स्वगुणकरणेन सत्प्रवृत्तिमतामपि स्वगुणकरणावरणेन ज्ञानचेतनावीर्यादिक्षयोपशमानां च परानुयायिनां तत्सहकारेण कर्तृत्वादिपरिणामानां परकर्त्तृत्वादिविभाव-परिणमनेन परकर्त्तृत्वे जातेऽपि तेषामेव गुणानां स्वभावसम्मुखीभवनेन कर्त्तृत्वादीनां परावृत्तिः, तेन सम्यग्दर्शनज्ञानचारित्रपरिणतेः स्वरूपसाधन-कर्तृत्वादि कुर्वन्, गुणकरणैः साधनकर्त्तृत्वं विधाय गुणप्रवृत्तिरूपं शुद्धं कर्त्तृत्वादिकं करोति, अत एव साधकानां सन्मुनीनां स्वरूपसम्मुखानां न परभावकर्त्तृत्वमिति, किन्तु ज्ञायकत्वमेव । अत्र पक्षः—तर्हि मुनीनां परभावाकर्त्तृत्वे उक्तहेतुद्वयजन्यकर्मकर्त्तृता कुतः ? तत्राह- स्वस्वभाव-मग्नानां साधकमुनीनामनभिसन्धिजवीर्यतदनुगतचेतनया कर्मबन्धकर्त्तृत्व-मस्ति, तथापि स्वायत्ताभिसन्धिजगुणप्रवृत्तीनां स्वभावानुगतत्वात् अकर्त्तृत्वम्, अथवा—एवंभूतसिद्धत्वास्वादानन्दमग्नानां तु न परभाव-कर्त्तृता । अथवा-सम्यग्दर्शनादिगुणप्राप्तौ वस्तुस्वरू  ावरणेन स्वरूपा-नुगतस्वशक्तित्वेन आत्मनः परभावकर्त्तृत्वं नास्त्येव, ज्ञायकत्वमेवेति । अतः स्वरूपरसिकानां सर्वभावज्ञायकत्वम्, कर्त्तृत्वं तु स्वपारिणामिक-भावस्य । अतः स्वात्मानमेकान्ते निवेश्य अनादिभ्रान्तिजं परभाव-कर्त्तृत्व-भोक्तृत्व-ग्राहकत्वादिकं निवारणीयम्, स्वरूपाखण्डानन्द-कर्त्तृत्वादिकं करणीयमिति गाथार्थः ॥३॥

**परब्रह्मणि मग्नस्य, श्लथा पौद्गलिकी कथा ।**
**क्वामी चामीकरोन्मादाः, स्फारा दारादराः क्व च ॥४॥**

परब्रह्मणीति–परब्रह्मणि–परमात्मनि मग्नस्य–तन्मयस्य स्वरूपाव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकनरमणरक्तस्य, पौद्गलिकी-पुद्गलसम्बन्धिनी, कथा-नाम वार्त्ता, श्लथा-शिथिला इत्यर्थः । परत्वेन अग्राह्यत्वेन अभोग्यत्वेन निर्धारात् यस्य कथापि श्लथा तस्य ग्रहः कुतो भवति ? अत एव अमी चामीकरोन्मादाः तस्य क्व ? शुद्धात्मगुणसम्पद्वतां चामीकरग्रहः एव न, परत्वात् पापस्थानहेतुत्वात्, कुत उन्मादः ? च-पुनः, स्फारा-देदीप्यमाना, दारा-वनिता तस्या आदराः क्व ? इति कुत्र नैवेति । स्वभावसुखभोगिनां पौद्गलिकभोग एव न, तर्हि या कुटिरागपटी अशुद्धविभावनटी दाराकटी तत्रादरः कथं भवति ? नैवेति ॥४॥

**तेजोलेश्याविवृद्धिर्या, साधोः पर्यायवृद्धितः ।**
**भाषिता भगवत्यादौ, सेत्थंभूतस्य युज्यते ॥५॥**

तेजोलेश्या इति- तेजोलेश्या-चित्तसुखलाभलक्षणा ज्ञानानन्दा-स्वादाश्लेषरूपा तस्या विवृद्धिः-विशेषतो वर्द्धनम् या, साधोः-निर्ग्रन्थस्य, पर्यायवृद्धितः-चारित्रपर्यायवृद्धितः, **भगवत्यादौ** भाषिता-उक्ता, **भगवत्यादौ-पञ्चमाङ्गे** सा-निर्मलसुखास्वादरूपा, इत्थंभूतस्य-आत्मज्ञानमग्नस्य रत्नत्रयैकत्वलीलामयस्य वाचंयमस्य युज्यते-घटते, नान्यस्य मन्दसंवेगिनः । अत्र प्रस्तावना-तत्र प्रथमं संयमस्वरूपमुच्यते-आत्मनि चारित्रनामा गुणः अनन्तपर्यायोपेतानन्ताविभागरूपोऽस्ति । तथा च **विशेषावश्यके**- दानादिलब्धिपञ्चकं चारित्रं सिद्धस्यापि इच्छन्ति तदावरणस्य तत्राप्यभावात्, आवरणाभावे च तदसत्त्वे क्षीणमोहादिष्वपि तदसत्त्वप्रसङ्गात्, ततस्तन्मते चारित्रादीनां सिद्धावस्थायां सद्भावः । चारित्रं च चारित्रमोहावृतं तच्च तत्त्वश्रद्धासम्यग्ज्ञानपूर्णानन्द इहाविर्भाव-पश्चात्तापादिभ्यः [१]क्षयोपशमावस्थां गतं च चारित्रमोहपुद्गलेषु उदय-प्राप्तेषु भुक्तेषु अनुदितेषु विष्कम्भितेषु केषुचित् प्रदेशभोगितां नीतेषु, चारित्रगुणविभागानां आविर्भावो भवति, तत्र सर्वजघन्यसंयमस्थाने सर्वाकाशप्रदेशानन्तगुणतुल्यचारित्रपर्यायप्राग्भावः प्रथमं संयमस्थानम् ।

१. तत्क्षयोपशमं B.2., V.2. क्षयोपशमावस्थागतया च S.M., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[4] ते कत्तिया पएसा ? सव्वागासस्स मग्गणा होइ ।**
**ते जत्तिया पएसा, अविभागतो अणंतगुणा ॥४५१२॥**

[बृहत्कल्पसूत्रम् गा० ४५१२]

प्रथमं संयमस्थानं सर्वोत्कृष्टदेशविरतिविशुद्धस्थानतः अनन्तगुणविशुद्धम्, द्वितीयं संयमस्थानं प्रथमस्थानात् अनन्ततमे भागे यावन्तः अविभागास्तावदविभागवृद्धौ भवति, एवं तृतीयम्, एवं चतुर्थम्, एवमनन्तभागवृद्ध्या अङ्गुलमात्राकाशक्षेत्रस्य अङ्गुलासङ्ख्यभागाकाशप्रदेशप्रमाणसमानि[1] स्थानानि भवन्ति, इदं प्रथमं कण्डकम् । ततः परमसङ्ख्यातभागवृद्धिरूपं द्वितीयं कण्डकम्, प्रथमं संयमस्थानं प्रथमं कण्डकम् । चरमसंयमस्थाने तावन्तोऽविभागाः तेषामसङ्ख्याततमे[2] भागे यावन्तः अविभागास्तावन्तोऽधिकाः क्षयोपशमा भवन्ति, तद् द्वितीये कण्डके प्रथमं संयमस्थानम्, ततः असङ्ख्येयानि स्थानानि अनन्तभागवृद्धिरूपाणि अङ्गुलासङ्ख्येयभागप्रदेशराशिप्रमाणानि द्वितीयं कण्डकम् । ततः परमेकमसङ्ख्यातभागवृद्धिरूपम्, पुनः असङ्ख्येयानि अनन्तभागवृद्धिरूपाणि तृतीयं कण्डकम् । ततः एकम् असङ्ख्यभागवृद्धिरूपम्, एवमनन्तभागान्तरिताङ्गुलासङ्ख्येयभागमात्रमसङ्ख्यभागवृद्धिरूपमङ्गुलासङ्ख्येयभागकण्डकमानस्थानरूपं द्वितीयं स्थानम् । ततः सङ्ख्यातभागवृद्धिरूपं प्रथमं संयमस्थानम् । ततः पुनः अनन्तभागवृद्धिरूपाणि असङ्ख्येयानि, ततः पुनः एकमसङ्ख्यभागवृद्धिरूपम्, ततः असङ्ख्येयानि अनन्तभागवृद्धिरूपाणि, एवमङ्गुलमात्रक्षेत्रासङ्ख्यभागप्रदेशमानकण्डकेषु गतेषु एकं सङ्ख्यातभागवृद्धिरूपं स्थानम्, एवमङ्गुलासङ्ख्येयभागतुल्यानि सङ्ख्येयभागवृद्धिस्थानानि गतानि । एवं सङ्ख्यातगुणवृद्धि–असङ्ख्यातगुणवृद्धि–अनन्तगुणवृद्धिरूपाणि असङ्ख्येयानि संयमस्थानानि भवन्ति । ततः परं स्थानमसङ्ख्येयगुणसंयमस्थानमानं भवति । एकान्तरं तानि असङ्ख्येयानि अनन्तभागवृद्धिरूपाणि संयमस्थानानि भवन्ति । सर्वसंयमस्थान–

१. समानस्था० S.M., B.2. । २. मसंख्यातमे S.M., B.1.2., V.2., A.D.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्या लोकसमानाः अलोके असङ्ख्येया लोकाकाशाः कल्प्यन्ते, तावत्प्रदेशराशितुल्यानि संयमस्थानानि भवन्ति उत्तरोत्तरनिर्मलानि । आदितः अनुक्रमसंयमस्थानारोही नियमात् शिवपदं लभते । प्रथममेवोत्कृष्टमध्यमसंयमस्थानातिरोही नियमात् पतति । एवं प्रथमस्थानतः अनुक्रमेण संयमक्षयोपशमी तस्य चारित्रपर्यायनिर्मलत्वेन चारित्रसुखस्वरूपं भगवतीवाक्यम् आलापकश्च भगवत्याम्– [5] "**जे इमे अज्जत्ताए समणा निग्गंथा विहरन्ति एए णं कस्स तेउल्लेसं वितीवयन्ति ? गोयमा ! मासपरियाए समणे निग्गंथे वाणमन्तराणं देवाणं तेउल्लेसं वितीवयन्ति । दुमासपरिआए समणे णिग्गंथे असुरिंदवज्जिजआणं भवणवासीणं देवाणं तेउल्लेसं वितीवयन्ति । एएणं अभिलावेणं तिमासपरिआए समणे निग्गंथे असुरकुमाराणं देवाणं तेउलेसं वितीवयन्ति । चउमासपरिआए गहगणणक्खत्ततारारूवाणं जोतिसिआणं तेउल्लेसं । पञ्चमासपरिआए चन्दिमसूरियाणं जोइसियाण तेउलेसं। छम्मासपरिआए सोहम्मीसाणाणं तेउलेसं । सत्तमासपरिआए सणंकुमारमाहिंदाणं देवाणं । अट्ठमासपरिआए बंभलोगाणं लंतगाणं तेउलेसं । णवमासपरिआए महासुक्क-सहस्साराणं देवाणं । दसमासपरिआए आणय-पाणय-आरणच्चूयाणं देवाणं। इक्कारसमासपरिआए गेविज्जविमाणाणं देवाणं । बारसमासपरिआए समणे निग्गंथे अणुत्तरोववाइयाणं देवाणं तेउलेसं वितीवयन्ति, तेण परं सुक्के सुक्काभिजाइए भवइ । तओ पच्छा सिज्झंति जाव अंतं करेंति । सेवं भंते !** [भग०सू०श०१४ उ०९ सू०५३७] टीकायां लेश्याप्रक्रमादिदमाह–**जे इमे** इत्यादि, य इमे प्रत्यक्षा **अज्जत्ताएत्ति,** आर्यतया पापकर्मबहिर्भूततया, अद्यतया अधुनातनतया, वर्त्तमानकालतया इत्यर्थः ॥ **तेयलेसंति** तेजोलेश्या सुखासिका, तेजोलेश्या हि प्रशस्तलेश्योपलक्षणम्, सा च सुखासिकाहेतुरिति कारणे कार्योपचारात् तेजोलेश्याशब्देन सुखासिका विवक्षितेति, **विईवयन्ति** व्यतिव्रजन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यतिक्रामन्ति । **असुरिंदवज्जियाणंति**–चमर–बलिवर्जितानां तेण परं–ततः परम्, ततः–संवत्सरात्परतः, **सुक्के** ति शुक्लो नामाभिन्नवृत्तोऽ–मत्सरी, कृतज्ञः, सदारम्भी, हितानुबन्धी, निरतिचारचरण इत्यन्ये, **सुक्काभिजातित्ति** शुक्लाभिजात्यं परमशुक्लमित्यर्थः, अत एवोक्तम्–

**[6] आकिञ्चन्यं मुख्यम्, ब्रह्मापि परं सदागमविशुद्धम् ।**
**सर्वशुक्लमिदं खलु, नियमात् संवत्सरादूर्ध्वम् ॥१३॥**

[षोड०प्र०षोड०१२ श्लो०१३]

एतच्च श्रमणविशेषमेवाश्रित्योच्यते, न पुनः सर्व एवंविधो भवति, अत्र मासपर्यायेति । संयमश्रेणिगतसंयमस्थानानां मासादिपर्यायगत–समयमात्राल्लङ्घनतत्प्रमाणसंयमस्थानोल्लङ्घी मुनिर्ग्राह्यः इति । अत्र परम्परासम्प्रदायः, जघन्यतः[१] उत्कृष्टं यावत् असङ्ख्येयलोकाकाश–प्रमाणेषु संयमस्थानेषु क्रमाक्रमवर्त्तिनिर्ग्रन्थेषु मासतः द्वादशमाससमय–प्रमाणसंयमस्थानोल्लङ्घनोपरितने वर्त्तमानः साधुरीदृग्देवतातुल्यं सुख–मतिक्रम्य वर्त्तते इति ज्ञेयम् । उक्तञ्च **धर्मबिन्दौ**–

**[7] उक्तं मासादिपर्यायवृद्ध्या द्वादशभिः परम् ।**
**तेजः प्राप्नोति चारित्री, सर्वदेवेभ्य उत्तमम् ॥३६॥**

[ध०बिं०प्र० अ०६, श्लो०३६]

तेजश्चित्तसुखलाभलक्षणं वृत्तौ । इत्येवम् आत्मसुखवृद्धिः आत्म–ज्ञानमग्नस्य भवति ॥५॥

**ज्ञानमग्नस्य यच्छर्म, तद्वक्तुं नैव शक्यते ।**
**नोपमेयं प्रियाश्लेषैर्नापि तच्चन्दनद्रवैः ॥६॥**

ज्ञानमग्नस्येति– ज्ञानमग्नस्य–आत्मस्वरूपोपलब्धियुक्तस्य, यत् शर्म–सुखं स्पर्शज्ञानानुभवानन्दः, तद् वक्तुं नैव शक्यते, अतीन्द्रियत्वात्

१. जघन्यः S.M., B.2, V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवाग्गोचरत्वात्, तद् अध्यात्मसुखं प्रिया-मनोज्ञेष्टवनिता[१] तस्या आश्लेषैः-आलिङ्गनैः तथा चन्दनद्रवैः-चन्दनविलेपनैर्नोपमीयते । यतः स्रक्चन्दनाङ्गनादिसुखं वस्तुतः न सुखम्, आत्मसुखनष्टैः[२] सुखबुद्ध्या आरोपितम्, लोके पुद्गलसंयोगजम् आरोपसुखं जात्या दुःखमेव । उक्तं च **विशेषावश्यके—**

[8] **जत्तो च्चिअ पच्चक्खं, सोम्म ! सुहं नत्थि दुक्खमेवेदं ।**
**तप्पडियारविभत्तं, तो पुण्णफलं ति दुक्खं ति** ॥ २००५ ॥

**★विसयसुहं दुक्खं चिय, दुक्खप्पडियारओ त्तिगिच्छव्व ।**
**तं सुहमुवयाराओ, न उवयारो विणा तच्चं** ॥ २००६ ॥

**सायासायं दुक्खं, तव्विरहंम्मि य सुहं जओ तेणं ।**
**देहेंदिएसु दुक्खं, सुक्खं देहिंदियाभावे** ॥ २०११ ॥

उक्तं च—

**औत्सुक्यमात्रमवसादयति प्रतिष्ठा,**
**क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।**
**नातिश्रमापगमनाय यथा श्रमाय,**
**राज्यं स्वहस्तधृतदण्डमिवातपत्रम्** ॥१॥ **इति** ॥

तस्मात् संसारः सर्वः दुःखरूप एव । स्वाभाविकानन्द एव सुखम्, यावद् इन्द्रियसुखे सुखबुद्धिः, तावत् सम्यग्दर्शनज्ञाने न इति **तत्त्वार्थवृत्तौ**, अतः अध्यात्मसुखं पुद्गलाऽऽश्लेषजसुखेन नोपमीयते इति ॥६॥

**शमशैत्यपुषो यस्य, विप्रुषोऽपि महाकथा ।**
**किं स्तुमो ज्ञानपीयूषे, तत्र सर्वाङ्गमग्नता ?** ॥७॥

शमशैत्यपुष इति- शमः-उपशमः रागद्वेषाभावः, तत्त्वास्वादकत्वम् आत्मनि निर्धार्य इष्टानिष्टे वस्तुनि रागादीनां शान्तिः, नहि

१. वनिताश्लेषैः सर्वप्रतिषु । २. भ्रष्टैः S.M.। ★ संग्रहशतकम् गा०६३, ७२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागादयो वस्तुपरिणामाः, किन्तु विभावजा अशुद्धा भ्रान्तिपरिणतिः, नहि पुद्गलादीनां शुभाशुभपरिणतिः कस्यापि जीवस्य निमित्ता, किन्तु पूर्णगलनपारिणामिकत्वेन । अथ वर्णादिकर्मविपाकाद्वा तत्र रागद्वेषता नु भ्रान्तिरेव । उक्तं च–

**कणगो लोहो न भणइ, रागो दोसो कुणंतु मज्झ तुमं ।**
**नियतत्तविलुत्ताणं, एस अणाईअ परिणामो ॥१॥**

स्वरूपस्य स्वायत्तत्वात् स्वभोग्यत्वात् परवस्तुसंयोगवियोगाभ्यामिष्टानिष्टतोपाधिः, एवं शमस्य शैत्यं-शीतलत्वम् अतप्तत्वम्, तस्य पुषः-पोषकस्य यस्य पुरुषस्य शमशैत्यपुषः, विप्रुषः-बिन्दुमात्रस्यापि महाकथा-महावार्त्ता, शमशैत्यबिन्दुरपि दुर्लभः, यस्य ज्ञानपीयूषे-तत्त्वज्ञानामृते सर्वाङ्गमग्नता, तत्र-तस्मिन् स्थाने किं [१]स्तुमः-किं वर्णयामः ? तस्य वर्णनां वक्तुमसमर्था वयमिति । यो हि स्वरूपज्ञानानुभवमग्नः स अतिप्रशस्यः । उक्तं च–

[9] "★**लब्भइ सुरसामित्तं, लब्भइ पहुअत्तणं न संदेहो ।**
**इक्को नवरि न लब्भइ, जिणंदवरदेसिओ धम्मो ॥१४॥**
[सं०स०गा०१४]

**धम्मो पवित्तिरूवो, लब्भइ कइया वि निरयदुक्खभया ।**
**जो नियवत्थुसहावो, सो धम्मो दुल्लहो लोए ॥२॥**

**नियवत्थुधम्मसवणं, दुल्लहं वुत्तं जिणिंदिआण सुयं ।**
**तप्फासणमेगत्तं, हुंति केसिं च धीराणं ॥३॥"**

अतः वस्तुस्वरूपधर्मस्पर्शनेन परमशीतीभूतानां परमपूज्यत्वमेव ॥७॥

**यस्य दृष्टिः कृपावृष्टिः, गिरः शमसुधाकिरः ।**
**तस्मै नमः शुभज्ञान-ध्यानमग्नाय योगिने ॥८॥**

॥ इति द्वितीयं मग्नाष्टकम् ॥ २ ॥

---

१. ब्रूमः B.1.2., S.M., V.2. । ★ सम्बोधप्रकरणे गा०९५९, रत्नसंचयः गा०५०३, चतुर्थं चरणं पृथगस्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्येति- तस्मै-शुभज्ञानध्यानमग्नाय योगिने नमः, शुभं नाम शुद्धम्, ज्ञानं-यथार्थपरिच्छेदनम्, भेदज्ञानविभक्तस्वपरत्वेन स्वस्वरूपैकत्वानुभवः, तन्मयत्वं ध्यानम् तत्र मग्नः, तस्मै योगिने-मनोवाक्कायरोधकाय, रत्नत्रयाभ्यासशुद्धसाध्यसंसाधकाय नमः । कस्य ? यस्य दृष्टिः कृपावृष्टिः-परमकरुणावर्षिणी, यस्य गिरः-वाचां समूहः शमसुधाकिरः-क्रोधादिपरित्यागः शमः, स[१] एव सुधा-अमृतम्, तस्याः किरणं-सेचनम्, (यस्य) तच्छीला दृष्टिः कृपामयी वाक् समतामृतमयी, तस्मै योगिने नमः इति । अत्र भावना--अनादिमिथ्यात्वासंयमकषाययोगचापल्यविध्वस्तात्मस्वभावानाम्, इष्टानिष्टपरभावग्रहणाग्रहणरसिकत्वेन तत्प्राप्त्यप्राप्तौ रत्यरत्यशुद्धाध्यवसायमग्नानां जीवानां कुतः स्वरूपमग्नता ? ततः शङ्काद्यतिचारवियुक्तावाप्तदर्शनो हि जीवः शुद्धाशयः त्रिभुवनमप्युपहतमोहमहेन्धनज्वलितकर्मदहनक्वथ्यमानमशरणमवलोक्य गुणावरणादुःखोद्विग्नः, निर्धारिततत्त्वश्रद्धानः, आश्रवनिवृत्तिसंवरैकत्वप्रतिज्ञामारूढः दृढीकरणार्थम्, पञ्चविंशतिभावनाभावितान्तरात्मा द्वादशानुप्रेक्षास्थिरीकृताध्यवसायः, पूर्वकर्मनिर्जराभिनवाग्रहणाविर्भावभूतस्वरूपसम्पदानुभवमग्नाः सुखिनः, अत एवागमश्रवणविभावविरतितत्त्वावलोकनतत्त्वैकाग्रताद्युपायैः स्वरूपानुभवमग्नत्वमेव कार्यम्, संसारे कर्मक्लेशसंततत्वमवगम्य संसारोद्विग्नेन विरागमार्गानुगप्रवर्त्तिनात्मस्वरूपाविर्भावहेतुषु सम्यग्दर्शनज्ञानचारित्रेषु वर्त्तितव्यमित्यर्थः ॥८॥

**॥ इति व्याख्यातं मग्नाष्टकम् ॥ २ ॥**

## ॥ अथ तृतीयं स्थिरताष्टकम् ॥

अथ मग्नत्वं स्थिरतया भवति, अतः स्थिरताष्टकं प्रदर्श्यते, तत्र धर्मास्तिकायादीनां त्रयाणां स्थिरता अक्रियत्वात्, पुद्गलानां स्थिरता स्कन्धादिनिबद्धा, सा तु न साधनहेतुः, अत्र नाङ्गीकृता, या तु वस्तुवृत्त्या

१. तदेव सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थिरस्य, परोपाधितः चलीभूतस्य, सम्यग्दर्शनादिगुणावाप्तौ परभावादिष्वगमनरूपा आत्मनः स्थिरता प्रतन्यते, तत्र नामस्थापना सुगमा, द्रव्यतः स्थिरता योगचेष्टारोधरूपा, द्रव्ये स्थिरता मम्मणवत्, द्रव्येण स्थिरता रोगादिसम्भवा, द्रव्यरूपा स्थिरता द्रव्यस्थिरता आगमतः नोआगमतः, आगमतः स्थिरतापदार्थज्ञस्य अनुपयुक्तस्य, नोआगमतः स्वरूपोपयोगशून्यस्य साध्यविकलस्य, प्राणायामादिषु कायोत्सर्गादिर्वा द्रव्यस्थिरता । भावतो द्विविधा अशुद्धा रागद्वेषमनोज्ञविषयेषु तन्मयत्वेन एकता, शुद्धा च सम्यग्दर्शनज्ञानचारित्रादिस्वरूपे तन्मयत्वरूपा, धर्मध्यानशुक्लध्यानादिषु अचलता भावस्थिरता, शुद्धसाध्यशून्या योगादीनां स्थिरता सा दुर्नयरूपा, या तु साध्यवार्त्तया साध्यनिष्पादनपरिणतिविकला नयाभासरूपा, या तु साध्याभिलाषसाध्योद्यमपरिणत्या कारणभूता योगादीनां द्रव्याश्रवत्यागरूपा स्थिरता सा आद्यनयचतुष्टयरूपा, या तु सम्यग्दर्शनज्ञानचारित्रेण स्वरूपसाधनसाध्यनिष्पादनाभ्यासवती स्थिरता सा शब्दनयस्थिरता, या तु धर्मशुक्लध्यानगतस्वरूपाप्रच्युतिपरिणतिरूपा समभिरूढनयस्थिरता, या तु क्षायिकदर्शनज्ञानचारित्रवीर्यसुखादिभ्योऽप्रच्युतिरूपा सा एवंभूतस्थिरता, विभावेऽपि सर्वनयरूपा स्थिरता तत्त्वविकलानामिष्यते । तथापि—अत्र परमानन्दसन्दोहभोगरूपसिद्धत्वसाधनरूपा[१] स्वभावस्थिरता तस्या एवाऽवसरः सा व्याख्यायते । अनाद्यशुद्धतामग्नः स्वरूपसुखाप्राप्तौ इन्द्रियसुखेच्छया चलोऽयं जीवस्तस्य करुणया गुरुर्वक्ति—

**वत्स ! किं चञ्चलस्वान्तो, भ्रान्त्वा भ्रान्त्वा विषीदसि ? ।**
**निधिं स्वसन्निधावेव, स्थिरता दर्शयिष्यति ॥१॥**

वत्सेति- हे वत्स ! त्वं चञ्चलस्वान्तः—चपलान्तःकरणः सन् इतः भ्रान्त्वा, एकं त्यजन् अन्यं गृह्णन् अनादितः कथं विषीदसि- विषादवान् भवसि? अप्राप्त्या दीनः, प्राप्त्याऽतृप्तः अत एव परभावे विषाद एव, सुखबुद्ध्या गृहीतस्य स्वयंसुखरूपाभावात् प्राप्तौ अपि न सुखमतः अत्र[२]

१. साधनभूता L.D.1.2. । २. तत्र L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तिर्विषादमूलैव, रे वत्स ! स्वसन्निधावेव-स्वसमीपे एव आत्मनि एव, निधिं-स्वगुणसम्पद्भाजनम्, तव स्थिरता भेदरत्नत्रयाभेदरत्नत्रयैकत्वरूपा दर्शयिष्यति-उपयोगगोचरा करिष्यति, अतोऽनादिविषयास्वादचलतां त्यक्त्वा शुद्धे ज्ञानाद्यनन्तगुणे शुद्धात्मनि स्थिरत्वं कुरु ॥१॥

**ज्ञानदुग्धं विनश्येत, लोभविक्षोभकूर्चकैः ।**
**आम्लद्रव्यादिवास्थैर्यादिति मत्वा स्थिरो भव ॥२॥**

ज्ञानदुग्धमिति- लोभविक्षोभकूर्चकैः अस्थैर्यात् ज्ञानदुग्धं विनश्येत । लोभः-लोलतापरिणामः, इच्छा मूर्च्छा गृध्नता काङ्क्षा इत्यादि लोभपर्यायाः, (तद्भावजन्या विक्षोभाः)-परभावाभिलाषरूपाः अशुद्ध-परिणामाः, त एव कूर्चकाः, तैर्ज्ञानं तत्त्वावबोधतत्त्वैकत्वरूपम्, दुग्ध-मिव दुग्धम्, विनश्येत-क्षयं लभेत, लोभपरिणामः आत्मस्वरूपा-नुभवविनाशहेतुः, कस्मादिव ? आम्लद्रव्यादिव, यथा आम्लद्रव्ययोगे पयो विनश्यति तथा लोभपरिणत्या आत्मस्वरूपसुखं विनश्यतीति । लोभपरिणामः-परभावग्रहणेच्छापरिणामः, आत्मगुणानुभवविध्वंसहेतुः, इति ज्ञात्वा आत्मस्वरूपे-अखण्डानन्दरूपे चित्स्वरूपे अवर्णागन्धा-रसास्पर्शे आत्मनि श्रद्धानज्ञानरमणतया स्थिरो भव ॥२॥

**अस्थिरे हृदये चित्रा, वाङ्नेत्राऽऽकारगोपना ।**
**पुंश्चल्या इव कल्याण-कारिणी न [1]प्रकीर्तिता ॥३॥**

अस्थिरे इति- हृदये अस्थिरे सति-परभावाभिलाषिणि चित्ते सति, चित्रा-अनेकप्रकारा वाङ्नेत्राद्याकारगोपना द्रव्यक्रियारूपा पुंश्चल्या इव-असती स्त्री इव कल्याणकारिणी न प्रकीर्तिता[2]-हितकारिणी न मता, जैनानां द्रव्यक्रिया भावधर्मयुता भावाभिलाषिणी एव प्रशस्या, भाव-धर्मरहिता तु मार्जारसंयमतुल्या, **तत्त्वार्थे** द्रव्यक्रिया केषाञ्चित् परम्परया धर्महेतुतया जाता, सा तु देवादिसुखेहलोकयशोभिलाषरहितानामेव, न तु लोकसंज्ञारूढानाम्, अतस्तत्त्वस्वरूपाभिमुखीभूय मन आत्मधर्मैकत्वं विधाय चित्तस्थिरतापूर्वकं स्थैर्यं करणीयमिति ॥३॥

---

१. तन्न कीर्त्तिता । L.D.1. । २. कीर्त्तिता L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्तर्गतं महाशल्यमस्थैर्यं यदि नोद्धृतम् ।**
**क्रियौषधस्य को दोषस्तदा गुणमयच्छतः ॥४॥**

अन्तर्गतमिति- अन्तर्गतम[1]भ्यन्तरम्, महाशल्यं-महत् शल्यरूपं-परभावानुयायि परभावानुगतचेतनावीर्यपरिणतिरूपम्, अस्थैर्यम्-अस्थिरत्वम्, अतश्चापल्यम् आत्मपरिणतीनां स्वस्वकार्याकरणे परभावोन्मुखप्रवर्त्तनरूपम् अस्थैर्यम्, यदि न उद्धृतं-न वारितम्, तदा क्रियौषधस्य कः दोषः ? न कोऽपीत्यर्थः, कथंभूतस्य क्रियौषधस्य ? गुणं स्वात्मस्वभावाविर्भावरूपमयच्छतः-अददतः, क्रिया हि वृत्तिरूपा, भावपरिणतिस्तु आत्मगुणशुद्धिरूपा, अन्तः शल्ये सति क्रियौषधेन नो रोगापगमः, अतः आभ्यन्तरं परानुयायितापरकर्तृतापरव्यापकतारूपं शल्यं निवारणीयमिति ॥४॥

**स्थिरता वाङ्मनःकायैर्येषामङ्गाङ्गितां गता ।**
**योगिनः समशीलास्ते, ग्रामेऽरण्ये दिवा निशि ॥५॥**

स्थिरता इति- येषां-प्राणिनाम्, वाङ्मनःकायैर्वचनमनः-काययोगैः, स्थिरता-आत्मगुणनिर्द्धारभासनरमणैकत्वरूपा, अङ्गाङ्गिताम् - तन्मयतां गता-प्राप्ता, ते योगिनः-मुनीश्वराः, समशीलाः-समस्वभावाः, स्वद्रव्य-स्वक्षेत्र-स्वकाल-स्वभावरूपस्वा[2]त्मस्वभावतः अन्यत्-परद्रव्ये परत्वरूपम् समत्वेन ज्ञानात् स्वात्मनः सकाशात् यदन्यत् तत्सर्वं भिन्नमिति समत्वं येषां निष्पन्नं तेषां ग्रामे-जनसमूहलक्षणे, अरण्ये-निर्जने, तुल्यत्वम्-इष्टानिष्टताभावः, दिवा-वासरे, निशि-रात्रौ समत्वं-तुल्यपरिणतिः अरक्तद्विष्टतारूपा समपरिणतिर्भवति ॥५॥

**स्थैर्यरत्नप्रदीपश्चेद्, दीप्रः संकल्पदीपजैः ।**
**तद्विकल्पैरलं धूमैरलंधूमैस्तथाऽऽश्रवैः ॥६॥**

स्थैर्येति- यस्य पुरुषस्य चेत्—यदि स्थैर्यरत्नप्रदीपः— स्थिरतारूपरत्नदीपकः, 'दीप्रः'-देदीप्यमानः, तत्-तदा सङ्कल्पदीपजैः विकल्पैः

१. माभ्य० L.D.1. । २. स्वात्मभावतः L.D.1. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूमैः अलं-सृतम्, परचिन्तानुगाऽशुद्धचापल्यतारूपः सङ्कल्पः, पुनः पुनः तत्स्मरणरूपो विकल्पः, सङ्कल्पविकल्परूपधूमैः अलं-सृतम्, यस्य स्वरूपैकत्वरूपा स्थिरता भासते तस्य सङ्कल्पविकल्पा[1] न भवन्ति, यद्यपि निर्विकल्पसमाधिः अभेदरत्नत्रयीकाले, तथापि स्वरूपलीनानां सांसारिकसङ्कल्पविकल्पाभावः, तथा 'अलंधूमैः'-अत्यन्तधूमैः मलिनैः आश्रवैः अपि अलं-सृतम् अतः सङ्कल्पविकल्परूपचलपरिणतिम[2]पहाय द्रव्यभावप्राणातिपात-मृषावादादत्तादान-मैथुन-परिग्रहरूपैराश्रवैः सृतम्, यो हि आत्मसमाधिरतः स्वस्वभावस्थिरस्तस्य आश्रवाः कुतः इति ? अतः आत्मनः स्वधर्मकर्त्तृत्व-यथार्थभासन-स्वरूपग्राहकत्व-स्वगुण-भोक्तृत्व-स्वस्वभावरक्षकत्वपरिणतस्य नाश्रवाः, एतेषां स्वभावानां परभावपरिणतानाम् आश्रवाः स्वरूपभ्रान्तिरेव स्वपरिणतीः परकर्त्तृत्वेन परिणमयति, यदा तु अस्य स्वरूपावबोधः स्वकार्यकरणनिर्धारः जातस्तदा स्वपरिणतीः स्वकार्यकरणे एव व्यापारयति न परकर्त्तृत्वे, कारकचक्रमपि स्वरूपमू[3]ढेनैव परकर्त्तृत्वादिव्यापारेण अशुद्धीकृतं यदा अनेन स्वपरविवेकेन अहम् अहम्, परः परः, नाऽहं परकर्त्ता भोक्ता एवं लब्धविवेकः स्वकारकचक्रं स्वकार्यकरणे व्यापारयति आत्मा आत्मानम् आत्मना आत्मने आत्मनः आत्मनि प्रवर्त्तयति इति स्वरूपम् । एवं स्वरूपपरिणतानामाश्रवा न भवन्ति ॥६॥

**उदीरयिष्यसि स्वान्तादस्थैर्यपवनं यदि ।**
**समाधेर्धर्ममेघस्य, घटां विघटयिष्यसि ॥७॥**

उदीरयिष्यसि इति- यदि स्वान्तात्-अन्तःकरणात् अस्थैर्यपवनं त्वम् उदीरयिष्यसि अस्थिरतामारुतं यदा प्रवर्त्तयिष्यसि तदा समाधेः स्वरूपार्थविश्रान्तिरू[4]पधर्ममेघस्य घटां विघटयिष्यसि-दूरीकरिष्यसि इति, अस्थिरस्य समाधिध्वंसो भवति। अतः आत्मधर्मविषये स्थिरता करणीया ॥७॥

---

१. विकल्पादि न संभवति V.2. । २. परपरिणति V.2. । ३. मूढे च L.D.1.। ४. रूपस्य धर्म० L.D.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चारित्रं स्थिरतारूपमतः सिद्धेष्वपीष्यते ।**
**यतन्तां यतयोऽवश्यमस्या एव प्रसिद्धये ॥८॥**

॥ इति तृतीयं स्थिरताष्टकम् ॥ ३ ॥

चारित्रमिति- अतः कारणात्सिद्धेष्वपि सकलकर्ममलमुक्तेष्वपि स्थिरतारूपं चारित्रमिष्यते, **पञ्चमाङ्गे** सिद्धानां चारित्राभावः उक्तः स च-क्रियाव्यापाररूपः, यस्तु स्थिरतारूपः स च वस्तुधर्मत्वात् अस्त्येवेति, **प्रज्ञापना-तत्त्वार्थ-विशेषावश्यका**दिषु व्यक्तं व्याख्याततत्वात्, आवरणाभावे आवार्यस्य प्राग्भावात् विगतचारित्रमोहस्य चारित्र-प्रकटनात्, सिद्धानामपि स्थिरतारूपं चारित्रम्, अतः स्थिरता साधनीया, प्रथमं सम्यग्दर्शनेन श्रद्धास्थिरतां कृत्वा सद्भासनस्वरूपविश्रान्तिस्वरूपैकाग्रतारूपां स्थिरतां कृत्वा समस्तगुणपर्यायाणां स्वकार्यप्रवृत्तिरूपां स्थिरतां निष्पाद्य, समस्तात्मपरिणतिनिःसङ्गरूपां परमां स्थिरतां निष्पादयति, अतः समस्तचापल्यरोधेन योगस्थिरतां कृत्वा उपयोग-स्थिरत्वेन स्वरूपकर्तृत्व-स्वरूपरमण-स्वरूपभोक्तृत्वरूपं स्थिरत्वं साध्यम्, तस्मात् स्थिरत्वसाधने यत्नः करणीय इत्युपदेशः ॥८॥

**॥ इति व्याख्यातं स्थिरताष्टकम् ॥ ३ ॥**

## ॥ अथ चतुर्थं मोहत्यागाष्टकम् ॥

अथ स्थिरता मोहत्यागाद् भवति, आत्मनः परिणतिचापल्यं मोहोदयात्, मोहोदयश्च निर्धाररूपसम्यग्दर्शनस्वरूपरमणचारित्रावारकश्च, क्षयोपशमी चेतनावीर्यादीनां विपर्यासपररमणतादिपरिणमनरूपः, इति तेन चापल्यम्, अतः मोहोदयवारणेन स्थिरता भवति, तेन मोहत्यागाष्टकं वितन्यते, नामस्थापनामोहः सुगमः, द्रव्येण-मदिरापानादिना मोहः-मूढता परिणामः, द्रव्यात्-धनस्वजनवियोगात्, द्रव्ये-शरीरपरिग्रहादौ, द्रव्यरूपो मोहः मोहनगीतादिषु गन्धर्वादीनां वाक्येषु, अनुपयुक्तस्य आगमतो, नोआगमतो रागवत्सु । भावतः मोहः अप्रशस्तः, समस्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापस्थानहेतुपरद्रव्येषु कुदेव-कुगुरु-कुधर्मेषु, प्रशस्तस्तु मोक्षमार्गे-सम्यग्दर्शन-ज्ञान-चारित्र-तपोहेतुषु सुदेवगुर्वादिषु । तत्र मोहत्यागः उत्सर्जनम्, भिन्नीकरणम्, अत्र यावत् (यावान्) अप्रशस्तमोहस्तावत् (तावान्) सर्वथा त्याज्य एव, अशुद्धत्वनिबन्धनत्वात् । प्रशस्तमोहः साधने असाधारणहेतुत्वेन पूर्णतत्त्वनिष्पत्तेः अर्वाक् क्रियमाणोऽपि अनुपादेयः । श्रद्धया विभावत्वेनैवावधार्यः । यद्यपि परावृत्तिस्तथापि अशुद्धपरिणतिरतः साध्ये सर्वमोहपरित्याग एव श्रद्धेयः, आद्यनयचतुष्टये कर्मवर्गणापुद्गलेषु तद्योगेषु तद्ग्रहणप्रवृत्त्या सङ्कल्पे कर्मपुद्गलेषु सत्तागतेषु बध्यमानेषु चलोदीरितेषु उदयप्राप्तेषु अशुद्धविभावपरिणाम-रूपमोहहेतुषु मोहत्वम् । शब्दादिनयत्रये मोहपरिणतचेतनापरिणामेषु मिथ्यात्वासंयमप्रशस्ताऽप्रशस्तरूपेषु मोहत्वम् । अत आत्मनोऽभिनव-कर्महेतुः मोहपरिणामः । मोहेनैव जगद् बद्धम्, मोहमूढा एव भ्रमन्ति संसारे । यतः ज्ञानादिगुणसुखरोधकेषु चलेषु अनन्तवारमनन्तजीवैर्भुक्त-मुक्तेषु जडेषु अग्राह्येषु पुद्गलेषु मनोज्ञाऽमनोज्ञेषु[१] ग्रहणाग्रहणरूपो विकल्पः मोहोद्भवः । तेनायं पुद्गलासक्तः मोहपरिणत्या पुद्गलानुभवी स्वरूपानवबोधेन मुग्धः परिभ्रमति । अतः मोहत्यागो हितः । उक्तं च-

**आया नाणसहावी, दंसणसीलो विसुद्धसुहरूवो ।**
**सो संसारे भमइ, एसो दोसो खु मोहस्स ॥१॥**

**जो उ अमुत्ति अकत्ता[२], असंगनिम्मलसहावपरिणामी ।**
**सो कम्मकवयबद्धो, दीणो सो मोहवसगत्ते ॥२॥**

**ही दुक्खं आयभवं, मोहमप्पाणमेव धंसेई ।**
**जस्सुदये णियभावं, सुद्धं सव्वं पि नो सरई[३] ॥३॥**

इत्येवं मोहस्य विजृम्भितं मत्वा त्याज्यमिति कथयति-

---

१. एष पाठो नास्ति B.2. S.M. V.1.2. L.D.1.2. । २. अमुत्तिऽकत्ता S.M., B.2. अमुत्तिकत्ता V.2. । ३. सरइ B.2., V.2., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अहं ममेति मन्त्रोऽयम्, मोहस्य जगदान्ध्यकृत् ।**
**अयमेव हि नञ्पूर्वः, प्रतिमन्त्रोऽपि मोहजित् ॥१॥**

अहं ममेति मन्त्रोऽयमिति—अहमिति मोहस्यात्माऽशुद्धपरिणामस्य उपचारतः नृपेतिसंज्ञस्य अहं मम, इति अयं मन्त्रः जगदान्ध्यकृत्-ज्ञानचक्षूरोधकः, अहमिति-स्वस्वभावेनोन्मादः परभावकरणे कर्तृता-रूपोऽहंकारः अहम्, सर्वस्वपदार्थतः भिन्नेषु पुद्गलजीवादिषु इदं ममेति परिणामो ममकारः, इत्यनेन अहं ममेति परिणत्या सर्वपरत्वं स्वतया कृतम्, एषः अशुद्धाध्यवसायः मोहजः, मोहोद्द्योतकश्च, शुद्धज्ञानाञ्जन-रहितान् जीवान् (शुद्धज्ञानाञ्जनरहितानां जीवानाम्) आन्ध्यकृत् स्वरूपा-वलोकनशक्तिध्वंसकः, हि इति निश्चितम्, अयमेव नञ्पूर्वकः प्रतिमन्त्रो-विपरीतमन्त्रः मोहजित्-मोहजयो मन्त्रः, तथा च नाऽहम् एते ये परे भावा, ममापि एते न, भ्रान्तिः एषा, साम्प्रतं यथार्थपदार्थज्ञानेनाहं पराधिपः, न परभावा मम । उक्तं च—

**[10] ★एगोहं नत्थि मे कोई, नाहमन्नस्स कस्स वि ।**
**एवं अदीणमणसो, अप्पाणमणुसासई ॥२६॥**

**एगो मे सासओ अप्पा, नाणदंसणसंजुओ ।**
**सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥२७॥**

**संजोगमूला जीवेण, पत्ता दुक्खपरम्परा ।**
**तम्हा संजोगसंबंधं [१]सव्वं तिविहेण वोसिरे ॥२८॥**

[आउरपच्च० गा० २६,२७,२८]

इत्येवं विभाव्य द्रव्यकर्मतनुधनस्वजने भिन्नतां नीतेषु स्वभावै-कत्वेन मोहजयो दृष्टः, अतः अहङ्कारममकारत्याग इष्ट इति ॥१॥

पुनस्तदेव भावयति—

---

★ महापच्च० गा० १३,१६, संथारापोरिसी गा०११-१२-१३ चंदाविज्झयं -पय०गा०१६०-१६१ । १. सव्वे सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शुद्धात्मद्रव्यमेवाहम्, शुद्धज्ञानं गुणो मम ।**
**नान्योऽहं न ममान्ये चेत्यदो मोहास्त्रमुल्बणम् ॥२॥**

शुद्धेति[१]—शुद्धः-निर्मलः सकलपुद्गलाश्लेषरहितः ज्ञानदर्शन-चारित्रवीर्याव्याबाधामूर्त्ताद्यनन्तगुणपर्यायनित्यानित्याद्यनन्तस्वभावमयः, असङ्ख्यप्रदेशी, स्वभावपरिणामी, स्वरूपकर्त्तृत्वभोगकर्तृत्वादि-धर्मोपेतः, (आत्मा शुद्धात्मा, तदेव[२]) शुद्धात्मद्रव्यमेव अहम्, अनन्त-स्याद्वादस्वसत्ताप्राग्भावरसिकः, अनवच्छिन्नानन्दपूर्णपरमात्मा परम-ज्योतीरूपः अहम्, शुद्धं निरावरणं सूर्यचन्द्रादिसहायविकलप्रकाशम्, एकसमये त्रिकाल-त्रिलोकगतसर्वद्रव्यपर्यायोत्पादव्ययध्रौव्यावबोधकं ज्ञानं मम गुणः, अहं कर्त्ता ज्ञानस्य, मे कार्यं ज्ञानम्, ज्ञानकरणान्वितः, ज्ञानपात्रम्,[३] ज्ञानात् जानन्, ज्ञानाधारः अहम्, ज्ञानमेव मम स्वरूपम् । इत्यवगच्छन् अन्ये धर्माधर्माकाशपुद्गलास्ततोऽन्यो जीवपदार्थः, जीवपुद्गलसंयोगजपरिणामः अन्यः सर्वः अहं न, मत्तः भिन्ना एव एते पूर्वोक्ताः भावाः, मम द्रव्यादिचतुष्टयेन भिन्नत्वात् । यो हि व्याप्य-व्यापकभावाद् भिन्नः, मम स न, यः असङ्ख्यप्रदेशे स्वक्षेत्रे अभेदतया स्वपर्यायपरिणामः स मम इति, स्वस्वरूपे स्वत्वम्, परे परत्वपरिणामः, मोहास्त्रं-मोहच्छेदकम् अस्त्रम्[४] ईदृग्भेदज्ञानविभक्तत्यक्तेन मोहक्षयः अतः सर्वपरभावभिन्नत्वं विधेयम् । अत एव निर्ग्रन्थाः त्यजन्ति आश्रवान्, श्रयन्ति गुरुचरणान्, वसन्ति वनेषु, उदासीभवन्ति विपाकेषु, अभ्यसन्ति[+] आगमव्यूहम्, अनादिपर[५]भावच्छेदाय प्रयत्नः उत्तमानाम् ॥२॥

---

१. शुद्धात्मद्रव्य इति B.1., A.D. । २. एष पाठो नास्ति V.2., B.1.2., S.M. । ३. ज्ञानपात्रः सर्वप्रतिषु । ४. उल्बणमिति शब्दस्य वृत्तिर्न दृश्यते । +अत्र "असी गत्यादानयोश्च" (धा०-१३२) इति अस् भ्वादिको ग्राह्यः । ५. भावभेदच्छेदाय L.D.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**योन मुह्यति लग्नेषु, भावेष्वौदयिकादिषु ।**
**आकाशमिव पङ्केन, नाऽसौ पापेन लिप्यते ॥३॥**

योन मुह्यति इति- यः-जीवः तत्त्वविलासी औदयिकादिषु भावेषु-शुभाशुभकर्मविपाकेषु आदिशब्दात् परभावानुगक्षयोपशमे(म) अशुद्धपारिणामिकभावग्रहः, तेषु लग्नेषु-आत्मनि स्वक्षेत्रीभूतेषु यो न मुह्यति-मोहैकीभावं न प्राप्नोति, भेदज्ञानविवेकेन त्यक्तपरसंयोगः अवश्योदितेषु यः अव्यापकः स पापेन-कर्मणा न लिप्यते । कमिव ? पङ्केन आकाशमिव, यथा आकाशस्थपङ्कः आकाशस्य न लेपकृत्, तत्र अपरिणमनात् । एवं शमसंवेगनिर्वेदनिगृहीतपरभावस्य अवश्योदयविपाके भुज्यमानेऽपि अव्यापकत्वात् न लेपः । स हि-पूर्वकर्मनिर्जरारूपं कार्यं करोति, स्वीयपरिणामस्य भिन्नरक्षणेन अकर्तृत्वं तस्य परभावानाम् । उक्तं च **अध्यात्मबिन्दौ-**

[11] **स्वत्वेन स्वं परमपि परत्वेन जानन् समस्ता-**
**ऽन्यद्रव्येभ्यो विरमणमितश्चिन्मयत्वं प्रपन्नः ।**
**स्वात्मन्येवाभिरतिमुपयन् स्वात्मशीली स्वदर्शी-**
**त्येवं कर्त्ता कथमपि भवेत् कर्मणो नैष जीवः ॥१।२६॥**

**तथोत्तराध्ययने-**

[12] **न कामभोगा समयं उविंति, न यावि भोगा विगयं उविंति ।**
**जे तप्पओसी य परिग्गही य, सो तेसु मोहा विगइं उवेइ ॥१०१॥**
[अध्य० ३२ गा० १०१]

एवं परद्रव्ये [१]अरमन् (अरममाणः) आत्मा मुच्यते, अत एव सर्वसङ्गपरिहारी, सङ्गो[२] हि मुह्यतानिमित्तम्, मुह्यतात्यागार्थी तन्निमित्तान् (नि) धनस्वजनाङ्गनाभोगभोजनादींस्त्यजति (भोजनादीनि त्यजति) कारणाभावे कार्याभावः, इति भावाश्रवपरिणतिरोधः संयमः, तद्रक्षणाय वृद्ध्यर्थं हिताय आश्रवत्यागो मुनीनाम्, भावना च-यैः परभावा

---
१. अरमदात्मा L.D.1.2. । २. सङ्गो हि मुच्यताम्, निमित्तमुज्झ्यताम् । त्यागार्थी L.D.1.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभोग्या अग्राह्याः कृताः, ते कथं तत्र रमन्ते ? ॥३॥

**पश्यन्नेव परद्रव्य–नाटकं प्रतिपाटकम् ।**
**भवचक्रपुर:स्थोऽपि, नामूढः परिखिद्यति ॥४॥**

पश्यन्नेवेति– स्वरूपाच्युत[1]स्वधर्मैकत्वे अमूढः–तत्त्वज्ञानी, स्वरूप-साधनोद्यतः, प्रतिपाटकम्-एकेन्द्रिय-विकलेन्द्रिय-पञ्चेन्द्रिय-रूपपाटके नरतिर्यग्देवनरकलक्षणे सर्वस्थाने, परद्रव्यनाटकं-जन्म-जरा-मरणादिरूपं संस्थाननिर्माणवर्णादिभेदविचित्रम्, पश्यन्नेव न परिखिद्यति-न खेदवान् भवति । जानाति च पुद्गलकर्मविपाकजा चित्रता न मत्स्वरूपम्, भ्रान्तानां भवत्येव, न तत्त्वपूर्णानाम् । कथंभूतः अमूढः? भवचक्रपुर-स्थोऽपि, अनादिस्वकृतकर्मपरिणामनृपराजधानीचतुर्गतिरूपचक्रक्रोड-गतोऽपि, आत्मानं भिन्नं जानन् न खिद्यते[2], परस्मैपदं तु काव्ये प्रयुक्तत्वात् "खिद्यति काव्ये जडो" इति पाठदर्शनात्, इत्यनेन कर्मविपाकचित्रतां भुञ्जन्नपि अखिन्नस्तिष्ठति, कर्तृत्वकाले न अरत्यना-दरौ तर्हि भोगकाले को द्वेषः ? उदयागतभोगकाले इष्टानिष्टतापरिणतिः एव अभिनवकर्महेतुः, अतोऽव्यापकतया भवितव्यम्, शुभोदयोऽपि आवरणम्, अशुभोदयोऽप्यावरणम्, गुणावरणत्वेन तुल्यत्वात् । का इष्टानिष्टता ? ॥४॥

**विकल्पचषकैरात्मा, पीतमोहासवो ह्ययम् ।**
**भवोच्चतालमुत्तालप्रपञ्चमधितिष्ठति ॥ ५ ॥**

विकल्पेति–विकल्पाश्चित्तकल्लोला एव चषकाः-मद्यपानपात्राणि तैः, हि इति निश्चितम्, अयं-जीवः पीतः मोह एव आसवो-मादकरसो येन सः पीतमोहासवः पुरुषः, भवोच्चतालं-भवः-संसारः स एव उच्चतालं-मद्यपगोष्ठीक्षेत्रं प्रति उत्तालं-पुनः पुनः उच्चस्वरेण ताला-दानरूपं प्रपञ्चं-विस्तारम् अधितिष्ठति-प्राप्नोति इत्यनेन मोही जीवः, मदिरामत्तवत् चापल्यं वैकल्यं करोति, परं स्वत्वेन स्वं च परत्वेन कलयन्, आत्मानमकार्यनिष्पादनपटिष्ठं प्रवर्त्तयन्, स्वस्थानभ्रष्टः भ्रमति, अत एव मोहत्यागः श्रेयान्[3] ॥५॥

१. ०च्युति L.D.1. । २. खिद्यति L.D.1. । ३. श्रेयः S.M. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**निर्मलस्फटिकस्येव, सहजं रूपमात्मनः ।**
**अध्यस्तोपाधिसम्बन्धो, जडस्तत्र विमुह्यति ॥६॥**

[१]निर्मल इति, – निर्मलस्फटिकस्य निर्दोषनिरावरणनिस्संग-स्फटिकस्य इव आत्मनः-ज्ञायकद्रव्यस्य सहजं-स्वाभाविकं शुद्धं रूप-मस्तीत्यनेन वस्तुवृत्त्या आत्मा स्फटिकवत् निर्मल एव-निस्सङ्ग एव, संग्रहनयेन आत्मा परोपाधिसङ्गी एव नास्ति, परमज्ञायकचिदानन्दरूपः अध्यास्तोपाधिसम्बन्धः [२]प्राप्तपुद्गलसंसर्गजकर्मोपाधिसम्बन्धः, अनेक-ग्लानम्लानावस्थः जडः वस्तुस्वरूपापरिज्ञानी तत्र उपाधिभावे मुह्यति-एकत्वं प्राप्नोति, यथा-मूर्खः श्यामनीलपीतादिपुष्पसंयोगात् स्फटिका-भेदरीत्या नीलपीतस्वभावं जानाति तथा वस्तुस्वरूपावबोधविकलो जीवो मिथ्यात्वाऽविरतिकषाययोगनिमित्ताद् बद्धैकेन्द्रियादिनामकर्मोदयाद् एके-न्द्रियादिभावमापन्नमेकेन्द्रियादिरूप[३]मेव मन्यते, एकेन्द्रियोऽहम्, विकलो-ऽहं पञ्चेन्द्रियोऽहम् इति जानाति, परं शुद्धं स्वीयं सच्चिदानन्दरूपं निर्मलं स्वरूपं नावबुद्ध्यतीति मूर्खतापरिणतिः । पुनः[४] तत्त्वज्ञः खानिस्थवज्रं समलं सावरणं समृदपि रत्नपरीक्षकवत् वज्रत्वेन अवधारयति, एवं ज्ञानावरणाद्यावृतम्[५] अतदाकारं ज्ञानज्योतिःप्रकाश-विकलमपि आत्मानं पूर्णानन्दं सहजाप्रयासानन्दसंदोहं सर्वज्ञं सर्वतत्त्व-स्वरूपाभिन्नमात्मानं सम्यग्ज्ञानबलेन निर्धारय[६]तीति, इत्यनेन आत्मा शुद्ध एव श्रद्धेयः, उपाधिदोषस्तु सन्नपि तादात्म्याऽभावात् संसर्गजत्वात् भिन्न एव निर्धार्य इति ॥६॥

[७]मोही जीवः परवस्तु आत्मत्वेन जानन् आरोपजं सुखं सुखत्वेन अनुभवति, भेदज्ञानी तु आरोपजं सुखं दुःखमेवेति निरा[८]वरणाय यतते तदुपदिशन्नाह–

---

१. निर्मलमिति S.M., B.1. । २. कल्पित० S.M. । ३. रूप एव V.1., B.2. । ४. एष पाठोऽस्ति L.D.1. । ५. द्यावरितं B.1.2., V.1.2. । ६. निर्धारयति इत्य० L.D.2. । ७. मोहात् L.D.1. । ८. निवारणाय L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनारोपसुखं मोह-त्यागादनुभवन्नपि ।**
**आरोपप्रियलोकेषु, वक्तुमाश्चर्यवान् भवेत् ॥७॥**

अनारोपेति- अनारोपजं-सहजं सुखं स्वगुणज्ञाननिर्द्धारप्राग्भावरूपं सुखम्, मोहत्यागात्-मोहक्षयोपशमात्, अनुभवन्नपि-भुञ्जन्नपि, आरोपः मिथ्योपचारः प्रियः येषां ते आरोपप्रियाः, आरोपप्रियाश्च ते लोकाश्च आरोपप्रियलोकाः, तेषु आरोपसुखं वक्तुमाश्चर्यवान् भवेत् ? अत्र काकूक्तिः, अपि तु न भवेत्, येन आरोपजं सुखं प्राप्तम्, स आरोपजसुखे आश्चर्यवान् चमत्कारवान् भवति । अथवा अनारोपसुखानुभवी आरोपप्रियलोकेषु अग्रे आरोपजं सुखं सुखमिति वक्तुमपि आश्चर्यवान् भवति, वक्तुं न समर्थो भवति, सुखाभावात् सुखकारणाभावात्, तच्च वस्तुवृत्त्या दुःखरूपे सुखमिति लोकार्थमुक्तेऽपि स्वयमाश्चर्यवान् भवेत्, किमुक्तमिदं [१]मया ? नेदं सुखमतः परमसम्भवे सुखे सुखाभासः निवारणीयः मोहमूलत्वात्, पौद्गलिके सुखे सुखभ्रान्तिरेव अभ्यन्तरं मिथ्यात्वमिति ॥७॥

**यश्चिद्दर्पणविन्यस्त-समस्ताचारचारुधीः ।**
**क्व नाम स परद्रव्येऽनुपयोगिनि मुह्यति ? ॥८॥**

॥ इति मोहत्यागाष्टकम् ॥ ४ ॥

यश्चिद्दर्पण इति- यः—पुरुषः आगमानुगताशयः-चिद्-ज्ञानं सर्वपदार्थपरिच्छेदकम्, तदेव दर्पणम्-आदर्शः तेन (तस्मिन्) विन्यस्ताः स्थापिताः समस्ता ज्ञानाद्याचाराः तेन(येन) (तैः) चारुर्मनोहरा धीर्बुद्धिर्यस्य सः-पुरुषः, नाम इति कोमलामन्त्रणे, परद्रव्ये-पुद्गलादौ, अनुपयोगिनि-अकिञ्चित्करे, केनापि (कस्मिन्नपि) [२]कार्ये ग्रहीतुमयोग्ये क्व मुह्यति ? इत्यर्थः, यः ज्ञानादिपञ्चाचारेण संस्कारितोपयोगी आत्मानन्दं ज्ञानदर्पणे पश्यन् परद्रव्ये कथं मुह्यति ? नैवेति । तत्त्वज्ञानविकलानामनादिमिथ्यात्वाऽसंयमवतां स्वरूपानुभवशून्यानामेव परद्रव्यानुभवः । तत्र सुखभ्रान्तिरूपो मोहः । स्वभावधर्मनिर्द्धार-भासन-रमणानुभवसुखास्वाद-

१. मयानन्द० V.2. । २. कार्येण L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीनानां न मोहः । अतः आत्मस्वरूपैकत्वमेव मोहत्यागोपायः, अत एव अनादिभ्रान्तिमपहाय आत्मानुभवरसिकतया भवनीयम् । आत्मस्वरूप-श्रद्धान-भासन-रमणानुभवो यमवता स्थातव्यमिति तत्त्वम् । आगम-श्रवणकुसङ्गत्यागात् तत्त्वरुचितत्त्वज्ञानबलेन संयोगजं सर्वमनित्यमशरणं संसारहेतुः। आत्मा एकः सर्वपदार्थान्तरमात्मव्यतिरिक्तं परस्पर्श एवाशुचिः। परानुयायिता एव आश्रवाः, स्वरूपानुगमनं संवरः, उदीर्णके अमग्नता इत्यादि परिणत्या मोहत्यागो विधेयः ॥ ८ ॥

**॥ इति मोहत्यागाष्टकं व्याख्यातम् ॥४॥**

## ॥ अथ पञ्चमं ज्ञानाष्टकम् ॥

मोहत्यागश्च ज्ञानाद् भवति, अतः ज्ञानाष्टकं लिख्यते । तत्र ज्ञानलक्षणं व्यवहाराव्यभिचाररूपं सर्वपदार्थावबोधरूपं सामान्य-विशेषात्मनि पदार्थजाते विशेषावबोधलक्षणं ज्ञानम्, ज्ञायतेऽनेनेति ज्ञानम् । उक्तं च **उत्तराध्ययने**-

**[13] एयं पंचविहं नाणं, दव्वाण य गुणाण य ।**
**पज्जवाणं च सव्वेसिं, नाणं नाणीहिं देसियं ॥ ५ ॥**

[अध्य० २८ गा०५]

इति । आत्मनः विशेषलक्षणम् । नामज्ञानं शब्दालापरूपम् । स्थापनाज्ञानं सिद्धचक्रादौ स्थापितम् । द्रव्यज्ञानम् आगमतो ज्ञानपदाव-बोधी अनुपयुक्तः । नोआगमतो **[14] द्रव्यज्ञानम् अनुपयुक्तावस्था इति तत्त्वार्थे** [अ०१, सू०५] । तथा द्रव्यज्ञानं पुस्तकन्यस्तम् । अथवा वाचना-प्रच्छना-परिवर्त्तना-धर्मकथानुप्रेक्षादीनां द्रव्यज्ञानम्, भावज्ञान-मुपयोगपरिणतिः । मत्यादिप्रकारं स्वपरविवेचकं परिच्छेदावलोक-नाभासनादिपर्यायम्, तत्र नैगमेन ज्ञानं भाषादिस्कन्धः ज्ञानम् । सङ्ग्रहेण सर्वजीवा(व)ज्ञानमभेदोपचारात्, व्यवहारेण पुस्तकादिज्ञानम्, ऋजुसूत्रेण तत्परिणामसङ्कल्परूपं ज्ञानम्, अथवा-ज्ञानहेतुवीर्यं नैगमेन, सङ्ग्रहेण आत्मा, व्यवहारेण क्षयोपशमीभूतज्ञानाविभागप्रवृत्तिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋजुसूत्रेण वर्त्तमानबोधः यथार्थायथार्थरूपमुभयज्ञानम्, शब्दनयेन सम्यग्दर्शनपूर्वकयथार्थावबोधलक्षणं कारणकार्यसापेक्षं ज्ञानं स्वपर-प्रकाशं[१] स्याद्वादोपेतमर्पितानर्पितादियुक्तं सम्यग्ज्ञानं ज्ञानम्, समभिरूढ-नयेन सकलज्ञानवचनपर्यायशक्तिप्रवृत्तिरूपम्, एवंभूतनयेन मत्यादीनां स्वस्वरूपपूर्णे एवंभूतता वस्तुतः केवलं ज्ञानम् एवंभूतज्ञानम्, अत्र मिथ्यादर्शनेऽपि विपर्यासोपेतं ज्ञानं कुज्ञानम्, तन्न मोहत्यागहेतुः, अतः सम्यग्दर्शनपूर्वकस्वस्वरूपोपादेयपरभावहेयोपयोगलक्षणं सम्यग्ज्ञानं गृहीतम्, तस्यैव संसारौदासीन्यहेतुत्वात् उक्तं च–

**तज्ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः ।**
**तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ? ॥१॥**

अतः ज्ञानं तत्त्वावबोधरूपम्, आत्मनः स्वस्वभावाविष्करणहेतुः, मोक्षमार्गस्य मूलम् '**ज्ञानक्रियाभ्यां मोक्षः**' **[15] पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए** । [ दशवै०अ०४, गा०१०] एवं स्वरूपम् । अत्रानुप्रेक्षायुक्तस्पर्शज्ञानस्यावसरस्तद् व्याख्यायते–

**मज्जत्यज्ञः किलाज्ञाने, विष्ठायामिव शूकरः ।**
**ज्ञानी निमज्जति ज्ञाने, मराल इव मानसे ॥१॥**

मज्जत्यज्ञ इति–अज्ञः-स्वभावविभावाविवेचकः, किल इति सत्ये, अज्ञाने-अयथार्थोपयोगे, मज्जति-मग्नो भवति, यथार्थावबोधविकलः अयथार्थे लीनो भवति, कमिव (क इव ?) विष्ठायां शूकरः इव, यथा शूकरः विष्ठायां मज्जति तथाऽज्ञोऽभोग्ये आत्मगुणावरणकारणे परवस्तुनि सातादिविपाके इन्द्रियविषये मज्जति । ज्ञानी–यथार्थावबोधी, ज्ञाने-तत्त्वावबोधे आत्मस्वरूपे निमज्जति-तन्मयो भवति । आत्म-स्वरूपावबोधानुभवलीनाः शब्दादिविषयान् मनोज्ञानिन्द्रादिविस्मय-हेतूंस्तृणयन्ति, रमन्ते स्वरूपे, भीष्मग्रीष्मतापतप्तशिलातलस्थाः अपि शीतलाः, अत्यन्तहिमे अकम्पा ध्यायन्ति स्वतत्त्वम्, जगद्विक्षोभ-

१. प्रकाशकम्- A.D. L.D.1.3. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनाक्षोभक्षुब्धाः(?) चिन्तयन्ति स्वगुणपर्यायान्, शक्रस्पर्द्धिचक्रिलीलां त्यजन्ति, किं बहुना ? आत्मानन्दावबोधरसिकानामन्यद् दुष्टम्, यथार्थ-सम्पूर्णप्रत्यक्षात्मबोधरसिकाः तितिक्षन्ति परीषहान्, प्रारम्भयन्ति श्रेणिम्, तन्वन्ति स्वरूपैकत्वरूपं ध्यानम्, अतः ज्ञानास्वादिन एव धन्याः । उक्तं च **संवेगरङ्गशालायाम्ः**—

**ते धन्ना सुकयत्था, जेसिं नियतत्तबोहरुइ जाया ।**
**जे तत्तबोहभोई, ते पुज्जा सव्वभव्वाणं ॥१॥**

**जेसिं निम्मलनाणं, जायं तत्तं सहावभोगित्तं ।**
**ते परमा तत्तसुही, तेसिं नामं पि सुद्धयरं ॥२॥**

तेषां जन्म जीवितं सफलम्, ये स्वतत्त्वबोधरसिका इति, अतो ज्ञानी ज्ञाने मज्जति, यथा मरालः-हंसः मानसे मज्जति तथा इति ॥१॥

**निर्वाणपदमप्येकम्, भाव्यते यन्मुहुर्मुहुः ।**
**तदेव ज्ञानमुत्कृष्टम्, निर्बन्धो नास्ति भूयसा ॥२॥**

निर्वाणपदमिति— निर्वाणपदं-निष्कर्मताहेतुपदम्, एकमपि स्याद्वादसापेक्षम्, मुहुर्मुहुः-वारंवारं भाव्यते-आत्मतन्मयतया क्रियते, वाचना-प्रच्छना-परावर्त्तना-ऽनुप्रेक्षा-धर्मचिन्तन-परिशीलन-निदि-ध्यासन-ध्यानतया करणं कर्तृत्वं कार्यत्वं कारणत्वम् आधारत्वम् आस्वादनं विश्रामः स्वरूपैकत्वम् । तदेवोत्कृष्टं ज्ञानं येनाऽऽत्मा स्वरूपलीनो भवति अनाद्यनास्वादितात्मसुखमनुभवति । तत् पदमप्यभ्यस्यम् । शेषेण वाग्विस्ताररूपेण भूयसाऽपि वेदनज्ञानेन न निर्बन्धः । किं बहुतरेण जल्पज्ञानेन ? भावनाज्ञानं स्वल्पमप्यमृतकल्पम् अनादिकर्मरोगापगमक्षममिति ॥२॥

**स्वभावलाभसंस्कार-स्मरणं (कारणं)★ ज्ञानमिष्यते ।**
**ध्यान्ध्यमात्रमतस्त्वन्यत् तथा चोक्तं महात्मना ॥३॥**

---

★स्मरणं-A.D.,L.D.1. । टीकायां-स्मरणम् इति पदं व्याख्यातम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावलाभेति- स्वभावः-ज्ञानाद्यनन्तगुणपर्यायरूपः, तस्य लाभः प्राप्तिः, संस्कारः-वासना, तत्प्राग्भावता[1] वा तस्य स्मरणं सदैव निरन्तरं तदुपयोगिता ज्ञानम् इष्यते अतः तत्त्वलाभतः, अन्यत् सर्वं वाग्विलास-रूपं स्वस्वरूपास्पर्शि[2] बाह्यज्ञानं लौकिकलोकोत्तरागमविकल्परूपं सर्वं ध्यान्ध्यमात्रं-[3]व्याक्षेपरूपम्, यदात्म[4]परविभजनाऽऽत्मैकत्वपरपरित्यागाय न भवति तत्सर्वं विलापरूपमरण्ये । तथा च **हरिभद्रपूज्यैः—**

**अकुत्थासंयतं नाणं, सुअपाढउव्व विन्नेयं ।**

**अनुयोगद्वारे-[16]सिक्खितं ठितं जितं मितं जाव गुरुवय-णोवगयं से णं तत्थ वायणाए पुच्छणाए परियट्टणाए धम्मकहाए णो अणुप्पेहाए ता दव्वसुअं ।** [अनु०द्वा०सू०१४]

इति प्राप्तचेत[5]नोक्षयोपशमः संज्ञाचतुष्टये इहलोकाशंसापरलोकाशंसया किं किं नास्ति, यस्तु सकलपुद्गलोद्विग्नः स्वस्वभावार्थी आत्मानं यथार्थावबोधेन जानाति त[6]ज्ज्ञानम्, तत्रोद्यमः कार्यः स्वसाध्यसिद्धये । उक्तं चः—

**आत्माज्ञानभवं दुःखम्, आत्मज्ञानेन हन्यते ।**
**अभ्यस्यं तत् तथा तेन, येन ज्ञानमयो भवेत् ॥१॥**
**स्वल्पज्ञानेन नो शान्तिम्, याति दृप्तात्मनां मनः ।**
**स्तोकवृष्ट्या यथा तप्त—भूमिरूष्मायतेतराम् ॥२॥**

अतः निरतिचारानाशंसि-यथार्थात्मबोधे रसिकतया भवनीयम् तदर्थमेवाङ्गोपाङ्गयोगोपधानाद्यभ्यासः मुनीनाम् । तथा चोक्तवान् महात्मा **पतञ्जलि**प्रमुखः यशोधनपटुश्च **श्रीहरिभद्रगुरुर्योगदृष्टिसमुच्चये** (? **योगबिन्दौ गा० ६७**) ॥३॥

---

१. प्रागभावता S.M., V.2., B.1.2., प्रागभावात् L.D.1. । २. रूपादर्शि V.1.2. । ३. व्याख्येय V.1.2., B.2.,L.D.2., ४. परचित्तजना० B.1.2., V.1.2. A.D. । ५. चिन्तना V.1.2., B.1.2. । ६. ते ज्ञानं. सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वादांश्च प्रतिवादांश्च, वदन्तोऽनिश्चितांस्तथा ।**
**तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद् गतौ ॥४॥**

वादांश्चेति—वादान्-पूर्वपक्षरूपान्, प्रतिवादान्-उत्तरपक्षरूपान्, पर-पराजयस्वजयेच्छया वदन्तः-विवादशुष्कवादादि कुर्वन्तः, तत्त्वान्तं-तत्त्वस्य वस्तुधर्मरूपस्य अन्तं-पारम्, नैव गच्छन्ति-नैव लभन्ते । कथंभूतान् वादान् ? अनिश्चितान्-अनिर्धारितपदार्थस्वरूपान्, वदन्तः तत्त्वप्रान्तं-स्वीयात्यन्तिकाकृत्रिमात्मज्ञानानुभवरूपं नैव लभन्ते । किंवत् ? गतौ-गमने तिलपीलकवत्-तिलपीलकवृषभवत्, भ्रमन् किञ्चित् स्थानान्तरं न लभते, एवं तत्त्वज्ञानानभिलाषी अनेकशास्त्रश्रमं कुर्वन् न तत्त्वानुभवं स्पृशति, अतः यथार्थतत्त्वज्ञानरुचिमत्तया भवनीयम् ॥४॥

**स्वद्रव्यगुणपर्याय-चर्या वर्या पराऽन्यथा ।**
**इति दत्तात्मसन्तुष्टिर्मुष्टिज्ञानस्थितिर्मुनेः ॥ ५ ॥**

स्वद्रव्येति- स्वद्रव्ये-गुणाश्रयलक्षणे शुद्धात्मनि, स्वगुणे-एक-द्रव्याश्रितसहभाव्यनन्तपर्यायोपेतज्ञानदर्शनचारित्रस्वरूपे, स्वपर्याये-उभयाश्रयलक्षणे अर्थव्यञ्जनादिभेदे, चर्या-तन्मयतापरिणतिः तत्र वर्त्तना, वर्या-श्रेष्ठा । स्वद्रव्यगुणपर्याये परिणमनमात्महितम् ।

**आया सहावनाणी, भोई रमई वि वत्थुधम्मंमि ।**
**सो उत्तमो महप्पा, अवरे भवसूयरा[१] जीवा ॥१॥**

[२]परापरद्रव्यगुणपर्यायरमणानुभवलक्षणा परिणतिः अन्यथा कार्या अहिता । परभावपरिणाम एव [३]भ्रमणहेतुः । उक्तं च—

**परसंगेण बंधो, मुक्खो परभावचायणे होई ।**
**सव्वदोसाण मूलं, परभावाणुभवपरिणामो ॥१॥**

अत एव देशविरतसर्वविरताः प्रत्याख्यान्ति परिग्रहादीन्, त्यजन्ति स्वजनपरिजनान्, प्रतिपद्यन्ते एकाकिविहारम्, शृण्वन्ति स्वसत्तागोष्ठिम्,

१. सूयए B.1.2. V.1.2. S.M.। २. पर० S.M. विना । ३. भवभ्र० S.M.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तयन्ति स्वधर्मानन्तताम्, ध्यायन्ति स्वगुणपर्यायपरिणामम्, मग्ना भवन्ति तदनुभवनेन, त्यजन्ति सर्वपरभावानुमोदनामिति एवंप्रकारेण मुनेः-त्रिकालनिर्विषयस्य ज्ञाततत्त्वस्य मुष्टिज्ञानस्थितिः अवस्थानम्, संक्षेपरहस्यज्ञानविश्रामः मर्यादा, कथंभूता स्थितिः ? दत्तात्मसन्तुष्टिः, दत्ता-प्रदत्ता आत्मनः सन्तुष्टिः-सन्तोष इत्यनेन आत्मग्रहणं परपरित्यागः इति मर्यादा निर्ग्रन्थस्य ॥५॥

**अस्ति चेद् ग्रन्थिभिद् ज्ञानम्, किं चित्रैस्तन्त्रयन्त्रणैः ।**
**प्रदीपाः क्वोपयुज्यन्ते ?, तमोघ्नी दृष्टिरेव चेत् ॥६॥**

अस्तीति- चेत्-यदि ग्रन्थिभित्-ग्रन्थिभेदोत्पन्नं विषयप्रतिभास-दलविकलम् आत्मधर्मवेद्यसंवेद्यरूपं ज्ञानं प्रतिभासः अस्ति, तन्त्रयन्त्रणैः चित्रैः-अनेकप्रकारैः परसाधनानिमित्तैः किं ? न किमपि । सम्यग्दर्शन-ज्ञानचारित्रभावपरिणतस्य किं परापेक्षया ? । तत्र दृष्टान्तः । चेत् दृष्टिः-चक्षुः तमोघ्नी-तमः-अन्धकारं तस्य घ्नी-हन्त्री (तद् हन्तीति) प्राप्ता तदा प्रदीपाः क्व उपयुज्यन्ते ? न क्वापि । दृष्टिः सर्वावलोकनक्षमा तर्हि सहायभूतदीपस्य किं प्रयोजनम् ? अत्र ग्रन्थिभेदस्वरूपम्-तत्र पञ्चे-न्द्रियत्व-संज्ञित्व-पर्याप्तत्वरूपाभिस्तिसृभिः लब्धिभिः युक्तः, अथवा उपशमलब्धिः उपदेशश्रवणलब्धिः करणत्रयहेतुप्रकृष्टयोगलब्धित्रिकयुक्तः, करणकालात्पूर्वमपि अन्तर्मुहूर्तकालं यावत् प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या विशुध्यमाना अवदातायमाना चित्तसन्ततिः ग्रन्थिकसत्त्वाना मभव्यसिद्धिकानां या विशोधिः तामतिक्रम्य वर्त्तमानः, ततो-ऽनन्तगुणविशुद्धः, अन्यतरस्मिन्-मतिश्रुतविभङ्गान्यतमस्मिन् साकारोप-योगे योगे चान्यतमस्मिन् वर्त्तमानः, तिसृणां विशुद्धानां लेश्याना-मन्यतमस्यां लेश्यायां वर्त्तमानो, जघन्यतस्तेजोलेश्यायां मध्यमपरिणामेन पद्मलेश्यायामुत्कृष्टपरिणामेन शुक्ललेश्यायाम्, तथा पूर्वजानां सप्तानां कर्मणां स्थितिमन्तःसागरोपमकोटीकोटीप्रमाणं कृत्वा अशुभानां कर्मणामनुभागं चतुःस्थानकं सन्तं द्विस्थानकं करोति, शुभानां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणां द्विस्थानकं सन्तं चतुःस्थानकं करोति, तथा ध्रुवप्रकृतिः सप्तचत्वारिंशत्सङ्ख्यया बध्नन् परावर्त्तमानाः स्वस्वभवप्रायोग्याः प्रकृतीः शुभा एव बध्नाति, ता अप्यायुर्वर्ज्जाः । अतीव विशुद्धपरिणामो हि नायुर्बन्धमारभते, यदुत तिर्यङ्मनुष्यो वा प्रथमं सम्यक्त्वमुत्पादयन् देवगतिप्रायोग्याः शुभाः प्रकृतीः बध्नाति, देवो नैरयिको वा प्रथमं सम्यक्त्वमुत्पादयन् मनुजगतिप्रायोग्याः शुभाः प्रकृतीः बध्नाति, सप्तमनरकनारकस्तिर्यग्द्विकं नीचैर्गोत्रं बध्नाति, भवप्रायोग्यात् बध्यमानस्थितिमन्तःसागरकोटाकोटिं बध्नाति, नाधिकाम्, योगवशात्, प्रदेशाग्रमुत्कृष्टजघन्यमध्यमं च बध्नाति, स्थितिबन्धे पूर्णे सत्यन्यं स्थितिबन्धं प्राक्तनस्थितिबन्धापेक्षया पल्योपमासङ्ख्येयभागन्यूनं करोति, ततोऽन्यं पल्योपमासङ्ख्येयभागं न्यूनं करोति, अतः अन्यं स्थितिबन्धं पूर्वपूर्वापेक्षया पल्योपमासङ्ख्येयभागन्यूनं[१] करोति, अशुभानां च प्रकृतीनां बध्यमानानामनुभागं द्विस्थानकं बध्नाति, तमपि प्रतिसमयमनन्तगुणहीनम्, शुभानां च चतुःस्थानकम्, प्रतिसमयमनन्तगुणवृद्धिं कुर्वन् करणं यथाप्रवृत्तं करोति, ततोऽपूर्वकरणम्, ततः अनिवृत्तिकरणमिति, करणं परिणामविशेषः । एतानि च त्रीण्यपि करणानि प्रत्येकमन्तर्मुहूर्त्तकानि ततः उपशान्ताद्धा लभते, सापि चान्तमुर्हूतिकी । यथाप्रवृत्तिकरणं चः—

**[17] अणुसमयं वड्ढंतो, अज्झवसाणाणंतगुणणाए ।**
**परिणामहीणाणं, दोसु वि लोगा असंखिज्जा ॥९॥**
(कर्मप्र० उप० क० गा० ९)

इति **कर्मप्रकृतौ**, प्रतिसमयमध्यवसानानामनन्तगुणतया विशुद्ध्या वर्द्धमानानां करणसमाप्ति यावद् वर्द्धते । तानि कियन्ति अध्यवसानानि भवन्ति ? द्वयोरपि यथाप्रवृत्तापूर्वकरणयोः परिणामाः स्थानानामनुसमयं लोकासङ्ख्येया भवन्ति यथाप्रवृत्तकरणे अपूर्वकरणे च प्रतिसमये–

१. भाग्यन्यूनं B.1.2. V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽसङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणानि अध्यवसायस्थानानि भवन्ति, तथाहि—यथाप्रवृत्तकरणे प्रथमसमये विशोधिस्थानानि नानाजीवापेक्षया असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि, द्वितीयसमये विशेषाधिकानि, ततोऽपि तृतीयसमये विशेषाधिकानि, एवं यावच्चरमसमये, एवमपूर्वकरणेऽपि द्रष्टव्यम् । अमूनि चाध्यवसायस्थानानि यथाप्रवृत्ताऽपूर्वकरणयोः सम्बन्धीनि स्थाप्यमानानि विषमचतुरस्रक्षेत्रमावृण्वन्ति, तयोरुपरि चानिवृत्तिकरणाध्यवसायानि मुक्तावलीसंस्थानि उपर्युपर्यमूनि अनुचिन्त्यमानानि प्रतिसमयमनन्तगुणवृद्ध्या प्रवर्त्तमानान्यवगन्तव्यानि तिर्यक्षट्स्थानपतितानि । इह कल्पनया द्वौ पुरुषौ युगपत्करणप्रतिपन्नौ विवक्ष्येते, तत्रैकः सर्वजघन्यया श्रेण्या प्रतिपन्नः, अपरः सर्वोत्कृष्टया विशोध्या । प्रथमजीवस्य प्रथमसमये मन्दा, द्वितीयसमयेऽनन्तगुणा, तृतीयेऽनन्तगुणा एवं यावत् येषां यथाप्रवृत्तकरणस्य सङ्ख्येयो भागो गतो भवति, ततः प्रथमसमये द्वितीयस्य जीवस्योत्कृष्टं विशोधिस्थानमनन्तगुणं वक्तव्यम्, ततोऽपि द्वितीये उत्कृष्टा विशोधिरनन्तगुणा, ततः उपरि जघन्यविशोधिः अनन्तगुणा, एवमुपर्यधश्च एकैकं विशोधिस्थानमनन्तगुणं द्वयोर्जीवयोस्तावन्नेयं यावच्चरमसमये जघन्यविशोधिस्ततः आचरमात् चरममभिव्याप्य यानि आमुक्तानि शेषाण्युत्कृष्टानि स्थानानि तानि क्रमेण निरन्तरमनन्तगुणानि वक्तव्यानि, तदेवं समाप्तं यथाप्रवृत्तकरणम् । अस्य च यथाप्रवृत्तकरणस्य पूर्वप्रवृत्तमिति द्वितीयं नाम । शेषकरणाभ्यां पूर्वं-प्रथमं प्रवृत्तं पूर्वप्रवृत्तमिति । अस्मिंश्च यथाप्रवृत्तकरणे स्थितिघातरसघातौ गुणश्रेणिर्वा न प्रवर्त्तन्ते केवलमुक्तरूपा विशोधिरेवानन्तगुणा । यानि वाऽप्रशस्तानि कर्माण्यत्र स्थितो बध्नाति तेषामनुभागं द्विस्थानकं बध्नाति, यानि च शुभानि तेषां चतुःस्थानकम्, स्थितिबन्धेऽपि च पूर्णे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसङ्ख्येयभागन्यूनं च बध्नाति । सम्प्रति अपूर्वकरणमभिधीयते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[18] ("मंदविसोही पढमस्स, संखभागाहि पढमसमयम्मि ।**
**उक्कस्सं उप्पिमहो, एक्केक्कं दोण्हं जीवाणं ॥१०॥**
**आचरमाओ सेसुक्कोसं, पुव्वप्पवत्तमिइनामं ।)**
**बीयस्स बीयसमये, जहण्णमवि अणंतरुक्कस्सा" ॥ ११ ॥**

[कर्मप्र०-उप०क० गा० १०-११]

इत्यादिवचनात् । द्वितीयस्य अपूर्वकरणस्य यो द्वितीयः समयः कृत-जघन्यमपि विशोधिस्थानादनन्तगुणं वक्तव्यम् । एतदुक्तं भवति-नेह यथाप्रवृत्तकरणवत् प्रथमतो निरन्तरं विशोधिस्थानमनन्तगुणं वक्तव्यम्, किन्तु प्रथमसमये प्रथमतो जघन्या विशोधिः सर्वस्तोका, सापि च यथाप्रवृत्तकरणचरमसमयभाविन उत्कृष्टा विशोधिरनन्तगुणा, ततोऽपि तस्मिन्नेव द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा, एवं प्रतिसमये तावद्वाच्यं यावच्चरमसमये उत्कृष्टा विशोधिः । अपूर्वाणि करणानि स्थितिघात-रसघात-गुणश्रेणि-स्थितिबन्धादीनां निवर्त्तनानि यस्मिन् तत् अपूर्वकरणम् । तथाहि—अपूर्वकरणे प्रविशन् प्रथमसमय एव स्थितिघातं रसघातं गुणश्रेणिं स्थितिबन्धं चान्यं युगपदारभते । तत्र स्थितिघातः स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षतः उदधिपृथक्त्वप्रमाणम्, जघन्येन पुनः पल्योपमसङ्ख्येयभागमात्रं स्थितिकण्डकमुत्किरति उत्कीर्य च या स्थितिः अधो न खण्डयिष्यति (ते) तत्र तद्दलिकं प्रक्षिपति, अन्तर्मुहूर्तेन कालेन तत् स्थितिकण्डकमुत्कीर्यते । एवं द्वितीयम्, एवं तृतीयम्, एवं प्रभूतानि स्थितिखण्डसहस्राणि व्यतिक्रामन्ति, तथा च सति यदपूर्व-करणस्य प्रथमसमये स्थितिसत्कर्म आसीत् तत्तस्यैव चरमसमये सङ्ख्येयगुणहीनं जातम् । रसघाते तु अशुभानां प्रकृतीनां यदनुभाग-सत्कर्म तस्य अनन्ततमं भागं मुक्त्वा शेषाननन्तानुभागभागा-दन्तिमवृत्तेन विनाशयति, ततः पुनरपि तस्य प्रागुक्तस्यानन्ततमं भागं शेषान् विनाशनम् (विनाशयति) । एवमनेकान्यनुभागखण्डसहस्राणि एकस्मिन् स्थितिखण्डे व्यतिक्रामन्ति, तेषां च स्थितिखण्डानां सहस्रैः द्वितीयमपूर्वकरणं परिसमाप्यते । स्थितिबन्धाद्धा तु अपूर्वकरणस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमसमये अन्य एवापूर्वपल्योपमसंख्येयभागहीनस्थितिबन्धः आरभ्यते। जीर्णस्थितिघात-स्थितिबन्धौ तु युगपदेवारभ्येते युगपदेव निष्ठां यातः । गुणश्रेणिस्तु-

**[19] गुणसेढीनिक्खेवो, समए समए असंखगुणणाए ।**
**अद्धादुगाइरित्तो, सेसे सेसे य निक्खेवो ॥१५॥**

[कर्मप्र०-उप०क० गा० १५]

भावना च घात्यस्थितिखण्डमध्याद्दलिकं गृहीत्वा उदयसमयात् प्रतिसमयमसंख्येयगुणतया निक्षिपति प्रथमसमये स्तोकम्, द्वितीयसमये असंख्येयगुणम्, तृतीयसमये असंख्येयगुणम्, एवं यावच्चरमसमयः । एष प्रथमसमयगृहीतदलिकनिक्षेपविधिः, एवं द्वितीयादिसमयगृहीतानामपि, इत्यनेन प्रथमसमये स्तोकः, द्वितीयसमये असंख्येयगुणः, तृतीयसमये असंख्येयगुणः, गुणश्रेणिदलिकनिक्षेपो भवति । इति अपूर्वकरणस्वरूपम् । अनिवृत्तिकरणे एतदुक्तं भवति-अनिवृत्तिकरणस्य प्रथमसमये ये वर्तन्ते ये च वृत्ताः ये च वर्तिष्यन्ते तेषां सर्वेषामपि समाना एकरूपा विशोधिः, द्वितीयसमयेऽपि ये वर्तन्ते ये च वृत्ताः ये च वर्तिष्यन्ते तेषामपि समा विशोधिः एवं सर्वेष्वपि समयेषु, नवरं-पूर्वतः उपरितने अनन्तगुणाधिका विशोधिः । चरमसमयं यावत्, अस्मिन् करणे प्रविष्टानां[१] तुल्यकालानामसुमतां परस्परमध्यवसानानां[२] या निवृत्तिर्व्यावृत्तिः सा न विद्यते इत्यनिवृत्तिकरणम् । अनिवृत्तिकरणे यावन्तः समयास्तावन्ति अध्यवसायस्थानानि पूर्वस्मात् पूर्वस्मात् अनन्तगुणवृद्धानि भवन्ति अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिंश्च भागे संख्येयतमे शेषे तिष्ठति अन्तर्मुहूर्तमात्रमधो मुक्त्वा मिथ्यात्वस्यान्तरकरणं करोति । अन्तरकरणकालश्चान्तर्मुहूर्तप्रमाणः । अन्तरकरणे च क्रियमाणे गुणश्रेणेः संख्येयतमं भागमुत्किरति, उत्कीर्यमाणं च दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति एवमुदीरणा आगालबलेन मिथ्यात्वोदयं निवार्य औपशमिकसम्यक्त्वं लभते । उक्तं च—

१. प्रतिष्ठानां B.1.2.,V.2 । २. सानानि V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[20] मिच्छत्तुदये खीणे, लहइ सम्मत्तमोवसमियं सो ।**
**लंभेण जस्स लब्भइ, आयहियं अलद्धपुव्वं जं ॥१८॥**

[कर्मप्र०-उप०क० गा० १८]

मिथ्यात्वस्योदये क्षीणे सति स जीव उक्तेन प्रकारेण औपशमिकं सम्यक्त्वं लभते । यस्य सम्यक्त्वस्य लाभेन [1]यदात्महितमलब्ध-पूर्वमर्हदादितत्त्वप्रतिपत्त्यादि तल्लभ्यते । तथाहि- सम्यक्त्वलाभे सति (यथा) जात्यन्धस्य पुंसः चक्षुर्लाभे सति एवं जन्तोः यथावस्थितवस्तु-तत्त्वावलोको भवति, महाव्याध्यभिभूतस्य व्याध्यपगमे इव महांश्च प्रमोदः । अत्र अनिवृत्तिकरणे क्रियमाणे यदि पुञ्जत्रयं करोति तदा प्रथमं क्षयोपशमं सम्यक्त्वं लभते अकृतत्रिपुञ्जः प्रथममुपशमसम्यक्त्वं लभते इति सिद्धान्ताशयः । **कर्मग्रन्थ**मते तु प्रथमम् उपशममेव लभते अयं च त्रिपुञ्जीकरण उपशमे करोति इति ग्रन्थिभिद् ज्ञानं तत्त्वोपयोगलक्षणं तस्य अन्यविकल्पैः किम् ॥६॥

**मिथ्यात्वशैलपक्षच्छिद्–ज्ञानदम्भोलिशोभितः ।**
**निर्भयः शक्रवद् योगी, नन्दत्यानन्दनन्दने ॥ ७ ॥**

मिथ्यात्वेति- योगी रत्नत्रयरूपमोक्षोपायी (कीदृशः ? निर्भयः-भयरहितः) आनन्दनन्दने-आनन्दः-आत्मानन्दः तदेव (स एव) नन्दनम् आनन्दनन्दनम्, तस्मिन् आनन्दनन्दने, नन्दति-क्रीडां करोति, किंवत् ? शक्रवत्-इन्द्रवत् । कथंभूतः योगी ? मिथ्यात्वशैलपक्षच्छिद्ज्ञानदम्भो-लिशोभितः-मिथ्यात्वं-विपर्यासरूपम्, तदेव शैलः-पर्वतः तस्य पक्षच्छेदनकृत् यद् ज्ञानं तदेव दम्भोलिः तेन शोभितः, इत्यनेन मिथ्यात्वभेदकज्ञानवज्रान्वितः सम्यग्दर्शनज्ञानचारित्रपरिणतः योगी आनन्दनन्दने नन्दति शुद्धात्मानन्दे नन्दति ॥७॥

**पीयूषमसमुद्रोत्थं, रसायनमनौषधम् ।**
**अनन्यापेक्षमैश्वर्यम्, ज्ञानमाहुर्मनीषिणः ॥८॥**

॥ इति ज्ञानाष्टकम् ॥ ५ ॥

---

१. यावदात्म० V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पीयूष इति- असमुद्रोत्थं पीयूषममृतम्, अनौषधम्-औषधरहितं रसायनं-जरामरणनिवारकम्, अनन्यापेक्षम्- अन्यत्-[१]परवस्तु तस्य अपेक्षया रहितम्, ऐश्वर्यम्-आश्चर्यमिति पाठे-आश्चर्यं-चमत्कारम् ज्ञानम्, स्वपरावभासनलक्षणम् आहुः मनीषिणः-पण्डिताः । इत्यनेन वस्तुतः मरणवा[२]रकं सर्वरोगमुक्तिहेतु रसायनं ज्ञानं वस्तुतः अवलोकनचमत्कारि ज्ञानम्, इत्येवमात्मज्ञानं परममुपादेयं ज्ञानं यथावबोधपरभावत्यागलक्षणं स्मृतम् । इत्यनेन अनादिपरभावपरिणतस्य मिथ्यात्वाज्ञानासंयममोहितस्य परभावोत्पन्नात्मरोधकपरिणतिं तत्त्वत्वेनाङ्गीकुर्वन् परभावमोहितः भ्रमति सूक्ष्मनिगोदादिचतुर्दशसु जीवस्थानेषु । स च तत्त्वज्ञानामृतपरिणतः आत्मा मिथ्यात्वादिदोषान् विहाय सम्यग्दर्शनज्ञानचारित्रकोटिमारूढः स्वरूपावभासनानन्दी सर्वदोषरहितो भवति, अत एवामृतं रसायनं ज्ञानम् तदर्थम् एवोद्यमः कार्यः ॥८॥

## ॥ इति व्याख्यातं ज्ञानाष्टकम् ॥ ५ ॥

## [३]अथ पञ्चमज्ञानाष्टककथनानन्तरं षष्ठं शमाष्टकं प्रारभ्यते-

ज्ञानी हि ज्ञानात् क्रोधादिभ्य उपशमति (उपशाम्यति), अतः शमाष्टकं विस्तार्यते षष्ठम् । तत्र आत्मनः क्षयोपशमाद्याः परिणतयः स्वभावपरिणामेन परिणमन्ति न तप्तादिपरिणतौ स शमः । [४]नाम-स्थापनाशमौ सुगमौ, द्रव्यशमः परिणत्यसमाधौ प्रवृत्तिसंकोचः द्रव्य-शमः आगमतः शमस्वरूपपरिज्ञानी अनुपयुक्तः, नोआगमतः मायया लब्धिसिद्ध्यादिदेवगत्याद्यर्थम् उपकारापकारविपाकक्षमादिक्रोधोपशम-त्वम् । भावतः उपशमस्वरूपोपयुक्तः आगमतः, नोआगमतो मिथ्यात्वमपहाय यथार्थभासनपूर्वकचारित्रमोहोदयाभावात् क्षमादिगुण-परिणतिः शमः । सोऽपि लौकिकलोकोत्तरभेदाद् द्विविधः[५], लौकिकः-वेदान्तवादिनां लोकोत्तरः-जैनप्रवचनानुसारिशुद्धस्वरूपरमणैकत्वम्,

---

१. परवस्तुरहितं B.1.2., V.2. S.M. । २. वारकः ज्ञानं वस्तुतः B.1.2., V.2., S.M. । ३. एष पाठो नास्ति B.1.2., V.2., S.M. । ४. नामशम० A.D. । ५. एष पाठो नास्ति B.1.2., V.2., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यनयचतुष्टये भावशमादिस्वरूपगुणपरिणमनहेतुः मनोवाक्काय-संकोचविपाकचिन्तनतत्त्वज्ञानभावनादिः, अन्त्यनयत्रये क्षयोपशमशमादिः शब्दनयेन क्षपकश्रेणिमध्यवर्त्तिसूक्ष्मकषायवतः, समभिरूढनयेन क्रोधादिशमः क्षीणमोहादिषु, एवंभूतनयेन कषायशमः । अत्र भावना-चिन्तास्मृतिविपाकभयादिकारणतः क्षयोपशमभावादिसाधनतः क्षायिक-शमः साध्यः । एवं शमपरिणतिः करणीया । आत्मनो मूलस्वभावत्वात् मूलधर्मपरिणमनं हितम् । तेनैव कारणेन शुद्धाध्यात्मपदप्रवृत्तिः सङ्गत्यागात्मध्यानसंवरीचञ्चरीकत्वं करणीयम् ।

**विकल्पविषयोत्तीर्णः, स्वभावालम्बनः सदा ।**
**ज्ञानस्य परिपाको यः, स शमः परिकीर्त्तितः ॥१॥**

विकल्पेति- विकल्पः-चित्तविभ्रमः, तस्य विषयः-विस्तारः, तेन (ततः) उत्तीर्णः-निवृत्तः आत्मास्वादनतः वर्णादिषु निवृत्तविषयः । स्वभावः-अनन्तगुणपर्यायसम्यग्ज्ञानदर्शनचारित्रस्वरूपः, तस्यालम्बनः स्वभावालम्बनः । इत्यनेन आत्मस्वभावदर्शी, आत्मस्वभावज्ञानी, आत्मस्वभावरमणी(णः), आत्मस्वभावविश्रामी, आत्मस्वभावास्वादी, शुद्धतत्त्वपरिणतः । ज्ञानस्य-आत्मोपयोगलक्षणस्य परिपाकः-प्रौढावसरः, स शमः-शमभावलक्षणः परिकीर्त्तितः । [१]अत्र योगस्य पञ्चविधत्वं प्रोक्तं **हरिभद्रपूज्यैः** अध्यात्मयोगः १ भावनायोगः २ ध्यानयोगः ३ समतायोगः ४ वृत्तिक्षययोगः ५, तत्र अनादिपरभावौदयिकभाव-रमणीयता धर्मत्वेन निर्धार्य तत्पुष्टिहेतुक्रियां कुर्वन् अधर्मं धर्मवृत्त्या इच्छन् प्रवृत्तः स एव निरामयनिःसङ्गशुद्धात्मभावनाभावितान्तः-करणस्य स्वभाव एव धर्म इति योगवृत्त्या अध्यात्मयोगः १ सर्वपरभावान् अनित्यादिभावनया विबुध्य अनुभवभावनया स्वरूपा-भिमुखयोगवृत्तिमध्यस्थ आत्मानं मोक्षोपाये युञ्जतः भावनायोगः २ स एव पिण्डस्थ-पदस्थ-रूपस्थ-रूपातीतध्यानपरिणतरूपैकत्वी ध्यानयोगी भण्यते ३ ध्यानबलेन भस्मीभूतमोहकर्मा तप्तत्वादिपरिणतिरहितः

१. तत्र S.M.,V.1.2., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समतायोगी उक्तः ४ तथा योगाधीनकर्मोदयाधीनानादिवृत्तिः जीवस्य तस्याः क्षयः-अभावः स्वरूपवृत्तिः वृत्तिक्षययोगी उच्यते ५ एवं पञ्चयोगेषु समतायोगी साधने पटिष्ठ इति ज्ञानस्य पूर्णावस्था शमः ॥१॥

**अनिच्छन् कर्मवैषम्यम्, ब्रह्मांशेन समं जगत् ।**
**आत्माभेदेन यः पश्येदसौ मोक्षं गमी शमी ॥२॥**

अनिच्छन् कर्मवैषम्यमिति- कर्मवैषम्यम्-ऊनाधिकत्वम्, अनिच्छन् गतिजातिवर्णसंस्थानब्राह्मणक्षत्रियादिवैषम्यं ज्ञानवीर्यक्षयोपशमकार्य-वैषम्यमनिच्छन् उदयतः आचरणतः[१] क्षयोपशमभेदे सत्यपि ब्रह्मांशेन-चेतनालक्षणेन, अथवा द्रव्यास्तिक-अस्तित्व-वस्तुत्व-सत्त्व-अगुरु-लघुत्व-प्रमेयत्व-चेतनत्व-अमूर्त्तत्व-असङ्ख्येयप्रदेशत्वपरिणत्या जगत्-चराचरम्, आत्माभेदेन-आत्मतुल्यवृत्त्या, समं-समानत्वेन यः पश्येत्[२] सर्वजीवेषु समत्वं कृत्वा अरक्तद्विष्टत्वेन वर्त्तमानोऽसौ योगी मोक्षगामी सकलकर्मक्षयलक्षणावस्थां गच्छतीत्येवं शीलो भवति, यो हि सर्वजीवेषु जीवत्वतुल्यवृत्त्या रागद्वेषपरिणतिमपहाय आत्मस्वभावानुषङ्गी असौ योगी मोक्षं गमी भवति ॥२॥

**आरुरुक्षुर्मुनिर्योगम्, श्रयेद् बाह्यक्रियामपि ।**
**योगारूढः शमादेव, शुद्ध्यत्यन्तर्गतक्रियः ॥३॥**

आरुरुक्षुरिति- योगं-समाधियोगं प्रति सम्यग्दर्शनज्ञानचारित्ररूपं मोक्षोपायलक्षणं योगम् आरुरुक्षुः-आरोहणेच्छुः, मुनिः-भावसाधकः, प्रीतिभक्तिवचनरूपशुभसङ्कल्पेन अशुभसङ्कल्पान् वारयन् आराधकः भवति, सिद्धयोगी तु रागद्वेषाभावेन उपशमीकृतार्थः, बाह्यां क्रियां-बाह्याचारप्रतिपत्तिं श्रयेदपि-अङ्गीकुर्वन्नपि, शमादेव शुद्ध्यति-शमात्-क्रोधाभावात् शुद्ध्यति-निर्मलीभवति । कथंभूतः मुनिः ? योगारूढः-योगे सम्यग्दर्शनज्ञानचारित्रे आत्मीयसाधनरत्नत्रयीलक्षणे आरूढः । पुनः कथंभूतः मुनिः ? अन्तर्गतक्रियः-अन्तर्गता वीर्यगुणप्रवृत्तिरूपा क्रिया

---

१. आचरणातः V.1.2.,B.1.2., A.D., S.M. । २. पश्यन् V.1.2 S.M.B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य सः अन्तर्गतक्रियः एवमभ्यन्तरक्रियावान् रत्नत्रयपरिणतः शमात् क्षमामार्दवार्जवमुक्तिपरिणतिपरिणतः निर्मलो भवति ॥३॥

**ध्यानवृष्टेर्दयानद्याः, शमपूरे प्रसर्पति ।**
**विकारतीरवृक्षाणाम्, मूलादुन्मूलनं भवेत् ॥४॥**

ध्यानवृष्टेरिति- ध्यानवृष्टेः-ध्यानं धर्मशुक्लाख्यम्, अन्तर्मुहूर्तं यावत् चित्तस्य एकत्रावस्थानं ध्यानम् । उक्तं च :-

**[21]अन्तोमुहुत्तमेत्तं, चित्तावत्थाणमेगवत्थुंमि ।**
**छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ॥१॥**

[ध्या०श० गा०३]

अत्र च निमित्तरूपे देवगुरुस्वरूपे अद्भुततादियुक्तचित्तैकत्वे च धर्मध्यानम् आज्ञाऽपायविपाकसंस्थानाख्यम्, तत्र आज्ञायाः निर्द्धारः सम्यग्दर्शनम्, आज्ञाया अनन्तत्वपूर्वापराविरोधित्वादिस्वरूपे चमत्कारपूर्वकचित्तविश्रामः आज्ञाविचयधर्मध्यानम्, एवं अपायादिष्वपि निर्द्धारभासनपूर्वं सानुभवचित्तविश्रान्तिः ध्यानम्, एवं शुक्लेऽपि, ईदृग्ध्यानवृष्टेः-मेघात् **[22]** दया-स्वपरभावप्राणाघातनरूपा भावदया, तद्वृद्धितद्रक्षणहेतुत्वात् स्वपरद्रव्यप्राणरक्षणानिर्विषयत्वेन द्रव्यदयापि दयात्वेनारोपिता, **श्रीविशेषावश्यके** [गा०१७६३-६४] गणधरवादाधिकारे इति । अतो द्रव्यदया तु कारणरूपा, भावदया तु दयाधर्मः, एवंविधाया दयानद्याः शमपूरे सकलकषायपरिणतिशान्तिः शमः,[१] रागद्वेषाभावः वचनधर्मरूपः शमः तस्य पूरः, तस्मिन् प्रसर्पति- वृद्धिमेति सति विकाराः-कामक्रोधादयः अशुद्धात्मपरिणामाः त एव तीरवृक्षाः तेषां मूलाद् उन्मूलनं भवेत्-उच्छेदनं भवेत् । अभावः इत्यनेन ध्यानेन योगतः दयानदीपूरः प्रवर्द्धयति वर्द्धमानपूरश्च विकारवृक्षाणामुच्छेदनं करोत्येव । अयं हि आत्मा विषयकषायविकारविप्लुतः स्वगुणावारककर्मोदयतः परिभ्रमति । स एव स्वरूपोपादानतः तत्त्वैकत्वतया प्रवर्द्धमानशमपूरः

१. वृद्ध० S.M., B.2., V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकारान् मूलाद् उन्मूलयति ॥४॥

**ज्ञानध्यानतपःशील–सम्यक्त्वसहितोऽप्यहो ।**
**तं नाप्नोति गुणं साधुर्यमाप्नोति शमान्वितः ॥५॥**

ज्ञानध्यानेति–ज्ञानं-तत्त्वावबोधः, ध्यानं-परिणामस्थिरतारूपम्, तपः-इच्छानिरोधः, शीलं-ब्रह्मचर्यम्, सम्यक्त्वं-तत्त्वश्रद्धानम्, पदानामुत्क्रमता द्वन्द्वसमासात् । इत्यादिगुणोपेतः साधुः, साधयति रत्नत्रय-करणेन मोक्षं स साधुस्तं निरावरणगुणं-केवलज्ञानादिगुणं नाप्नोति-न प्राप्नोति, यं गुणं शमान्वितः-समताचारित्रमयः आप्नोति-प्राप्नोति लभते इत्यर्थः । अत्र ज्ञानादयो गुणा निरावरणाऽमलकेवलज्ञानस्य परम्परा-कारणं शमः-कषायाभावः, यथाख्यातसंयमः केवलज्ञानस्यासन्न-कारणम्, अश्वकरण-समीकरण-किट्टीकरणवीर्येण सूक्ष्मलोभं खण्डशः खण्डशः कृत्वा क्षयं [१]नीते सति निर्विकल्पसमाधौ अभेदरत्नत्रयी-परिणतः क्षीणमोहावस्थायां यथाख्यातचारित्री परमशमान्वितः ज्ञानावरणदर्शनावरणान्तरायक्षयं नयति, लभते च [२]सकलामलं केवल-ज्ञानं केवलदर्शनं परमदानादिलब्धीः[३], अत एव क्षायोपशमिकज्ञानी यं न प्राप्यते तं परमशमान्वितः प्राप्यते(प्राप्नोति) अत एव धीराः-दर्शनज्ञाननिपुणाः अभ्यसन्ति पूर्वाभ्यासम्, आश्रयन्ते गुरुकुलवासम्, रमन्ते निर्जने वने, तेन आत्मविशुध्यर्थी शमपूरणे उद्यतते ॥५॥

**स्वयंभूरमणस्पर्धि–वर्द्धिष्णुसमतारसः ।**
**मुनिर्येनोपमीयेत, कोऽपि नासौ चराऽचरे ॥६॥**

स्वयंभू इति–स्वयंभूरमणः-अर्द्धरज्जुप्रमाणः प्रान्तसमुद्रः, तस्य स्पर्द्धी-स्पर्धाकारी, वर्द्धिष्णुः-वर्द्धमानः, समतारसः-समता-रागद्वेषा-भावः, तस्या रसः समतारसः, एवंविधः मुनिः, त्रिकालाविषयी, अतीतकालरमणीयविषयस्मरणाभावः, वर्त्तमानेन्द्रियगोचरप्राप्तविषय-

---

१. गते० S.M.,V.1. याते V.2.,B.2. । २. सकलाकला V.1.2., B.2. ।
३. लब्धयः B.1.2., V.2., S.M., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमणाभावः, अनागतकालमनोज्ञविषयेच्छाभाववान्[१] मुनिः, येन उपमानेन उपमीयते चराचरे-विश्वे असौ कोऽपि न जगति, यत् तत्सर्वम् अचेतनपुद्गलस्कन्धजं मूर्तं च, तत् समतारसेन सहजात्यन्तिकनिरुपम-चरितशमभावस्वरूपेण कथमुपमीयते ? दुर्लभो हि समतारसः, विश्वे-शुभाशुभभावे परत्वेन अरक्तद्विष्टतया वृत्तिः शुद्धात्मानुभवः । उक्तं चः—

**[23] वंदिज्जमाणा न समुक्कसंति, हेलिज्जमाणा न समुज्जलंति।**
**दंतेण चित्तेण चलंति धीरा, मुणी समुग्घाइयरागदोसा ॥८६६॥**

[आव० नि० गा० ८६६]

**[24] बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं ।**
**विरत्तकामाण तवोधणाणं, जं भिक्खुणो सीलगुणे रयाणं ॥१७॥**

[उत्तरा०अ०१३-गा० १७]

इति समतास्वादिनां नरेशभोगाः रोगाः, चिन्तामणिसमूहाः कर्कर-व्यूहाः, वृन्दारकाः दारका इव भासन्ते, अतः संयोगजा रतिर्दुःखम्, समतैव महानन्दः ॥६॥

**शमसूक्तसुधासिक्तम्, येषां नक्तंदिनं मनः ।**
**कदाऽपि ते न दह्यन्ते, रागोरगविषोर्मिभिः ॥७॥**

शमसूक्त इति-येषां-महात्मनाम्, मनः-चित्तं शमः-कषायाभावः, चारित्रपरिणामः तस्य सूक्तानि-सुभाषितानि, तदेव सुधा-अमृतम्, तेन सिक्तमभिषिञ्चितं मनः नक्तंदिनम्-अहोरात्रम्, ते रागोरगविषोर्मिभिः-रागः-अभिष्वङ्गलक्षणः स एव उरगः-सर्पः तस्य विषस्य ऊर्मयः ताभिः ते, शमतासिक्ता न दह्यन्ते, जगज्जीवा रागाहिदष्टाः, विषये[२]-घूर्मघूर्मिताः भ्रमन्तः(भ्रमन्ति), इष्टसंयोगानिष्टवियोगचिन्तया, विकल्प-यन्ति बहुविधान् अग्रशोचादिकल्पनाकल्लोलान्, संग्रहन्ति अनेकान् जगदुच्छिष्टान् पुद्गलस्कन्धान्, याचयन्ति अनेकान् [३]धनोपार्जनोपायान्,

---

१. भावात् V.1.2. B.1.2. । २. विषयघूर्मि B.1.2, V.1.2 । १. धनार्जनो० B.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रविशन्ति कूपेषु, विशन्ति यानपात्रेषु, द्रव्याद्यहितं हितवद् मन्यमानाः, जगदुपकारितीर्थंकरवाक्यश्रवणप्राप्तशमताधनाः स्वरूपानन्दभोगिनः स्वभावभासन-स्वभावरमण-स्वभावानुभवेन सदा असङ्गमग्ना[१] विचरन्ति आत्मगुणानन्दवने, अतः सर्वपरभावैकत्वं विहाय रागद्वेष-विभावमपहाय शमभावित्वेन भवनीयम् ॥७॥

**गर्जज्ज्ञानगजोत्तुङ्ग–रङ्गद्ध्यानतुरङ्गमाः ।**
**जयन्ति मुनिराजस्य, शमसाम्राज्यसम्पदः ॥८॥**

॥ इति शमाष्टकम् ॥६॥

गर्जज्ज्ञानमिति- मुनिराजस्य शमसाम्राज्यसम्पदः जयन्ति । कथंभूताः सम्पदः ? गर्जज्ज्ञानगजोत्तुङ्गरङ्गद्ध्यानतुरङ्गमाः-गर्जत्-स्फुरद् ज्ञानं स्वपरावभासनरूपाः गजाः उत्तुङ्गा-उन्नताः रङ्गन्तः-नृत्यन्तः ध्यानरूपाः तुरङ्गमाः-अश्वाः इत्यनेन भासनगजध्यानाश्वशोभिताः राज्य-सम्पदः निर्ग्रन्थस्वरूपभूपस्य जयन्ति । अतः शमतास्पदमुनीनां महाराजत्वं सदैव जयति, अतः शमाभ्यासवता भवितव्यमित्युपदेशः ॥८॥

**॥ इति व्याख्यातं शमाष्टकम् ॥६॥**

## अथ इन्द्रियजयाष्टकम् ।

शमान्तरायकृद् इन्द्रियाभिलाषः, तेन इन्द्रियजयादेव शमावस्थानम्, अतः इन्द्रियजयाष्टकं विस्तार्यते । तत्र इन्द्रो-जीवः, सर्वपरमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियं लिङ्गनात् सूचनात् प्रदर्शनादुपलम्भाद् व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम् । इन्द्रियविषयोपलम्भात् ज्ञायकत्वसिद्धिः । तत्सिद्धौ **उवओगलक्खणो जीवो** इति जीवनसिद्धिः । द्विविधानि इन्द्रियाणि द्रव्येन्द्रियाणि भावेन्द्रियाणि च । तत्र द्रव्येन्द्रियं द्विविधम्, निर्वृत्तीन्द्रियम् उपकरणेन्द्रियं च । तत्र निर्वृत्तिः अङ्गोपाङ्गानां [२]निर्वृत्तानि इन्द्रियद्वाराणि कर्मविशेषसंस्कृताः शरीरप्रदेशाः निर्माणनामाङ्गोपाङ्ग-प्रत्यया, उपकरणं बाह्यमभ्यन्तरं च निर्वृत्तिः । तस्यानुपघातानुग्रहा-

१. संमग्ना V.1.2., B.2. । २. निर्वर्तितानि सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्यामुपकारीति लब्धिः, उपयोगस्तु भावेन्द्रियं भवति, लब्धिः तदावरणीयमतिज्ञानावरणीय-श्रुतज्ञानावरणीय-चक्षुरचक्षुर्दर्शनावरणीय-वीर्यान्तरायकर्मक्षयोपशमजनिता स्पर्शादिग्राहकशक्तिः लब्धिः, स्पर्शादिज्ञानमुपयोगः, स्पर्शादिविज्ञानं फलरूपमुपयोगः । अत्रेन्द्रियाणां वर्णादिज्ञानेन विषयता, किन्तु ज्ञानमग्ना हि तेषु वर्णादिषु मनोज्ञामनोज्ञेषु इष्टानिष्टतया भूत्वा इष्टाभिमुखताऽनिष्टकम्पनारूपा मोहपरिणतिः विषयता ज्ञानस्य विषयत्वेन सिद्धानां सविषयताप्तेः, अतः रक्तद्विष्टतया प्रवर्त्तमानं ज्ञानं विषयः, कारणकार्ये एकता चारित्रमोहोदयेन अरम्ये रमणमसंयमः। तत्र वर्णादयो हि ज्ञेयाः एव, न रम्याः । तत्र रमणं-विषयेन्द्रियद्वारप्रवृत्तज्ञानस्य इष्टानिष्टतया परिणमनम्, तस्य जयः इन्द्रियविषयजयः। किमित्याह इति यद्द्वारेण वर्णादीनां ज्ञानं न इष्टानिष्टता इन्द्रियजयः, अनाद्यशुद्धासंयमपरिणतिवारणारूपः, तत्र ज्ञानं हि आत्मनः स्वलक्षणत्वात् स्वपरपरिच्छेदः विधिः । इष्टानिष्टता तु विभाव एव । सङ्गाङ्गितया अनादिसन्ततिजः अशुद्धपरिणामः सर्वथा त्याज्यः एव । अतः इन्द्रियजये यतितव्यम्। तत्र द्रव्यजयः संकोचादिलक्षणः, भावजयः चेतनावीर्ययोः स्वरूपानुपातः । नैगमनयेन निर्वृत्त्युपकरणेन्द्रियपरिणमनयोग्याः पुद्गलस्कन्धाः, संग्रहेण जीवपुद्गलौ, व्यवहारतः निर्वृत्त्युपकरणेन्द्रियपरिणतनिर्माणादिविपाकजानि इन्द्रियसंस्थानानि, ऋजुसूत्रेण स्वस्वविषयग्रहणोत्सुकौ(के) निर्वृत्त्युपकरणौ(णे), शब्दनयेन संज्ञाग्रहमिता लब्धिः उपयोगपरिणतिवृत्तिः, समभिरूढनयेन संज्ञागृहीताऽगृहीतविषयक्षेत्रप्राप्तविषयपरिच्छेदः, एवंभूतनयेन मतिश्रुतचक्षुरचक्षुर्वीर्याद्यन्तरायाणां क्षयोपशमावधेः प्रान्तं यावद्ज्ञानम्, तत्रासंयतस्येष्टानिष्टयुक्त एवावबोधो भवति । तेन विषयः इति संज्ञाभोक्तृत्वाशुद्धता [१]आत्मनः अशुद्धपरिणामः, तस्य जयः । सोऽपि आद्यनयचतुष्टये कारणरूपशब्दादिषु संयमगुणप्राग्भावानुगतचेतनादिपरिणामः । द्रव्य-

---

१. आत्माशुद्ध० V.1.2., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयोऽपि भावजयहेतुत्वात् अभ्यस्यः । भावजयस्तु स्वधर्मत्वात् साध्य एव । तदर्थमुपदेशः—

**बिभेषि यदि संसारान्मोक्षप्राप्तिं च काङ्क्षसि ।**
**तदेन्द्रियजयं कर्त्तुम्, स्फोरय स्फारपौरुषम् ॥१॥**

बिभेषि यदीति—हे भव्य ! यदि त्वं संसारात् बिभेषि-भयं प्राप्नोषि, च-पुनः, मोक्षः-सकलकर्मक्षयलक्षणः, तस्य प्राप्तिस्तां काङ्क्षसि-अभिलषसि, तदा इन्द्रियजयं कर्तुं स्फारपौरुषं-देदीप्यमानं पराक्रमम्, स्फोरय-प्रवर्त्तयस्व, अतः महाकदर्थनाकन्दरूपात् भव-[१]कूपोद्विग्नः शुद्धचिदानन्दाभिलाषी जीवः हालाहलोपमानिन्द्रिय-विषयांस्त्यजति । उक्तं च **उत्तराध्यनने**—

**[25] ★सल्लं कामा विसं कामा, कामा आसीविसोपमा ।**
**कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥५३॥**

[अ० ९ गा० ५३]

**वृद्धास्तृष्णाजलापूर्णैरालवालैः किलेन्द्रियैः ।**
**मूर्च्छामतुच्छां यच्छन्ति, विकारविषपादपाः ॥२॥**

वृद्धाः इति-किल इति सत्ये, इन्द्रियैः-विषयभोगरसिकैः आल-वालैः वृद्धाः-महत्त्वमापन्नाः, विकारविषपादपाः-विकारा एव विष-वृक्षाः अतुच्छामत्यन्तां मूर्च्छां यच्छन्ति-मुह्यतां ददति । इत्यनेन अनादि-स्वरूपयुतानां-परभावरमणाभोग्याभोग्यचेतनानां विकारविषवृक्षाः इन्द्रियैः-स्पर्शनादिभिः विषयग्राहकैः प्रवर्द्धमानाः महामोहं कुर्वन्ति, किंभूतैः आलवालैः ? तृष्णाजलापूर्णैः-तृष्णा-लोभवैकल्यं लालसा, तद्रूपेण जलेन आपूर्णैः-भृतैः इत्यर्थः, तृष्णाप्रेरितानि एव इन्द्रियाणि धावन्ति । तृष्णाया आनन्त्यम्—

**[26] सुवण्णरुप्पस्स य पव्वया भवे,**
**सिया हु केलाससमा असंखया ।**

१. कूपाद् विग्नः A.D. । ★ इन्द्रियपराजयशतकम् गा०२८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नरस्स लुद्धस्स न ते वि किंचि,**
**इच्छा हु आगाससमा अणंतया ॥४८॥**

[उत्तरा०अ०९ गा०४८]

**वारमणंतं भुत्ता, वंता चत्ता य धीरपुरुसेहिं ।**
**ते भोगा पुण इच्छइ, भोत्तुं तिण्हाउलो जीवो ॥२॥**

तृष्णाकुलस्यैव विषयाः रमणीयाः । सा च अनाद्यभ्यासतः विषयप्रसङ्गेन वर्द्धते । अतः इन्द्रियविषयपरित्यागो युक्तः ॥२॥

**सरित्सहस्रदुष्पूर-समुद्रोदरसोदरः ।**
**तृप्तिमान्नेन्द्रियग्रामो, भव तृप्तोऽन्तरात्मना ॥३॥**

सरित्सहस्रेति—हे भव्य ! अयमिन्द्रियग्रामः तृप्तिमान् न, कदापि न तृप्ति लभते । यतः अभुक्तेषु ईहा, भुज्यमानेषु मग्नता, भुक्तपूर्वेषु स्मरणम्, इति त्रैकालिकी अशुद्धा प्रवृत्तिः इन्द्रियार्थरक्तस्य । तेन तृप्तिः क्व ? कथंभूतः इन्द्रियग्रामः ? "सरित्सहस्रदुष्पूरसमुद्रोदरसोदरः" सरितां सहस्रं तेन दुष्पूर्यते समुद्रस्योदरं तस्य सोदरः, सहस्रशः नदीपूरैः दुष्पूरः-अपूर्यमाणः यः समुद्रस्य-जलनिधेः उदरं तस्य सोदरः भ्राता, अतः कारणात् पूर्यमाणोऽपि दुष्पूरः इन्द्रियाभिलाषः । स शमसन्तोषेणैव पूर्यते । तदर्थं हितोक्तिः- भो उत्तम ! अन्तरात्मना-आत्मनः अन्तर्गतेन स्वरूपेण तृप्तो भव । स्वरूपावलम्बनमन्तरेण न तृष्णाक्षयः । अयं हि संसारचक्रक्रोडीभूतपरभावान् आत्मतया मन्यमानः, "शरीरमेवात्मा" इति बहिर्भावे कृतात्मबुद्धिः बहिरात्मा सन् अनन्तपुद्गलावर्त्तकालं मोहावगुण्ठितः पर्यटति । स एव निसर्गाधिगमाभ्यां स्वरूपपररूपवि-भजनेन "अहं शुद्धः" इति कृतनिश्चयः सम्यग्दर्शनज्ञानचारित्रात्मक-मात्मानमात्मत्वेन जानन् रागादीन् परत्वेन निर्धारयन् सम्यग्दृग् अन्तरात्मा उच्यते । स एव सम्यग्दर्शनलाभकाले निर्धारिततत्त्वस्वरूप-पूर्णप्राप्तौ परमात्मा परमानन्दमयसम्पूर्णस्वधर्मप्राग्भावभोगी सिद्धो भवति । तेन मिथ्यात्वमपहाय आत्मस्वरूपभुञ्जनेन उच्छिष्टमल-जम्बालोपमान् विषयान् त्यजति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[25] सल्लं कामा विसं कामा, कामा आसीविसोपमा ।**
**कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥५३॥**
[उत्तरा० अ० ९ गा० ५३]

**[27] विसयविसं हालाहलं विसयविसं उक्कडं पी( पि )यंताणं ।**
**विसयविसयाइन्नं पिव, विसयविसविसूइया होइ ॥२१३॥**
[उप०मा० गा० २१३]

**कामभोगग्रहो दुष्टः, [१]कालकूटविषोपमः ।**
**तद्व्यामोहनिवृत्त्यर्थमात्मभावोऽमृतोपमः ॥३॥**

अतः आत्मानुभवने तृप्तिं कुरु ॥३॥

**आत्मानं विषयैः पाशैः, भववासपराङ्मुखम् ।**
**इन्द्रियाणि निबध्नन्ति, मोहराजस्य किंकराः ॥४॥**

आत्मानमिति–भवः–संसारः, तस्य वासो–निवासः तत्र पराङ्मुखः–निवृत्तः उद्विग्नः, तमात्मानमिन्द्रियाणि निबध्नन्ति, भववासदृढं कुर्वन्ति, कैः ? विषयपाशैः–विषया एव पाशाः तैः, एते मोहराजस्य किंकराः–परिवारभूताः, **उपमितौ**[२] मोहसुतः जगद्व्यामोहकृत् रागकेशरी तत्प्रधानो विषयाभिलाषः इति भवमूलविषयपरित्यागो हिताय ॥४॥

**गिरिमृत्स्नां धनं पश्यन्, धावतीन्द्रियमोहितः ।**
**अनादिनिधनं [३]ज्ञानम्, धनं पार्श्वे न पश्यति ॥५॥**

गिरिमृत्स्नामिति– मूढः गिरिमृत्स्नां–भूधरमृत्तिकां स्वर्णादिकां धनं पश्यन्, इन्द्रियमोहितः–विषयासक्तः धावति–इतस्ततः परिभ्रमति, ज्ञानं धनं पार्श्वे–समीपे न पश्यति, तदात्मा[४] स्वलक्षणभूतं तत्त्वावबोधरूपं ज्ञानं धनं न पश्यति–नावलोकयति, कथंभूतं ज्ञानं ? अनादिनिधनमनादि–आदिरहितं सत्तया, अनिधनमन्तरहितं सत्ताविश्रान्तिरूपम् । उक्तं च—

---

१. कालकूटो B.1.2., V.1.2.. A.D. । २. उपमिताः मोहसुताः S.M. । ३. पार्श्वे ज्ञानं धनं A.D., पार्श्वे धनं ज्ञानं S.M. । ४. तदात्म्या० B.1.,V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**"केवलनाणमणंतं, जावरूवं तवं निरावरणं"**
**(लोगालोगपगासगमेगविहं निच्चजोइ त्ति॥१॥)**

[विं०विं०-१८।१]

सिद्धत्वेन अविनश्वरत्वात् निगोदावस्थां यावत् ज्ञानमत्यन्ताव-बोधमहामोहोदयेऽपि सत्तागतं सम्यग्दृष्टिदेशविरतिसर्वविरतानां साध्यभूतं निर्विकल्पसमाधिः शुक्लध्यानस्य फलरूपमर्हत्सिद्धानां परमं स्वरूपं केवलज्ञानं धनं स्वीयं सहजं विस्मृत्यौपाधिकारोपितमृदूपलरूपे धने मुह्यन्ति मूढाः ॥५॥

**पुरःपुरःस्फुरत्तृष्णा-मृगतृष्णानुकारिषु ।**
**इन्द्रियार्थेषु धावन्ति, त्यक्त्वा ज्ञानाऽमृतं जडाः ॥६॥**

पुरःपुर इति—जडाः-मूर्खाः स्याद्वादवस्तुस्वरूपोपलम्भरहिताः ज्ञानामृतं-ज्ञानं-बोधः तदेव अमृतमविनाशिपदहेतुत्वात्, [1]त्यत् त्यक्त्वा इन्द्रियार्थेषु-रूपरसगन्धस्पर्शशब्दलक्षणेषु धावन्ति-भोगाभिलाषिणः आतुरा भवन्ति । तदर्थं यत्नः, तदर्थं दम्भविकल्पकल्पना, तदर्थं कृष्या-दिकर्म करोति । कथंभूतेषु इन्द्रियार्थेषु ? पुरःपुरःस्फुरत्तृष्णामृग-तृष्णानुकारिषु-अग्रे स्फुरन्ती या तृष्णा-भोगपिपासा तया, मृगतृष्णा-जलभ्रान्तिः तदनुकारिषु-तत्सदृशेषु, यथा-मृगतृष्णाजलं न पिपासापहं भ्रान्तिरेव एवमिन्द्रियभोगाः न सुखं सुखभ्रान्तिरेव तत्त्वविकलानाम् ॥६॥

**★पतङ्गभृङ्गमीनेभ—सारङ्गा यान्ति दुर्दशाम् ।**
**एकैकेन्द्रियदोषाच्चेद्, दुष्टैस्तैः किं न पञ्चभिः ? ॥७॥**

[2]पतङ्गभृङ्गमीनेति—रूपासक्तः पतङ्गः, रसासक्तः मीनः, गन्धा-सक्तः भृङ्गः-भ्रमरः, स्पर्शासक्तः इभः-गजः, शब्दासक्तः-सारङ्गः-मृगः एते एकैकेन्द्रियदोषात् दुर्दशां-दुष्टां दीनां दशामवस्थां यान्ति, तदा तैः पञ्चभिः दुष्टैः किं न इति ?-किं दुःखं न भवति ? भवत्येव । अत

---

१. तं A.D.,V.2.,B.1. त्यं B.2 । ★ पतङ्गमीनेभभृङ्ग० A.D., टीका-कारेणात्र टीकायामेतत्क्रमो गृहीतः, किन्तु अत्र मूलग्रन्थकारोक्तः श्लोकः गृहीतः ।
२. पतङ्गमीनेति सर्वप्रतिषु ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव महाचक्रधरा वासुदेवाः मण्डलिकादयः कण्डरीकादयश्च विषय-व्यामोहितचेतना नरके दीनावस्थां प्राप्ताः । किं बहुना ? मा कुरुध्वं विषयविषसङ्गमम् ॥७॥

**विवेकद्विपहर्यक्षैः, समाधिधनतस्करैः ।**
**इन्द्रियैर्न जितो योऽसौ, धीराणां धुरि गण्यते[१] ॥८॥**

॥ इति इन्द्रियजयाष्टकम् ॥ ७ ॥

विवेकेति—विवेकः-स्वपरविवेचनम्, [स एव द्विपः-गजः] तद्घाते हर्यक्षतुल्यैः-सिंहोपमैः, समाधिः-स्वरूपानुभवलीलाविश्रान्तिः, [स] एव धनं-सर्वस्वम्, तद्हरणे तस्करास्तैः, एवमिन्द्रियैः यः असौ पुरुषः नेमि—गजसुकुमालादिसदृशैः न जितः-इन्द्रियाधीनो न जितः, सः पुरुषः धीराणां धुरि-आदौ गण्यते-श्लाघ्यते । उक्तं चः—

**धन्यास्ते ये विरक्ता गुरुवचनरतास्त्यक्तसंसारभोगाः,**
**योगाभ्यासे विलीना गिरिवनगहने यौवनं ये नयन्ति ।**
**तेभ्यो धन्या विशिष्टाः प्रबलवरवधूसङ्गपञ्चाग्नियुक्ताः**
**[२]नैवाक्षौघे प्रमत्ताः परमनिजरसं तत्त्वभावं श्रयन्ति ॥१॥**

अहह पूर्वभवास्वादितसाम्यसुखस्मरणेन प्रणयन्ति अनुत्तरविमान-सुखलवसत्तमाः इन्द्रादयो हि विषयस्वादत्यागासमर्थाः लुठन्ति भूपीठे मुनीनां चरणकमलेषु । अतः अनाद्यनेकशः भुक्तविषयाः वारणीयाः । तत्सङ्गोऽपि न विधेयः । न स्मरणीयः पूर्वपरिचयः । प्रतिसमयं दुर्गञ्छनीया एव एते संसारबीजभूताः इन्द्रियविषयाः । अत एव निर्ग्रन्था निवर्त्तयन्ति कालं वाचनादिना तत्त्वावलोकनेहादिषु । उक्तं च—"निम्मलनिक्कल-निस्संगसिद्धसब्भावफासणा कइया" इत्यादि । रुच्या रत्नत्रयीपरिणताः तिष्ठन्ति स्थविरकल्पजिनकल्पेषु, सर्वैरपि भव्यैरेतदेव विधेयम् ॥८॥

**॥ इति व्याख्यातमिन्द्रियजयाष्टकं संपूर्णम् ॥ ७ ॥**

---

१. गुण्यते B.1.2., S.M., V.1. । २. नैवासक्ताः V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथाष्टमं त्यागाष्टकम् ।

इन्द्रियजयो हि त्यागाद् वर्द्धते, अतः आत्मनः स्वरूपादन्यत् [१]परभावत्वं त्याज्यम्, तेन त्यागाष्टकं लिख्यतेऽष्टमम् । त्यागः-त्यजनं त्यागः सर्वेषां परभावत्यागः सुखम्, त्यागः उत्सर्जनम्, तत्र स्वद्रव्य-स्वक्षेत्र-स्वकाल-स्वभावत्वेन स्यादस्तीति प्रथमभङ्गगृहीतात्मपरिणाम-स्वात्मनि वर्त्तमानः स्वधर्मः तस्य समवायत्वेनाभेदात् त्यागो न भवति, अस्त्येव तदात्मनि, उपादेयत्वं तु सम्यग्ज्ञानादिसाधनवृत्त्या विस्मृतस्य स्मरणात् तिरोभूतस्याविर्भावात् अभुक्तस्य भोगात् शेषाणां सर्व-संयोगिकतया ज्ञानात् हेयतैव यद्यपि देवादिनिमित्तानां [२]शुभभावादीनां ध्यानादीनामात्मसाधनपरिणामानामनाद्यशुद्धपरिणतिग्रहणवृत्तिवारणाय ग्रहणता कृता तथापि स्वसिद्धावस्था गता न, इति उत्सर्गमार्गेण न ग्रहणता अनादिमिथ्यादृष्टिः कुदेवादिरक्तः स च सम्यग्दर्शनबलेन निर्धारितस्वधर्मरुचिः शुद्धदेवादीन् गृह्णाति तथापि परत्वज्ञप्तिरेव, अप्रशस्तत्यागः प्रशस्तग्रहणम्, प्रशस्तत्यागः स्वसाधनापरिणतिग्रहणम्, स्वसाधनपरिणतित्यागः स्वसत्ताधर्मग्रहणमिति क्रमः परमसिद्धेः, तत्र नामत्यागः शब्दालापरूपः, स्थापनात्यागः दशयतिधर्मपूजनादौ स्थाप्यमानः, द्रव्यत्यागः द्रव्येण बाह्यवृत्त्या इन्द्रियसुखाभिलाषेण उपयोगभूतेन वा यस्त्यागः द्रव्यत्यागः, द्रव्यस्य द्रव्याणाम् आहारोपधि-प्रमुखस्य त्यागः, द्रव्यरूपः त्यागः द्रव्यत्यागः, स च आगमतः द्रव्यत्यागस्वरूपज्ञानी अनुपयुक्तः, नोआगमतः ज्ञशरीरम्, त्यागस्वरूप-ज्ञायकस्य शरीरम्, भव्यशरीरं त्यागस्वरूपज्ञायकभावी लघुशिष्यादिः, तद्व्यतिरिक्तस्तु द्रव्यत्यागः पुद्गलाशंसा—इहलोकाशंसा-परलोका-शंसारहितः स्वरूपसाधनाभिमुखी बाह्योपधिशरीरान्नपानस्वजनादित्यागः इति । भावतः अभ्यन्तररागद्वेषमिथ्यात्वाद्याश्रवविभावपरिणतित्यागः, आत्मनः क्षायोपशमिकानां ज्ञानादीनां परभावतो निवृत्तिः भावत्यागः, सम्यग्ज्ञानपूर्वकचारित्रवीर्यसंकरजन्यः आत्मपरिणामः, नामस्थापनां

---

१. परभावं सर्वप्रतिषु । २. शुभाचारादीनां B.1.2.,A.D.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत् नैगमसंग्रहौ, व्यवहारो विषगरानुष्ठानेन, ऋजुसूत्रेण कटुविपाक-भीत्या, शब्दसमभिरूढौ तद्धेतुतया एवंभूतत्यागः सर्वथावर्जनं वर्जनीयत्वेन अथवा अशनादिबाह्यरूपमाद्यनयचतुष्टये, अभ्यन्तरस्त्यागः शब्दादिनयत्रये इति भावना । स त्यागः करणीय इत्युपदिश्यतेः—

**संयतात्मा श्रयेच्छुद्धोपयोगं पितरं निजम् ।**
**धृतिमम्बां च पितरौ, तन्मां विसृजत ध्रुवम् ॥१॥**

संयतात्मा इति—संयतात्मा-संयमाभिमुखी, शुद्धोपयोगं निजपितरं श्रयेत्, रागद्वेषरहित आत्मज्ञानं श्रयेत्-आश्रयेत् । धृतिम्-आत्मरति-रूपाम्, अम्बां-जननीं श्रयेत् । तेन आहारपर्याप्तिनामकर्मोदयाद् यत्र उत्पन्नः सा माता, तद्भोगी पिता इति लौकिकसम्बन्धः । तान् वक्ति तौ पितरौ मां विसृजत-त्यजत, नाहं वां पुत्रः, न युवां[1] मम जनकौ इति अयं हि लोके एव मार्गः । अत्र दृष्टान्तः—"जहा एगया **भरहे** खित्ते **मगह**जणवए **सुवप्पाए** नयरीए अरिदमणनयमग्गहिए "**वयरजंघो**" राया । तस्स **धारिणी** देवी, तस्स उ **सुभाणु** नाम कुमरो अमरुव्व सुन्दरो अणुक्कमेण विज्जापुरन्दरो जाओ । लावण्णजुओ सहजेण जिणधम्मसाहुवंदण-पूयणतप्परो जाओ । सो कमेण कन्दप्परमणे जुव्वणवसो पत्तो । ता जणएण रूवलावण्णसीलकलियाओ एगसयं रायकन्नाओ आपत्तीता पणीयाओ । सो तेसिं सद्धिं विसयभुंजमाणो तिलोगनाह-तिलोयबन्धु-सेवणरओ चिट्ठइ । तओ एगया अणेगेहिं केवलिहिं, अणेगेहिं विउलमइहिं, अणेगेहिं उजुमईहिं, अणेगेहिं ओहिनाणीहिं, अणेगेहिं पुव्वधरेहिं, अणेगेहिं आयरियउवज्झाएहिं, अणेगेहिं तवोधणेहिं, अणेगेहिं नवदिक्खिएहिं अणेगदेवदेवीपरिवुडो **सिरिसम्भवो** अरिहा सव्वन्नू सव्वदंसी आगासगएणं छत्तेणं, आगासगएणं चक्केणं, उद्धूवमाणेहिं सेयचामरेहिं, पुरओ धम्मज्झएण विरायमाणं, नयरपरिसरे समोसढो । जाओ अ समोसरणे तिवप्पो, परिसा निग्गया, वणपालेण वद्धाविओ कुमारो, जस्स पइदिणं दंसणं

---

१. यूयं मम जनकाः S.M., V.1.2., B.1. ।

अभिलससि कंखसि सो सव्वजगजीववच्छलो तित्थयरो समागओ ते पुण्णजोगेणं । तेणं समए सो कुमारो इत्थिसएहिं परिवेढीओ आसि, तेउ भणइ, सुणसु मे तारगो निम्ममो, निरहंकारो, अकिंचणो, सव्वन्नू, सव्वदंसी, जिणो, वीयरागो सुद्धधम्मदेसी आगओ । गच्छामि वंदणत्थं इति पुलिअंगो अब्भुट्ठिओ, चलिओअं जिणवंदणत्थं, मग्गे वि लोगवूहं भणंतो अहो ! अममो मे भयवं, अकिंचणो मे भयवं, अतिण्हो मे भयवं, वंदंतु भो ! तुब्भे जइ सुहट्ठिणो आगच्छंतु, भो ! तुम्हाणं सव्वसंसयच्छेयगो परमेसरो दिट्ठुस्सं इअ भणंतो इत्थिआहिं समं वणं पत्तो, दिट्ठाइ सओ भणइ, अत्थि भद्दे ! कोवि एयारिसो तिहुअणजण-चमक्कारकरो, सव्वसुरिंदेहिं वंदिज्जमाणचलणो ? एवं जाव समूहं पासई अरिहंतं फुलुप्पलकमलनयणवयणो अहो ! मे पुण्णंकरो अज्ज फलं पत्तो, अहो ! मे अज्ज अमयघणो वुट्ठो, जेण वीयरागदंसणं जायं, एवं अभिणंदंतो पंचाभिगमपुव्वं तित्थयरचलणो वंदिऊण ठिओद्धुणंतो ताव चारित्तमोहस्स खओवसमेण जायविरइमइ भणइ, नाह ! असरणसरण ! महासत्थवाह ! भवसमुद्दनिज्जामय ! ममं सामाईअं उवदिसह, जेण कसायच्चाओ भवइ, एवं वुत्ते अरहंतेण सामाईअं दिण्णं, गहिअवओ समणो जाओ, ताव आउक्खयं जायं, मओ से कुमारसमणो, ता तस्स जणओ राया सपरिजणो आगओ, सुअं मयं पासिऊण विसन्नो जणणी विवलवंती रुयमाणी, सो सुभाणुजीवो झत्ति देवत्तं लहिऊण समागओ जिणचरणे, ता अम्मापियरो विलवंता पासिऊण भणइ, को एरिसो दुक्खो जं जिणचरणे परमसुहदायगे लहिऊण रुयसिं ? ते भणंति अम्हाणं सुओ परमवल्लहो वावन्नो । तस्स विओगो जाओ, सो दुक्खो दुस्सहो । ता सुरो भणइ राय ! भणसु तस्स सरीरं तुह इट्ठं जीवो वा ? जई जीवो इट्ठो ता अहं, कुणसु रागं, जई सरीरो इट्ठो ता कलेवरं रज्जह, कहयसि तुज्झ पुत्तत्तं कत्थ तणुसु जीवे वा ? ऊत यं इच्छति य(?) कहं रुयसि ? ता जणयो भणई, नो सो रागो उल्लसइ, ता सुरो भणइ मन्नणा चेव एसा, जं मे सुओ, इमा पिया, इमा जणणी, इच्चाई वियप्पा अवत्थुता तव रूवे सम्बन्धे कह मुच्छिया ? इय वयणेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिबुद्धा सव्वे पव्वज्जमागया, [1]इयलोगम्मि सम्बन्धो भमरूवो इति ।

**युष्माकं सङ्गमोऽनादि-[2]र्बन्धवोऽनियतात्मनाम् ।**
**ध्रुवैकरूपान् शीलादिबन्धूनित्यधुना श्रये ॥२॥**

युष्माकमिति- हे मातापितरौ ! हे बन्धवः ! युष्माकं सम्बन्धः अनादिसन्तत्या अनाद्यनियतात्मनामसंयतानां भवतीत्यर्थः । वा अनियतात्मनाम्-अनिश्चितस्वरूपाणाम् । मित्रं शत्रुर्भवति, शत्रुः पुनर्मित्रं भवति, अधुना ध्रुवा-निश्चिता, एकरूपा-नानाभावरहिता तान्, शीलादिबन्धून्-शील-सत्य-शम-दम-सन्तोषादिबन्धून् हितकारकान् नित्यं सदा श्रये हे साधक ! शुद्धात्मगुणरूपान् बन्धून् भज ॥ २ ॥

**कान्ता मे समतैवैका, ज्ञातयो मे समक्रियाः ।**
**बाह्यवर्गमिति त्यक्त्वा, धर्मसंन्यासवान् भवेत् ॥३॥**

कान्ता मे इति—तत्त्वज्ञानी [3]अभ्यन्तरसम्बन्धे रतिं करोति तदाह—मे-मम स्वरूपसाधनतत्परस्य समता एव एका कान्ता-वल्लभा भोगयोग्या, इत्यनेन तत्त्वावलम्बनीभूतानां समता वनिता, समक्रियाः-साधवः मे ज्ञातयः-स्वजना इति कृत्वा बाह्यवर्गं-पुत्रकलत्रादिकं त्यक्त्वा धर्मसंन्यासवान्-गृहस्थधर्मत्यागवान् भवेत् । औदयिकसम्पदां विहाय क्षयोपशमजां स्वीयां साधनसम्पदां भजति । अनादिपरसङ्गादि-[4]विभावसम्पदां गृह्णन् इच्छन् भुञ्जन् भवाटव्यां परिभ्रमति । स एव सम्यग्ज्ञानदर्शनेन चारित्रसाधनधर्मपरिणतो मोक्षसाधको भवति ॥३॥

**धर्मास्त्याज्याः सुसङ्गोत्थाः, क्षायोपशमिका अपि ।**
**प्राप्य चन्दनगन्धाभम्, धर्मसंन्यासमुत्तमम् ॥४॥**

धर्मास्त्याज्या इति—क्षायोपशमिकाः-भेदरत्नत्रयीरूपाः धर्माः सुसङ्गोत्थाः-सत्सङ्गदेवगुरुप्रसङ्गसम्भवाः अपि धर्मास्त्याज्याः । क्षमादिवचनरूपा धर्मादिनिमित्ताश्रिता यद्यपि अर्वाक्काले साधनरूपा अपि

---

१. इयलोगिग A.D. । २. बान्धवो B.1.2., V.1.2. । ३. आभ्यन्तर० A.D. । ४. प्रसङ्गा० V.2.,B.1., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्याज्याः । धर्मसंन्यासमुत्तमं क्षायिकाभेदरत्नत्रयीरूपं स्वधर्मपरिणामं सहजपरिणमनरूपं प्राप्य-लब्ध्वा । कथंभूतं धर्मसंन्यासं ? चन्दनगन्धाभं चन्दनगन्धतुल्यम्, तिलादौ हि सुगन्धता सङ्गसम्भवा पुष्पादिनिमित्त-सम्भवा, चन्दने सुगन्धता सहजरूपा तादात्म्यत्वेन-सहजेन उत्था-उत्पन्ना सहजोत्था । अनेन सहज एव आत्मनि धर्मपरिणामः स्वरूपत्वात् सहजः। स च अशुद्धतया आवृतत्वेन गुरुनिमित्तात् प्राग्भावं लभते । तत्र प्रथमं सविकल्पयुतजिज्ञासादिनिमित्तसापेक्षं[1] सम्यग्दर्शनादिकं प्रकटति । तेनैव वर्द्धमानेन निर्विकल्पमभेदरत्नत्रयीरूपं निमित्ताद्यपेक्षां विनाऽपि गुण-परिणामरूपं सहजधर्मपरिणामं परिणमयति तदा सविकल्पा साधना त्याज्या एव भवति । उक्तं च **योगदृष्टिसमुच्चये–**

**[28] द्वितीयाऽपूर्वकरणे प्रथमस्तात्त्विको भवेद् ।**

**(आयोज्यकरणादूर्ध्वम्, द्वितीय इति तद्विदः "॥१०॥)** इति"

तत्र सम्यग्लाभकाले प्रथमापूर्वकरणं क्षपकश्रेणिनिवृत्तिबादरगुण-स्थाने द्वितीयमपूर्वकरणम् । तत्र द्वितीये अपूर्वकरणे प्रथमः धर्मः अतात्त्विकः, स तात्त्विकः तत्त्वरूप एव भवति । भावना च यद्यपि क्षायोपशमिकाः सम्यग्दर्शनादिगुणाः अरिहन्त-(अर्हत्)प्रवचनादिस्व-जातिअबाधक-विजातिपरद्रव्यमवलम्ब्य प्रवर्त्तन्ते परावलम्बनेन अता-त्त्विकाः । तत्त्वं स्वस्वरूपं न तन्मया इति किन्तु अरिहन्तादि(अर्हदादि) गुणावलम्बिनः इति एष परानुयायिविषयाद्याश्रवपरिणतिपरित्यागेऽपि निर्विषय-निस्संग-तीर्थंकराद्यवलम्बनेऽपि परानुयायिताऽस्त्येव, इत्यनेन अतात्त्विकः[2], यस्य सम्यग्दर्शनादिगुणक्षयोपशमः स्वरूपनिर्धार-भासन-रमणात्मकः अन्यनिमित्ताद्यलम्बनम् ऋते स तात्त्विकः इति । अत्र रत्नत्रयीस्वरूपे वीतरागसर्वज्ञोक्तयथार्थतत्त्वार्थश्रद्धानं सम्यग्दर्शनम् । यथार्थतत्त्वावबोधो ज्ञानम् । [3]तत्त्वरमणं चारित्रमिति गुणत्रयीक्षयोपशमः ।

१. जिनाज्ञादि A.D., V.1. । २. अतात्त्विका B.1.2., V.2., S.M. । ३. यथार्थस्वतत्त्व० V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हद्वाक्याद्यवलम्बनेन [1]साधकत्वस्वगुणोऽपि क्रमकारणं करणाद् अतत्त्वं विकल्पपूर्वकमन्तर्मुहूर्त्तं यच्चोपादेयत्वेन स्वतत्त्वनिर्द्धार-भासन-रमणरूपं हेयबुद्ध्या [2]परभावत्यागनिर्द्धार-भासन-रमणयुक्तं रत्नत्रयीपरिणमनं भवति तद्भेदरत्नत्रयीरूपम्। यच्च सकलविभावहेयतयाप्यवलोकनादिरहितं विचारणस्मृति[3]ध्यानादिमुक्तमेकसमयेनैव सम्पूर्णात्मधर्मनिर्धार-भासन-रमणरूपं निर्विकल्पसमाधिमयमभेदरत्नत्रयीस्वरूपम्। उक्तं च **ध्यानप्रकाशे—**

**जो य वियप्पो चिरकालिओ, सपरोभयावलंबणे होइ ।**
**जट्ठि व्व पुरस्स चलणे, निमित्तगाही भवे भेई ॥१॥**

**एगसमएण नियवत्थुधम्मंमि जं गुणतिगं रमइ ।**
**परदव्वाणुवओगी निमित्तचाई अभेई सो ॥२॥**

ईदृग् अभेदरत्नत्रयीपरिणतेन भेदरत्नत्रयीपरिणामः सप्रयासः ससङ्करः त्यज्यत एव ॥४॥

**गुरुत्वं स्वस्य नोदेति, शिक्षासात्म्येन यावता ।**
**आत्मतत्त्वप्रकाशेन, तावत्सेव्यो गुरूत्तमः ॥५॥**

गुरुत्वमिति—यावता अस्य साधकस्य गुरुत्वं स्वस्य आत्मन एव न उदेति-न जायते, केन ? शिक्षासात्म्येन-स्वयमेव स्वस्य शिक्षादायकः न भवति । पुनः केन ? आत्मतत्त्वप्रकाशेन-आत्मधर्मप्राग्भावेन संशय-विपर्ययरहितशुद्धात्मतत्त्वप्रकाशकः यावन्न भवति तावदयं उत्तमः-स्वपरोपकारी रत्नत्रयीपरिणतः द्रव्यभावगुरुगुणोपेतः गुरुः तत्त्वकथकः सेव्यः । हे गुरो ! अतीतानन्तकालाप्राप्तं स्वात्मधर्मनिर्द्धार-भासन-रमणं तत्तवोपदेशाञ्जनेन प्राप्तमात्मानुभवसुखं भुक्तम्, अहो ! गुरूणां कृपा, यया परमामृतास्वादनं भवति । अतः यावद् न पूर्णानन्दः तावत् तव चरणौ शरणम् । उक्तं चः—

१. साधकस्व० A.D., V.1., । २. परभावात्याग B.1.2., A.D., S.M. । ३. ज्ञानादि V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[29] *नाणस्स होई भागी, थिरयरो दंसणे चरित्ते अ ।**
**धन्ना आवकहाए, गुरुकुलवासं न मुंचंति ॥१॥**

[बृ०क०भा० गा० ५७१३]

अत एव परित्यज्य चक्रवर्त्तित्वम् इभ्यश्रेष्ठित्वम्, ग्रहन्ति श्रमणत्वम्, सेवन्ते गुरुचरणारविन्दान् तत्त्वजिज्ञासापटवः ॥५॥

**ज्ञानाचारादयोऽपीष्टाः, शुद्धस्वस्वपदावधि ।**
**निर्विकल्पे पुनस्त्यागे, न विकल्पो न वा क्रिया ॥ ६ ॥**

ज्ञानाचारा० इति—ज्ञानाचारादयः कालविनयादि-निःशङ्कादि-समितिगुप्त्यादयः आचाराः, आचर्यन्ते गुणवृद्धये ते आचाराः । शुद्धस्वस्वपदावधि-शुद्धः स्व इति स्वकः तस्य पदस्य अवधिः मर्यादा तावद् इष्टाः, शुभोपयोगदशायां सविकल्पतां यावद् आचाराः इष्टाः वल्लभाः, यदा निर्विकल्पे चिन्तनारहिते त्यागे विकल्पः न । इदं त्याज्यम् इदं ग्राह्यमिति विकल्परहिते त्यागे निष्प्रयासस्वरूपैकत्वरूपे विकल्पचिन्तना न, क्रिया बलवीर्यादिरूपापि न, तत्र स्वरूपावलम्बिगुणवर्त्तने[1] वीर्यस्य स्वक्षेत्रावगाढत्वेन न चलनता परभावग्रहणे तु परग्राहकत्वेनोन्मुखवीर्यप्रवृत्तौ कार्याभ्यासतः विषमीकृतवीर्यत्वेन चलनारूपा क्रियाऽस्ति । अतः स्वरूपमग्नानां स्वस्वप्रदेशव्याप्तगुणानां तत्प्रदेशगतवीर्यसहकारवृत्त्या प्रदेशान्तरागमनरूपा वीर्यचलनक्रिया न । क्रिया द्विधा, बाधका साधका चैव । तत्र मिथ्यात्वासंयमकषायप्रेरितचेतनापरिणामाः पराभिलाषकत्वेन परग्रहणाय प्रेरयन्ति वीर्यं सा अभ्यन्तरा,[2] कुदेवसेवनादिरूपा बाह्यक्रिया बन्धहेतुत्वेन बाधका भण्यते । या तु शुद्धदेवगुरुसेवनाश्रवनिरोधसंवरपरिणमनरूपा कर्मबन्धरोधरूपा साधका उक्ता । निर्विकल्पे ध्यानसमाधौ बाधकक्रिया भावसाधकबाह्य-

---

★ पञ्चा० ११।१६, पञ्चव० गा० १३५८, उपदे०प०प्र० गा० ६८२, निशीथभा० गा० ५४५७, विशेषाव० गा० ३४५९ उप०मा० गा० ३४१, यतिल०समु०गा० १३९, विधिप्र० २७।१४ । १. प्रवर्तने A.D. V.1. । २. आभ्यन्तरा A.D. V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियाभावः गुणानुयायिवीर्यपरिणमनरूपा अभ्यन्तरा क्रियाऽस्ति, तथापि ग्रहणत्यागरूपक्रियाऽभावेन क्रिया नेत्युक्तम् ॥६॥

**योगसंन्यासतस्त्यागी, योगानप्यखिलांस्त्यजेत् ।**
**इत्येवं निर्गुणं ब्रह्म, परोक्तमुपपद्यते ॥७॥**

योगसंन्यासत इति—त्यागी-बाह्याभ्यन्तरसमस्तपरभावत्यागी, योग-संन्यासतः-योगरोधनतः, आवर्जीकरणात् ऊर्ध्वमखिलान्-समस्तान् योगान्-वीर्यपरिस्पन्दरूपान् त्यजेत् अयोगी भवति। इति समस्तयोगरोधेन परोक्तं-परैः-उत्कृष्टैः सर्वज्ञैः उक्तं-निवेदितम् । निर्गुणं-योगादिरहितं सत्त्वरजस्तमोरूपगुणरहितम्, ब्रह्म-आत्मस्वरूपम् उपपद्यते-शुद्धचिन्मयं निष्पद्यते ॥७॥ योगरोधस्वरूपं च वस्तुत इति सांसर्गिकगुणरहितः इति कथनेन [१]आत्मा सदैव निर्गुणः इति निवारयन्नाह-

**वस्तुतस्तु गुणैः पूर्णमनन्तैर्भासते स्वतः ।**
**रूपं त्यक्तात्मनः साधोर्निरभ्रस्य विधोरिव ॥८॥**

॥ इति त्यागाष्टकम् ॥ ८ ॥

वस्तुत इति—वस्तुतः-पदार्थमूलस्वरूपेण, शुद्धः आत्मा स्वतः-स्वस्वभावेन अनन्तैः गुणैः पूर्णः भासते सम्यग्ज्ञानदर्शनचारित्रतपोरूपेण साधनपरिणमनेन अनादिसङ्गीभावपरित्यागेन स्वरूपभासनरमणानुभवनेन अभिनवकर्माऽग्रहणस्वरूपैकत्वतन्मयध्यानतः पूर्वकर्मक्षरणेन अयमात्मा शुद्धः सकलपुद्गलोपाधिरहितो यदा भवति, तदा ज्ञानदर्शनचारित्र-वीर्यागुरुलघु-अव्याबाधासङ्गामूर्त्तपरमदानलाभभोगोपभोगाक्रियसिद्ध-त्वाद्यनन्तैः स्वासङ्ख्येयप्रदेशव्याप्यव्यापकैः गुणैः पूर्णः भासते-राजते इत्यर्थः । [२]किमिव ? त्यक्तात्मनः-त्यक्तं परभावे आत्मत्वं येन सः [३]त्यक्तात्मा तस्य त्यक्तात्मनः, साधोः-मोक्षपदसाधकस्य रूपं निरभ्रस्य-मेघपटलरहितस्य, विधोः-चन्द्रस्य, इव रूपं भासते । यथा अभ्रहीन-

१. मा आत्मा A.D. V.1., B.1. । २. कमिव S.M. B.1.V.2 । ३. एष पाठो नास्ति S.M. B.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रस्वरूपं निर्मलं भवति । तथा ज्ञानावरणाद्यभ्ररहितस्य शुद्धात्मनः स्वरूपं निर्मलं भवति । अत एव बाधकपरिणतिहेतुतां संत्यज्य साधकत्वमवलम्ब्य साधकत्वेऽपि विकल्परूपार्वाचीनापवादसाधनां त्यजन्, उत्सर्गसाधनां गृह्णन्, पुनः (तामेव) त्यजन् पूर्णगुणावस्थां श्रयन् एवमनुक्रमेण त्यागयोग्यं त्यजन् आत्मा सकलसंसर्गभावनिरावरणेन निर्मल-निष्कलङ्कासङ्ग-सर्वावरणरहितः सच्चिदानन्दरूपः आत्मात्यन्तिकैकान्तिक-निर्द्वन्द्व-निष्प्रयास-निरुपचरितसुखपूर्णो भवति । अतः सम्यग्ज्ञानबलेन हेयोपादेयविवेचनं कृत्वा समस्तहेयभावत्यागवत्तया भवितव्यम् । त्यागो हि निर्जरामूलम् । परभावग्रहणमेवात्माहितम् । अतस्त्यागः करणीय एव आत्मस्वरूपाभिलाषुकैः ॥८॥

**॥ इति व्याख्यातं त्यागाष्टकम् ॥८॥**

## ॥ अथ क्रियाष्टकम् ॥९॥

परभावत्यागकरणमेव साधका क्रिया, अतः क्रियाष्टकं निरूप्यते । क्रियते आत्मकर्तृत्वेन सा क्रिया, कर्तुः द्रव्यस्य प्रवृत्तिः । स्वरूपाभिमुखदर्शनज्ञानोपयोगता ज्ञानम्, स्वरूपाभिमुखवीर्यप्रवृत्तिः क्रिया, एवं "ज्ञानक्रियाभ्यां मोक्षः," तत्र ज्ञानं-स्वपरावभासनरूपम्, क्रिया-स्वरूपरमणरूपा । तत्र चारित्रवीर्यगुणैकत्वपरिणतिः क्रिया, सा साधका। अत्र अनादिसंसारे अशुद्धकायिक्यादिक्रियाव्यापारनिष्पन्नः संसारः । स एव विशुद्धसमितिगुप्त्यादिविनयवैयावृत्त्यादिसत्क्रियाकरणेन निवर्तते । अतः संसारक्षपणाय क्रिया संवरनिर्जरात्मिका करणीया । नामस्थापना सुगमा । द्रव्यक्रिया शुद्धा अशुद्धा च । तत्र शुद्धा स्वरूपानुयायियोगप्रवृत्तिरूपा । अशुद्धा कायिक्यादिव्यापाररूपा । भावक्रिया-वीर्यप्रवृत्तिरूपा । पुद्गलानुयायि-औदारिकादिकायव्यापारसन्मुखा अशुद्धा । शुद्धा पुनः स्वगुणस्वपरिणमनत्वनिमित्तवीर्य[१]व्यापाररूपा क्रिया भावक्रिया । तत्र क्रियासङ्कल्पः नैगमेन । सङ्ग्रहेण सर्वे संसारजीवाः

१. व्यापारपररूपा V.1. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सक्रिया उक्ता: । व्यवहारेण शरीरपर्याप्त्यनन्तरं क्रिया । ऋजुसूत्रनयेन कार्यसाधनार्थं योगप्रवृत्तिमुख्यवीर्यपरिणाम[१]रूपादिक्रिया । शब्दनयेन वीर्यपरिस्पन्दात्मिका । [२]समभिरूढेन गुणसाधनारूपसकलकर्त्तव्य-व्यापाररूपा । एवंभूतनयेन तत्त्वैकत्ववीर्यतीक्ष्णतासाहाय्यगुणपरिणमन-रूपा । अत्र साधकस्य साधनक्रियाया अवसर: नाणचरणेण मुक्खो । तेन चरणगुणप्रवृत्तिस्वरूपग्रहणपरभावत्यागरूपा क्रिया मोक्षसाधका । अतो ज्ञाततत्त्वेन तत्त्वसाधनार्थं सम्यक्क्रिया करणीया । तदुपदेश:- क्षायिकसम्यक्त्वं यावद् निरन्तरं नि:शङ्काद्यष्टदर्शनाचारसेवना, केवलज्ञानं यावत् कालविनयादिज्ञानाचारता, निरन्तरं यथाख्यातचारित्रादर्वाक् चारित्राचारसेवना, परमशुक्लध्यानं यावत् तपआचारसेवना, सर्वसंवरं यावत् [३]वीर्याचारसाधनाऽवश्यंभावा, न हि पञ्चाचारमन्तरेण मोक्षनिष्पत्ति:। दर्शनाद् हि स्वगुणानां प्रवृत्ति: क्रिया दर्शनादिगुणविशुद्ध्यर्थं "[४]सन्नि-मित्तमवलम्ब्य प्रवर्त्तनम् आचार:" गुणपूर्णतानिष्पत्ते: अर्वाक् आचरणा करणीया । आचरणातो गुणनिष्पत्तिर्भवत्येव । पूर्णगुणानां तु आचरणा परोपकारायेति सिद्धम् । अत एव उच्यते:—

**ज्ञानी क्रियापर: शान्तो, भावितात्मा जितेन्द्रिय: ।**
**स्वयं तीर्णो भवाम्भोधे:, [५]परं तारयितुं क्षम: ॥१॥**

ज्ञानी क्रियापर इति—ज्ञानी-यथार्थतत्त्वस्वरूपावबोधी, यदा क्रिया-साधनकारणानुयायियोगप्रवृत्तिरूपा, स्वगुणानुयायिवीर्यप्रवृत्तिरूपा तस्यां तत्पर:-उद्यत:, पुन: शान्त:-कषायतापरहित:, भावितात्मा-भावित:-शुद्धस्वरूपरमणमय: आत्मा यस्य स: भावितात्मा, जितेन्द्रिय:-पराजितेन्द्रियव्यापार:, भवाम्भोधे:-भवसमुद्रात् स्वयं तीर्ण:-पारंगत:, परम्- आश्रितम्, उपदेशदानादिना तारयितुं क्षम:-समर्थो भवति । यो हि सम्यग्दर्शनज्ञानचारित्रपरिणत: आत्मारामी आत्मविश्रामी आत्मानु-

१. रूपाक्रिया V.1.2., B.1.2., A.D., L.D.1.2.3 । २. समभिरूढनयेन L.D.1.3 । ३. वीर्याचारस्य L.D.1.3 । ४. तन्नि० L.D.1.3 । ५. परांस्ता० V.2., B.1.2.,S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवमग्नः स स्वयं संसारात् निवृत्तः तत्सेवनापरान् निस्तारयति । अत्र द्रव्यज्ञानं-भावनारहितं वचनव्यापारमनोविकल्परूपं संवेदनज्ञानं यावत्, तच्च भावज्ञानं (ज्ञानस्य) तत्त्वानुभवरूपोपयोगस्य कारणम्, द्रव्यक्रिया योगव्यापारात्मिका, सापि भावक्रिया(याः) स्वगुणानुयायिस्वगुणप्रवृत्ति-रूपायाः [१]कारणम्, अत्र 'ज्ञानस्य फलं विरतिः' तेन ज्ञानं विरति-कारणम् । 'उक्तं च—**तत्त्वार्थटीकायां-''दर्शनज्ञाने चारित्रस्य कारणम्, चारित्रं मोक्षकारणम्''** । **उत्तराध्ययने**ऽपिः—

**[30] ★नादंसणिस्स नाणं, नाणेण विना न हुंति चरणगुणा ।**
**अगुणिस्स नत्थि मुक्खो, नत्थि अमुक्खस्स निव्वाणं ॥३०॥**

इति ॥ १ ॥ [अध्य० २८, गा० ३०]

अतो ज्ञानं क्रियायुक्तं हिताय नैकमेवेत्याह-

**क्रियाविरहितं हन्त ! ज्ञानमात्रमनर्थकम् ।**
**गतिं विना पथज्ञोऽपि, नाप्नोति पुरमीप्सितम् ॥२॥**

क्रियाविरहितं हन्त इति- क्रियाविरहितं-क्रिया-साधनप्रवृत्तिरूपा तया विरहितं ज्ञानमात्रं-संवेदनज्ञानम् अनर्थकं-न मोक्षरूपकार्यसाधकम्। तत्र दृष्टान्तः-पथज्ञोऽपि-मार्गज्ञातापि, गतिं विना-चरणविहारक्रियां विना ईप्सितम्-इच्छितं पुरं-नगरं न आप्नोति-न प्राप्नोति, चरणचंक्रमणेनैव ईप्सितनगरप्राप्तिः इति 'नाणचरणेण मुक्खो' इति वचनात् ।

**[31] सण्णाणनाणोवगए महेसी, अणुत्तरं चरिउं धम्मसंचयं ।**
**अणुत्तरे णाणधरे जसंसी, ओभासइ सूरिए वंतलिक्खे ॥२३॥**

इति **उत्तराध्ययने** ॥ २ ॥ [अध्य-२१ गा० २३]

पुनस्तदेव द्रढयन्नाह—

**स्वानुकूलां क्रियां काले, ज्ञानपूर्णोऽप्यपेक्षते ।**
**प्रदीपः [२]सप्रकाशोऽपि, तैलपूर्त्यादिकां यथा ॥३॥**

★चंदाविज्झयं पय० गा० ७६। १. करणम् L.D.1.3 । २.स्वप्र० V.2.विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वानुकूलामिति–ज्ञानपूर्णोऽपि–स्वपरविवेचनविशिष्टोऽपि, काले–अवसरे कार्यसाधनक्षणे, स्वानुकूलां–तत्कार्यकरणरूपां क्रियामपेक्षते, तत्त्वज्ञानी सम्यग्ज्ञानी प्रथमं संवरकार्यरुचिः [१]देशविरतिसर्वविरतिग्रहण–रूपां क्रियामाश्रयति, पुनः चारित्रयुक्तोऽपि तत्त्वज्ञानी केवलज्ञानकार्य–निष्पादनरसिकः शुक्लध्यानारोहरूपां क्रियामाश्रयति । केवलज्ञानी सर्वसंवरपूर्णानन्दकार्यावसरे योगरोधरूपां क्रियां करोति । अत एवोच्यते ज्ञानी क्रियामपेक्षते, एवं तदर्थमेव आवश्यककरणं मुनीनाम् । तत्र दृष्टान्तः यथा प्रदीपः [२]सप्रकाशोऽपि तैलपूर्त्यादिकां क्रियामपेक्षते एवं सम्यग्ज्ञानी अपि क्रियारङ्गी भवति । क्रिया हि वीर्यशुद्धिहेतुः । अशुद्ध–वीर्यविहिताश्रवः संसरति संसारे । स एव गुणिसेवनगुणप्राग्भावोद्यतः संवरीभवति । कर्मप्रदेशग्रहणं [३]योगैः । योगाः वीर्यप्रभवाः । तेन योगाः परमात्मवन्दनस्वाध्यायाध्ययनादियोजिताः न कर्मग्रहणाय भवन्ति । योगानां सत्प्रवृत्तिः क्रिया इति ॥३॥

**बाह्यभावं पुरस्कृत्य, ये क्रियां व्यवहारतः ।**
**वदने कवलक्षेपम्, विना ते तृप्तिकाङ्क्षिणः ॥४॥**

बाह्यभावमिति–बाह्यभावं–बाह्यत्वम्, पुरस्कृत्य–अङ्गीकृत्य, ये–नराः असेवितगुरुचरणाः, व्यवहारतः क्रियां निषेधयन्ति "किं बाह्य–क्रियाकरणेन" ? इत्युक्त्वा क्रियोद्यमं मन्दयन्ति ते नरा वदने मुखे कवलक्षेपं विना तृप्तिकाङ्क्षिणः–तृप्तिवाञ्छका इति ॥४॥

**गुणवद्बहुमानादेर्नित्यस्मृत्या च सत्क्रिया ।**
**जातं न पातयेद् भावमजातं जनयेदपि ॥५॥**

[४]गुणवद्बहुमानादेरिति–सम्यग्दर्शनज्ञानचारित्रक्षमामार्दवार्जवादिगुण–वन्तः तेषां बहुमानं स्वतोऽधिकगुणवतां बहुमानम्, आदिशब्दात् दोष–पश्चात्तापः पापदुर्गञ्छाऽतिचारालोचनं देवगुरुसाधर्मिकभक्तिः उत्तर–

१ दिग्वि० S.M. विना । २. स्वप्र० V.2., विना । ३. योगे S.M. । ४. गुणवदिति L.D.1.2.3 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणारोहणादिकं सर्वं ग्राह्यम् । च पुनः नित्यस्मृतिः पूर्वगृहीतव्रत-स्मरणम्, अभिनवप्रत्याख्यान-सामायिक-चतुर्विंशतिस्तव-गुरुवन्दन-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानादीनां नित्यस्मृत्या सत्क्रिया भवति । अत्र गाथा **श्रीहरिभद्रपूज्यैः विंशतिकायाम्—**

[32] **★तम्हा णिच्चसइए बहुमाणेणं च अहिगयगुणिंमि ।**
**पडिवक्खदुगंछाए, परिणइआलोयणेणं च ॥३६॥**

**तित्थंकरभत्तीए, सुसाहुजणपज्जुवासणाए य ।**
**उत्तरगुणसद्धाए, इत्थ सया होइ जइयव्वं ॥३७॥**

**एवमसंतो वि, इमो जायइ जाओवि न पडइ कयाइ ।**
**ता एत्थं बुद्धिमया, अपमाओ होइ कायव्वो ॥३८॥**

[पञ्चा०प्र० पञ्चा० १ गा० ३६-३७-३८]

[33] **सुहपरिणामो निच्चं, चउसरणगमाइ आयरं जीवो ।**
**कुसलपयडीउ बंधइ, बद्धाओ सुहाणुबंधाओ ॥५९॥**

[चउसरणपयन्नो गा० ५९]

इत्यादिक्रियाजातमुत्पन्नं भावं सम्यग्ज्ञानादिसंवेगनिर्वेदलक्षणं न पातयेत्। अपि च न जातं धर्मध्यानशुक्लध्यानादिकं भावमजातमपि-अनुत्पन्नमपि जनयेत्-निष्पादयेत् । श्रेणिक-कृष्णादीनां गुणिबहुमानेन, मृगावत्याः पश्चात्तापेन, आलोचनेन अतिमुक्तनिर्ग्रन्थस्य, गुरुभक्त्या चण्डरुद्रशिष्यस्य, इत्याद्यनेकवाचंयमानां परमानन्दनिष्पत्तिः श्रूयते आगमे ॥५॥

**क्षायोपशमिके भावे, या क्रिया क्रियते तया ।**
**पतितस्यापि तद्भाव-प्रवृद्धिर्जायते पुनः ॥६॥**

क्षायोपशमिके इति—चारित्रानुगवीर्यक्षयोपशमे जाते या क्रिया वन्दन-नमनादिका क्रियते तया क्रियया पतितस्यापि-गुणपराङ्मुखस्यापि जीवस्य

---

★ श्रावकप्रज्ञप्तिः गा० १०४-५-९, श्रावकधर्मविंशिका गा० ८-९-१०, श्रावकधर्मविधिः गा० १०६-१०७-१०८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः तद्भावप्रवृद्धिः-सम्यग्ज्ञानादिगुणभावप्रवृद्धिः जायते। उक्तं च–

**[34] खओवसमिगभावे, दढजत्तकयं सुहं अणुट्ठाणं ।**
**परिवडियं पि हु जायइ, पुणोवि तब्भाववुड्ढिकरं ॥१॥**

[पञ्चा०प्र० पञ्चा०३, गा० ३४]

औदयिकभावेऽपि क्रिया भवति, सा न तादृग्गुणवृद्धिकरी । औदयिकीक्रिया च **[35]** उच्चैर्गोत्रसुभगादेययशःनामकर्मोदयेन अन्तरायोदयेन उच्चैर्गोत्रोदयेन च तपःश्रुतादिलाभः **प्रज्ञापना**सूत्रतः [प्रज्ञा०सू० प०२३, सू०२९२] ज्ञेय इति । ज्ञानावरण-दर्शनावरण-दर्शनमोह-चारित्रमोहान्तरायक्षयोपशमतः शुद्धधर्मप्राग्भावार्थं या क्रिया क्रियते सा आत्मगुणप्रकाशकरी भवति ॥६॥ पुनस्तदेव दर्शयति–

**गुणवृद्ध्यै ततः कुर्यात्, क्रियामस्खलनाय वा ।**
**एकं तु संयमस्थानम्, जिनानामवतिष्ठते ॥७॥**

गुणवृद्ध्यै इति–ततः स्वधर्मप्राग्भावहेतुत्वात् क्रियां-सत्प्रवृत्तिं कुर्यात् । किमर्थम् ? गुणवृद्ध्यै । गुणाः-ज्ञानादयः तेषां वृद्धिः तस्यै, गुणप्रोल्लासार्थमिति । न [१]ह्याहारादिपञ्चदशसंज्ञानिमित्तम् । पुनः अस्खलनाय-अप्रतिपाताय क्रियारहितः साधकत्वे अवस्थातुमशक्तः, यतो वीर्यस्य चापल्यं तच्च क्रियावतः सत्क्रियानियुक्तं प्रतिपाताय न भवति । अन्यथा चानादिप्रवृत्तिप्रवृत्तः स्खलनाय भवति । क्रिययोत्तरोत्तरस्थानारोहणं च श्रूयते आगमे । तथा च एकमप्रतिपातिसंयमस्थानं जिनानां क्षायिकज्ञानचारित्रवतामेकं पूर्णस्वरूपैकत्वरूपं स्थानमवतिष्ठते नान्यस्य । अतः साधकेनाभिनवगुणवृद्ध्यर्थं क्रिया करणीया । अत एव वनं निवसन्ति निर्ग्रन्थाः । चैत्ययात्राद्यर्थं गच्छन्ति नन्दीश्वरादिषु । कायोत्सर्गयन्ति शरीरम्, आकुञ्चन्ति विग्रहं [२]वीरासनेन । संलेखयन्त्यनशनोत्सुकाः, गृह्णन्ति परिहारविशुद्धि-जिनकल्पाद्यभिग्रहव्यूहम् ॥७॥

---

१. त्वा L.D.1.2.3 । २. स्थैर्या० V.2., धीरा० B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ विषाद्यनुष्ठानादूषिता न तु सानुष्ठाना । सानुष्ठाना हि क्रिया भवहेतुरेव । तेन या क्रिया साधनहेतुः, सा (ताम्) एव आह-

**वचोऽनुष्ठानतोऽसङ्गा, क्रिया सङ्गतिमङ्गति ।**
**सेयं ज्ञानक्रियाभेद-भूमिरानन्दपिच्छला ॥८॥**

॥ इति क्रियाष्टकम् ॥९॥

वचोनुष्ठानत इति—वचनमर्हदाज्ञा, तदनुयायिनी क्रिया धर्महेतुः । यतः-

**प्रशान्तचित्तेन [१]गभीरभावेनैवादृता सा सफला क्रिया च ।**
**अङ्गारवृष्टेः सहसा न चेष्टा, नासङ्गदोषैकगुणप्रकर्षा ॥१॥**

विष-गराऽन्योन्यानुष्ठानत्यागेन श्रीमद्वीतरागवाक्यानुसारतः उत्सर्गापवादसापेक्षरूपा क्रिया वचनानुष्ठानक्रियाकरणतः असङ्गक्रियासङ्गतिं संयोगितामङ्गति-प्राप्नोति । वचनक्रियावान् अनुक्रमेणासङ्गक्रियामेति निर्विकल्पनिष्प्रयासरूपां क्रियां प्राप्नोति । सा एव- असङ्गक्रिया एव ज्ञानक्रिया । [२]एवमभेदभूमिः ज्ञेया । असङ्गक्रिया भावक्रिया शुद्धोपयोगे[३] शुद्धवीर्योल्लासतादात्म्यतां दधाति । ज्ञानवीर्यैकत्वं ज्ञानक्रियाऽभेदः इत्यनेन यावद् गुणपूर्णता न, तावत् निरनुष्ठाना क्रिया करणीया । नहि तत्त्वज्ञाः क्रियानिषेधकाः, किन्तु [४]क्रिया हि शुद्धरत्नत्रयीरूपवस्तुधर्मसाधने कारणम्, न धर्मः । धर्मत्वम् आत्मस्थमेव । उक्तं च **श्रीहरिभद्रपूज्यैः दशवैकालिकवृत्तौ**- "धर्मसाधनत्वाद् धर्म इति" । अतः द्रव्यक्रियां धर्मत्वेन गृह्णन्ति तत्कारणे कार्योपचार एव, नान्यः । एतच्छ्रद्धानविकलानां क्रिया न धर्महेतुः ।

[36] **बहुगुणविज्जानिलओ, उस्सुत्तभासी तहावि मुत्तव्वो ।**
**जह वरमणीजुत्तो वि हु, विग्घकरो विसहरो लोए ॥१८॥**

इति **षष्टिशतकप्रकरणे**, [गा०१८] । तथा च **आचाराङ्गे** "भय-

---

१. गम्भी० V.1.2., B.1.2. । २. अभेद० V.1.2., B.1.2., S.M. । ३. योग० V.1.,B.1.2.,A.D.,L.D.1.3, योगः V.2.। ४. क्रियादि B.2.,V.1.,A.D.,S.M.,L.D.1.2.3 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचिकित्सायां न संयम'' इति । अतः निमित्तहेतुत्वेन क्रिया निरनुष्ठाना करणीया । इयमसङ्गक्रिया, सा आनन्दपिच्छला स्वाभाविकानन्दामृतरसार्द्रा, अतः आत्म[१]तत्त्वावबोधानन्दो[२]त्सुकैर्निरनुष्ठाना सत्प्रवृत्त्यसत्प्रवृत्तिपरित्याग-रूपा क्रिया द्रव्यतो, भावतः स्याद्वादस्वगुणानुयायिवीर्यप्रवृद्धि-अभिनव-गुणवृद्धिरूपा संयमस्थानारोहणी[३] तत्त्वैकत्वरूपा क्रिया प्रतिसमयं करणीया, साध्यसापेक्षत्वेन, अत एव ''**ज्ञानक्रियाभ्यां मोक्ष**'' इति निर्द्धारणीयम् । द्रव्यक्रियोद्यतो भावक्रियावान् भवति । ततश्च स्वरूपास्पदीभवतीति श्रेयः ॥८॥

## ॥ इति क्रियाष्टकम् ॥९॥

## ॥ अथ तृप्त्यष्टकम् ॥

क्रियावन्तो हि कदाचिन्मदलोभाविष्टाः सदभ्यासं निष्फलीकुर्वन्ति, तेन कषायत्यागरूपपूर्वकं स्वरूपभोगोत्पन्नतृप्तिरूपमष्टकं निरूप्यते । तत्र तृप्तिर्नामादिभेदाच्चतुर्धा—तत्र नामतृप्तिः जीवस्य अजीवस्य(वा) तृप्तिरिति नाम क्रियते, शब्दोच्चारणरूपा वा, स्थापनातृप्तिः अक्षर-न्यासरूपा, द्रव्यतृप्तिः आगमतः तत्पदार्थज्ञोऽनुपयुक्तः नोआगमतो ज्ञशरीरभव्यशरीरतद्व्यतिरिक्तभेदात्, तत्र तद्व्यतिरिक्ता द्रव्येण आहार-धनोपकरणा तृप्तिः, भावतृप्तिः आगमतः तत्पदार्थज्ञोपयुक्तस्य, नोआग-मतः स्वरूपज्ञानानन्दपूर्णस्य सहजात्मानुभवाविच्छिन्नस्य भवति । नैगमे जीवाजीवात् तृप्तिः, संग्रहव्यवहाराभ्यां ग्रहणयोग्य[४]द्रव्यप्राप्तौ, ऋजुसूत्रेण ईप्सितसंपत्तौ, शब्दादिनयैस्तु स्वस्वरूपनिरावरणपूर्णाविघ्नभोक्तृत्वेन तृप्तिः । इयं च पद्धतिः **[37]ओघनिर्युक्तिवृत्ति**गताहिंसानयवद्भावनीया । [ओघ०नि०गा०७५५] अत्र कारणतो नामादिनिक्षेपत्रिकनैगमादिनयसत्का वस्तुतः भावनिक्षेपशब्दादिनयरूपा एव ग्राह्या, सा च साधनकालेऽपवा-दोद्भवा सिद्धत्वे तूत्सर्गोद्भवा ग्राह्या । तामेवाह–

---

१. तत्त्वाव्याबाधा० S.M. विना । २. दोच्छकैः S.M. विना, दोच्चकैः L.D.1।
३. रोहण० A.D., B.1. V.1., L.D.1. । ४. द्रव्याप्राप्तौ B.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पीत्वा ज्ञानामृतं भुक्त्वा, क्रियासुरलताफलम् ।**
**साम्यताम्बूलमास्वाद्य, तृप्तिं याति परां मुनिः ॥१॥**

पीत्वा ज्ञानामृतमिति—मुनिः-सावद्याभाषी स्वात्मावलोकनलीनः, पराम्-उत्कृष्टां लौकिककुप्रावचनिकेतराम्, तृप्तिं-सन्तोषावस्थाम्, याति-प्राप्नोति लभते इत्यर्थः । किं कृत्वा ? ज्ञानामृतं- ज्ञानं-यथार्थस्वपर-पदार्थस्वरूपावभासनरूपं तदेवामृतं पीत्वा शुद्धात्यन्ताविच्छिन्नचिद्धारा-परीक्षितहेयोपादेयवस्त्ववलोकनोपयोगं पीत्वा, क्रिया-सद्योगप्रवृत्तिः । तत्त्वप्राग्भाव-विभावाभावभावितचेतनाश्रद्धानपूर्वका या वीर्यप्रवृत्तिः सा एव सुरलता-कल्पवल्ली तस्याः फलं स्थिरत्वेन [१]तत्त्वानुभवलक्षणं भुक्त्वा साम्यं-समता, शुभाशुभेषु पुद्गलादिषु तुल्यत्वं तदेव ताम्बूलं स्वादिमोपमानमास्वाद्य, मुनिः परामुत्कृष्टां तृप्तिं याति इत्यन्वयः । सांसारिकोपाधिपुद्गलोद्भवविभावभावितात्मनोऽनादिमिथ्याज्ञानासत्क्रिया-रक्तद्विष्टतासक्ताः जगदुच्छिष्टाभोग्यवर्णाद्यनुभवमग्नत्वेन या आरोपजा तृप्तिः न सा तृप्तिः, यतः तत्प्राप्तावपि तृष्णा प्रगुणीभवति, तेन न तृप्तिः, स्वतत्त्वानन्दभोगेनैव तृप्तिः । अत एव सत्पुरुषास्त्यजन्ति दामिनीचलान् कामिनीविलासान्, [२]हीलयन्ति उदयागतान् सद्विपाकान्, निःसङ्गयन्ति रङ्गाभिष्वङ्गिसङ्गसङ्गान्, विरङ्गयन्ति अङ्गरागान्, [३]वसन्ति स्वाध्यायाध्ययनेन तत्त्वश्रवण-मनन-निदिध्यासन-परिशीलनेषु, धन्यां मन्यन्ते परमात्मावस्थामिति ॥१॥

पुनरपि नित्यां तृप्तिं व्याख्यातुमाह—

**स्वगुणैरेव तृप्तिश्चेदाकालमविनश्वरी ।**
**ज्ञानिनो विषयैः किं तै-र्यैर्भवेत्तृप्तिरित्वरी ॥२॥**

स्वगुणैरिति चेत्-यदि स्वगुणैः-[४]चैतन्यस्य स्वद्रव्य-स्वक्षेत्र-स्व-काल-स्वभावभूतैः अमूर्त्ताऽसङ्गाऽनाकुलचिदानन्दरूपैः । एव-अन्य-

---

१. स्वानु० L.D.1 । २. हेल० V.1., L.D.1 । ३. विशन्ति L.D.1 । ४. चेतनस्य S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगव्यवच्छेदार्थः, तृप्तिः ज्ञानिनः-सम्यगवबुद्धतत्त्वस्य-तैः, स्पर्श-रस-वर्ण-गन्ध-शब्दैः किम् ? न किमपि । यः स्वरूपानुभवी स विभावहेतुभूतान् इन्द्रियविषयान् नावगच्छति । कथंभूता स्वगुणैः तृप्तिः? आकालं सर्वमप्यनागतकालमविनश्वरी-विनाशरहिता, सहजत्वेन नित्या इत्यर्थः । स्पर्शज्ञानवतो यैः-शब्दादिभिः इत्वरी-अल्पै[1]कालीया औपचारिकी तृप्तिर्भवेत् तैः-विषयैः परविलासैः किम् ? न किमपि । परविलासाः बन्धहेतवः एव । अत्र भावना—अनेकशो भुक्ता एते, तथापि नाप्तमात्मस्वरूपम्, न च ते सुखहेतवः, किन्तु सुखत्वबुद्धिरेव कृतकाः, तेन तद्विषयाभिमुखतैव न स्वरूपरसिकानामतः आत्मगुणैस्तृप्तिर्विधेया ॥२॥ तामेव भावयति-

**या शान्तैकरसास्वादाद्, भवेत्तृप्तिरतीन्द्रिया ।**
**सा न जिह्वेन्द्रियद्वारा, षड्रसास्वादनादपि ॥३॥**

या शान्तैकेति- या अतीन्द्रिया-इन्द्रियविषयग्रहणरहिता आत्मज्ञानभोक्तृत्ववेद्या स्वरूपानुभवलक्षणा तृप्तिः, शान्तैकरसास्वादात्-कषायोद्भवरहितसाम्यरसास्वादनात् भवेत्-लभेत सा-तृप्तिः षड्रसास्वादनात्-तिक्ताम्लमधुरकषायकटुक्षाररसभोजनात् जिह्वेन्द्रियद्वारा-रसनेन्द्रियद्वारा न भवति । रसनेन्द्रियेण पौद्गलिकरसानुभवः, आत्मा च स्वरूपानुभवी पुद्गलगुणानां ज्ञाता, न भोक्ता । पुद्गलगुणा [2]अभोज्या एव । मोहोदयाद् आहारसंज्ञातः रसास्वादनं न स्वरूपतः । स्वरूपं च ज्ञानानुभवलक्षणमतः आत्मानुभवा तृप्तिः, न पौद्गलिकेति ॥३॥

**संसारे स्वप्नवन्मिथ्या, तृप्तिः स्यादाभिमानिकी ।**
**तथ्या तु भ्रान्तिशून्यस्य, सात्मवीर्यविपाककृत् ॥४॥**

संसारे इति- संसारे-द्रव्यतः चतुर्गतिरूपे, भावतः मिथ्यात्वादि-विभावलक्षणे संसरणे, आभिमानिकी-मिथ्याभिमानोत्पन्ना पुद्गलादि-प्राप्तमान्यतारूपा तृप्तिः, सा स्वप्नवत् मिथ्या-वितथा कल्पनारूपा एव,

---

१. अल्पकाली सर्वप्रतिषु । २. अभेद्या ..D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतोऽज्ञैः तृष्णाग्रसितैः स्वीयकल्पनाकल्पितेष्टतेष्टीकृतपुद्गलस्कन्ध-सम्पत्तौ 'अहो ! मया प्राप्तं मणिरत्नादिव्यूहं' मायोदयमाधुरीवचन-चातुरीचतुरस्वजनसमूहं चेति तृप्तस्तिष्ठति[1], तथापि कल्पनारूपत्वात् गत्वरत्वात् औदयिकत्वात् परत्वात् स्वसत्तारोधकाष्टकर्मबन्धनिदानराग-द्वेषोत्पादकत्वात् दुःखमेव तथ्या इति, मरुमरीचिकाकल्पा तृप्तिः न सुखहेतुः, तु-पुनः भ्रान्तिशून्यस्य-[2]मिथ्यावबोधरहितस्य सम्यग्ज्ञानोप-युक्तस्य स्वतत्त्वाभिमुखस्य तथ्या-सत्या स्वस्वभावाविर्भावानुभवा-त्मिका तृप्तिः सुखहेतुः । किंभूता तृप्तिः ? सात्मवीर्यविपाककृत्-आत्मनः(ना) सह सात्मा, तस्य यद् वीर्यं तस्य विपाकः-पुष्टिविशेषः, तं करोतीति कृत् इत्यनेन स्वस्वाभाव्यगुणानुभवोत्था तृप्तिः आत्मनः सहजं वीर्यं पुष्टीकरोति, तेन सामर्थ्येन गुणप्राग्भावः, अतो गुरुचरणसेवनागम-श्रवणतत्त्वग्रहणादिना आध्यात्मिकी तृप्तिः विधेया इत्युपदेशः ॥४॥

**पुद्गलैः पुद्गलास्तृप्तिं यान्त्यात्मा पुनरात्मना ।**
**परतृप्तिसमारोपो, ज्ञानिनस्तन्न युज्यते ॥५॥**

पुद्गलैरिति—पुद्गलैः-शरीरधनवसनभोजनस्वजनादिभिः,पुद्गलाः-शरीरादयः, पुद्गलोपचयरूपां तृप्तिं यान्ति-पुद्गलोपचारवृद्धिं यान्ति, पुनः आत्मा-अमूर्तज्ञानानन्दरूपः, आत्मना-आत्मगुणपरिणामेन ज्ञान-चरणानन्दादिना तृप्तिं याति स्वरूपानुभवरसिकानां स्वरूपास्वादनेन तृप्तिः । पुनः उपदिशति-ज्ञानिनः-अनेकान्तानन्तस्वपरपदार्थपरीक्षादक्षस्य तद्भ्रान्तिजन्याभिमानं परतृप्तिसमारोपः, परैः-पुद्गलैः तृप्तिः-परतृप्तिः परतृप्तौ समारोपः-आत्मतृप्तिमान्यतारूपः न युज्यते-न घटते । भावना च सम्यग्ज्ञानी तु यथार्थावबोधी आत्मधर्ममेव आत्मनि[3] अङ्गीकरोति परं परत्वेनैव वेत्ति, परधर्मं परे स्थापयति, स्वधर्मं स्वत्वे स्थापयति । अतः सम्यग्दृष्टिः पौद्गलिकोपचये न रज्यते । पुद्गलास्वादनेन सुखाव-भास एव मिथ्याज्ञानम् । उक्तं च—

---

१. तृप्तिः S.M., V.2. B.1 । २. मिथ्यात्वा० L.D.1 । ३. आत्मना S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तवइ तवं चरइ चरणं, सुअंपि नवपुव्व जाव अब्भसइ ।**
**जा परसुहे सुहत्तं, ता नो सम्मत्तविन्नाणं ॥१॥**

पुनः **श्रीहरिभद्रपूज्यैः—**

**सुअवं सीलवं चाई, जिणमग्गायरणारई ।**
**परं वा परसंगं वा, धम्मं मन्नइ जो जडो ॥२॥**

यच्च आत्मनः स्वरूपं सहजं [१]ज्ञानादि, तदेव धर्म इति तत्त्वम् ॥५॥

**मधुराज्यमहाशाका-ग्राह्येऽबाह्ये च गोरसात् ।**
**परब्रह्मणि तृप्तिर्या, जनास्तां जानतेऽपि न ॥६॥**

मधुराज्येति—या परब्रह्मणि-शुद्धात्मनि- अमूर्त्तानन्तज्ञानघने, या तृप्तिः स्वरूपा-समतालिङ्गनानन्दचिद्विलासरूपा, जनाः-तत्त्वावलोकन-नयनविकलाः, तां शुद्धात्यन्तैकान्ताध्यात्मस्वभावानुभवरूपां तृप्तिं जानतेऽपि न-नैव ज्ञायते इति ज्ञानग्रहणेऽपि नास्ति । अतः कुतोऽनुभवः? या तृप्तिः मधुराज्यमहाशाकाग्राह्ये पुनः गोरसात् अबाह्ये भोजने न, मधुरमाज्यं-मधुराज्यम्, महान्तः शाकाः-व्यञ्जनानि तैर्ग्राह्ये पुनः गोरसः-दध्यादि तस्मात् अबाह्ये, युक्ते एवंविधे भोजने सा तृप्तिः न । अथवा कथंभूते ब्रह्मणि ? मधुराज्यमहाशाकाग्राह्ये-मधु-मिष्टं राज्यम्, तत्र महती आशा-इच्छा येषां ते मधुराज्यमहाशाकाः तैः-परिग्रहैश्वर्या-भिलाषुकैः, अग्राह्ये-ग्रहीतुमशक्ये गोरसात्-वाग्रसात्, बाह्ये वाचाम-गोचरे 'अप्राप्य मनसा सह' इति वेदोक्तत्वात् **[38]** '**अपयस्स पयं नत्थि**' **इत्याचाराङ्ग**वचनात् । [आचा० श्रुत०१, अ०५, उ०६, सू० १७०] एवंविधे परब्रह्मणि-परमात्मनि या तृप्तिः सा लोकैर्न ज्ञायते एव, अतः पुद्गलोपचारसहस्रैः सा तृप्तिर्न भवति ॥६॥

**विषयोर्मिविषोद्गारः, स्यादतृप्तस्य पुद्गलैः ।**
**ज्ञानतृप्तस्य तु ध्यान-सुधोद्गारपरम्परा ॥७॥**

विषयोर्मि इति—अतृप्तस्य-स्वरूपास्वादरहितस्य, पुद्गलैः-

---

१. ज्ञानादिकम् L.D.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अङ्गरागाङ्गनालिङ्गनादिकैः, विषयोर्मिविषोद्गारः स्यात्-भवेत्, विषयः-इन्द्रियविलासः स एव विषयोद्गारः-प्रकाशः स्यात् । उक्तं च—

**जह जह पुग्गलभोगो, तह तह वड्ढइ विसयं पि कसाई ।**
**इंदियसुहा दुहा खलु, अगिज्झा तओ विरत्ताणं[१] ॥१॥**

ज्ञानतृप्तस्य-स्वात्मतत्त्वावबोधपूर्णस्य, ध्यानं-तत्त्वैकत्वम्, यत् सुधा-अमृतं तस्य उद्गारः तस्य परम्परा श्रेणिर्भवेत् निरामय-निर्मलपरमात्मानुभवस्तृप्तेः लक्षणमेतत् तत्त्वभावना-तत्त्वज्ञान-तत्त्वध्यानामृतोद्गारपरम्परावृद्धिः ॥७॥

**सुखिनो विषयातृप्ता, नेन्द्रोपेन्द्रादयोऽप्यहो ।**
**भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥८॥**

॥ इति तृप्त्यष्टकम् ॥ १० ॥

सुखिनो इति—अहो ! इति आश्चर्ये, इन्द्रोपेन्द्रादयः-इन्द्रः-शक्रः, उपेन्द्रः-कृष्णः, इत्यादयः अनेके न सुखिनः-सुखमयाः न । कथंभूता इन्द्रोपेन्द्रादयः ? विषयातृप्ताः-विषयैः-मनोज्ञेन्द्रियसंयोगैः, अतृप्ताः अनेकवनिताविलासषड्रसग्राससुरभिकुसुमवासरम्यावासादिभिः मृदुशब्दाकर्णनवर्ण्यवर्णावलोकनैः संख्येयासंख्यकालभोगैः अतृप्ताः । न च एते तृप्तिहेतवः । असदारोप एवायं लोके-चतुर्दशरज्ज्वात्मके अनन्तसकर्मजीवात्मके, एकः भिक्षुः आहारागृध्नः संयमयात्रार्थं भिक्षणशीलः निष्परिग्रहः सुखी अस्ति । ज्ञानं-स्वरूपावबोधः तेन तृप्तः, निरञ्जनः-रागाद्यञ्जनश्यामतारहितः, स्वधर्मभोगवत्त्वात् । "यद्वस्तुनि यो धर्मो न भवति ततो न जायते ।" उक्तं च **विशेषावश्यके:—**

[8] **जत्तो च्चिय पच्चक्खं सोम्म ! सुहं नत्थि दुक्खमेवेदं ।**
**तप्पडियारविभत्तं, तो पुण्णफलं ति दुक्खं ति ॥२००५॥**
**विसयसुहं दुक्खं चिय, दुक्खप्पडियारओ त्तिगिच्छव्व ।**
**तं सुहमुवयाराओ, न उवयारो विणा तच्चं ॥२००६॥**

१. तच्चरत्ताणं S.M., V.1.2., B.1.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सायासायं दुक्खं, तव्विरहम्मि अ सुहं जओ तेणं ।**
**देहिंदिएसु दुक्खं, सुक्खं देहेंदियाभावे ॥२०११॥**

इति सातासातयोर्विपाकभेद एव नत्वावरणे । अव्याबाधावरणत्वं तु उभयोरपि । यच्च स्वगुणान् घातयति तदुदयः कः सुखत्वेनोरुरीकुरुते ? इति आत्मनः ज्ञानानन्दानुभवा तृप्तिः प्रशस्या, नौपाधिकी । इत्यनेन [1]तया एव सम्यग्दर्शनिनः स्तुवन्ति अर्हन्तम्, पूजयन्ति परमात्मानम्, [2]देशविरता अपि सामायिकपौषधोपवासिनः आत्मानुभवलवास्वादनार्थमेव तिष्ठन्ति एकान्ते मुनयस्तन्निष्पादनाय त्यजन्ति पञ्चाश्रवान्, तद्विघाताय गृह्णन्ति भीष्मग्रीष्मतप्तशिलातापातापनाम्, शिशिरहिमनिशाकरकराभिघातक्षुब्धा वसन्ति निर्वसना वने, स्वाध्यायन्ति आगमव्यूहान्, क्षमादिधर्मद्वारा भावयन्ति आत्मानम्, तत्त्वज्ञानेन आरोहन्ति गुणश्रेणिशृङ्गे, चिन्तयन्ति तत्त्वैकत्वं तत्त्वसमाध्यर्थमेव प्राणायामादिप्रयासः जिनकल्पादिकल्पः इति [3]सा स्वभावानुभवतृप्तिः सर्वैरभ्यस्या ॥८॥

**॥ इति व्याख्यातं तृप्त्यष्टकं दशमम् ॥१०॥**

## ॥ अथ निर्लेपाष्टकम् ॥

अथ अलिप्तस्य तत्त्वसमाधिर्भवति पूर्णानन्दतृप्तिरपि अलिप्तस्य, तेन निर्लेपाष्टकं [4]प्रस्तूयते । चेतनस्य सकलपरभावसंयोगाभावेन व्याप्यव्यापकग्राहककर्त्तृत्वभोक्तृत्वादिशक्तीनां स्वभावावस्थानं निर्लेपः । नामतो निर्लेपः अभिलाप्यात्मकः जीवाजीवानाम्, स्थापनानिर्लेपः निर्ग्रन्थाकारादिः, द्रव्यनिर्लेपः कांस्यपात्रादिः तद्व्यतिरिक्तः, शेषस्तु पूर्ववत्, भावनिर्लेपः जीवाजीवाभेदाश्च[5], अजीवो धर्माधर्माकाशादिः जीवस्तु समस्तविभावाभिष्वङ्गरहितः मुक्तात्मा, नयैस्तु द्रव्यपरिग्रहादिष्वलिप्तः नैगमेन, संग्रहेण जीवो जात्या अलिप्तः, व्यवहारेणालिप्तो द्रव्यतस्त्यागी, शब्दनयेन सम्यग्दर्शनसम्यग्ज्ञानपरिच्छिन्नपरभावपरित्यागी तन्निमित्त-

---

१. तद्रुच्या A.D., V.1. । २. दिग्वि० S.M., विना । ३. स्व० A.D., V.1. L.D.1. विना । ४. वितन्यते S.M., B.2. । ५. जीववेदाश्च B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतान्(नि) धनस्वजनोपकरणान्(नि) तेष्वनासक्तः, समभिरूढेन [१]अरिहन्ता(अर्हदा-)दिनिमित्तैर्बहुतरैः परिणमनैरलिप्तत्वात् क्षीणमोहो जिनः केवली चालिप्तः, एवंभूतेन सिद्धः सर्वपर्यायैरलिप्तत्वात्, वाचनान्तरे तु नैगमालिप्तः अंशत्यागी नैगमाकाररूपेण, संग्रहेण सम्यग्दर्शनासत्तया आत्मानं सर्वथा विभक्तत्वात्, व्यवहारेण तच्छ्रद्धया [२]अपास्तरागादिलेपत्यागात्, [३]ऋजुसूत्रस्तु सन्निमित्तादिष्वरक्तत्वेनावलम्बनात्, शब्दतः अभिसन्धिजवीर्यबुद्धिपूर्वकोपयोगस्य रागादिषु अपरिणमनात्, समभिरूढतः सर्वचेतना सर्वजीवस्य[४] विभावाश्लेषरहितत्वात्, एवंभूततः[५] पूर्वाभ्यासचक्र[६]भ्रमादिभवो[७]पग्राहिसर्वपुद्गलसंगरहितस्य सिद्धस्य निर्लेपत्वम् । पुनर्निक्षेपत्रये नयचतुष्टयम्, भावनिक्षेपे पर्यायालिप्तत्वेन 'अन्तिमनयत्रयमिति' **तत्त्वार्थ**वृत्तेराशयः अत्र भावसम्यक्साधकनिर्लेपाधिकारः ।

**संसारे निवसन् स्वार्थ-सज्जः कज्जलवेश्मनि ।**
**लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥१॥**

संसारे इति—निखिलः-समस्तो लोकः कज्जलवेश्मनि-रागादिपापस्थानविभावतन्निमित्तीभूतधनस्वजनादिगृहे, संसारे निवसन्-वसमानः, स्वार्थसज्जः-स्वस्य आरोपात्मताकृतः अर्थः-अहङ्कारममकारादिरूपः स्वार्थः, तत्र सज्जः-सावधानः, लिप्यते रागादिभावकर्माभिष्वङ्गतः समस्तात्मीयक्षयोपशम[८]भावपरानुगतः सर्वसत्तावरकत्वेन भावकर्म-द्रव्यकर्म-नोकर्मलेपैर्लिप्यते । तथा ज्ञानसिद्धः-हेयोपादेयपरीक्षापरीक्षितसर्वभावः स्वात्मनि [९]स्वत्वमन्यत्र सर्वत्र परत्वोपयुक्तः स्वात्मारामी स्वरूपविलासी न लिप्यते त्रिविधकर्मोपस्करैर्नावगुण्ठ्यते अतः आत्मधर्मावभासनतदुपादेयतया यतितव्यमित्युपदेशः ॥१॥

---

१. अरिहन्तादिप्रशस्त V.1. । २. अप्रशस्त V.1. । ३. ऋजुस्तु S.M., B.2. । ४. सर्ववीर्यस्य V.1. । ५. एवंभूतः V.1.। ६. चक्रा S.M., B.2., V.2., L.D.1. । ७. पग्राह० B.2., V.2., L.D.2. । ८. क्षयोपशमा V.1., B.1., A.D. । ९. स्वात्मम् V.1., B.1. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नाऽहं पुद्गलभावानाम्, कर्ता कारयिता च न ।**
**नानुमन्तापि चेत्यात्म-ज्ञानवान् लिप्यते कथम् ॥२॥**

नाहमिति—'इति'-अमुना प्रकारेण यथार्थावभासनेन, भेदज्ञान-विभिन्नात्मस्वरूप आत्मज्ञानवान् कथं लिप्यते ? नैवेति, इतीति किम् ? अहं विमलकेवलालोकमयः, स्वकीयपारिणामिकपर्यायोत्पाद-व्ययत्व-ध्रुवत्व-ज्ञायकत्व-भोक्तृत्व-रमणत्वादिभावानां कर्ता, पुद्गलभावानां द्रव्यकर्म-नोकर्महिंसादिपापव्यापाराणां योगप्रवृत्तेश्च कर्त्ता न-नैव । पुद्गलग्रहणमोचनरूपं मम कार्यम्, वर्णादीनां ग्रहणास्कन्दनानां नाहं कर्ता, च-पुनः, पुद्गलभावानां पूर्वोक्तानामहं कारयिता परस्मात् कारयतीति कारयिता न, च-पुनः, न अनुमन्ता-पौद्गलिकवर्णादीनां शुभानां नानुमोदनशीलः, अहमिति सकलपुद्गलत्रैकालिकाग्राहकाभोक्तृ-त्वाकारकत्वात्मज्ञानवान् स न लिप्यते । लेपो हि पुद्गलानुयायि[१]चेतनया भवति सर्वथा विधिविच्छिन्नसङ्गस्य न लेप इति ॥२॥

**लिप्यते पुद्गलस्कन्धो, न लिप्ये पुद्गलैरहम् ।**
**चित्रव्योमाञ्जनेनैव ध्यायन्निति न लिप्यते ॥३॥**

लिप्यते इति—लिप्यते-अन्योन्याश्लेषेण संक्रमादिना पुद्गलस्कन्धः अन्यैः-पुद्गलैः लिप्यते-उपचयीभवति, स्वजातिद्रव्यपरिवर्त्तनपारिणा-मिकद्व्यधिकर[२]सोत्पत्तिबन्धनधर्मत्वात् । पुद्गलानां सम्बन्धः स्निग्ध-रूक्षाभ्यां द्विगुणसमधिकानाम्, तत्र जघन्यगुणा[३]नामेकाद्यविभागानां न बन्धः, न सदृशानां बन्धः, द्व्यधिकानामेव बन्धः । त्रिगुणः पञ्चगुणेन बन्धः, पञ्चगुणः सप्तगुणेन, एवं सर्वत्र द्विगुणः चतुर्गुणेन, चतुर्गुणः षड्गुणेन, षड्गुणोऽष्टगुणेन, एवं बन्धसंयोगो भवति । अत्र स्निग्धरूक्षौ स्पर्शस्थौ अपि एकान्तेन न स्कन्धहेतुः स्पर्शस्य स्कन्धकरण उपादाना-

१. यायिनो० S.M. । २. रसोपेत V.2. । ३. गुणतो S.M., V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावात् । न रसस्थौ, रसस्य आस्वादनरूपत्वात् । अतः पूरणगलनगुणाविभागानामेव द्व्यधिकत्वं स्निग्धरूक्षस्पर्शसङ्ग[1]परिणतं स्कन्धत्वहेतुः, अतः पुद्‌गलैः पुद्‌गला एव लिप्यन्ते । अहं निर्मलानन्दचिद्रूपः न पुद्‌गलाश्लेषी, अतः शुद्धात्मा पुद्‌गलैर्न लिप्यते, वस्तुवृत्त्या पुद्‌गलात्मनोः तादात्म्यसम्बन्ध एव नास्ति । संयोगसम्बन्धस्त्वौपाधिकः । इति ध्यायन् चित्राञ्जनैर्न व्योम इव न लिप्यते । यथा व्योम–आकाशं चित्रैः अञ्जनैः संलिप्यमानमपि न लिप्यते तथा अहमपि अमूर्त्तात्मस्वभावः पुद्‌गलैः एकक्षेत्रावगाढैः न लिप्ये । यो हि आत्मस्वभाववेदी स्ववीर्यं ज्ञानादिशक्तिमात्मनि व्यापारयन् अभिनवकर्मग्रहणैर्न लिप्यते । यावती आत्मशक्तिः परानुयायिनी तावान् आश्रवः, स्वरूपानुयायिनी स्वशक्तिः संवरः इति रहस्यम् । [2]अत्र च आत्मज्ञानमात्रसन्तुष्टा रागद्वेषप्रविष्टाः सम्यग्दर्शनादिगुणभ्रष्टाः [3]आत्मानमबन्धतया जानन्ति ते निरस्ताः, उक्तं च **उत्तराध्ययने–**

**[39] भणंता अकरंता य, बन्धमुक्खपइन्निणो ।**
**वायाविरियमित्तेण, समासासंति अप्पयं ॥१०॥**

**न चित्ता तायए भासा, कओ विज्जाणुसासणं ।**
**विसन्ना पावकम्मेहिं, बाला पंडियमाणिणो ॥११॥**

(अध्य० ६. गा. १०–११)

अत एव तत्त्वश्रद्धानसम्यग्ज्ञानोपयुक्ता यदात्मनः क्षायोपशमिकचेतना वीर्यादिशक्तीन् परभावविभावाद् आकृष्य आत्मगुणे प्रवर्त्तयति तावती अबन्धकता । शेषा यावती परानुगा विषयकषाय[4]चापल्यशक्तिः तावती बन्धकता । एवं सर्वात्मशक्तिः स्वरूपविश्रामरमणरूपा तदा सर्वात्मना अबन्धकः इति सिद्धान्तः ॥३॥

१. परिणितं B.1.2., V.1.2. । २. अन्यच्च V.2. । ३. आत्मा अब० B.1.2., V.2.1., S.M., A.D. । ४. चापल्यताशक्तिः S.M. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**लिप्तताज्ञानसंपात-प्रतिघाताय केवलम् ।**
**निर्लेपज्ञानमग्नस्य, क्रिया सर्वोपयुज्यते ॥४॥**

लिप्तता इति–निर्लेपज्ञानमग्नस्य–शुद्धस्याद्वादात्मज्ञानमग्नस्य पुंसः क्रिया–आवश्यककरणरूपा, लिप्तताज्ञानसंपातप्रतिघाताय–लिप्तताज्ञानं–विभावचेतनोपयोगः, तत्र सम्पातः–पतनं तस्य प्रतिघाताय–[१]निवारणाय केवलमुपयुज्यते–उपकारीभवति, इत्यनेन ध्यानारूढस्य न क्रियाकरणम्, किन्तु भावनाचिन्ताज्ञानवतो विघ्नवारणाय क्रिया उपकारिणी । ध्यानाधिरूढस्याप्रच्युतात्मस्वभावानुभवस्थस्य विघातनी । **आगमे**ऽपि–पूर्वं यदमृतकुम्भोपमं तदेवोपरि विषकुम्भोपमम् । उक्तं च –

**जा किरिया सुद्धुयरी सा विसुद्धीए न अप्पधम्मोत्ति ।**
**पुव्विं हिया पच्छा अहिया जह निस्सिहाइतिगं ॥१॥**

अत एव आत्मस्वरूपावबोधैकत्वं हितम् ॥४॥

**तपःश्रुतादिना मत्तः, क्रियावानपि लिप्यते ।**
**[२]भावनाज्ञानसंपन्नो, निष्क्रियोऽपि न लिप्यते ॥५॥**

तपःश्रुतादिना इति–क्रियावान् अपि जिनकल्पादितुल्यक्रियाभ्यासी अपि तपःश्रुतादिना मत्तः–मानी अभिनवकर्मग्रहणैर्लिप्यते । न च रुषादयोत्कृष्टा क्रिया हितकारिणी । उक्तम्–**आचाराङ्गेः–[40]"से वंता कोहं च माणं च मायं च लोभं च एयं पासगस्स दंसणं उवरयसत्थस्स पलियंतकरस्स आयाणं सगडब्भि** ॥सू०१२१॥इति ।

[आचा० श्रुत०१, अ० ३, उ०४, सू० १२१]

पुनः **[41] ( जे ममाइयमइं जहाइ से चयइ ममाइयं, से हु दिट्ठपहे मुणी जस्स नत्थि ममाइयं, तं परिण्णाय मेहावी विइत्ता लोगं ) वंता लोगसन्नं से मइमं परिक्कमेज्जासि त्ति बेमि ।** ॥सू०९८॥

[आचा० श्रुत०१, अ०२, उ० ६, सू० ९८]

---

१. निरावरणाय S.M., V.2., B.2. । २. भावज्ञानं च संपन्नो V.2., B.2. ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

पुनः [42] (**से जं च आरभे जं च नारभे, अणारद्धं च न आरभे छणं छणं) "परिण्णाय-लोगसन्नं च सव्वसो । उद्देसो पासगस्स नत्थि बाले पुण णिहे कामसमणुन्ने असमियदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ त्ति ।** ।।सू०१०३-४।।

[आचा० श्रु० १. अ०-२. उ० ६. सू०-१०३-४]

अतः क्रियादिमत्तः आहारादिचतस्रः (क्रोधादिचतस्रः) ओघ-लोक-सुख-दुःख-शोक-वितिगिच्छा-मोहाभिधानपञ्चदशसंज्ञया धर्माभ्यासः 'प्रवृत्तिर्न धर्मः' **इत्याचाराङ्गवृत्तौ** । भावना-अनुप्रेक्षा तज्ज्ञान-मग्नो निष्क्रियोऽपि तादृक्तीव्रतरवीर्याप्रवृत्तो न लिप्यते-न बध्यते । उक्तं च **सूयगडांगे—**

**[43]न कम्मुणा कम्म खवेंति बाला, अकम्मुणा कम्म खवेंति वीरा ।**
**मेहाविणो लोभमयावतीता, संतोसिणो नोपकरेंति पावं ।।१५।।**

[श्रुत० १ अ० १२. गा० १५]

**[44] जहा कुम्मे सअंगाइं, सए देहे समाहरे ।**
**एवं पावाइं मेहावी, अज्झप्पेणं समाहरे ।।१६।।**

[श्रुत० १ अ० ८ गा० १६]

इत्यनेन [1]भावनाज्ञानं तत्त्वैकत्वानुभवान्वितं सम्यग्ज्ञानम्, तेन युक्तो न लिप्यते सर्वः सत्क्रियाभ्यासः शुद्धसिद्धात्मस्वरूपाविर्भावसाध्यतत्त्व-ज्ञानानुभवयुक्तस्य हिताय भवति ।।५।।

**अलिप्तो निश्चयेनात्मा, लिप्तश्च व्यवहारतः ।**
**शुद्ध्यत्यलिप्तया ज्ञानी, क्रियावान् लिप्तया दृशा ।।६।।**

अलिप्त इति— निश्चयेन-निश्चयरूपेण नयेन स्वरूपेण जात्या इत्यर्थः । आत्मा-चेतनः, अलिप्तः-पुद्गलाश्लेषरहितः, च-पुनः, व्यवहारतो बाह्यप्रवृत्तिसोपाधिकत्वतः अयमात्मा लिप्तः । अतः परसंसर्गजन्यव्यवहारत्यागे यतितव्यम् । अत एवाऽलिप्तया दृशा शुद्ध-

---

१. भावज्ञानं V.2., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिदानन्दावलोकनात्मकयाऽऽत्मानमात्मतया परं च परतया अरक्ताद्विष्ट-दृष्ट्या ज्ञानी-वेद्यसंवेदकः स्वसंवेदनज्ञानी, शुद्धयति-शुद्धो भवति सर्वविभावमलापगमनेन निर्मलो भवति । अन्यः क्रियावान् लिप्तया दृशा लिप्तोऽहं बद्धोऽहम् अशुद्धाचरणैः, तेन शुद्धाचरणेन पूर्वप्रकृतीः क्षपयित्वा अभिनवाकरणेन आत्मानं मोचयामीति दृष्ट्या क्रियां वन्दन-नमनादिकां कुर्वन् शुद्धयति-निर्मलो भवतीति निश्चयव्यवहारगौण-मुख्यवतां [१]साधनक्रमः ॥६॥

**ज्ञानक्रियासमावेशः सहैवोन्मीलने द्वयोः ।**
**भूमिकाभेदतस्त्वत्र, भवेदेकैकमुख्यता ॥७॥**

ज्ञानक्रियेति—द्वयोः दृष्ट्योः उन्मीलने-उद्घाटने सहैव-समकाल-मेव, नह्येकान्तज्ञानरुचिः सम्यग्दर्शनी, न ह्येकान्तक्रियारुचिः सम्यग्-दर्शनी, किन्तु सापेक्षदृष्टिरेव सम्यग्दर्शनी, अतः ज्ञानक्रियासमावेशः उभयोः संयोग एव साधनत्वेन निर्धार्य तत्र कचवरसमन्वितमहागृह-शोधनप्रदीपपुरुषादिव्यापारवदिह जीवः स्वरूपकर्मकचवरभृतस्वरूप-शोधनालम्बनो ज्ञानादीनां स्वभावभेदव्यापारोऽवसेयः । तत्रोक्तं श्री-**आवश्यकनिर्युक्तौः**-

**[45] ★नाणं पगासगं सोहगो, तवो संजमो उ गुत्तिकरो ।**
**तिण्णंपि समाजोगे, मोक्खो जिणसासणे भणिओ ॥१०३॥**

तथापि **[46] उपदेशपदप्रकरणे**- [गा०१९१] "क्रियाकृतकर्म-क्षयः मण्डूकचूर्णतुल्यः, ज्ञानकृतकर्मक्षयस्तद्भस्मकल्पः एव ज्ञातव्यः । तु-पुनः, या च एकैकमुख्यता, अत्र-साधनावसरे सा भूमिकाभेदतः-भूमिका-गुणस्थानावस्था तस्याः भेदतः, ध्यानाद्यवसरे ज्ञानं मुख्यतः, अर्वाक्क्रियैव मुख्यतः, तथा सर्वत्र साधनसामग्री यथायोगं[२] कार्या । उक्तं च **भगवतीटीकायाम्** :—

---

१. साधक० L.D.1., V.2., B.2. । २. योग्यम् V.1. B1. L.D.1. S.M. ।
★उप०माला-३४१, यतिल०समु०१३९ चंदावि०पय० ८० । धर्मसंग्रहणी११७५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[47] ★जइ जिणमयं पवज्जह, ता मा ववहारनिच्छए मुयह ।
इक्केण विणा तित्थं, छिज्जई अन्नेण उ तच्चं ॥१॥

अतः साधनोद्यताः सर्वमपि स्वस्थाने स्थापयन्ति ॥७॥

**सज्ज्ञानं यदनुष्ठानम्, न लिप्तं दोषपङ्कतः ।**
**शुद्धबुद्धस्वभावाय, तस्मै भगवते नमः ॥८॥**

॥ इति निर्लेपाष्टकम् ॥ ११ ॥

सज्ज्ञानमिति—यदनुष्ठानं-यदाचरणम्, सज्ज्ञानं-सम्यग्ज्ञानयुक्तम्, दोषाः- इहलोकाशंसापरलोकाशंसाक्रोधमानादयः, तैः न लिप्तं-नाश्लेषितम्, तस्मै भगवते-पूज्याय नमः । किंभूताय भगवते ? शुद्ध-बुद्धस्वभावाय, शुद्धः- सर्वपुद्गलाश्लेषरहितः, बुद्धः-ज्ञानमयः स्वभावो यस्य सः तस्मै इत्यनेन यथा सत्ता तथा, निष्पन्नः निरावरणः सिद्धस्वभावः, तस्य साधका ज्ञानक्रिया सावधाना । तत्र भावना अनादिघोषणाघोषितपरभावात्मबुद्धिरूपाऽसद्ज्ञानपरभावास्वादनसंमिलि-तविभावाऽभ्रपटलतिरोभूततत्त्वज्ञानभानुबहुलीभूतमिथ्यात्वासंयममहामोह-तिमिरान्धीभूतभूतानां मध्ये केचन सदागमाञ्जनतत्त्वप्रीतपानीयपानो-त्पन्नसद्विवेकाः पश्यन्ति । ज्ञानावरणादिकर्मच्छादितविभावमलतन्मयी-भूतशरीरादिपुद्गलस्कन्धैकताप्राप्तोऽपि मूर्त्तभावोऽपि छिन्नोऽपि अमूर्त्ता-खण्डज्ञानानन्दानन्ताव्याबाधस्वरूपमात्मानं भुज्यमानविषया अपि रोचयन्ति स्वतत्त्वानुभवनम्, नानोपायार्जितमपि त्यजन्ति [१]धनौषधं विचित्रचित्रतोद्भूतम्, वर्जयन्ति स्वजनवर्गम्, कोटिदानदायका अपि चरन्ति गोचरीम्, मृदुनवनीतकुसुमशय्याशायिनोऽपि शेरते घातोपल-शिलाभूमौ, एकात्मतत्त्वसहजस्वभावामूर्त्तानन्दलीलालुब्धा ज्ञानक्रिया-भ्यासतः, साधयन्ति निरावरणात्यन्तिकैकान्तिक-निर्द्वन्द्व-निरामयाविनाशि सिद्धस्वरूपमेतत्साधनोद्यताय भगवते नमः ॥८॥

**॥ इति व्याख्यातं निर्लेपाष्टकमेकादशमम् ॥ ११ ॥**

★पञ्चवस्तुकप्र० गा० १७२, उप०मा० गा० २२८, आगमसारः गा० ८, संग्रहशतकम् गा०२२ । १. धनौघं A.D., V.1.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ अथ निःस्पृहाष्टकम् ॥

अथ निर्लेपत्वदृढीकरणार्थं निःस्पृहत्वं विस्तार्यते, तत्र निःस्पृहत्वं-सर्वपरभावानभिलाषरूपम्, इच्छामूर्च्छानिवारणम् । स्पृहा नाम इच्छा, तदभावो निःस्पृहत्वम् । तत्र नामनिःस्पृह उल्लपरूपः, स्थापनानिःस्पृहः मुनिप्रतिमादिः, द्रव्यनिःस्पृह इहपरत्राधिकाभिलाषेण अल्पानिच्छकः, अथवा भावधर्मास्वादनमन्तरेण तत्स्वरूपापरिज्ञानेन[1] धनादिषु अनिच्छुश्च । भावनिःस्पृहः अप्रशस्तः वेदान्तादिकुतीर्थोपदेशेन एकान्तमुक्तिरक्तः, धनादिषु निःस्पृहः सः । [2]प्रशस्तः स्याद्वादानेकान्तपरीक्षापरिच्छिन्नात्म-तत्त्वानुभवरुचिपिपासिताः सर्वमपि हेयीकुर्वन्ति परभावम्, भवन्ति स्वरूपलालितचेतसः । तत्र साधनार्थमादिनयचतुष्टयेन । सिद्धं च नयत्रयेण । तथा जीवाजीवे निःस्पृहः नैगमेन, अजीवे निःस्पृहः संग्रहव्यवहाराभ्याम्, ऋजुसूत्रेण स्वभोग[3]भोग्येषु, शब्दसमभिरूढाभ्यां सन्निमित्तपरायत्तसाधनपरिणामेषु, एवंभूतेन आत्मीयसाधनपरिणामा-पन्नभेदज्ञानसविकल्पचरणशुक्लध्यानशैलेषीकरणादिषु निःस्पृहः । अत्र आद्यनयचतुष्टयनिःस्पृहस्यावसरः। भावना च-अनादौ संसारे स्पृहा-कुलितैर्बहुशः प्राप्तं दुःखलक्षम्, तेन परभावस्पृहानिरीहेण भवितव्यम् ।

**स्वभावलाभात्किमपि, प्राप्तव्यं नावशिष्यते ।**
**इत्यात्मैश्वर्यसम्पन्नो, निःस्पृहो जायते मुनिः ॥१॥**

स्वभावलाभात् इति—स्वभावः-आत्मधर्मज्ञानदर्शनरमणाव्याबाधा-मूर्त्तानन्दरूपाविच्छिन्नसिद्धत्वशुद्धपारिणामिकलक्षणः, तस्य लाभात् । अन्यत्किमपि प्राप्तव्यं-लब्धुं योग्यं न अवशिष्यते-अवशिष्टम्[4]स्ति आत्मस्वरूपलाभ एव लाभ इति । आत्मैश्वर्यं-स्वरूपसाम्राज्यं तेन संपन्नः-संयुक्तः मुनिः ज्ञपरिज्ञया ज्ञात्वा, प्रत्याख्यानपरिज्ञया प्रत्याख्यात-द्रव्यभावाश्रवः साधुः निःस्पृहः-सर्वशरीरोपकरणपरिवारयशोबहुमानादिषु स्पृहारहितः इच्छारहितः, जायते-भवति । न ह्यनादितृष्णा स्वभावोप-

---

१. परज्ञानेन B.1.,V.1 । २. समस्तः S.M., V.2 । ३. भोग्य० S.M., B.1.2 विना । ४. अवशिष्टः B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगमन्तरेणोपशाम्यति ॥१॥

**संयोजितकरैः के के, प्रार्थ्यन्ते न स्पृहावहैः ? ।**
**अमात्रज्ञानपात्रस्य, निःस्पृहस्य तृणं जगत् ॥२॥**

संयोजितकरैः इति—स्पृहावहैः-इच्छामग्नैः पुरुषैः के के जनाः परिग्रहभारभुग्ना न प्रार्थ्यन्ते-न याच्यन्ते ? किम्भूतैः स्पृहावहैः ? संयोजितौ करौ येषां ते संयोजितकराः तैः, इत्यनेन विषयाशालोलुपैः अनेकान्यनृपसेवनोद्यतैः भवितव्यं भवति । मात्रा-मानं तेन रहितममात्रं च तत् ज्ञानं च अमात्रज्ञानं तस्य पात्रं-स्थानम्, तस्य साधोः-निःस्पृहस्य-स्पृहारहितस्य जगत् तृणं-तृणप्रायम्, परभावेच्छामुक्तस्य निर्ग्रन्थस्य जगत् तृणं-निःसारम्, सारं-स्वात्मस्वरूपम् । गाथा-

**तिणसंथारनिसन्नो, मुनिवरो भट्ठरागमयमोहो ।**
**जं पावइ मुत्तिसुहं, कत्तो तं चक्कवट्टी वि ॥४८॥**

[संस्ता० प्रकी० गा०४८]

**आयसहावविलासी, आयविसुद्धो वि जो निए धम्मे ।**
**नरसुरविसयविलासं, तुच्छं निस्सारं मन्नंति ॥१॥ ॥२॥**

**छिन्दन्ति ज्ञानदात्रेण, स्पृहाविषलतां बुधाः ।**
**मुखशोषं च मूर्च्छां च, दैन्यं यच्छति यत्फलम् ॥३॥**

छिन्दन्ति इति—बुधाः-तत्त्वज्ञाः, ज्ञानदात्रेण स्पृहाविषलतां-स्पृहा एव विषवल्लि[1]स्तां छिन्दन्ति, यस्याः फलं यत्फलम्, मुखशो[2]षं च पुनः मूर्च्छां च पुनः दैन्यं यच्छति-ददाति इत्यनेन स्पृहाविषलता मुखशोषादिकं वितरति, इच्छकः दीनो भवति । तेन विषमविषोपमविषयस्पृहा निवारणीयेति ॥३॥

**निष्कासनीया विदुषा, स्पृहा चित्तगृहाद् बहिः ।**
**अनात्मरति[3]चाण्डालीसङ्गमङ्गीकरोति या ॥४॥**

निष्कासनीया इति—विदुषा-पण्डितेन, आत्मसमाधिसाधनोद्यतेन

१. विषवल्लींV.2 । २. शोका० S.M.,B.1.2 । ३. चण्डाली० B.2.,S.M. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पृहा-पराशा चित्तगृहात्-मनोनिकेतनात्, बहिर्निष्कासनीया-दूरीकरणीया, स्पृहा हि लोभपर्यायः, लोभश्च कषायपरिणामः, तद्विगम एव श्रेयान् । या स्पृहा अनात्मरतिचाण्डालीसङ्गम् अनात्मानः-परभावाः तेषु रतिः-रमणीयतापरिणतिः एव चाण्डाली, तस्याः सङ्गमङ्गीकरोति, अतः स्पृहा त्याज्या । उक्तं च–

**जे परभावे रत्ता, मत्ता विसयेसु पावबहुलेसु ।**
**आसापासनिबद्धा, भमंति चउगइमहारण्णे ॥१॥**

परभाववृत्तिरेव विभावः आत्मशक्तिध्वंसनमुद्गरः, अतो निरस्त-पराशापाशा निर्ग्रन्थाः स्वरूपचिन्तनस्वरूपमणानुभवलीनाः पीनाः तत्त्वानन्दे रमन्ते स्वरूपे, विरमन्ति विषयविरूपभवकूपपाततः ॥४॥

**स्पृहावन्तो विलोक्यन्ते, लघवस्तृणतूलवत् ।**
**महाश्चर्यं तथाप्येते, मज्जन्ति भववारिधौ ॥५॥**

स्पृहावन्त इति–स्पृहावन्तः-परेच्छानिरताः तृणतूलवल्लघवः-तुच्छा निर्मूल्याः विलोक्यन्ते । उक्तं च–

**तूलं तृणादपि लघु, तूलादपि हि याचकः ।**
**वायुना किं न वातो( नीतो )ऽसौ, [१]मामपि प्रार्थयिष्यति ॥१॥**

तदाश्चर्यं लघवोऽपि एते स्पृहादिना अपि भववारिधौ-भवसमुद्रे मज्जन्ति । अन्यत्र लघुत्वं तरणहेतुः, एतत् लघुत्वं भवमज्जनहेतुरेव । यद्यपि प्रार्थनादिदानव्यवहाराः तथापि त्रिभुवनधनस्वजनपिपासागरिष्ठाः ब्रुडन्तीत्यर्थः ॥५॥

**गौरवं पौरवन्द्यत्वात्, प्रकृष्टत्वं प्रतिष्ठया ।**
**ख्यातिं जातिगणात् स्वस्य, प्रादुष्कुर्यान्न निःस्पृहः ॥६॥**

गौरवमिति–निःस्पृहः-लौकिकस्पृहारहितः, पौरवन्द्यत्वात्-नागरिकलोकवन्द्यत्वात्, गौरवं-गुरुत्वम्, प्रतिष्ठया-शोभया प्रकृष्टत्वं जाति-

---

१. ममायं V.1, A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणात् स्वस्य कुलसम्पन्नतादिख्यातिं न प्रादुष्कुर्यात्-न प्रकटीकरोति इत्यादि । निःस्पृहाः[१] महत्त्वं न ख्यापयन्ति न विशदीकुर्वन्ति, निःस्पृहस्य न यशोमहत्त्वाभिलाषः ॥६॥

**भूशय्या भैक्षमशनम्, जीर्णं वासो गृहं वनम् ।**
**तथापि निःस्पृहस्याहो, चक्रिणोऽप्यधिकं सुखम् ॥७॥**

भूशय्या–इति भूः-वसुन्धरा एव शय्या-पल्यङ्कः भैक्षं-भिक्षया जातं भैक्षमशनं भोजनम् । उक्तं च–

**[48] अहो जिणेहिं असावज्जा, वित्ती साहूण देसिआ ।**
**मोक्खसाहणहेउस्स, साहुदेहस्स धारणा ॥९२॥**

[श्रीदशवै० अ० ५. उ० १ गा०९२]

तथा च वासो-वस्त्रम्, जीर्णम्, गृहं-स्थानं वनम्, तथापि अहो इति अद्भुतं निःस्पृहस्य-बाह्यसम्पद्विकलस्यापि, सुखं चक्रिणः सकाशात् स्वं[२] चक्रवर्त्तिनः सुखमधिकमत्यन्तमिति चक्रवर्त्यादिगत्वरैः औपाधिकैः सुखैः सकाशाद् मुनिः स्वरूपजैः सहजानश्वरैः परमानन्दसुखैः पूर्णः । अतः जातिभेद एवायं इन्द्रियात्मसुखयोः । इन्द्रियजे सुखे सुखत्वमारोपितमेव, न च पुद्गलस्कन्धे तु सुखं सुखहेतुत्वं च । आत्मन्येवाच्छिन्नसुखपरम्परा, सुखस्य कर्तृत्वादिकारक[३]षट्कमात्मन्येव अतो वास्तवं सुखं जिनाज्ञानिगृहीतपरभावस्य निःस्पृहमुनेरेव, अतो निःस्पृहस्य महदिन्द्रियागोचरं स्वाभाविकं सुखमिति ॥७॥

**परस्पृहा महादुःखम्, निःस्पृहत्वं महासुखम् ।**
**एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥८॥**

॥ इति निःस्पृहाष्टकम्' ॥ १२ ॥

परस्पृहेति–परस्य-परवस्तुनः पराद् वा स्पृहा-आशा महादुःखं-महत्कष्टम्, निःस्पृहत्वं-निर्वाञ्छकत्वम्, महासुखं-महानन्द इति सुख-

---

१. एष पाठो नास्ति सर्वप्रतिषु । २. स्व सर्वप्रतिषु । ३. कारके S.M., B.1.2., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखयोः समासेन-संक्षेपेण एतद् लक्षणमुक्तं-कथितम् । इत्यनेन पराशा एव दुःखम् । यच्च निर्विकाराखण्डसच्चिदानन्दस्य स्वाभाविकात्मधर्म-भोक्तुः परभावाभिलाष एव दुःखम्, तर्हि किं पराशा ? इति । अस्यात्मनः स्वपरविवेकनिगृहीतपरभावाविर्भावितात्मानन्तानन्दस्य[१] निःस्पृहत्वं धर्मः, तदास्वादनेन सुखमिति । अत एव स्पृहा त्याज्या, स्पृहा हि स्वसामर्थ्य-शून्यस्य भवति । अयं तु पूर्णानन्दाखिलज्ञेयज्ञानवान् परमः पदार्थः सर्व-पदार्थावगमस्वभावः शुद्धात्मीयानन्दभोगी । तस्य अनादिस्वतत्त्वानुभव-भ्रष्टत्वेन परस्पृहां गतस्यापि साम्प्रतमव्याबाधात्मभावभावनया टण्को-त्कीर्णन्यायेन अवगतात्मस्वरूपस्य स्पृहा पराशा न भवतीत्युपदेशः ॥८॥

**॥ इति व्याख्यातं निःस्पृहाष्टकम् ॥१२॥**

## ॥ अथ मौनाष्टकम् ॥

एते च गुणाः पूर्वोक्ताः मुनेर्निर्ग्रन्थस्य भवन्ति, अतः मुनिस्वरूपं निर्दिशति । सन्ति च लोके अनिर्ग्रन्थाः निर्ग्रन्थारोपमत्ताः [२]आत्मा-शुद्धाभिमानतः तत्त्वविवेकविकलाः । तेषामेवोपदेशाय विशुद्धगुरु-तत्त्वावबोधार्थं चाह- तत्र मन्यते त्रिकालविषयत्वेन आत्मानमिति मुनिः। तत्र नाममुनिः स्थापनामुनिः सुगमः, द्रव्यमुनिः ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्, अनुपयुक्तो लिङ्गमात्रद्रव्यक्रियावृत्तिः साध्योपयोग-शून्यस्य प्रवर्त्तनविकल्पादिषु कषायनिवृत्तस्य परिणतिचक्रे असंयम-परिणतस्य द्रव्यनिर्ग्रन्थत्वम्, भावमुनिः चारित्रमोहनीयक्षयोपशमोपशम-क्षायिकोत्पन्नस्वरूपरमणपरभावनिवृत्तः परिणतिविकल्पप्रवृत्तिषु द्वादश-कषायोद्रेकमुक्तः । नैगमसंग्रहव्यवहारनयैः द्रव्यक्रियाप्रवृत्त-द्रव्याश्रव-विरक्तस्य मुनित्वम् । ऋजुसूत्रनयेन भावाभिलाषसङ्कल्पोपगतस्य, शब्दसमभिरूढैवंभूतनयैः प्रमत्तात् क्षीणमोहं यावत् परिणतौ सामान्य-विशेषचक्रे स्वतत्त्वैकत्वपरमसमतामृतरतस्य मुनित्वम् । अत्र सम्यग्-

---

१. त्मानन्दस्य S.M., B.2., L.D.1.,V.2. । २. आत्मानम B.1.2. V.1.2. S.M. L.D.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानदर्शनचारित्रप्राग्भाववतो द्रव्यभावाश्रवविरतस्वरूपरतस्यावसरः-

**मन्यते यो जगत्तत्त्वम्, स मुनिः परिकीर्त्तितः ।**
**सम्यक्त्वमेव तन्मौनम्, मौनं सम्यक्त्वमेव वा[१] ॥१॥**

मन्यते इति—यः-शम-संवेग-निर्वेदाऽनुकम्पाऽऽस्तिक्यलक्षण-लक्षितः, जगद्-लोकं जीवाजीवलक्षणम्, मन्यते-जानाति यथार्थोपयोगेन द्रव्यास्तिक-पर्यायास्तिक-स्वभाव-गुण-पर्यायैः निमित्तोपादानकारण-कार्यभावोत्सर्गापवादपद्धत्या जानाति स मुनिः [२]अवगृहीततत्त्वः परिकीर्त्तितः-कथितः श्रीतीर्थकरगणधरैः । मुनेः-निर्ग्रन्थस्य, एवेति निर्धारणे, तत् सम्यक्त्वं यत् यथा ज्ञातं तथा कृतमिति तत् सम्यक्त्वमेव मुनित्वं सम्यक्त्वं वा-पुनः सम्यक्त्वमेव मौनं निर्ग्रन्थत्वम् । अत्र यत् शुद्धश्रद्धाननिर्धारितात्मस्वभावः, तत्र अवस्थानं चरणम्, यच्च सम्यग्दर्शनेन निर्धारितं सम्यग्ज्ञानेन विभक्तं स्वरूपोपादेयत्वं तच्च तथैव भवति रमणं चरणं मुनित्वम् । अतः सम्यक्श्रद्धागृहीतकरणं तत् एवंभूतनयेन सम्यक्त्वमेवम्, अत एव सम्यग्मुनित्वं सम्यक्स्वरूपम् । इति ज्ञपरिज्ञा-प्रत्याख्यानपरिज्ञाप्राप्तमेव कार्यसाधकम्, तेन सम्यक्त्व-मुनित्वे अभेदः सम्यग्दृष्टिभिः यच्चतुर्थगुणस्थानस्थैः साध्यत्वेन धारितं तथाकरणे यत्र मुनिभावे निष्पादिते सिद्धावस्थायाम्, इत्यनेन शुद्धसिद्ध-त्वस्य धर्मनिर्द्धारः सम्यक्त्वम् । **आचाराङ्गेः—[49] जं सम्मं ति पासहा तं मोणं ति पासहा, जं मोणं ति पासहा तं सम्मं ति पासहा । ण इमं सक्कं सिढिलेहिं अदिज्जमाणेहिं गुणासाएहिं वंकसमायारेहिं पमत्तेहिं गारमावसंतेहिं । मुणी मोणं समायाए धुणे कम्मसरीरगं पंतं लूहं सेवंति वीरा सम्मत्तदंसिणो ॥** [आचा०-श्रुत० १. अ०-५, उ०-३ सू०१५५] तथा च पञ्चास्तिकायेषु जीवः चेतनालक्षणः, तत्र स्वीयात्मबद्धोऽपि विभावग्रस्तोऽपि सत्तया निर्मलानन्दी निर्धार्य तदावरणविगमाय मोहहेतून् द्रव्याश्रवान् हेयत-योपलक्षितान् हेयतया करोतीति सम्यक्त्वं मुनिस्वरूपम् ॥१॥

---

१. च. सर्वप्रतिषु । २. अवगततत्त्वः V.1., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आत्मात्मन्येव यच्छुद्धम्, जानात्यात्मानमात्मना ।**
**सेयं रत्नत्रये ज्ञप्ति-रुच्याचारैकता मुनेः ॥२॥**

आत्मा इति—अत्र ज्ञानादिगुणानामभेदकरणभूतानां ज्ञायकत्व-कार्यकर्ता आत्मा एव । अत्रोपादानस्वरूपे षट्कारकचक्रमय एव आत्मा स्वयमेव कर्ता कार्यरूपोऽपि कारणरूपसम्प्रदानापादानाधिकरणं स्वयमेवेति व्याख्यातं **भाष्ये श्रीजिनभद्रक्षमाश्रमणैः** । अत एव आत्मा जीवः कर्तारूपः, आत्मना आत्मीयज्ञानवीर्येण करणभूतेन, आत्मानमनन्तास्तित्व-वस्तुत्व-द्रव्यत्व-सत्त्व-प्रमेयत्व-सिद्धत्व-धर्म-कदम्बकोपेतं कार्यत्वापन्नमात्मनि आधारभूते अस्तित्वाद्यनन्तधर्म-पर्यायपात्रभूते जानाति । सा इयं जानातिरूपा प्रवृत्तिः सा एव रत्नत्रये सम्यग्दर्शनज्ञान-चारित्रलक्षणे ज्ञप्तिः रुचिः आचारः-भासननिर्द्धाराचार-रूपः, एतेषामेकता-अभेदपरिणतिः मुनेः अस्ति इत्यनेन आत्मना आत्मानं ज्ञात्वा तद्रुचिः तदाचरणं मुनेः स्वरूपम् । भावना च मिथ्यात्वाज्ञानासंयमैकत्वेन पौद्गलिकसुखं सुखत्वेन निर्धार्य ज्ञात्वा च तदाचरणप्रवृत्तस्यानन्तकालं तत्त्वानवबोधेन दाघज्वरपरिगत[१] इव मृत्ति-कालेप इवावगुण्ठितः कर्मपुद्गलैः न चोपलब्धः तत्त्वश्रद्धान-ज्ञान-रमणानुभवलवोऽपि । तेनैव निसर्गाधिगमादिकारणेन अनादिनिधनोऽयं जीवोऽनन्तज्ञानादिपर्यायालिप्तामूर्त्तस्वभावोऽवगतः निर्द्धारितश्च साध्योऽहं साधकोऽहं सिद्धोऽहं ज्ञानदर्शनानन्दाद्यनन्तगुणमयोऽहमिति ज्ञप्ति-रुचि-आचरणरूपं मुनिस्वरूपम् । उक्तं च—

**[50] आत्मानमात्मना वेत्ति, मोहत्यागाद् यदात्मनि ।**
**तदेव तस्य चारित्रम्, तद् ज्ञानं तच्च दर्शनम् ॥१॥**

[योगशा०-प्र० ४, श्लो० २]

---

१. गता B.1.2. V.1.2. L.D. 1. S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः हरिभद्रपूज्यैः षोडशके—

**[51] बालः पश्यति लिङ्गम्, मध्यमबुद्धिर्विचारयति[१] वृत्तम् ।**
**आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥१।२॥**

[षोड०प्र० षो०-१ श्लो०२]

अतः तत्त्वैकत्वं चारित्रम्, पुनस्तदेव द्रढयति-

**चारित्रमात्मचरणाद्, ज्ञानं वा दर्शनं मुनेः ।**
**शुद्धज्ञाननये साध्यः, क्रियालाभात् क्रियानये ॥३॥**

चारित्रमिति—आत्मचरणात्-आत्मस्वरूपरमणात् परभावप्रवृत्तित्यागात् चारित्रम्, आत्मस्वरूपावबोधः ज्ञानम्, स्वीयासङ्ख्येयप्रदेशव्याप्यव्यापकत्वेन सहजलक्षणज्ञानाद्यनन्तपर्यायः अहम्, नान्यः इति निर्द्धारः दर्शनम्, इत्यनेन आत्मा ज्ञानदर्शनोपयोगगुणद्वयलक्षणः । एवमुक्तं च **भाष्ये** आत्मनः गुणद्वयमेव व्याख्यानयन्ति इति तन्मते, ज्ञाने स्थिरत्वं चारित्रम्, तेन ज्ञानचारित्रयोरभेद एव । ज्ञानमेवात्मपरिणाम[२]व्यापृतं सम्यक्त्वमाश्रवरोधः, तत्त्वज्ञानैकता चारित्रमेवं व्यापारभेदात् ज्ञानस्यैवावस्थात्रयम्। उक्तं च—

**[52] एवं जिणपण्णत्ते, सद्दहमाणस्स भावओ भावे ।**
**पुरिसस्साभिणिबोहे, दंसणसद्दो हवइ जुत्तो ॥३२॥**

[सन्म० कां-२, गा० ३२]

तथा च क्रियानये क्रियालाभात् साध्यनिष्पादनाय इति । प्रथमं च क्रियानयसाध्यं तत्त्वप्राग्भावे च सर्वं ज्ञाननयसाध्यमस्ति । वस्तुतः ज्ञानप्रवृत्तिरेव चरणं ज्ञानमयसेवात्मधर्मत्वात् अतः ज्ञानस्वरूप एवात्मा ॥३॥

**यतः प्रवृत्तिर्न मणौ, लभ्यते वा न तत्फलम् ।**
**अतात्त्विकी मणिज्ञप्ति-र्मणिश्रद्धा च सा यथा ॥४॥**

यतः प्रवृत्तिरिति—अशुद्धज्ञाने निष्फलत्वं द्रढयति यथा अतात्त्विकी मणिज्ञप्तिः-अमणौ मण्यारोपा अतात्त्विकी ज्ञप्तिः-ज्ञानं तत्त्वरहितम्

१. वृत्ति सर्वप्रतिषु । २. परिणाममयीवृत्तिः S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमणौ मणिश्रद्धा, तस्मिन् तत्फलं न लभ्यते-न प्राप्यते, यतः-यत् मणेः सकाशात् मणिप्रवृत्तिः विषापहारादिका न भवतीत्यर्थः। उक्तं च-

**[53]पुल्लेव मुट्ठी जह से असारे, अयंतिए कूडकहावणे वा ।**
**राढामणी वेरुलियप्पगासे, अमहग्घओ होइ हु जाणएसु ॥४२॥४॥**

[उत्तरा० अ०-२० गा० ४२]

**तथा यतो न शुद्धात्म-स्वभावाचरणं भवेत् ।**
**फलं दोषनिवृत्तिर्वा, न तद् ज्ञानं न दर्शनम् ॥५॥**

तथा इति—तथा-तेन प्रकारेण, यत-एकान्तद्रव्याचरणचारित्रात्, शुद्धात्मस्वभावाचरणं-शुद्धः-परभावरहितः योऽसौ आत्मस्वभावः-स्वरूपलक्षणः तस्याचरणं-तदैकत्वं तन्मयत्वं न भवेत् तेन प्रवर्त्तनेन फलं-शुद्धात्मस्वभावलाभरूपं न परमात्मपदनिष्पत्तिः, न दोषाणां-रागादीनां निवृत्तिः-अभावः न वा, अथवा तत्सर्वमपि प्रवर्त्तनं बाललीलाकल्पं शुद्धात्मस्वरूपालम्बनमन्तरेण अवेद्यसंवेद्यरूपं ज्ञानं तत् ज्ञानं तथा सकलपरभावसङ्गौपाधिकाशुद्धात्माध्यवसायमुक्ततात्त्विकामूर्त्त-चिन्मयानन्दात्मीयसहजभाव एवाहमिति निर्द्धारविकलं तद्दर्शनं न नैवेत्यर्थः । अत एव श्रुतेन केवलात्मज्ञानं तदभेदज्ञानमुत्सर्गज्ञानं च श्रुताक्षरावलम्बि सर्वद्रव्योपयोगं भेदज्ञानं सर्वाक्षरसम्पन्नश्च यावद् द्रव्यशुभावलम्बी तावद्भेदज्ञानी । उक्तं च **समयप्राभृते–**

**[54] जो सुएणभिगच्छइ, अप्पाणमिणं तु केवलं सुद्धं ।**
**तं सुअकेवलमिसिणो, भणंति लोगप्पदीवयरा ॥९॥**

**जो सुअनाणं सव्वं, जाणइ सुअकेवली तमाहु जिणा ।**
**नाणं आया सव्वं, जम्हा सुअकेवली तम्हा ॥१०॥**

आत्मस्वरूपज्ञानं च **प्राभृते**–

**[55]★अहमिक्को खलु सुद्धो, णिम्ममओ नाणदंसणसमग्गो ।**
**तम्हि ठिओ तच्चित्तो, सव्वे एए खयं नेमि ॥७३॥**

[सम०सा०गा०७३]

---

१. न न भवती B.1., A.D. । ★ आगमसारः गा० ४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्मलनिष्कलङ्कज्ञानदर्शनोपयोगलक्षणः आत्मा, तज्ज्ञानं ज्ञानम् । उक्तं च—

**देहदेवल जो वसै, देव अणाइ अणंत ।**
**सो पर जाणहु जोइया, अन्न न तं तं नमंत ॥१॥**

आत्मज्ञानेनैव सिद्धिः । साध्यमपि पूर्णात्मज्ञानम्, तदर्थमेव विवदन्ति(न्ते)दर्शनान्तरीयाः । प्राणामयन्ति रेचकादिपवनम्, अवलम्बयन्ति मौनम्, भ्रमन्ति गिरिवननिकुञ्जेषु, तथाप्यर्हत्प्रणीतागमश्रवणाप्तस्याद्वादस्वपरपरीक्षापरीक्षितं स्वस्वभावावबोधमन्तरेण न कार्यसिद्धिः । अतः प्राप्तावसरे तदेवानन्तगुणपर्यायात्मकमात्मज्ञानमात्मनाऽऽत्मनि करणीयम् । उक्तं च—

**आत्माज्ञानभवं दुःख-मात्मज्ञानेन हन्यते ।**
**अभ्यस्यं तत्तथा तेन, येन ज्ञानमयो भवेत् ॥१॥ ॥५॥**
**यथा शोफस्य पुष्टत्वम्, यथा वा वध्यमण्डनम् ।**
**तथा जानन् भवोन्माद-मात्मतृप्तो मुनिर्भवेत् ॥६॥**

यथा शोफस्येति—यथा-येन प्रकारेण, शोफस्य पुष्टत्वं-शरीरस्थौल्यं न पुष्टत्वे इष्टम्, वा-अथवा, यथा वध्यस्य मारणार्थं स्थापितस्य मण्डनं-कणवीरमालाद्यारोपणात्मकमेवंरूपं भवोन्मादं जानन् भवस्वरूपमेवंविधं जानन् मुनिः-समस्तपरभावत्यागी आत्मतृप्तः-आत्मस्वरूपे अनन्तगुणात्मके तृप्तः-तुष्टः भवेत् । संसारस्वरूपमसारं निष्फलम् अभोग्यं तु तद् ज्ञात्वा मुनिः स्वरूपे मग्नो भवति ॥६॥

**सुलभं वागनुच्चारम्, मौनमेकेन्द्रियेष्वपि ।**
**पुद्गलेष्वप्रवृत्तिस्तु, योगानां मौनमुत्तमम् ॥७॥**

सुलभमिति—वागनुच्चारं-वचनाप्रलापरूपम्, मौनं सुलभं-सुप्राप्यम्, तद् एकेन्द्रियेष्वपि अस्ति । तन्मौनं मोक्षसाधकं नास्ति । पुद्गलेषु-पुद्गलस्कन्धजवर्ण-गन्ध-रस-स्पर्शसंस्थानादिषु योगानां-द्रव्यभावमनोवचनकाययोगानां या अप्रवृत्तिः रम्या, रम्यतया अव्यापकत्वम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदभिमुखं वीर्यापसरणपरिसर्पणरहितं मौनमुत्तमं प्रशस्यम् । भावना च परभावानुगचेतनावीर्यप्रवर्त्तनं चापल्यं तद्रोधः मौनमुत्तममुत्कृष्टमायति आत्मनीनं यद् योगचापल्यं च नात्मकार्यम्, तेन तद्रोधः श्रेयान् । योगस्वरूपं **[56] कर्मप्रकृतौ** [बन्ध०क०गा०३...९] आत्मनो वीर्य-गुणस्य क्षयोपशमप्राप्तस्यासंख्येयानि स्थानानि । सर्वजघन्यं प्रथमं योग-स्थानं सूक्ष्मनिगोदिनः । एवं सूक्ष्मनिगोदेषु उत्पद्यमानस्य जन्तोः भवति। इह जीवस्य वीर्यं केवलिप्रज्ञाच्छेदनकेन छिद्यमानं छिद्यमानं यदा विभागं न प्रयच्छति तदा स एवांशोऽविभागः, ते च वीर्यस्याविभागाः एकैक-स्मिन् जीवप्रदेशे चिन्त्यमाना जघन्येनाप्यसङ्ख्येयलोकाकाशप्रदेश-प्रमाणाः, उत्कर्षतोऽप्येतत्सङ्ख्याः । किन्तु जघन्यपदभाविवीर्या-विभागापेक्षया असङ्ख्येयगुणा द्रष्टव्याः । येषां जीवप्रदेशानां समाः तुल्यसङ्ख्यया वीर्याविभागा भवन्ति । सर्वेभ्योऽपि चान्येभ्योऽपि जीवप्रदेशगतवीर्याविभागेभ्यः स्तोकतमाः ते जीवप्रदेशाः घनीकृतलोका-संख्येयभागासङ्ख्येयप्रतरगतप्रदेशराशिप्रमाणाः समुदिता एका वर्गणा। सा च जघन्या स्तोकाविभागयुक्तत्वात् जघन्यवर्गणा । अतः परे ये जीवप्रदेशाः एकेन वीर्याविभागेनाभ्यधिका घनीकृतलोकासङ्ख्येय-भागवर्त्यसङ्ख्येयप्रतरगतप्रदेशराशिप्रमाणा वर्तन्ते तेषां समुदायो द्वितीया वर्गणा । ततः परं द्वाभ्यां वीर्याविभागाभ्यामधिकानामुक्तसङ्ख्या-कानामेव जीवप्रदेशानामेव समुदायस्तृतीया वर्गणा । एवमेकैक-वीर्याविभागवृद्ध्या वर्द्धमानानां तावतो(?त्यः) जीवप्रदेशानां समुदायरूपा वर्गणा असङ्ख्येया वक्तव्याः, ताश्च कियत्य इति ? इदं घनीकृत-लोकस्य या एकैकप्रदेशपङ्क्तिरूपा श्रेणिः, तस्याः श्रेणेरसङ्ख्येयतमे भागे यावन्तः आकाशप्रदेशास्तावन्मात्रा वर्गणा समुदिता एकं स्पर्द्धकम्। "स्पर्धते इवोत्तरोत्तरवृद्ध्या वर्गणा अत्रेति स्पर्द्धकम् ।" पूर्वोक्तस्पर्द्धक-गतचरमवर्गणायाः परतो जीवप्रदेशा नैकेन वीर्याविभागेनाधिकाः प्राप्यन्ते नाऽपि द्वाभ्याम्, नाऽपि त्रिभिः, नाऽपि सङ्ख्येयैः, किन्त्वसङ्ख्येय-लोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यन्ते, ततस्तेषां समुदायो द्वितीयस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्द्धकस्य प्रथमा वर्गणा । ततो जीवप्रदेशानामेकेन वीर्याविभागे-नाधिकानां समुदायो द्वितीया वर्गणा । द्वाभ्यां वीर्याविभागाभ्यामधिकानां समुदायः तृतीया वर्गणा । एवं तावद्वाच्यं यावत् श्रेण्यसङ्ख्येयभागगत-प्रदेशराशिप्रमाणा वर्गणा भवन्ति, तासां च समुदायः द्वितीयं स्पर्द्धकम् । ततः पुनरप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणैः वीर्याविभागैरभ्यधिकाः प्राप्यन्ते, ततस्तेषां समुदायः तृतीयस्य स्पर्द्धकस्य प्रथमा वर्गणा, ततः एकैकवीर्याविभागवृद्ध्या द्वितीयादयो वर्गणास्तावद्वाच्या यावत् श्रेण्य-सङ्ख्येयभागगतप्रदेशराशिप्रमाणा भवन्ति । तासां च समुदायस्तृतीयं स्पर्द्धकम् । एवमसङ्ख्येयानि स्पर्द्धकानि वाच्यानि । एवं पूर्वोक्तानि स्पर्द्धकानि श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि जघन्यं योगस्थानम्। एतच्च सूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य भवप्रथमसमये वर्त्तमानस्य प्राप्यते, ततोऽन्यस्य जीवस्याधिकतरवीर्यस्य येऽल्पतरवीर्या जीवप्रदेशा-स्तेषां समुदायः प्रथमा वर्गणा । ततः एकेन वीर्याविभागेन वृद्धानां समुदायो द्वितीया वर्गणा । द्वाभ्यामधिकानां समुदायस्तृतीया वर्गणा । एवमेकैकवीर्याविभागवर्द्धमानानां यावत् श्रेण्यसङ्ख्येयभागगतप्रदेश-राशिप्रमाणा भवन्ति, तासां समुदायः प्रथमस्पर्द्धकम् । ततः प्राक्तनयोग-स्थानप्रदर्शितप्रकारेण द्वितीयादीनि स्पर्द्धकानि वाच्यानि । तानि च यावत् श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति । ततस्तेषां समुदायो द्वितीयं योगस्थानम् । ततोऽन्यस्य जीवस्याधिकतरवीर्यस्योपदर्शितप्रकारेण तृतीयं योगस्थानं वाच्यम् । एवमन्याऽन्यजीवापेक्षया तावद् योगस्थानानि वाच्यानि यावत्सर्वोत्कृष्टं योगस्थानं भवति । तानि च योगस्थानानि सर्वाण्यपि श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति। क्षयोप-शमवैचित्र्यात्सर्वमवसेयम् । ननु जीवानामनन्तत्वात् प्रतिजीवं च योग-स्थानस्य प्राप्यमाणत्वाद् अनन्तानि योगस्थानानि प्राप्नुवन्ति, कथमुच्यते असङ्ख्येयानि? उच्यते- यतः एकैकस्मिन् योगस्थाने सदृशे सदृशे वर्त्तमानाः स्थावरजीवा अनन्ताः प्राप्यन्ते । ततः सर्वजीवापेक्षयापि सर्वाणि योगस्थानानि केवलज्ञानेन परिभाव्यमानानि असङ्ख्येयान्येव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्यन्ते नाधिकानि । एकस्मिन् योगस्थाने एको जीवो जघन्यतः एकं समयमुत्कृष्टतः अष्टौ यावत्तिष्ठति। एवं योगस्थानतारतम्येन सर्वजीवेषु योगबाहुल्यं गाथाक्रमेण वक्तव्यम्—

**[57] सुहुमनिगोआइक्खणप्पजोग बायर विगलअमणमणा ।**
**अपज्जलहु पढमदुगुरु, पज्जहस्सियरो असंखगुणो ॥५३॥**
**असमत्ततसुक्कोसो, पज्जजहन्नियरु एव ठिइठाणा ।**
**अपज्जेयरसंखगुणा, परमपज्जबिए असंखगुणा ॥५४॥**

[शतक०कर्म० गा० ५३-५४]

इत्यष्टाविंशतिभेदाल्पबहुत्वमवगन्तव्यम् । योगबाहुल्ये बहुकर्मग्राही मन्दत्वे अल्पपुद्गलग्राही इत्येवं या योगानां पुद्गलग्रहणरूपा प्रवृत्तिः तस्याः रोधः मौनमुत्तमम् । किं सतृष्णस्य बाह्ययोगरोधेन ? तस्मात् सकलविमलज्ञानाद्यनन्तगुणगणमाहात्म्यपरमात्मभावरसिकैः आत्मनो योगप्रवृत्तिः पुद्गलानुगतया रोधनीया इत्युपदेशः ॥७॥

**ज्योतिर्मयीव दीपस्य, क्रिया सर्वापि चिन्मयी ।**
**यस्यानन्यस्वभावस्य, तस्य मौनमनुत्तरम् ॥८॥**

॥ इति मौनाष्टकम् ॥ १३ ॥

ज्योतिर्मयीवेति—तस्य-तत्त्वैकत्वपरिणतस्य, मौनं-योगनिग्रहरूपं स्वधर्मप्राग्भावकर्तृत्वभोक्तृत्वे व्यापारिताशेषवीर्यस्य कर्मविकरणापूर्वकरणकिट्टीकरणादिषु स्थापितवीर्यकरणस्य परभावाप्रवृत्तत्वेन मौनं-योगचापल्यतावारणरूपम्, अनुत्तरं-सर्वोत्कृष्टं यस्य क्रिया गुणप्रकर्षप्रवर्त्तना वीर्यप्रवृत्तिः सापि चिन्मयी-स्वरूपज्ञानमयी आत्मानुभवैकत्वरूपा । यथा दीपस्य या क्रिया उत्क्षेपणनिक्षेपणादिका या सर्वापि ज्योतिर्मयी-ज्ञानप्रकाशयुक्ता, तथा यस्य वन्दननमनादिगुणस्थानारोहरूपा क्रिया तत्त्वज्ञानप्रकाशिका, तस्य अनन्यस्वभावस्य-न विद्यते अन्यः-परः स्वभावो यस्य सः तस्य । परभावव्यापकचेतनाभिसन्धिवीर्यरहितस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधोः मौनमनुत्तरम् । वियद् वस्तुभावानुरोधादेव तत्कारकाद् वियत् सम्पूर्णता तदुत्पत्तौ 'कुम्भस्येव दशात्मनः' इति न्यायात् ज्ञानिनः क्रिया कार्योपकारका ज्ञातव्या । ज्ञानमयस्यात्मनः तत्त्वैकत्वाध्यासिनः स्वरूपा-रोहकाणां या क्रिया सा ज्ञानस्वरूपप्रकाशनहेतुः, आवरणनिमित्तमस-त्क्रिया आवरणापगमाय सत्क्रियानिमित्तं भवति । तत्त्वमग्नस्य न कारणीभवति, अतः तत्त्वज्ञानस्वरूपैकत्वध्यानलीनानां (लीनेभ्यः) मुनीनां (मुनिभ्यः) । तेषामेव (तेभ्य एव) नमः ॥८॥

॥ इति व्याख्यातं मौनाष्टकम् ॥१३॥

## अथ विद्याष्टकम् ॥१४॥

अथेदृग् [१]मुनित्वं यथार्थविद्यातत्त्वोपयोगिबुद्धिमतो भवति, अतो विद्याष्टकमुपदिशति । तत्र विद्या इति नाम जीवस्याभिधानं क्रियते सा नामविद्या । अक्षवराटककाष्ठादि विद्या इति स्थाप्यते सा स्थापनाविद्या । द्रव्यविद्या लौकिका शिल्पादिरूपा । लोकोत्तरा द्विविधा कुप्रावचनिका भारतरामायणोपनिषद्रूपा, लोकोत्तरा सुप्रावचनिका विद्या आवश्यकाचाराङ्गादिलक्षणा । सापि ज्ञशरीरभव्यशरीरस्य तदभ्यासवतोऽनुपयुक्तस्य द्रव्यविद्या, अथवाऽनुपयुक्तस्य हेयोपादेयपरीक्षाविकलस्य वाचना-प्रच्छना-परिवर्त्तना-धर्मकथारूपा अनुप्रेक्षावि[२]कला सर्वापि चेतनाविज्ञप्तिर्द्रव्यरूपा ज्ञेया । भावविद्या तु लोकोत्तरार्हत्प्रणीतागम-रहस्याभ्यासवशतः नित्यानित्याद्यनन्तस्वभावभावितानन्तपर्यायोपेतचिद्रूपो-पादेयबुद्धिः विभावाद्यनन्तपरभावपरित्याग[३]ज्ञप्तिलक्षणा । भावविद्या-भ्यासस्यावसरः । तत्र मत्यादिज्ञानक्षयोपशमनिमित्ता इन्द्रियादयो नैगमेन विद्या, सर्वजीवद्रव्याणि संग्रहेण, द्रव्यश्रुतं व्यवहारेण, ऋजुसूत्रेण वाचनादि, शब्दनयेन यथार्थोपयोगः, कारणकार्यादिसंकररूपसविकल्प-चेतना समभिरूढेन, निर्विकल्पचेतना क्षायोपशमिकी साधकावस्था एवं-

---

१. मौनाष्टकम् S.M. । २. विकलापि S.M.,B.1.2.V.2. । ३. परभावत्यागज्ञप्तिः S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतेन, साधका निर्विकल्पतात्त्विकी । तथा केचित्- केवलज्ञानरूपसिद्ध-विद्या इति आद्यनयचतुष्टयस्य द्रव्यनिक्षेपान्तर्गतत्वेन कारणरूपा गृहीता । अन्त्यनयत्रयाणां भावरूपत्वेन कार्यरूपा उत्तरोत्तरसूक्ष्मा गृहीता, तत्र कारणोद्यमेन कार्यादरवता भवितव्यम् ।

**नित्यशुच्यात्मताख्याति-रनित्याशुच्यनात्मसु ।**
**अविद्यातत्त्वधीर्विद्या, योगाचार्यैः प्रकीर्तिता ॥१॥**

नित्यशुच्येति—अनित्याशुच्यनात्मसु नित्यशुच्यात्मताख्यातिः अविद्या इत्यन्वयः । अनित्ये-चेतनाद् जातिभिन्नमूर्त्तपुद्गलग्रहणोत्पन्ने परसंयोगे, या नित्यताख्यातिः सा अविद्या । अशुचिषु-शरीरादिषु श्रवन्नवद्वाररन्ध्रेषु [१]शुद्धस्वरूपावरणनिमित्तेषु शुचिख्यातिः । अनात्मसु-पुद्गलादिषु आत्मताख्यातिः-'अहं ममेति बुद्धिः इदं शरीरं मम, अहमेवैतत्, तस्य पुष्टौ पुष्टः,' इति ख्यातिः-कथनं ज्ञानम्, तत्र रमणमियम् अविद्या-भ्रान्तिबुद्धिः । या च तत्त्वधीः-तत्त्वबुद्धिः, शुद्धात्मनि नित्यता शुचिता आत्मता इति ज्ञप्तिः विद्या-तत्त्वविवेकः । अत्र नित्यत्वं तु उत्पादव्ययध्रुवरूपेऽपि अर्पितानर्पितप्रकारेण द्रव्यास्तिककूटस्थनित्यता ज्ञेया, इयं विद्या परमार्थसाधनपट्वी योगाचार्यैः-योगः-ज्ञान-श्रद्धान-चरणात्मकमोक्षोपायः तस्य आचार्याः- तदाचरणकुशलाः तैः प्रकीर्त्तिता । अत्र भेदज्ञानं साधनम् । उक्तं च **अध्यात्मबिन्दौ-**

**[58] ये यावन्तो ध्वस्तबन्धा अभूवन्,भेदज्ञानाभ्यास एवात्र बीजम् ।**
**नूनं येऽप्यध्वस्तबन्धा भ्रमन्ति, तत्राभेदज्ञानमेवेति विद्मः ॥१।९॥**

**यः पश्येन्नित्यमात्मानमनित्यं परसङ्गमम् ।**
**छलं लब्धुं न शक्नोति, तस्य मोहमलिम्लुचः ॥२॥**

यः पश्येदिति—यः-आत्मार्थी आत्मानम्, नित्यं-सदा अचलित-स्वरूपम्, पश्येत्-अवलोकयेत्, परसङ्गमं-शरीरादिकम् अनित्यम्-अध्रुवं पश्येत्, तस्य-साधनोद्यतस्य मोहो-मौढ्यं मुह्यता-मिथ्यात्वादिभ्रान्तिरूपा

१. शुद्धं V.2., B.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मलिम्लुचः-तस्करः छलं-छिद्रं लब्धुं न शक्नोति-न समर्थो भवतीत्यनेन यथार्थज्ञानवतो रागादयो न प्रवर्धन्ते, तस्यात्मा मोहाधीनो न भवति ॥२॥

**तरङ्गतरलां लक्ष्मीमायुर्वायुवदस्थिरम् ।**
**अदभ्रधीरनुध्यायेद्, अभ्रवद् भङ्गुरं वपुः ॥३॥**

तरङ्गतरलामिति—अदभ्रधीः-पुष्टबुद्धिः, लक्ष्मीः तरङ्गवत्-जलधिकल्लोलवत् तरला-चपला तां तरङ्गतरलामस्थिरामनुध्यायेत्, आयुः-जीवितं वायुवद् अस्थिरं-गत्वरं प्रतिसमयविनश्वरमध्यवसानादिविघ्नोपयुक्तम्, अनुध्यायेत्-चिन्तयेत् । वपुः-शरीरं पुद्गल-स्कन्धनिचितम्, अभ्रवद्भङ्गुरं-भङ्गशीलमनुध्यायेत्, इदं च यथार्थचिन्तनं भावना च । स्वसंपद्विमुक्तेन पृथ्वीकायस्कन्धाः सम्पद्रूपेण उपचरिता न च ते सम्पत् । तथा जीवः ज्ञानदर्शनवीर्यसुखरूपैः भावप्राणैरेव जीवति आयुर्जीवनं तु बाह्यप्राणसम्बन्धस्थितिहेतुः । तन्नात्मस्वरूपम् । तथा वर्ण-गन्ध-रस-स्पर्शाचेतनशरीरोपचयश्च न स्वरूपम्, तदपि अस्थिरम्, इत्येवमस्थिरे परभावे स्वात्मधर्मप्रध्वंसके कः प्रतिबन्धः ? तदर्थं च स्वगुणान् चेतनावीर्यादीन् कः परभावग्रहणोन्मुखान् करोति? अतः आत्मनि आत्मगुणप्रवृत्तिरेव करणीया ॥३॥

**शुचीन्यप्यशुचीकर्तुं, समर्थेऽशुचिसम्भवे ।**
**देहे जलादिना शौच-भ्रमो मूढस्य दारुणः ॥४॥**

शुचीन्यपीति—मूढस्य-अज्ञस्य यथार्थोपयोगरहितस्य, देहे-इन्द्रियायतने जलादिना-पानीयमृत्तिकादिसङ्गेन शौचभ्रमः श्रोत्रियादीनां दारुणः-भयकृत् । यश्च जात्याऽशुचिः, स किं जलव्यूहैः शुचीभवति? कथम्भूते देहे ? शुचीन्यपि-कर्पूरादीन्यपि अशुचीकर्तुं-मलीकर्तुं समर्थे, देहसङ्गाद् मलयजविलेपनादयोऽप्यशुचीभवन्ति[१] । पुनः कथम्भूते देहे ? अशुचिसम्भवे अशुचि-आर्त्तवं मातुः रक्तम्, पितुः शुक्रम्, तेन

१. सर्वप्रतिषु नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवः-उत्पत्तिः यस्य स तस्मिन् । उक्तं च **भवभावनायाम्–**

**[59] सुक्कं पिऊणो माऊए, सोणियं तदुभयंपि संसट्ठं ।**
**तप्पढमयाए जीवो, आहारइ तत्थ उप्पन्नो ॥२५४॥**
**को कायसुणयभक्खे, किमिकुलवासे य वाहिखित्ते य ।**
**देहम्मि मच्चुविहुरे, सुसाणठाणे य पडिबन्धो ॥४२१॥**

अतोऽस्थिरेऽपवित्रे औपाधिकेऽभिनवकर्मबन्धकारणे द्रव्याभावाधिकरणे कः संस्कारः ? ॥४॥

अथ देहे आत्मत्वारोपोऽपि बहिरात्मदोषौघः, अतस्तन्निवार्य स्वरूपे आत्मनः पावित्र्यं करणीयम् । तदुपदिशति–

**यः स्नात्वा समताकुण्डे, हित्वा कश्मलजं मलम् ।**
**पुनर्न याति मालिन्यम्, सोऽन्तरात्मा परः शुचिः ॥५॥**

यः स्नात्वेति–सः-अन्तरात्मा देहाद् भिन्नात्मज्ञानी-स्वपरविवेकी परः-प्रकृष्टः, शुचिः-पवित्रः ज्ञेयः यः पुरुषः, समता-अरक्तद्विष्टता [१]तद्रूपे कुण्डे स्नात्वा कश्मलजं-पापोत्पन्नं मलं हित्वा पुनः मालिन्यं न याति- न प्राप्नोति सम्यक्त्वभावितात्मा परमः शुचिः, '**बन्धेण न वोलइ कयावि**' इति वचनात्, सम्यग्दृष्टिरनेनांशेन स्नातकः न पुनः उत्कृष्टां स्थितिं बध्नाति, एतदेव सहजं पवित्रत्वम् ॥५॥

**आत्मबोधो न वः पाशो, देहगेहधनादिषु[२] ।**
**यः क्षिप्तोऽप्यात्मना तेषु, स्वस्य बन्धाय जायते ॥६॥**

आत्मबोध इति–भो भव्याः ! वः-युष्माकं आत्मबोधः-आत्मज्ञानं न पाशः-न बन्धहेतुः, तेषु देहगृह(गेह-)धनादिषु यः आत्मना क्षिप्तः स पाशः-रागपरिणामः स्वस्य आत्मन [३]एव बन्धाय जायते इत्यनेन देहगृहादिषु यः रक्तः सर्वः भवपाशे बध्नाति स्वस्य बन्धहेतुः इत्यनेन परभावा रागादयः आत्मनः बन्धवृद्धिहेतवः ॥६॥

---

१. सर्वप्रतिषु नास्ति । २. धनादिकम् A.D., V.1. । ३. एवं B.2., L.D.2., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मिथो युक्तपदार्थाना-मसंक्रमचमत्क्रिया ।**
**चिन्मात्रपरिणामेन, विदुषैवानुभूयते ॥७॥**

मिथो युक्त इति– मिथः-परस्परं युक्तानां मिलितानां पदार्थानां-धर्मादीनामेकक्षेत्रावगाहिनां पुद्गलानां च स्वक्षेत्रपरिणतानामसंक्रम-चमत्क्रिया न संक्रमः परस्परममीलनरूपः चमत्क्रिया-चमत्कारः, एक-क्षेत्रावगाढा अपि न परस्परं व्यापका भवन्ति इत्यनेन स्वरूपतो भिन्ना एव, एषा चमत्क्रिया विदुषा एव अनुभूयते-पण्डितेनैव विभज्यते । कथम्भूतेन विदुषा ? चिन्मात्रपरिणामेन- ज्ञानमात्रपरिणामेन । ज्ञान-मात्रबलेन इत्यनेन पञ्चास्तिकायानामेकक्षेत्रस्थितानां कैश्चित्साधारणगुणैः अगुरुलघ्वादिभिः तुल्यानामपि असाधारणगुणैः गतिस्थित्यवगाहचेतना-पूरणगलनादिलक्षणैश्च भेद एव । स्वाशुद्धग्राहकतागृहीतपुद्गलेष्वपि न स्वगुणसंक्रमः । नाऽपि पुद्गलगुणसंक्रमः जीवे । एषा भेदचमत्क्रिया भिन्नद्रव्ये स्वद्रव्यगुणपर्यायाणामेकद्रव्यव्याप्यावस्थितानामाधाराधेयत्वे-नाभेदरूपाणामपि स्वस्वधर्मपरिणतिरूपा भेदचमत्क्रिया । एवं द्रव्याद् द्रव्यस्य, गुणाद् गुणस्य, पर्यायात्पर्यायस्य, स्वभावस्य भेदलक्षणा चमत्क्रिया विदुषा-पण्डितेनैव अनुभूयते । नान्येन द्रव्यानुयोगज्ञान-विकलेन । उक्तं च **सन्मतौ–**

**[60] अण्णोण्णाणुगयाणं इमं च तं च त्ति विभयणमसक्कं ।**
**जह दुद्धपाणियाणं जावन्त विसेसपज्जाया ॥४७॥**

[सन्म० का०१, गा० ४७]

**जं दव्वखित्तकाले, एगत्ताणं पि भावधम्माणं ।**
**सुअनाणकारणेणं, भेए नाणं तु सा विज्जा ॥१॥**

इति **हरिभद्रपूज्यैः** । द्रव्यानुयोगलीनानामाधाकर्मादिदोषमुख्यत्वं न तथा च **भगवत्यङ्गे–[61] "समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभेमाणे किं कज्जइ ? गोयमा ! बहुतरा**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**से निज्जरा किरइ, अप्पतरे से पावे कम्मे कज्जई"** । [श०८ उ०६ सू०३३२] तद्वृत्तिः-इह च केचित् मन्यन्ते-असंस्तरणादिकारणे एवाप्रासुकादिदाने बहुतरा निर्जरा भवति, नाकारणम् । यत उक्तम्—

[62] **★संथरणंम्मि असुद्धं, दोण्हवि गेण्हंतदिंतयाण हिअं ।**
**आउरदिट्ठंतेणं, तं चेव हियं असंथरणे ॥१॥**

अन्ये त्वाहुरकारणेऽपि गुणवत्पात्रायाप्रासुकादिदाने परिणामवशात् बहुतरा निर्जरा भवति अल्पतरं च पापं कर्म इति । निर्विशेषणत्वात् सूत्रस्य, परिणामस्य च प्रामाण्यात् । आह—

[63] **परमरहस्समिसीणं, समत्तगणिपिडगझरियसाराणं ।**
**परिणामिअं पमाणं, निच्छयमवलम्बमाणाणं ॥७६१॥**

[ओघ०नि० गा० ७६१]

इत्यूह्यम् । पुनः—

[64] **चरणकरणप्पहाणा, ससमयपरसमयमुक्कवावारा ।**
**चरणकरणस्स सारं, णिच्छयसुद्धं न जाणन्ति ॥६७॥**

[सन्म० कां०३, गा० ६७]

[65] **अहागडाइं भुंजंति, अण्णमण्णे सकम्मुणा ।**
**उवलित्ते ति जाणिज्जा, अणुवलित्ते ति वा पुणो ॥८॥**
**एतेहिं दोहिं ठाणेहिं, ववहारो ण विज्जइ ।**
**एतेहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥९॥**

[सूय० श्रुत०२ अध्य०५, गा० ८-९, ]

इति द्वितीयाङ्गे-२१ अध्ययने (द्वितीयश्रुतस्कन्धे पञ्चमाध्ययने ) इत्यादि गीतार्थस्याकल्पं कल्पम्, एषा लब्धिः तत्त्वज्ञानवतामेव ॥७॥

**अविद्यातिमिरध्वंसे, दृशा विद्याञ्जनस्पृशा ।**
**पश्यन्ति परमात्मान-मात्मन्येव हि योगिनः ॥८॥**

॥ इति विद्याष्टकम् ॥१४॥

---

★ बृ०क०भा०गा०१६०८, सं०रं०शा०गा० २८४०, नि०भा०गा०१६५०, दंसणसुद्धिपयरणं गा० १२८, श्राद्धदि० कृ० गा० १७५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविद्या इति—एव हि-निश्चये, योगिनः-समाधिदशावस्थाप्रवृत्त-चक्रयोगिनः, आत्मनि एव-स्वात्मनि एव, परमात्मानम्-उत्कृष्ट-निष्पन्नसिद्धात्मानं पश्यन्ति-आत्मनि परमात्मत्वं निर्धारयन्ति । कया? विद्याञ्जनस्पृशा दृशा-विद्या-तत्त्वबुद्धिरूपा अञ्जनस्पृशा दृशा-चक्षुषा, क्व सति ? अविद्या-अज्ञानम् अबोधः-अयथार्थोपयोगो वा तदेव तिमिरं तस्य ध्वंसः तस्मिन्, इत्यनेन मिथ्यातिमिरध्वंसे जाते सम्यग्दृष्टयः आत्मानम् आत्मनि पश्यन्ति । अत एव अनेकोपयोगेन श्रुताभ्यासेन आत्मस्वरूपोपलम्भाय तत्त्वपरीक्षणाय यतितव्यम् । यथार्थमात्म-स्वरूपपरिज्ञानं विद्या परमोपकारिणी इति ज्ञेयम् ॥८॥

॥ इति विद्याष्टकम् ॥१४॥

## अथ विवेकाष्टकम् ॥१५॥

सा च तत्त्वविद्या विवेकेन-स्वपरविभजनेन स्फुटीभवति, अतः विवेकस्याभ्यासः कर्त्तव्यः । तत्र विवेचनं हेयोपादेयपरीक्षणं विवेकः । नामस्थापनाविवेकौ सुगमौ । द्रव्यविवेकः लौकिकः धनोपार्जनराजनीति-कुलनीतिदक्षस्य भवति । लोकोत्तरस्तु धर्मनीतिदक्षस्य भवति । भावतो विवेकः बाह्यस्वजनधनतनुरागविभजनरूपः बाह्यः । अभ्यन्तरश्च ज्ञाना-वरणादिद्रव्यकर्माशुद्धचेतनोत्पन्नविभावितादिभावकर्मैकत्वविभजनरूपः, तत्स्वरूपश्चायमागमे—

**"पुव्विं रागाइया विभावा सव्वओ विभज्जिज्जा ।**
**पच्छा दव्वा कम्मा सव्वविभिन्नो नियो अप्पा ॥१॥"**

तथा च **प्राभृते**-'समस्तकाचशकलव्यूहपतितं रत्नं रत्नपरीक्षकः गृह्णाति, एवं सम्यग्दृष्टिः सर्वविभावपरभावपरिणतिमध्यस्थमात्मान-मचलमखण्डमव्ययं ज्ञानानन्दमयं स्वत्वेन विभज्य उपादत्ते' । **श्रीहरिभद्रपूज्यैश्च** प्रथमं क्षुद्रादिदोषोपशमे[१] मार्गानुसारिगुणे[२] तत्त्व-जिज्ञासा । तत्त्वज्ञगुरुसेवनतः अतिमधुरत्वेन श्रुतरसिकः, यथार्थजीवा-

१. शमैः S.M., V.2., A.D. विना । २. गुणैः S.M. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवविवेचनतः सर्वपरभावभिन्नमात्मानमुपलभ्य भेदज्ञानी भवति । स च क्रमेणात्मतः परं त्यजन् सर्वपरभावत्यागी सिद्ध्यति । तत्राद्यनयत्रयेण लौकिकलोकोत्तरविवेकः, ऋजुसूत्रनयेन धर्मसाधनविवेकः, शब्दादिनयत्रयेण विभावविभजनक्षयोपशमसाधनोपयोगादिक्षायिकसाधकपरिणतिविवेकः यथाक्रममवगन्तव्यः । तत्रात्मनः कर्मसंयोगैकत्वं विवेचयन्नाहः—

**कर्म जीवं च संश्लिष्टम्, सर्वदा क्षीरनीरवत् ।**
**[१]विभिन्नीकुरुते योऽसौ, मुनिहंसो विवेकवान् ॥१॥**

कर्म जीवं च इति—कर्म-ज्ञानावरणादिकम्, जीवं च-सच्चिदानन्दरूपं सर्वदा-सर्वकालम्, क्षीरं-पयः नीरं-जलं तद्वत् संश्लिष्टम् एकीभूतं यो [२]विभिन्नीकुरुते-लक्षणादिभेदैः पृथक् पृथक् कुरुते असौ मुनिहंसः विवेकवान्-भेदज्ञानवान् । जीवो नित्यः, पुद्गलसङ्गाः अनित्याः, जीवः अमूर्त्तः पुद्गला मूर्त्ताः, जीवोऽचलः पुद्गलाश्चलाः, जीवः ज्ञानाद्यनन्तचेतनालक्षणः, पुद्गला अचेतनाः, जीवः स्वरूपकर्ता, स्वरूपभोक्ता, स्वरूपरमणाभवविश्रान्तिः[३], पुद्गलाः कर्तृत्वादिभावरहिताः, इत्यादिलक्षणैः विभज्य यो विरक्तः स मुनिः-श्रमणः विवेकवान्-विवेकयुक्त इति ज्ञेयम् ॥१॥

**देहात्माद्यविवेकोऽयम्, सर्वदा सुलभो भवे ।**
**भवकोट्यापि तद्भेद-विवेकस्त्वतिदुर्लभः ॥२॥**

देहात्मा इति—आत्मा त्रिविधः-बाह्यात्मा १ अन्तरात्मा २ परमात्मा ३ चेति । यस्य देहमनोवचनादिषु आत्मत्वभासः[४], देह एवात्मा एवं सर्वपौद्गलिकप्रवर्त्तनेषु आत्मनिष्ठेषु आत्मत्वबुद्धिः स बाह्यात्मा १ । मिथ्यादृष्टिः एषः । पुनः सकर्मावस्थायामपि आत्मनि ज्ञानाद्युपयोगलक्षणे शुद्धचैतन्यलक्षणे महानन्दस्वरूपे निर्विकारामृता-

---

१-२. विभिन्नं S.M., B.2., V.2. । ३. विश्रान्तः A.D., V.2., B.1.2. । ४. आत्मत्वस्वभावः V.1., आत्मस्वभावः V.2.,B.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याबाधारूपे समस्तपरभावमुक्ते [१]आत्मबुद्धिः अन्तरात्मा । सम्यग्दृष्टि-गुणस्थानकतः क्षीणमोहं यावत् अन्तरात्मा उच्यते २ । यः केवलज्ञान-दर्शनोपयुक्तः शुद्धसिद्धः स परमात्मा, सयोगी अयोगी केवली सिद्धश्च स परमात्मा उच्यते । सर्वत्र परमात्मत्वसत्ता समाना, अतो भेदज्ञानेन सर्वं साध्यमिति । देहात्मा देहः-शरीरम्, आत्मा-जीवः, आदिशब्दात् मनोवाक्कायादिषु आत्मा अयम् इत्यविवेकः सर्वदा-सर्वकालं सुलभः-सुप्राप्यः भवे-संसारे । तद्भेदविवेकः—तस्य शरीरात्मनोः भेदविवेकः—भिन्नताविवेचनरूपः भवकोट्यापि अतिदुर्लभः-दुष्प्रापः अनादि-कालैकत्वगृहीतपरभावात्मनोः स्वस्वलक्षणभेदेन भेदज्ञानमतिदुर्लभम् । सम्यग्दृष्टिरेव भेदज्ञानं करोति आत्मन्यात्मत्वनिश्चयः दुर्लभः । उक्तं च

**समयप्राभृते—**

**[66] सुदपरिचिदाणुभूता, सव्वस्सवि कामभोगबंधकहा ।**
**एगत्तस्सुवलंभो णवरि ण सुलहो विहत्तस्स ॥४॥**

आत्मा ज्ञानानन्दमयः, परभावा रागादयः । तेषां विभजनरूपः आत्मस्वरूपरसिकत्वोपयोगो दुर्लभः ॥२॥

**शुद्धेऽपि व्योम्नि तिमिराद्, रेखाभिर्मिश्रता यथा ।**
**विकारैर्मिश्रता भाति, तथात्मन्यविवेकतः ॥३॥**

शुद्धे इति—यथा-येन प्रकारेण, शुद्धे व्योम्नि-आकाशे तिमिरात् चक्षुषि भ्रमतिमिररोगात् रेखाभिर्नीलपीतादिभिः मिश्रता-शबलता कर्बुरता दृश्यते तथा-तेनैव प्रकारेण अविवेकतः-असदुपयोगतः विकारैः -रागाद्यशुद्धाध्यवसायैः मिश्रता-एकता भाति-शोभते इति । अनादि-विकारविक्रियापरिणतः दृश्यते इत्यनेन निश्चयनयेन निर्विकाराखण्ड-चिन्मूर्त्तिः तथापि परैकत्वेन विकाराङ्कितो भासते इति ॥३॥

[२]ननु आत्मनः परभावकर्त्तृत्वाभावे [३]परोपाधिजन्यविकारेण

---

१. आत्मत्वबुद्धिः A.D. । २. अथ व्याख्या- V.2.,B.1.2., S.M., A.D. । ३. व्योम्नि तिमिराद् रेखाभिः मिश्रता यथा विकारैः अन्येन विकारेण, एष पाठोऽधिकः । V.2., B.1.2., S.M.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकारता कथमिति निवारयन्नाह–

**यथा योधैः कृतं युद्धम्, स्वामिन्येवोपचर्यते ।**
**शुद्धात्मन्यविवेकेन, कर्मस्कन्धोर्जितं तथा ॥४॥**

यथा योधैरिति—यथा योधैः-सुभटैः कृतं युद्धं-समरम्, स्वामिनि-नृपे, उपचर्यते जयपराजयहर्षविषादश्लोकाश्लोकादिकं स्वामिनि एव अयं नृपः जितः अयं पराजितः लोके इत्युक्तिर्भवति तच्च स्वामित्वांशं ममत्वैकत्वेन तथा संग्रहेण शुद्धे आत्मनि अविवेकेन–अज्ञानेन असंयमेन कर्म-ज्ञानावरणादि तस्य स्कन्धः-समूहः तस्य ऊर्जितं-साम्राज्यमस्ति इत्यनेन स्वस्वरूपकर्तृत्वभोक्तृत्वपरावृत्तौ ग्राहकतादिशक्तिपरिग्रहणेन तत् कर्तृत्वापत्तिर्जीवस्योपचर्यते-उपचारः क्रियते, असदारोप उपचारः, परभावकर्तृत्वादिपरिणत्यभावेऽप्यौपाधिककर्तृत्वाद्युपचारोऽनादीनः इति ॥४॥

पुनस्तदेव कथयति परप्रसङ्गाच्चैतन्यव्यामोहं दर्शयति—

**इष्टकाद्यपि हि स्वर्णम्, पीतोन्मत्तो यथेक्षते ।**
**आत्माभेदभ्रमस्तद्वद् देहादावविवेकिनः ॥५॥**

इष्टकाद्यपि इति—कश्चित् पीतोन्मत्तः-पीतेन-कनकेन पङ्क्ति-रथन्यायेनार्थः धत्तूरकेणोन्मत्तः-घूर्मितः इष्टकाद्यपि मृन्मयस्कन्धानपि हीति-निश्चितं स्वर्णम् ईक्षते-विलोकते तद्वत् अविवेकिनः-तत्त्वज्ञान-विकलाः, [१]देहादौ-शरीरादौ, आत्माभेदभ्रमः(भ्रमं)ईक्षते (न्ते) आत्मना -चेतनेन सह न भेदः-अभेदः तस्य भ्रमः (भ्रमं) कुर्वन्ति । शुद्धा-गमाश्रवणाज्ञातस्वपरविभेदः परं स्वात्मत्वेन जानन् आत्मानं परेणैकत्वं मन्यमानः भ्रमत्यनन्तकालम्, अतः अयमविवेकस्त्याज्यः ॥५॥

पुनः शुद्धताशुद्धताहेतुत्वोपदेशं कथयति–

---

१. देहात्-शरीरात् B.1.2., A.D., S.M.,V.2., ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इच्छन्न परमान् भावान्, विवेकाद्रेः पतत्यधः ।**
**परमं भावमन्विच्छन्नाविवेके निमज्जति ॥६॥**

इच्छन्न परमानिति–परमान् भावान् परमभावग्राहकनयेन संमत-शुद्धचैतन्यानुगसर्वधर्मपरिणमनेन परमान्-उत्सर्गशुद्धनयोपदिष्टान् नित्या-नित्याद्यनन्तान् [1]न इच्छन्-[2]न वाञ्छन् विवेकाद्रेः-तत्त्वज्ञान-तत्त्वरमण-गिरेः शृङ्गाद् अधः पतति-विवेकरहितो भवति, परमं-शुद्धं तादात्म्यता-गतं सर्वविशुद्धात्मस्वभावं स्याद्वादोपयोगेन अन्विच्छन् गवेषयन् शुद्ध-चैतन्यमुपादेयतया कुर्वन् अविवेके-अज्ञाने असंयमे न निमज्जति-न मग्नो भवति । [3]आत्मस्वरूपैकत्वानुभवकरणप्रवृत्तः परभावचूरणचक्रवर्त्ती एव इति समस्तपरभावोन्मादमन्थनपटुशुद्धात्म[4]ज्ञान-श्रद्धान-रमणानु-भवने यतितव्यम्, नार्वाचीनपरिणतौ, अत एवापूर्वकरणप्रविष्टमुनिरने-कर्द्धिलाभे न सङ्गतिमङ्गति । अपूर्वकरणं च सर्वाभिनवगुणप्राप्तौ भवत्येव ।

**[67] सम्मदरसव्वविरई, अणविसंजोयदंसखवगे य ।**
**मोहसमसंतखवगे खीणसजोगीयर गुणसेढी ॥८२॥**

[शतककर्म० गा० ८२]

एवमेकादशगुणश्रेणिषु प्रथमगुणश्रेणौ करणत्रयं शेषासु दश-सङ्ख्यासु अपूर्वकरणानिवृत्तिरूपं करणद्वयं करोत्येव । एवमपूर्वा-पूर्वकरणारोहणेन कर्मपटलविगमो भवति । उक्तं च–

**[68]सातर्द्धिरसेष्वगुरुः, संप्राप्य विभूतिमसुलभामन्यैः ।**
**सक्तः प्रशमरतिसुखे, न भजति तस्यां मुनिः सङ्गम् ॥२५६॥**
**या सर्वसुरवरर्द्धिर्विस्मयनीयाऽपि सानगारर्द्धेः ।**
**नार्घति सहस्रभागम्, कोटिशतसहस्रगुणितमपि ॥२५७॥**

[प्रशमरतिः गा० २५६-५७]

---

१-२. सर्वप्रतिषु नास्ति । ३. अथात्म० B.1.2.,V.2.,S.M. । ४. ज्ञानरमणा० A.D.,V.1. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आत्मन्येवात्मनः कुर्यात्, यः षट्कारकसङ्गतिम् ।**
**क्वाविवेकज्वरस्यास्य, वैषम्यं जडिमजवात्*( जडमज्जनात् ) ।।७।।**

आत्मन्येवात्मन इति—यः आत्मनः कर्तृत्वव्यापारविभजनदक्षः आत्मनि-एके स्वात्मद्रव्ये, एव आत्मनः स्वीयां षट्कारकसङ्गतिं- षट्कारकाणां कर्ता(कर्तृ)-कर्म-करण-सम्प्रदानाऽपादानाऽधिकरण- रूपाणां सङ्गतिमेकत्वं कुर्यात् । अस्य पुरुषस्य अविवेकोऽज्ञानं तदेव (स एव) ज्वरस्तस्य वैषम्यं-विषमत्वं क्व-कथं भवति ? ज्वरस्य हेतुत्वमाह-'जडिमजवात्' जडिमा-मौढ्यं तस्य जवो-वेगः तस्मात्, अथवा जलमज्जनात्-जलमज्जनेन महाज्वरोत्पातः तस्मात् । अत्र षट्कारकव्याख्या **श्रीविशेषावश्यक**ानुसारेण उच्यते । आत्मा कर्तात्मा[1] परः सः तथा च यः कर्ता स कारकचक्रोपेत एव । आत्मा कर्ता स्वगुणपरिणमनात्मकज्ञप्तिक्रियाकारकत्वात् । ज्ञानाद्यनन्तगुणप्रवृत्तिः कार्यम् । गुणाः करणभूताः[2] । गुणपर्यायाणामुत्पादपर्यायाणां पात्रत्वात् सम्प्रदानम् । व्ययीभूतपर्यायाणां विश्लेषास्पदत्वाद् अपादानम् । तथानन्तगुणपर्यायाणामाधारत्वाद् आधारः । आत्मनि आत्मा आत्मानम् आत्मना आत्मने आत्मनः परिणमनवृत्त्या करोति । उक्तं च **श्रीजिन- भद्रपूज्यैः—**

[69] **कारणमहवा छद्धा, तत्थ संततो त्ति कारणं कत्ता ।**
**कज्जप्पसाहगतमं, करणं मिउपिंडदंडाइं ॥ २११२ ॥**

[विशेषा० गा० २११२]

व्या० अथवा कारणं षोढा । तत्र स्वतन्त्रः कर्त्ताः यः स्वतन्त्रं स्वाधीनं कारणं स कर्ता यथा घटस्य कर्ता कुम्भकारः, तथा आत्मनि व्याप्यावस्थितानामभेदरूपाणां गुणानां स्वस्वपरिणमनकार्यव्यापार- प्रवृत्तिरूपां क्रियां करोति तेनात्मा कर्ता १ । कार्यप्रसाधकतमं कारणं करणमुपादान-निमित्तभेदात् द्विभेदम् । तत्र घटे मृत्पिण्डमुपादानम्,

१. कर्तात्मापारः V.2., B.2. A.D., कर्ताव्यापारः V.1 । २. कारण० B.1., V.2.।
★ अत्र वृत्तिकारस्यानुसारेण मूलगाथा लिखिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दण्डादि निमित्तम्, तथा आत्मा कर्ता, ज्ञानादि कार्यम् । तत्र स्वसत्ता-परिणतिः उपादानम् । स्वरूपसिद्धौ शुद्धपारिणामिककार्ये निमित्ताभावः इति । कर्मक्षपणशुद्धात्मप्राग्भावलक्षणे साधनकार्येऽप्यात्मा कर्ता, च तत्त्वसिद्धिः कार्यम्, आत्मगुणा ज्ञानदर्शनचारित्रवीर्यरूपाः स्वधर्मसाधना-वलम्बिनः [१]कारणमुपादानम्, निर्विकारवीतरागवाक्यादयः निमित्तमिति ।

**[69] कम्मं किरियाकारणमिह निच्चिट्ठो जओ न साहेइ ।**
**अहवा कम्मं कुम्भो, स कारणं बुद्धिहेउ त्ति ॥२११३॥**
**भव्वो त्ति व जोग्गो त्ति व, सक्को त्ति व सो सरूवलाभस्स ।**
**कारणसंनिज्झंमि वि, जं नागासत्थमारंभो ॥२११४॥**
**बज्झनिमित्तावेक्खं, कज्जं वि य कज्जमाणकालम्मि ।**
**होइ सकारणमिहरा, विवज्जयाऽभावया होज्जा ॥२११५॥**

[विशेषा० गा० २११३-१४-१५]

क्रियते कर्त्रा निर्वर्त्यते इति व्युत्पत्तेः कर्म भण्यते । कासौ क्रिया? कुम्भं प्रति कर्तृव्यापाररूपा, सा च कुम्भलक्षणकार्यस्य कारणमिति प्रतीतमेव । आह—ननु कुलाल एव कुम्भं कुर्वन्नुपलभ्यते, क्रिया तु न काचित् कुम्भकरणे व्याप्रियमाणा दृश्यते । इत्याह—इह निश्चेष्टः कुलालोऽपि यस्मान्न (घटं) साधयति-निष्पादयति, या च तस्य चेष्टा सा क्रिया इति कथं न तस्याः कुम्भकारणत्वमिति । अथवा-कर्तुः ईप्सिततमत्वात् क्रियमाणः कुम्भ एव कर्म, तर्हि कार्यमेवेदमतः कथमस्य कारणत्वं ? नहि सुतीक्ष्णमपि सूच्यग्रमात्मानमेव विध्यति । ततः कार्यं निर्वर्त्यस्यात्मन एव कारणमित्यनुपपन्नमेवेत्याह- स कारणं (बुद्धिहेउ त्ति) स कुम्भः कारणं-हेतुः कुम्भस्य । कुतः ? प्रस्तावात्-कुम्भबुद्धिहेतुत्वात् । इदमुक्तं भवति-सर्वोऽपि बुद्धौ सङ्कल्प्य कुम्भादि-कार्यं करोति, इति व्यवहारः, ततो बुद्ध्यध्यवसितस्य कुम्भस्य चिकीर्षतो मृन्मयकुम्भः तद् बुद्ध्यालम्बनतया कारणं भवत्येव । न च वक्तव्यम-

---

१. करण० V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निष्पन्नत्वादसन्नसौ तद्‌बुद्धेरपि कथमालम्बनं स्यात् ? द्रव्यरूपतया तस्य सर्वदा सत्त्वादिति । ननु य एवेह मृन्मयकार्यरूपो घटः तस्यैव कारणं चिन्त्यते इति प्रस्तुतं बुद्ध्यध्यवसितस्तु तस्मादन्य एवेति तत्कारणाभिधानमप्रस्तुतमेव । सत्यम्, भाविनि भूतवदुपचारन्यायेन तयोरेकत्वाध्यवसानाददोषः । स्थासकोशादिकारणकालेऽपि हि किं करोषीति पृष्टः कुम्भकारः "कुम्भं करोमी"त्येवं वदति, बुद्ध्यध्यवसितेन निष्पत्स्यमानस्यैकत्वाध्यवसायादिति । अथवा-भव्यो योग्यः स्वरूपलाभस्येति शक्य उत्पादयितुमतः सुकरत्वात्कार्यमप्यात्मनः कारणमिष्यते । अवश्यं च कर्मणः कारणत्वमिष्टव्यम्, यत्-यस्मात्, समस्तकारणसामग्रीसंनिधानेऽपि नैवमेव कोशार्थं प्रारम्भः किन्तु विवक्षितकार्यार्थमतस्तदविनाभावित्वात् तत्क्रियायाः कार्यमप्यात्मनः कारणमिति । एतदेव भावयति-बाह्यानि कुलालचक्रचीवरादीनि यानि निमित्तानि तदपेक्षं[1] क्रियमाणकालेऽन्तरङ्गबुद्ध्यालोचितं कार्यं भवति । स्वस्यात्मनः कारणं स्वकारणम्, अन्यथा यदि बुद्ध्या पूर्वमपर्यालोचितमेव कुर्यात् तदा प्रेक्षापूर्वं शून्यमनस्कारम्भविपर्ययो भवेत् । घटकारणसंनिधावप्यन्यत् किमपि शरावादिकार्यं भवेदभावो वा भवेद् । न किंचित्कार्यं भवेदित्यर्थः । तस्माद्-बुद्ध्यध्यवसितं कार्यमप्यात्मनः कारणमेवेष्टव्यम् । किं बहुना? यथा यथा युक्तितो घटते तथा तथा सुधिया कर्मणः कारणत्वं वाच्यम् । अन्यथा कर्मणः अकारकत्वे करोतीति कारकमिति षण्णां कारकत्वानुपपत्तिरेव स्यादिति ।

**[69] देओ स जस्स तं संपयाणमिह तं पि कारणं तस्स ।**
**होई तदत्थिताओ, न कीरए तं विणा जं सो ॥२११६॥**

स अभिनवपर्यायः यस्य देयः स तं प्रति सम्प्रदानम्, तदपि तस्य कारणम् । यद्वस्तु तदर्थित्वे तत्त्वे तदरूपत्वे भवति न अभिनवपर्यायग्रहणं तर्हि न कार्योत्पत्तिः। इदमुक्तं भवति-अभिनवपर्यायग्रहणेनैव कार्यसिद्धिः।

---

१. तदपेक्ष्य V.1. ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**[69] भूपिंडावायाओ, पिंडो वा सक्करादवायाओ ।**
**चक्कमहावाओ वाऽऽपादाणं कारणं तं पि ॥२११७॥**

भूपिण्डस्य अपायः शर्करादीनामपायः चक्रादीनामुपपत्तौ एवमपादानं कारकं कारणं भवति । भूरपादानं पिण्डापायेऽपि ध्रुवत्वात् । अथवा विवक्षया पिण्डः अपादानम्, तद्गतशर्करादीनामपायेऽपि विवेकेऽपि ध्रुवत्वात् अथवा घटापायाच्चक्रमापाको वाऽपादानमिति ।

**[69] वसुहागासं चक्कं, सरूवमिच्चाइसंनिहाणं जं ।**
**कुंभस्स तंपि कारणमभावओ तस्स जदसिद्धी ॥२११८॥**

घटस्य चक्रं सन्निधानमाधारः, तस्यापि वसुधा, तस्या अप्याकाशम्, अस्य पुनः स्वप्रतिष्ठत्वात् स्वरूपमाधारः । इत्येवमादि यत्किमपि आनन्तर्येण परम्परया वा सन्निधानमाधारो घटस्य विवक्ष्यते तत्सर्वमपि तस्य कारणम् । तदभावे तस्य घटस्य यद्-यस्मादसिद्धिः । एवमात्मनोऽपि यथा आत्मा कर्ता, स्वगुणानां कर्ता, स्वस्वज्ञप्तिदृष्टिरमणानुभवलक्षणानां प्रवृत्तिः कार्यम्, ते एव गुणाः सत्तास्था निरावरणाः करणरूपाः, तेषामेवोत्पादपरिणतिपर्यायाभिनवाविर्भावलक्षणं सम्प्रदानम्, तेषामेव पर्यायाणां ज्ञानादीनां पूर्वपर्यायव्ययलक्षणमपादानम्, आत्मनः असङ्ख्येयप्रदेशरूपस्वक्षेत्रत्वं समस्तगुणपर्यायाणामाधारः । इति स्वस्वरूपषट्कारकाणां सर्वकार्यनिष्पत्तिः । परिणतानां ज्ञानं सविवेकस्तद्विवेकवता सर्ववैषम्याभावः इति श्लोकार्थः । अत्रावसरायातमुच्यते, कारकता तु आत्मपरिणतिकर्तृत्वरूपात्मशक्तिपरिणामः । स च सदैव निरावरणोऽपि बन्धकार्यकर्तृत्वेन कर्मरूपस्य कर्ता एव सम्यग्ज्ञानोपयोगगृहीतस्वरूपलाभाभिलाषी स्वगुणप्राग्भावरूपस्वसाधनकार्यकर्ता स एव निष्पन्नपूर्णानन्दसिद्धत्वे स्वरूपगुणपरिणमनज्ञायकतादिमूलकार्यकर्ता इति ज्ञेयम् ॥७॥

**संयमास्त्रं विवेकेन, शाणेनोत्तेजितं मुनेः ।**
**धृतिधारोल्बणं कर्म, शत्रुच्छेदक्षमं भवेत् ॥८॥**

॥ इति विवेकाष्टकम् ॥१५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयमास्त्रमिति-संयमः-परभावनिवृत्तिरूपः तदेव अस्त्रं विवेकेन-स्वपरविवेचनेन शाणेन-'शराणेकरी' इति भाषा । उत्तेजितम्-उत्कृष्ट-तेजस्तां नीतम्, धृतिः-सन्तोषः, तद्रूपा धारा तया उल्बणं-तीक्ष्णं संयमास्त्रम्, कर्म-ज्ञानावरणादि, तदेव शत्रुः तस्य छेदः तस्मिन् क्षमं-समर्थं भवति, इत्यनेन अनादिमिथ्यात्वासंयमाज्ञानाधिष्ठः विशिष्टोत्कृष्ट[1]-रूपस्वरूपधर्मभ्रान्त्या परभावैकत्वोत्पन्नविपर्यासकर्तृत्व-भोक्तृत्व-ग्राहकत्वाद्यशुद्धपरिणत्या संगृहीतकर्मोपाधिः तद्विपाकप्राप्तशुभा-शुभसंयोगभोगेन रागद्वेषपरिणतः संसारे संसरति जीवः, स एव त्रिलोक-वत्सलार्हदुक्तपरमागमसंयोगपीततत्त्वरहस्यः स्वपरविवेकेन परभावविभावाभ्यां निर्वृतः शुद्धात्मीयस्वभावरुचिः सर्वाश्रवनिर्वृतः परमात्म-साधको भवति। अत एव स्वपरभेदज्ञानरूपविवेकाभ्यासः करणीयः ॥८॥

**॥ इति व्याख्यातं विवेकाष्टकं पञ्चदशम् ॥ १५ ॥**

## अथ माध्यस्थाष्टकम् ॥१६॥

अथ विवेकी [2]रागद्वेषवान् न भवति शुभाशुभसंयोगे मध्यस्थो भवति । अतो माध्यस्थ्यं निरूपयति । अत्र भावना—धर्मध्यानालम्बनरूपा चतुष्प्रकारा, मैत्री १ प्रमोदा २ माध्यस्था ३ करुणा ४ एवं च-

**[70]मा कार्षीत्कोऽपि पापानि, मा च भूत् कोऽपि दुःखितः।**
**मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥११८॥**
**अपास्ताशेषदोषाणाम्, वस्तुतत्त्वावलोकिनाम् ।**
**गुणेषु पक्षपातो यः, स प्रमोदः प्रकीर्त्तितः ॥११९॥**
**दीनेष्वार्त्तेषु भीतेषु, याचमानेषु जीवितम् ।**
**उपकारपरा बुद्धिः, कारुण्यमभिधीयते ॥१२०॥**
**क्रूरकर्मसु निःशङ्कम्, देवतागुरुनिन्दिषु ।**
**आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥१२१॥**

[यो०शा० प्र०-४ श्लो० ११८-१२१]

१. ०त्कृष्टा० B.2., A.D., V.1.2. । २. रागद्वेषाभाववान् भवति B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति भावनालक्षणं योगशास्त्रोक्तं व्यवहारनयेन निश्चयनयेन । सर्वजीवपुद्गलेषु शुभाशुभपरिणतेषु अरक्तद्विष्टतारूपा परिणतिः मध्यस्था, सा नामादिभेदतः चतुर्द्धा । तत्र द्रव्यमध्यस्था अनुपयुक्तस्य साध्यसाधनशून्यस्य, भावमध्यस्था मुनेः मध्यस्थपरिणतिः । आद्यनयचतुष्टये द्रव्यमध्यस्था, अन्त्यनयत्रये भावमध्यस्था, साऽपि साधकस्य साधनकाले साधनारूपा, वीतरागस्य च सर्वान्यजीवपुद्गलसमूहेषु न रागः न द्वेषः एषा सिद्धरूपा उत्सर्गैवंभूतरूपा मध्यमा(स्था) । साऽत्र प्रतन्यतेः—

**स्थीयतामनुपालम्भम्, मध्यस्थेनान्तरात्मना ।**
**कुतर्ककर्करक्षेपैस्त्यज्यतां बालचापलम् ॥१॥**

स्थीयतामिति—भो उत्तमाः! बालचापलं-बालस्याज्ञस्यैकान्ताज्ञानरक्तस्य चापलं-वस्तुस्वरूपानपेक्षिवचनरूपं चापल्यम्, त्यज्यतांमुच्यताम्, कैः ? । (कुतर्ककर्करक्षेपैः-) कुतर्काः-कुयुक्तयः ते एव कर्कराः-उपलास्तेषां क्षेपास्तैः तदा किं कर्त्तव्यमित्याह-मध्यस्थेनरागद्वेषाभावेन, अन्तरात्मना-साधकात्मना, साधकत्वेन अनुपालम्भं स्थीयताम्, मध्यस्थस्य स्वभावोपघातरूपोपालम्भः [१]न यस्य सः अनुपालम्भस्तं यथा स्यात् तथा, इत्यनेन यो हि शुभैः पुद्गलैः न रज्यते अशुभैश्च न द्वेष्टि तस्य नोपालम्भः ॥१॥

**मनोवत्सो युक्तिगवीम्, मध्यस्थस्यानुधावति ।**
**तामाकर्षति पुच्छेन, तुच्छाग्रहमनःकपिः ॥२॥**

मनोवत्स इति—मध्यस्थस्य मनोवत्सः चित्तमित्यर्थः । युक्तिगवींयथार्थवस्तुस्वरूपविभजनोपपत्तिः युक्तिः, सा एव गौस्तां युक्तिगवीम्, अनुधावति-अनुगच्छति पक्षपाताभावाद्, यथार्थोपयोगता एव भवति । तां सम्यग्ज्ञानतां [२]गावम्, तुच्छाग्रहमनःकपिः-तुच्छः-स्याद्वादोत्सर्गापवादाद्यनन्तोपयोगशून्य[३]मनसः ग्रहः-कदाग्रहः, तन्मयं मनो यस्य सः, कपिःवानरः पुच्छेन आकर्षति-गतिस्खलनाय भवति, न तादृग् यथार्थयुक्तिः प्रसरति । कदाग्र[४]हमनसां पक्षदृष्टिरेव न तत्त्वदृष्टिरिति ॥२॥

---

१. A.D., V. 1, प्रतौ एष पाठोऽस्ति, अन्यत्र न । २. गवाम् V. 1.2, B.2., S.M.। ३. शून्यः मनस ग्रहः सर्वप्रतिषु । ४. मग्नानाम् A.D.,V. 1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नयेषु स्वार्थसत्येषु, मोघेषु परचालने ।**
**समशीलं मनो यस्य, स मध्यस्थो महामुनिः ॥३॥**

नयेषु इति—स महामुनिः मध्यस्थ उच्यते, यस्य मनः नयेषु समशीलं-नयान्तरोक्तवस्तुधर्मेषु तत्प्रवर्त्तनेषु मनः समभावलक्षणं स्वपक्षपातरहितम्, कथम्भूतेषु नयेषु ? स्वार्थसत्येषु, स्वस्य अर्थः स्वार्थः, तस्मिन् सत्येषु स्वाभिमतस्थापनकुशलेषु, परचालने-परस्थापने मोघेषु-निष्फलेषु, परपक्षस्थापनेऽसत्येषु स्वमतस्थापने धीरेषु यः समः-[१]इष्टताऽनिष्टतारहितोपयोगः यथार्थविभजनशीलः स मुनिः मध्यस्थः । नयस्वरूपं गीयते च-अनेकधर्मकदम्बकोपेतस्य वस्तुनः एकेन धर्मेणोन्नयनमवधारणात्मकं वस्तुनः एकांशपरिच्छेदकं ज्ञानं नयव्यपदेशमास्कन्दति । नयस्य स्वार्थग्राहकता नित्यमेवेदमनित्यमेवेदमित्येकान्तज्ञानमेकपक्षस्थापनरूपं मिथ्याज्ञानम् । सर्वनयस्थापनपरं सर्वस्वभावात्मवस्तुस्वरूपसापेक्षं गौणमुख्यत्वेन अर्पितानर्पितोपयोगमेकांशज्ञानं नयज्ञानम् । [२]तदेवान्यनयोच्छेदरूपं दुर्नयव्यपदेशं लभते । सर्वसापेक्षतया स्वरूपवृत्तिज्ञानं सुनयः । उक्तं च **सन्मतौ**-

**[71] तम्हा सव्वे वि नया, मिच्छादिट्ठी सपक्खपडिबद्धा ।**
**अण्णोण्णणिस्सिया पुण, हवन्ति सम्मत्तसब्भावा ॥२१॥**
[कां-१, गा०२१]

ते च नयाः सप्त, नैगमः १ संग्रहः २ व्यवहारः ३ ऋजुसूत्रः ४ शब्दः ५ समभिरूढः ६ एवंभूतः ७ । एवमेषु चत्वारो द्रव्यनयाः, त्रयः भावनयाः, इति **पूज्याशयः** । **दिवाकरास्तु**-आद्याः त्रयः द्रव्यनयाः, तथा शेषाः चत्वारः भावनयाः । तत्र निगम्यन्ते-परिच्छिद्यन्ते इति निगमा गमा लौकिका अर्थाः, तेषु निगमेषु भवो योऽध्यवसायो ज्ञानांशः (ज्ञानाख्यः) स नैगमः । स च सामान्येनाऽपि व्यवहरति । सामान्यबुद्धिहेतुना सामान्यवचनहेतुना च, अत्यन्तभेदेभ्योऽन्यत्वरूपेण

१. इष्टानिष्टता A.D., B.1.2, S.M. । २. तदन्य B.1.2, S.M., V. 2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तामात्रेण सामान्यबुद्धिचेतना (हेतुना) अशोकवनादिषु सत्स्वप्यनेकजातिवृक्षेषु वनस्पतिसामान्यात् 'वनम्' इत्यवबोधः । (सामान्य-) वचनहेतुना च द्रव्यम् इत्यादि जीवाजीवविभागविकलः । [1]तथा विशेषेणापि (विशेष) बुद्धिहेतुना विशेषवचनहेतुतारूपा हेतुना अत्यन्तसामान्यादन्यत्वरूपेण व्यवहरति परमाणुनिष्ठत्वेन । तथा सामान्यविशेषेणापि गवादिना सर्वगोपिण्डेष्वनुवृत्त्यात्मकेन अश्वादिव्यावृत्त्यात्मकेन च व्यवहरति । यथा लोको व्यवहरति, तथाऽनेन व्यवहर्त्तव्यमिति, लोकश्चोपदिष्टैः प्रकारैः समस्तैः व्यवहरति। प्रवचने च वसतिप्रस्थकनिदर्शनद्वयेन विभावितः, काणभुजराद्धान्तहेतुरवगन्तव्यः । स च अंश-सङ्कल्पभेदाद् द्विविधः, स च सदसद्-योग्यताभूतपूर्वारोपभेदाद् अतीताऽनागतवर्त्तमानतदारोपादिभेदाद् अनेकविधः, नामनिक्षेपतो द्रव्यनिक्षेपवृत्तिः, अंशोपलम्भे सर्वारोपः, अन्यसमस्तसापेक्षः नैगमः सुनयः ।

अभेदेन-वस्तुसामान्येन संग्रहणात् सर्वस्य सर्वं संगृह्णातीति संग्रहः, वस्तुसत्ताग्राहकः संग्रहः । यदि भवनाभिसम्बद्धस्यैव भावत्वमभ्युपगम्यते ततः परिसमापितात्मस्वरूपित्वाद् भावस्य भ्रान्तिसमुपनिबन्धनघटादिविकल्प(प्रकल्पन)मानर्थक्यम् । यदि घटादिविकल्पोऽपि भवनप्रवृत्तितन्त्रमेवेत्येवं सति भाव एव, तदनर्थान्तरत्वात् तत्स्वात्मवत् । भवनार्थान्तरत्वे [2]व्योमोत्पलादिवदसत्त्वम्, विकल्पानां रासभविषाणादिसत्त्वं वा, घटादिवद् भवनानर्थान्तरत्वात् । एतद्दर्शनपुरःसरा एव च सर्वनित्यैकत्वं[3]कारणमात्रवादाः कालपुरुषस्वभावादयश्चेति । अत्र द्रव्यास्तिकभेदा जीवाजीवयोग्यत्वसद्द्रव्य-उपचारद्रव्य-एकत्वाभेदादिगोचरभेदादनेकभेदः । भावनिश्चयसामान्याभेदसंगृहीतानां विधिपूर्वकावस्थादिभेदेन विभजनं-भेदकरणलक्षणं तत्तद्धर्मप्रवृत्तिभिन्नज्ञानरूपः व्यवहारः । यदि घटादिभेदश्रुत्या स्वसामान्यानुबद्धस्य निरस्तसामान्या-

---

१. तद्वा A.D., S.M., B.1.2, V.2 । २. चान्योत्प० सर्वप्रतिषु । ३. कत्वा० सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरसम्बन्धस्य श्रूयमाणत्वानुगुणमेव ग्रहणं न स्यात् । किन्तु सर्वव्यपदेशविशेषाभिव्यङ्ग्यो भाव एव तेन तेन रूपेणाभिव्यज्यते[1]। ततो घटाद्यन्यतरभेदश्रुतौ सर्वरूपभेद[2]भावप्रतीतिप्रसङ्गः, ततश्च [3]घटपटोदकादिरूपव्यतिकरभावप्रसङ्गः, उपदेशक्रियोपभोगापवर्गव्यवस्थादीनां चाभावात्सर्वसंव्यवहारोच्छेदः । सर्वविशेषव्याकरणे च निर्निबन्धनभवनाभावाद् भावाभाव एव । अविशेषत्वाभेदत्वानिरूप्यत्वादितश्च नैवासौ भावः खरविषाणादिवत् । तस्माद् व्यवहारोपनिपतितसामान्योपनिबन्धनं तु (यदेव यद्) यदा द्रव्यं पृथिवी-घटादि व्यपदिश्यते, तदेव तत्तदा त्रैलोक्याविभिन्नरूपं सततमवस्थितापरित्यक्तात्मसामान्यं महासामान्यप्रतिक्षेपेण संव्यवहारमार्गमास्कन्दतीति । एवंविधवस्तूपनिबन्धनैव च वर्णाश्रम[4]प्रतिनियतयम-नियम-गम्यागम्य-भक्तादिव्यवस्था, कुम्भकारादेश्च मृदानयनाऽवमर्दनशिवकस्थासकादिकरणप्रवृत्तौ वेतनकादिदानस्य साफल्यम् । अव्यवहार्यत्वाच्च शेषमवस्तु व्योमेन्दीवरादिवदिति ।

ऋजु-सममकुटिलं सूत्रयति ऋजु वा श्रुतमागमोऽस्येति सूत्रपातनबद्धः ऋजुसूत्रः । यस्मादतीतानागतवस्तुपरित्यागेन वर्त्तमानपदवीमनुधावत्यतः साम्प्रतकालावरुद्धपदार्थत्वाद् ऋजुसूत्रः । एष च भावविषयप्रकारातीतानागतवस्तुपरित्यागे विषयवचनपरिच्छेदे प्रवृत्तः सर्वविकल्पातीतातिसंप्रमुग्धसंग्रहाग्रहाविशिष्टत्वाद् व्यवहारस्यायथार्थतां मन्यमानः अचरणपुरुषगरुडवेगव्यपदेशवद् वर्त्तमानक्षणसमवस्थितिपरमार्थं व्यवस्थापयति । अतीतानागताभ्युपगमस्तु खरविषाणास्तित्वाभ्युपगमान्न भिद्यते । दग्धमृतापध्वस्तविषयश्च अनाश्वासः न कस्यचिदपि स्यात् । अघटादिलक्षणमृदाद्यनर्थान्तरत्वाच्च घटादिकालेऽपि घटादि नैव स्यात् । न च (तदेव) तदेकं मृद्द्रव्यमन्यथा वर्त्तते, किं तर्हि ? अन्यदेवान्यप्रत्ययवशात् अन्यथोत्पद्यते इति । न च पिण्डादिक्रियाकाले कुम्भकार-

---

१. व्यङ्ग्यते A.D., B.1. । २. भेदाभाव० सर्वप्रतिषु । ३. घटपटादि V.2., घटपटकादि S.M. । ४. प्रतिनियम० S.M., V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यपदेशः । यदि चान्यदपि कुर्वन्नन्यस्य (तस्य ?) कर्तेत्युच्यते, पटादिकरणप्रवृत्तोऽपि प्रत्याख्यातविज्ञानान्तरसम्बन्धः स्यादेव कुम्भकारस्ततश्चाशेषलोकव्यवहारोपरोध इत्यतः पूर्वापरभागवियुतः सर्ववस्तुगतो वर्त्तमानक्षण एव सत्यः, नातीतानागतं वास्तीति वर्त्तमानवादिनो नास्तिकादयः, एतद्दर्शनं च "चर खाद" इत्यादि, "एतावानेव लोकोऽयं यावानिन्द्रियगोचरः" इत्यादि, सूक्ष्मस्थूलभेदात् ।

परिणतिसामान्य-विशेषपरिणतिक्षायोपशमिकौदयिकादिवर्त्तमानग्रहरूपः शब्दनयः । शब्द एवासौ अर्थकृतवस्तुविषयविशेषा(ष) प्रत्याख्यानेन [1]शब्दकृतार्थविशेषं मन्यते । यदि अर्थाधीनः (यः यः (अर्थः धातोः) विशेषः स्यान्न शब्दकृतः । तेन घटवर्त्तमानकाले घट एव निर्विशेषः स्यात् । कर्म-करण-सम्प्रदानापादान-स्वाम्यादिविशेषान्नाप्नुयात् । ततश्च घटं पश्यत्येवमादिकारककृतो व्यवहारो विद्यते (छिद्येत) । अतः *समानलिङ्गादिशब्दसमुद्भावितमेवाभ्युपैति वस्तु, नेतरत् । नहि पुरुषः स्थाणुः । यदीष्येत वचनार्थहानिः स्यात् । भेदार्थं हि वचनम्, अतः स्वातिः तारा नक्षत्रमिति लिङ्गतः, निम्बाम्रकदम्बा वनमिति वचनतः, स पचति, त्वं पचसि अहं पचामि पचावः पचामः इति पुरुषतः, एवमादि सर्वं परस्परविशेषव्याघातादवस्तु, परस्पर-

---

१. शब्दकृतमेवार्थविशेषम् A.D., V.1 ।

★ समानलिङ्गादिशब्दसमुद्भावितमेव वस्त्वभ्युपैति नेतरत्, नहि पुरुषः स्त्री, यदीष्येत वचनार्थहानिः स्यात्, भेदार्थं हि वचनम्, अतः स्वातिः तारा नक्षत्रमिति लिङ्गतः, निम्बाम्रकदम्बा वनमिति वचनतः, स पचति त्वं पचसि अहं पचामि पचावः पचामः इति पुरुषतः, एवमादि सर्वं परस्परविशेषव्याघातादवस्तु, परस्परव्याघाताच्चैवमाद्यवस्तु प्रतिपत्तव्यम्, यथा शिशिरो ज्वलनः, तथा विरुद्धविशेषत्वात् तटस्तटी तटमित्यवस्तु, रक्तनीलमिति यथा, यद् वस्तु तदविरुद्धविशेषमभ्युपयन्ति सन्तः यथा घटः कुटः कुम्भ इति । तथा चोच्यते- यत्र ह्यर्थो वाचं न व्यभिचरत्यभिधानं तत्, एवमयं समानलिङ्गसङ्ख्यापुरुषवचनः शब्दः एतद्दर्शनानुगृहीतं चोच्यते- अर्थप्रवृत्तितत्त्वानां शब्द एव निबन्धनम् इति ।

[तत्त्वार्थसू०अ०१, सू०३४]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याघातत्वे एवमाद्यवस्तु प्रतिपत्तव्यम्। यथा शिशिरो ज्वलनः, तथा विरुद्धविशेषत्वात् तटः तटी तटमित्यवस्तु, रक्तनीलमिति यथा, यद्वस्तु तदविरुद्धविशेषमभ्युपयन्ति सन्तः, यथा घटः कुम्भः । तथा चोच्यते यत्रार्थो वाचं न व्यभिचरति अभिधानं तद्, एवमयं समानलिङ्ग-सङ्ख्यापुरुषवचनं शब्दः । एतद्दर्शनानुगृहीतं चोच्यते अर्थप्रवृत्तितत्त्वानां शब्द एव निबन्धनमिति ।

[72] **तत्त्वार्थे** शब्दनयस्त्रिभेदः, साम्प्रतसमभिरूढैवंभूतभेदात् । साम्प्रतं-वर्त्तमानं भावाख्यमेव वस्त्वाश्रयत इति वर्त्तमानक्षणवर्त्ति-वस्तुविषयोऽध्यवसायः तद्भवः शब्दः साम्प्रतिः (साम्प्रतः) स्वार्थे को वा साम्प्रतिकः । **अनुयोगद्वारा**दिषु भिन्नाख्यानेन भिन्नैव व्याख्यायते ।

यां यां संज्ञामभिधत्ते तां तां समभिरोहतीति समभिरूढः । सोऽ-भिदधाति-यदि लिङ्गमात्रभिन्नमवस्तु, विसंवादित्वात्, रक्तनीलतादिवत्, एवं सति मूलत एव भिन्नशब्दं कथं वस्तु स्यात् ? शब्देन हि अर्थाद् निरुक्तिः क्रियते, एतस्मान्निरुक्तादेषः इति यत्र तद्भेदस्तद्भिन्नमेव, यथा तु पूर्वनयेनैकं कृत्वोच्यते इन्द्रशक्रादि । तथा यदवस्तु घटज्वलनादि भिन्ननिमित्तत्वाद् अनयोरेकत्वेन अवस्तुता । एवं घटकुटयोरपि चेष्टा-कौटिल्यनिमित्तभेदात्पृथक्ता । तथा प्रकृतिप्रत्ययोपात्तनिमित्तभेदाद् भिन्नौ शक्रेन्द्रशब्दौ एकार्थौ न भवतः, विविक्तनिमित्तावबद्धत्वात्, गवाश्व-शब्दवत् । (अथापि प्रतीतत्वाद्) (प्रतीतिश्च) लोके चैवं निरूढत्वात्, इन्द्रशब्दस्य पुरन्दरादयः पर्यायाः । इत्येतदनुपपन्नम्, एवं हि सामान्य-विशेषयोरपि पर्यायशब्दत्वं स्यादेव । यतः प्लक्ष इत्युक्ते प्राग् वृक्षेऽस्ति संप्रत्ययः, अस्तित्वेऽसम्प्रमोहे च संज्ञान्तरकल्पनायामिहापि तर्ह्युक्ता-दनुक्तप्रतिपत्तौ सत्यां पर्यायत्वप्रसङ्गः । प्रविश, पिण्डीं भक्षयेत्यस्य गमात् । तथास्तिर्भवतिपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते, वृक्षः प्लक्षोऽस्ति इति गम्यते न्यायादस्तिपर्यायः प्राप्तः, (भेदः साधीयान्) तस्माद्भेदस्यार्थनयात् दन्तिहस्तिनोश्चैकत्वप्रसङ्गः इति, एवं संज्ञान्तराभिधानमवस्तु इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंभूतनय आह–[1]निमित्तं क्रियां कृत्वा [2]शब्दः प्रवर्त्तते, नहि यदृच्छाशब्दोऽस्ति अतो घटमान एव घटः, कुटंश्च कुटो भवति, पूर्दारणप्रवृत्त एव पुरन्दरः, यथा दण्डसम्बन्धानुभवनप्रवृत्तस्यैव दण्डित्वमन्यथा व्यवहारलोपप्रसङ्गः, न चाऽसौ तदर्थः अनिमित्तत्वात् ।

पुनः नयस्यावयवविभागेन व्याख्यानमाह– निश्चयेन गम्यन्ते उच्चार्यन्ते प्रयुज्यन्ते येषु शब्दास्ते निगमाः–जनपदाः, तेषु निगमेषु–जनपदेषु ये अक्षरात्मकानां ध्वनीनां सामान्यनिर्देशाः अभिहिता [3]उच्चारिताः शब्दाः घटादयः तेषामर्थो जलधारणाऽऽहरणादिसमर्थः शब्दार्थपरिज्ञानं चेति शब्दस्य घटादिरर्थोऽभिधेयः, तस्य परिज्ञान-मवबोधः, घट इत्यनेनायमर्थः उच्यते, अस्य चार्थस्य अयं वाचकः । यदेवंविधमध्यव[4]सायान्तरं स नैगमः, स सामान्यविशेषालम्बीत्येतद् दर्शयति–देशसमग्रग्राही । यदा हि स्वरूपतो घटोऽयमिति निरूपयति तदा सामान्यघटं सर्वसामान्यव्यक्त्याश्रितं घटाभिधानप्रत्ययहेतुमाश्रयत्यतः समग्रग्राहीति । तथा विशेषतः सौवर्णो मृन्मयो राजतः श्वेत इत्यादिकं विशेषं निरूपयति ततो देशग्राहीति भण्यते नैगमनयः । साम्प्रतं संग्रहस्य अवयवार्थमाह– (अर्थानां सर्वैकदेशग्रहणं संग्रहः । त०भा०१।३५) अर्थानां सामान्यविशेषात्मकयोरेकीभावेन ग्रहणमाश्रयणमेवंविधोऽध्यवसायः संग्रहो भण्यते । एकीभावेन ग्रहणमेव द्रष्टव्यम्, यौ हि सामान्य–विशेषौ नैगमाभिमतौ(तां) संपिण्ड्य संग्रहनयः सामान्यमेव केवलं स्थापयति सत्तास्वभावम्, यतः सत्तातो न व्यतिरिच्यते विशेषः ।

*व्यवहारलक्षणाभिधित्सयाह–लौकिकाः विशेषाः, तैरेव घटादि–

---

१. निमित्ताम् सर्वप्रतिषु । २. शब्दाः प्रर्वतन्ते S.M., A.D., B.2., V.1. । ३. उद्धारिताः S.M., A.D., B.1, V.2. । ४. सायान्तरः S.M., A.D., V.2, B.1 । * अत्र एवं भाति अधुना अवयवार्थ इति विषयश्चलति तत्र व्यवहारावयवार्थ इति स्थाने व्यवहारलक्षण० किमर्थम् ? इत्यारेका । अस्मिन्विषये तत्त्वार्थटीकायां श्रीसिद्धसेनाचार्या एवं कथयन्ति– लौकिकाः–पुरुषास्तै समः–तुल्यः, यथा लौकिका विशेषैरेव घटादिभिर्व्यवहरन्ति तथायमपीत्यतस्तत्समः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिर्व्यवहरन्ति, तेषामुपचारप्रायः इति । "उपचारो नामान्यत्र सिद्धस्यार्थस्यान्यत्रारोपो यः" । यथा— कुण्डिका स्त्रवति, पन्था गच्छति, उदके कुण्डिकास्थे स्त्रवति सति कुण्डिका स्त्रवतीत्युच्यते, पुरुषे च गच्छति पन्था गच्छति इति, एवमुपचारबहुल इत्यर्थः । विस्तृतो विस्तीर्णोऽनेकार्थो (ज्ञेयो) यस्य सः विस्तृतार्थः, अध्यवसायविशेषो व्यवहार इति निगद्यते ।

ऋजुसूत्रलक्षणं व्याचिख्यासया आह— (सतां साम्प्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः । त०भा०१।३५) सतां विद्यमानानाम्, न खपुष्पादीनामसताम् तेषामपि सत्तानां (साम्प्रतानां) वर्त्तमानानाम् अर्थानाम् (घटादीनाम्) अभिधानं-शब्दः, परिज्ञानम्-अवबोधो विज्ञानं यत् स भवति ऋजुसूत्रः । एतदुक्तं भवति—तानेव व्यवहारनयाभिमतान् विशेषान् आश्रयन् विद्यमानान् वर्त्तमानक्षणवर्त्तिनोऽभ्युपगच्छन्नभिधानमपि वर्त्तमानमेवाभ्युपैति, नातीतानागते, तेन अनभिधीयमानत्वात् कस्यचिदर्थस्य, तथा परिज्ञानमपि वर्त्तमानमेवाश्रयति नातीतमागामि वा, तत्स्वभावानवधारणात् । अतो वस्त्वभिधानं विज्ञानं चात्मीयं वर्त्तमानमेवेतीत्थमध्यवसायः स ऋजुसूत्रः इति ।

'यथार्थाभिधानं शब्दनयः' (त०भा० १/३५) यथेति-येन कारणेन भावरूपेणनामस्थापनाद्रव्यवियुतेनार्थो घटादिः यथार्थः, तस्याभिधानं शब्दः; यथार्थाभिधानम्, तदाश्रयी योऽध्यवसायः स शब्दनयतयाभिधीयते, वर्त्तमानमात्मीयं विद्यमानं भावघटमेवाश्रयति नेतरानिति ।

(नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रत्ययः साम्प्रतः त०भा० १/३५) अर्थे-अभिधेये यः प्रत्ययो-विज्ञानं स साम्प्रतो नयः । एतदुक्तं भवति—

---

उपचारप्राय इति । उपचारो नामान्यत्र सिद्धस्यार्थस्यान्यत्राध्यारोपो यः, यथा कुण्डिका स्त्रवति, पन्था गच्छति, उदके कुण्डिकास्थे स्त्रवति कुण्डिका स्त्रवतीत्युच्यते, पुरुषे च गच्छति पन्था गच्छतीति । एवमुपचारप्राय उपचारबहुल इत्यर्थः । विस्तृतो-विस्तीर्णोऽनेकोऽर्थो ज्ञेयो यस्य स विस्तृतार्थः अध्यवसायविशेषो व्यवहार इति निगद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामादिषु प्रतिविशिष्टवर्त्तमानपर्यायापन्नेष्वपि प्रसिद्धो वाचकतया यः शब्दः, तस्मात् शब्दाद् भावाभिधायिनः तद्वाच्येऽर्थे भावरूपे प्रवृत्तोऽध्यवसायः साम्प्रताख्यामासादयति । यतो भाव एव शब्दाभिधेयो भवति, तेनाशेषाभिलषितकार्यकारणादिति ।

अथाऽधुना समभिरूढलक्षणं दर्शयन्नाह—विद्यमानेषुवर्त्तमान-पर्यायापन्नेषु अर्थेषु-घटादिषु, असंक्रमः- इत्यन्यत्राऽगमनम्, शब्दस्य यत् सोऽसंक्रमः, यथा घट इत्यस्य शब्दस्य विद्यमानं घटं चेष्टात्मकं विरहय्य न अन्यत्र कुटाद्यर्थेऽभिधानसामर्थ्यमस्ति अभिधेयत्वात् । यदि चास्य शब्दस्य कुटादिरर्थोऽभिधेयो भवेदेवं सति यथोक्तसर्वसंकरत्वादयो दोषा उपजायेरन् । नित्यतो न शब्दान्तराभिधेयोऽर्थोऽन्यस्य शब्दस्या-भिधेयो भवति एवमसंक्रमणगवेषणपरोऽध्यवसायः समभिरूढः ।

एवंभूतस्वरूपमाह- व्यञ्जनं शब्दस्तस्यार्थोऽभिधेयो वाच्यं तयोर्व्यञ्जनार्थयोरेव सङ्घटनं करोति, घट इति यदिदम् अभिधानम्, तच्चेष्टाप्रवृत्तस्यैव । जलधारणाहरणसमर्थस्य वाचकं चेष्टां च जलाद्या-नयनरूपां कुर्वाणो घटो मतः, न पुनः क्रियातो निवृत्तः । इत्थं यथार्थतां प्रतिपद्यमानोऽध्यवसायः एवंभूतोऽभिधीयते । ननु नया इति कः पदार्थः? "नयन्ते(नीयन्ते) प्रदर्श्यन्ते इति नयाः" सामान्यादिरूपेणार्थं प्रकाशयन्ति स्वार्थप्रापणेन **प्रापकाः**, कुर्वन्ति तत्तद्विज्ञानमात्मन इति **कारकाः**, अपूर्वं साधयन्ति-शोभनामन्योन्यव्यावृत्त्यात्मिकां विज्ञप्ति जनयन्ति अतः **साधकाः**, एवं **निर्वर्त्तकोपलम्भका**दिपर्यायाः **तत्त्वार्थतः** ज्ञेयाः । अत्र कर्तृ-क्रिययोः अभेदोऽस्ति, यतः स एव पदार्थः कर्ता इत्येवं व्यपदिश्यते स्वतन्त्रत्वात् । तथा स एव च साध्यात्मना वर्त्तमानक्रिया इत्याख्यायते, अतोऽनयोर्नात्यन्तिको भेदः ।

**अथैते** नयाः तन्त्रान्तरीयाः मतान्तरीयाः अथ च स्वतन्त्राः सप्त वा जिनवचनविभजनशीलाः (चोदक-) पक्षग्राहिणः मतिभेदा वा । एवं सर्वत्र मिथ्यात्वादपि प्रतिपत्तिं प्राप्नोति तेन पुनः सूरिराह—इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते नैते तन्त्रान्तरीयाः, नापि स्वतन्त्राः । किं तर्हि ? तदाह— विज्ञानगम्यस्य जीवादेः स्वसंवेद्यस्य वाच्यस्यार्थस्य घटपटादेरध्यवसायान्तराणि विज्ञानभेदाः, वस्त्वेवानेकधर्मात्मका(कम)नेकाकृतिना ज्ञानेन निरूप्यते, एकवस्तुविषया ज्ञानविशेषाः ते चोदाहरन्ति । घट इत्युक्ते नैगमः, (मन्यते) लोकप्रसिद्धकुम्भकारचेष्टानिर्वृत्तः पृथुबुध्नोदराकारः जलघृतक्षीरादीनामाहरणे देशान्तरसञ्चारणे समर्थः पाकजादिक्रियानिष्पन्नः द्रव्यविशेषः, कनकोपलजादिसमग्रसामान्य-विशेषव्यक्तिभेदग्राहकः सङ्कल्पयोग्यतत्सत्तादिदेशग्राहकविज्ञानविशेषेण घटः । एवं जीवोऽपि लोकप्रसिद्धचेतनायोगव्यापारः, चेष्टानिवृत्तः शरीराकारासङ्ख्येयप्रदेशानेकसंस्थानरूपः आहारविहारक्रियासमर्थः नरनारकामरादिरूपः अंशतः ज्ञशरीराद्यपर्याप्तादिसमग्रतः पर्यायादिद्रव्यविशेषो जीवः । संग्रह एकस्मिन् घटे बहुषु वा घटेषु नाम-स्थापना-द्रव्यलक्षणेषु अतीतानागतवर्त्तमानेषु पर्यायेषु सामान्यघटसम्प्रत्ययः घटज्ञानम्, तथा जीवे जीवेषु वा नामादिनिक्षेपरूपेषु त्रिकालपर्यायेषु सामान्यजीवसत्ताग्राहकज्ञानविशेषः, सूक्ष्मनिगोदात् सिद्धत्वपर्यन्तेषु तच्छरीरेषु च ज्ञशरीरभव्यशरीररूपेषु च तुल्यजीवज्ञानविशेषसंग्रहाध्यवसायः, आधिक्येनावसीयन्ते परिच्छिद्यन्ते (पदार्थाः)ततो येन सोऽध्यवसायः । व्यवहारस्तु जलाद्याहरणादिव्यवहारयुक्तो घटो घटः, सुखदुःखवेत्तृत्वादिव्यवहारपरो जीवो जीवः ।

ऋजुसूत्रस्तु वर्त्तमाननामस्थापनाद्रव्यभावघटानां चेष्टादिपर्यायाणां वाचको घटः, एवं चतुर्निक्षेपमयो जीवः द्रव्यभावप्राणाधारत्वजीवत्ववस्तुतया वर्त्तमानो ग्राह्यः । साम्प्रतस्तु घटत्वशब्दवर्त्तमानसर्वपर्यायग्राही जीवत्वादिनामपर्यायव्यक्तवृत्तिर्जीवः इति ।

समभिरूढस्तु घटे कुटत्वादिपर्यायासंक्रमरूपः यत्पर्यायवृत्तितत्समुदितपर्यायाभिधायिजीवान्यतरपर्यायोऽसंक्रमस्वपर्यायवाचको जीवः । एवंभूतस्तु ज्ञानदर्शनसम्पूर्णपर्यायप्रवृत्तिवर्त्तिजीव इत्यभिधायकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं च- **तत्त्वार्थवृत्तौ**–नैगमेन देशग्राहिणा, संग्रहेण सामान्यग्राहिणा, व्यवहारेण विशेषग्राहिणा, ऋजुसूत्रेण वर्त्तमानवस्तुग्राहिणा, शब्देन वर्त्तमानभावग्राहिणा, समभिरूढेन प्रतिशब्दं भिन्नार्थग्राहिणा, एवंभूतेन स्वस्वपर्यायग्राहिणा, इत्याद्यनेकजीवाजीवेषु नयचालना तत्त्वार्थवृत्तितः ज्ञातव्या । तत्र ज्ञाने किञ्चिद् भाव्यते–तत्र नैगमः अक्षरानन्तभागरूप-श्चेतनांश एकेन्द्रियावस्थः ज्ञानम् । संग्रहः सामान्यसत्तास्थो ज्ञान-परिणामः ज्ञानम् । व्यवहारः अष्टप्रकारमपि ज्ञानं वस्तुपरिच्छेदकत्वात् । ऋजुसूत्रः सम्यग्दृष्टेरर्हदभिहिततत्त्वश्रद्धायिनः यदिन्द्रियजमनिन्द्रियजं च तत्सर्वं ज्ञानम् । मिथ्यादृष्टेः सर्वमेव विपर्यासः । शब्दस्तु–श्रुतज्ञान-केवलज्ञाने ज्ञानम् । तत्र साम्प्रतः श्रुतादिज्ञानचतुष्टयं ज्ञानम् । समभिरूढः श्रुतज्ञान-केवलज्ञाने ज्ञानम् । एवंभूतः केवलज्ञानं ज्ञानम् । इत्येवं स्वपक्षस्थापनपरैर्नयैः स्वाभिमतप्रकाशकैः अनेके वक्तारः प्रतिवदन्ते-विवादास्पदीभवन्ति । तत्र येषां मनः समशीलं ते मध्यस्थाः उच्यन्ते, इत्येवं माध्यस्थ्यं समाश्रयणीयम् ॥३॥

**स्वस्वकर्मकृतावेशाः, स्वस्वकर्मभुजो नराः ।**
**न रागं नाऽपि च द्वेषम्, मध्यस्थस्तेषु गच्छति ॥४॥**

स्वस्वकर्म इति–तेषु-कर्मोदयेषु मध्यस्थः-समचित्तः न रागं च पुनः न द्वेषं गच्छति । कथंभूता नराः ? स्वस्वकर्मकृतावेशाः स्वे स्वे कर्मणि-आत्मीयात्मीये कर्मणि कृतः आवेशो यैस्ते स्वकीयकर्मवशा इत्यर्थः । सर्वे स्वस्य कर्मणः भोक्तारः इत्यनेन स्वकृतकर्मविपाकोदये शुभे च अशुभे च विपाकप्राप्ते सति समानचेतोवृत्तयः । सुरेन्द्रवृन्द-वन्दितचरणा अपि, तथा दीनजनैः-लुब्धकधीवरैः विडम्ब्यमाना अपि न रागं च न द्वेषं च गच्छन्ति स मध्यस्थः समचित्तः उच्यते । उक्तं **चावश्यकनिर्युक्तौ**-

**[23]वंदिज्जमाणा न समुक्कसंति, हेलिज्जमाणा न समुज्जलन्ति।**
**दंतेण चित्तेण चलंति धीरा, मुणी सया समुग्घाइयरागदोसा ॥८६६॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मनः स्याद्व्यापृतं यावत्, परदोषगुणग्रहे ।**
**कार्यं व्यग्रं वरं तावन्मध्यस्थेनाऽऽत्मभावने ॥५॥**

मनः स्याद् व्यापृतमिति—परदोषगुणग्रहणे यावद् मनः व्यापृतं-व्यापारवत् स्यात् तावत् आत्मभावने-आत्मस्वरूपचिन्तने व्यग्रं-तदायत्तं वरं-प्रधानं कार्यम् । केन ? मध्यस्थेन पुरुषेण समभावास्वादनरसिकेन । इत्यनेनात्मस्वरूपस्यामूर्त्तस्यागुरुलघुषड्गुणहानिवृद्धिपरिणमनोत्पाद-व्यय-ध्रौव्यतालक्षणस्वरूपचिन्तनगुणप्रवृत्तिः गुणान्तरसहकारप्रवृत्ति-स्वरूपचिन्तनादिकं तत्र चिन्तने व्यग्रस्य सांसारिकगुणदोषचिन्तनावकाश एव न भवति । अत एव निर्ग्रन्थाश्चिन्तयन्ति भावनाचक्रम्, घोषयन्ति द्रव्यानुयोगग्रन्थम्, प्रश्नयन्ति [1]परस्परस्वभावविभावपरिणामम्, विलोक-यन्ति आत्मस्वरूपं साऽऽवरणं निरावरणम्, विभजयन्ति हेतुगणपरिणा-मम्, त्यजन्ति अशुद्धनिमित्तानि, विचारयन्ति निक्षेपाक्षेपम्, संमीलयन्ति नयाऽनुयोगम्, तन्मयीभवन्ति ध्यानादिषु, यतोऽनादिविभावानुगतचेतना-वीर्यप्रवर्त्तनगृहीतपरस्वरूपोपादेयतया परदोषगुणावलोकनाशुद्धचिन्तन-निवारणार्थं मनः स्याद्वादानन्तपञ्चास्तिकायस्वरूपावलोकनाजीवहेय-जीवोपादेयज्ञानं कार्यमिति ॥५॥

**विभिन्ना अपि पन्थानः, समुद्रं सरितामिव ।**
**मध्यस्थानां परं ब्रह्म, प्राप्नुवन्त्येकमक्षयम् ॥६॥**

विभिन्ना अपि इति—विभिन्ना—अनेकभेदभिन्ना अपि पन्थानः-पञ्चध्यानमार्गसाधनपद्धतयः साधनाः अनेके द्रव्याचरणतः शुक्लध्यानं यावत् सम्यग्दृष्टि-अपुनर्बन्धकादयः, जिनकल्पाः स्थविरकल्पादयः [2]सन्ति तथापि मध्यस्थानां मध्यस्थभाववर्त्तिनामेकमक्षयं परं ब्रह्म प्राप्नुवन्ति । इत्यनेन सर्वे साधनोपायाः एकं शुद्धमात्मस्वरूपं समवतरन्ति । सर्वेषां मोक्षसाधकानां साध्यैकत्वात्, कमिव ? समुद्रं सरितामिव, यथा नद्यः समुद्रं गच्छन्ति, एवं तत्त्वैकत्वपरिणामानां सर्वं

---

१. परस्परम् A.D.,V.1। २. एष पाठो नास्ति । B.1.2.,A.D,V.2., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधनं शुद्धात्मभावे अवरतरति । अतो रागद्वेषाभावो हितम् ॥६॥

**स्वागमं रागमात्रेण, द्वेषमात्रात्परागमम् ।**
**न श्रयामस्त्यजामो वा, किन्तु मध्यस्थया दृशा ॥७॥**

स्वागममिति—स्वागमं-गणधरोक्तमागमम्, वयं न रागमात्रेण श्रयामः, यच्च अस्मत्परम्परानुगतैः इदमेवाभिमतम्, अस्माकं कल्प-मिदमिति रागातुरत्वेन न जिनागमे रागः । वा-अथवा, परागमं-कापिलादिशास्त्रम्, न केवलद्वेषमात्रेण परकीयत्वाद् न द्वेषः तेन न त्यजामः, किन्तु परीक्षया यथार्थवस्तुस्वरूपनिरूपणेन सम्यग्ज्ञानहेतुत्वाद् नित्याऽनित्याद्यनन्तस्वभावकथनेऽप्यविरोधित्वाद् मध्यस्थया दृशा जिनागमं श्रयामः । विपर्यासोपेतवस्तुस्वरूपपरीक्षणाऽक्षमत्वेन त्यजामः, न द्वेषमात्रेण त्यागयोग्यत्वात् त्यजामः । उक्तं च-

[73] **पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।**
**युक्तिमद्वचनं यस्य, तस्य कार्यः परिग्रहः ॥३८॥**

[लो०त०नि०श्लो०३८, द्वा०द्वा०४।३]

**न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु ।**
**यथावदाप्तत्वपरीक्षया तु, त्वामेव वीरप्रभुमाश्रयामः ॥२९॥**

इति ॥७॥ [अयोगव्यव०द्वा० श्लो० २९]

**मध्यस्थया दृशा सर्वे-ष्वपुनर्बन्धकादिषु ।**
**चारिसञ्जीवनीचार-न्यायादाशास्महे हितम् ॥८॥**

॥ इति मध्यस्थाष्टकम् ॥१६॥

मध्यस्थया इति—वयं मध्यस्थया दृशा सर्वेषु मैत्रीप्रमोदकरुणादिषु हितं-कल्याणम्, आशास्महे-इच्छामः, सर्वत्र रागद्वेषपरित्यागानु[1]-कूलभावनया हितं सिध्यति । कस्मात् ? **चारिसञ्जीवनीचार**न्यायात् तत्रोदाहरणं- यथा कश्चित्पुरुषः अजानन्नपि पशुं सञ्चारयन् पशुत्व-

---

१. त्यागेनानु० S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परित्यागचक्षुर्द्योतकहेतुः जातः, स च सञ्जीवनीचारणरूपो दृष्टान्तस्तन्न्यायात् तथा चरणादिषु मन्दप्रयत्नोऽपि अध्यात्मानुगसमभावपरिणतः आत्मानमनादिपशुत्वभावगतमपहाय स्वरूपोपलब्धिरूपं दक्षत्वभेद[1]ज्ञानरूपं चाक्षुषत्वं करोति । अत एव सर्वं साध्यसापेक्षस्य साधनं हितम्, साध्यशून्यस्य बालक्रीडारूपम् । उक्तं च **वीतरागस्तोत्रे**-

**[74]तथापि श्रद्धामुग्धोऽहम्, नोपालभ्यः स्खलन्नपि ।**
**विशृङ्खलापि वाग्वृत्तिः, श्रद्दधानस्य शोभते ॥८॥**

[प्र० १ श्लो०-८]

पुनः केषु ? अपुनर्बन्धकादिषु, **[75]** अपुनर्बन्धकस्वरूपं **श्रीहरिभद्रसूरि**वचनाद् [पञ्चा०प्र०पञ्चा०३, गा०४] ज्ञेयम्, आदिशब्दात् मार्गाभिमुख-मार्गपतिताऽविरतसम्यग्दृष्टि-देशविरत-सर्वविरतादिषु सर्वत्र परभावरागद्वेषविनिर्मुक्तात्मस्वभावानुकूलता एव साधनम् । उक्तं च **योगशास्त्रे**-

**[76] आत्मैव दर्शनज्ञान-चारित्राण्यथवा यतेः ।**
**यत्तदात्मक एवैष, शरीरमधितिष्ठति ॥१॥**

**आत्मानमात्मना वेत्ति, मोहत्यागाद्यदात्मनः ।**
**तदेव तस्य चारित्रम्, तद् ज्ञानं तच्च दर्शनम् ॥२॥**

**आत्माज्ञानभवं दुःख-मात्मज्ञानेन हन्यते ।**
**तपसाप्यात्मविज्ञान-हीनैश्छेत्तुं न शक्यते ॥३॥**

[यो०शा०, प्र०४, श्लो० १-२-३]

**सोऽयं समरसीभाव-स्तदेकीकरणं मतम् ।**
**आत्मा यदपृथक्त्वेन, लीयते परमात्मनि ॥४॥**

[यो०शा०, प्र० १०, श्लो० ४]

**॥ इति व्याख्यातं माध्यस्थाष्टकम् ॥१६॥**

---

१. भेदरूपं S.M.,B.1.2, V.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ निर्भयाष्टकम् ॥१७॥

माध्यस्थ्ये स्थिरत्वं निर्भयस्य भवति, भयमोहोदयात् परिणाम-चापल्यं भवति, अतो भयपरिहारः कार्यः । आत्मा हि शुद्धचिद्रूपाविनश्वरः, तेन निर्भय एव । [१]अत्र नामस्थापनानिर्भयौ सुगमौ । द्रव्य-निर्भयः सप्तभयरहितः । भावनिर्भयः कर्मबन्धहेतुविभावपरिणतिरहितः । बन्धहेतुपरिणामः आत्मसत्तारोधकाभिनवकर्मबन्धकत्वान्महाभयम् । तत् च संवरपरिणामपरिणतानां बन्धहेतुपरिणामाव्यापकानां न भवति । नैगमेन सर्वद्रव्याणाम्, संग्रहेण वस्तुसत्तायाम्, वस्तुवृत्त्याऽविनश्वरत्वात् । व्यवहारेण कर्मोदयाव्यापकस्य धीरस्य, ऋजुसूत्रेण निर्ग्रन्थस्य, शब्दनयेन ध्यानस्थस्य, समभिरूढनयेन केवलिनः,एवंभूतनयेन सिद्धस्य निर्भय-त्वम्, [२]अविनश्वरसर्वगुणप्राग्भावात् । अत्र च[३] यथार्थात्मस्वरूपविज्ञा-तुरौदयिकभावनिर्ममस्य[४] साधने निर्भयता भवति, अतो निर्भयाष्टकं व्याख्यायते ।

**यस्य नास्ति परापेक्षा, स्वभावाद्वैतगामिनः ।**
**तस्य किं [५]नु भयभ्रान्ति-क्लान्तिसन्तानतानवम् ॥१॥**

यस्य नास्तीति–यस्य परापेक्षा–पराश्रयता-पराधीनता पराशा वा, नास्ति तस्य स्वभावाद्वैतगामिनः–स्वभावस्य यद् अद्वैतमेकत्वं स्वभावाद्वैतं तत्र गमनशीलस्य भयभ्रान्तिः त्रासः-खेदः तस्य तानवम्-[६]अविस्तारः नु भवति ? काक्वर्थः[७] । इत्यनेन परवस्तुसंरक्षणे पराशादिना भयं भवति । यः परभावनिःस्पृहस्तस्य परभावाभावे भयखेदौ कुतः ? नैवेति[८] ॥२॥

पुनर्निर्भयमूलभावनां दर्शयन्नाह–

---

१. तत्र V.1, A.D. । २. अनश्वर० V.1, A.D. । ३. अन्यच्च S.M.,B.1.2. । ४. निर्भयस्य S.M., B.1, L.D.1 । ५. न सर्वप्रतिषु । ६. विस्तारः न, सर्वप्रतिषु । ७. काक्कायाः V.1 विना, काक्वापाठः V.1. । ८. मैवेति V.2., B.1.2., L.D.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भवसौख्येन किं भूरि-भयज्वलनभस्मना ।**
**सदा भयोज्झितं ज्ञान-सुखमेव विशिष्यते ॥२॥**

भवसौख्येनेति—भूरि-बहु, भयस्य इहलोकपरलोकादि ज्वलनं तस्य (भयम् इहलोकपरलोकादि, तदेव ज्वलनस्तस्य) भस्मना-क्षारभूतेन चौरदायादराजभयज्वलनदग्धेन भवसौख्येन-इन्द्रियजेन मन्यमानसौख्येन जात्या दुःखरूपेण किं ? न किमपि नैवेत्यर्थः । ज्ञानं-तत्त्वपरिच्छेदानुभवरूपं तस्य सुखं निर्भयमेव वि(अव)शिष्यते-सर्वाधिकत्वेनाङ्गीक्रियते सुखस्वरूपं च ज्ञाने एव, पौद्गलिके सुखे सुखारोपः भ्रम एव । उक्तं च-

**जं पुग्गलजं सुहं (क्खं), दुक्खं चेव त्ति जह य तत्तस्सं ।**
**गिम्हे मट्टिअलेवो, विडंबणाखिंसणामूलं ॥१॥**

अतः पुद्गलग्रहणं न सुखमकार्यमेव ॥२॥

**न गोप्यं क्वाऽपि नारोप्यम्, हेयं देयं च न क्वचित् ।**
**क्व भयेन मुनेः स्थेयम्, ज्ञेयं ज्ञानेन पश्यतः ॥३॥**

न गोप्यमिति—मुनेः—परमात्मभावसाध्योपायरतस्य, स्वतत्त्वज्ञानानुभवस्वसंवेदनपटोः गोप्यं-गोपनमाच्छादनं तद्योग्यं गोप्यं न किमपि, स्वधर्मस्य परैर्ग्रहीतुमशक्यत्वात् गोप्यं कथं भवति ? च-पुनः नारोप्यम्-आरोपोऽसद्गुणस्य स्थापनं तदपि न, यतः स्वरूपेणैवानन्तगुणमयत्वात् परगुणेन न गुणित्वप्रसङ्गः, अतः आरोप्यमपि क्वापि नास्ति । क्वचित् हेयं न, सर्वहेयस्य हेयत्वेन कृतत्वात् । तथा देयमपि न, स्वधर्मव्यूहस्य परत्रागमनात् । अतो मुनेः भयेन संत्राणाभिलाषवता क्व स्थेयं ? न क्वापि । स्वयमेव स्वस्य त्रातुं समर्थत्वात् । कथम्भूतस्य मुनेः ? ज्ञेयं-स्वपरपदार्थसमूहम्, ज्ञानेन-अवबोधेन, पश्यतः-ज्ञायमानस्य ॥३॥

**एकं ब्रह्मास्त्रमादाय, निघ्नन्मोहचमूं मुनिः ।**
**बिभेति नैव संग्राम-शीर्षस्थ इव नागराद् ॥४॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकं ब्रह्मास्त्रमिति—मुनिः-स्वरूपरतः परभावविरतः, न बिभेति-न भयवान् भवति । किं कुर्वन् ? मोहचमूं निघ्नन्-मोहसैन्यध्वंसं कुर्वन् । किं कृत्वा ? ब्रह्मास्त्रं-ब्रह्मज्ञानमात्मस्वरूपावबोधः, तदेवास्त्रं-शस्त्र-मादाय-गृहीत्वा । क इव ? संग्रामस्य शीर्षं तत्र तिष्ठतीति संग्राम-शीर्षस्थः नागराट्-नागराजो[१] गजश्रेष्ठ इव । यथा गजश्रेष्ठः संग्रामे न बिभेति तथा मुनिः कर्मपराजये प्रवृत्तो न भयवान् भवति । यो हि स्व-रूपासक्तः तस्य परभावे ध्वंसनोद्यतस्य भयं हि परसंयोगविनाशे भवति तद्विनाशश्चास्य क्रियमाण एव अतो न भयं वाचंयमस्य शरीरादिसर्वपर-भावविरतत्वात् ॥४॥

**मयूरी ज्ञानदृष्टिश्चेत्, प्रसर्पति मनोवने ।**
**वेष्टनं भयसर्पाणाम्, न तदानन्दचन्दने ॥५॥**

मयूरीति—मनोवने-चित्तोद्याने, चेत्-यदि ज्ञानदृष्टिः-स्वभावपरभाव-विवेचनदृष्टिः, मयूरी प्रसर्पति-स्वेच्छया विचरति सति (ती) तदा आनन्दचन्दने-स्वरूपानुभवानन्दचन्दने, भयसर्पाणां वेष्टनं न भवतीत्यर्थः। इदमुक्तं भवति-यदा ज्ञानेन स्वपरयोर्विभेदे कृते स्वस्यामूर्त्तचिद्घनत्व-निर्धारे परसंयोगस्य परत्वनिर्धारे जाते भयस्योदयो न भवति ॥५॥

**कृतमोहास्त्रवैफल्यम्, ज्ञानवर्म बिभर्ति यः ।**
**क्व भीस्तस्य क्व वा भङ्गः, कर्मसङ्गरकेलिषु ॥६॥**

**कृतमोहास्त्रेति**—तस्य-स्वरूपानन्दभोक्तुः, कर्मसङ्गरकेलिषु-कर्मक्षयकरणसंग्रामे, भीः-भयं क्व ? भङ्गः क्व ? नैवेति । तस्य कस्य ? यः कृतमोहास्त्रवैफल्यं-कृतं मोहास्त्रस्य वैफल्यं निष्फलत्वं येन एवंविधं ज्ञानवर्म-ज्ञानसन्नाहं बिभर्त्ति-धत्ते । सर्वमोहविदारणदारुण-ज्ञानसन्नाहधरस्य, कर्मकृतस्वगुणघातभीः[२] क्व ? इदमुक्तं भवति—येन नयविभजनपरीक्षितः स्वपरपदार्थसार्थः तस्य मोहादीनां भयं न ॥६॥

---

१.राजा B.2. L.D.1. S.M. V.1 । २. भीतं B.1.2, L.D.1., V.1.,S.M.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तूलवल्लघवो मूढा, भ्रमन्त्यभ्रे भयानिलैः ।**
**नैकं रोमापि तैर्ज्ञान-गरिष्ठानां तु कम्पते ॥७॥**

तूलवल्लघव इति—मूढाः-तत्त्वज्ञानविकलाः, तूलवल्लघवः-अर्कतूल-वल्लघवः, अभ्रे-आकाशे, भयानिलैः-भयपवनैः प्रेरिता भ्रमन्ति । ज्ञानगरिष्ठानामेकं रोमापि तैः पवनैर्न कम्पते । इत्यनेन सप्तभयसन्निधाने मूढाः-परभावात्मत्वज्ञानमुग्धाः [१]तद्वियोगभयेन कम्पमानाः इतस्ततो भ्रमन्ति । ये चासङ्ख्यातप्रदेशानन्तज्ञानमयस्यात्मनः स्वरूपावलोकिनो ज्ञानगरिष्ठाः अविनाशिचैतन्यभावरक्ताः तेषामध्यवसायरूपं रोमापि न कम्पते । किञ्च गत्वरैः गतैरिति अध्यात्माभ्यासैकत्वानन्दानन्दिताः सदा निर्भयाः स्वरूपे स्थिराः तिष्ठन्ति ॥७॥

**चित्ते परिणतं यस्य, चारित्रमकुतोभयम् ।**
**अखण्डज्ञानराज्यस्य, तस्य साधोः कुतो भयम् ॥८॥**

॥ इति निर्भयाष्टकम् ॥ १७ ॥

**चित्ते इति**—यस्य-निर्ग्रन्थस्य, अकुतोभयं-न विद्यते कुतः कस्माद् भयं यस्य तत् चारित्रं-स्वरूपस्थिरत्व[२]-रम्यरमणत्वलक्षणं परिणतं चेतनावीर्यादिसर्वगुणेषु तन्मयीभूतम्, तस्य साधोः कुतः-कस्माद् भयं ? न कस्मादपि । कथम्भूतस्य मुनेः ? अखण्डज्ञान-राज्यस्य-अचूर्णितज्ञानराज्यस्य, इत्यनेन वचनधर्मक्षमामार्दवार्जवपरि-णतस्य शुद्धज्ञानरम्यरमणस्य साधोः द्रव्यभावमुक्तियुक्तस्य [३]परमा-किञ्चनस्य न भयम् । यथा **श्रीकेशि-गौतमाध्ययने-**

**[77] एगप्पो अजिए सत्तू, कसाया इंदियाणि य ।**
**ते जिणित्तु जहानायम्, विहरामि अहं मुणी ॥३८॥**

---

१. तद्वियोगेन B.1.2, M.S, V.2 । २.स्थिरत्वलक्षणं B.1.2., V.2., S.M.।
३. परिणामा० S.M., V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[78] रागदोसादओ तिव्वा, नेहपासा भयंकरा ।
ते छिंदित्तु जहानायं, विहरामि जहक्कमं ॥४३॥
[उत्तरा०-अ० २३. गा० ३८, ४३]

तथा च **नमिराजर्षि**वचनम्—

[79] बहु खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।
सव्वओ विप्पमुक्कस्स, एगंतमणुपस्सओ ॥१६॥
[उत्तरा० अ० ३ गा० १६]

इत्यादि । परपुद्गलसंयोगे यथार्थज्ञानवतो न भयम् ॥८॥

**॥ इति व्याख्यातं निर्भयाष्टकम् ॥१७॥**

## ॥ अथ अनात्मशंसाष्टकम् ॥१८॥

निर्भयत्वं सर्वपरभावत्यागे भवति, परभावत्यागश्च तेषु परभावेषु अनात्मज्ञानेन भवति । तदर्थं यदात्मव्यतिरिक्तं तदनात्म, तस्य[१] शंसनं-कथनं तत्स्वरूपमनात्मशंसाष्टकं व्याख्यायते । तत्र नामस्थापना सुगमा । द्रव्यतः अनात्मशंसनं द्विविधम्, बाह्यमन्तरङ्गं च । तत्र बाह्यं-लौकिकं यत्स्वभोगादिप्रयोजनाभावे परधनगृहकलत्रादौ न ममेदमित्यारेकारूपं ज्ञानम् । तथा बाह्यं लोकोत्तरं यद् धनस्वजनतनुप्रमुखं विनाशित्वेन परभवे असहायत्वेन दुःखोत्पत्तिस्वरूपेषु स्वार्थप्रतिबद्धस्वजनेषु यत् परत्वारेकाचिन्तनरूपा तस्य ज्ञानम् । भावतः पुनः कुप्रावचनिकमशुद्धं मोक्षाभिलाषपूर्वकं यत् तामिलस्य [तामलेः] परित्यागतुल्यम् । शुद्धं तु सम्यग्दर्शनपूर्वकतत्त्वातत्त्वविवेकेनो[२]पयुक्तम्, सम्यग्ज्ञानेन आत्मनः स्वद्रव्य-स्वक्षेत्र-स्वकाल-स्वभावाद् भिन्नमौपाधिकत्वम्,[३] तत्सर्वमपि पररूपं न मदीयमिति वास्तवं भेदज्ञानं तदनात्मशंसनम्, तत्करणे तत्त्वज्ञानं भवति । तदपि अनिष्टेषु अजीवेषु, जीवाश्रितकर्मपुद्गलेषु

१. तत्-V.1.2. B.1.2. S.M. । २. विवेचनो-V.2. B.1. A.D. । ३. त्वात्-V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्विपाकेषु, [१]तन्निमित्तोत्पन्नाशुद्धविभावपरिणामेषु अनात्मत्वं यावद् व्यवहारः । तथा सन्निमित्तपरायत्तचेतनावीर्यपरिणत्या भावयोगचेतना-विकल्पेषु परत्वम् ऋजुसूत्रः । द्रव्यौदयिकसदाचारसत्यभाषासत्यमनो-योगादिषु साधनसंवराध्यवसायेषु सन्निमित्तावलम्बिस्वात्मपरिणामेषु परत्वं शब्दः । रूपातीतशुक्लध्यानशैलेशीकरणादिपरत्वं समभिरूढः । स्वात्मपारिणामिकभावानन्तज्ञानदर्शनाद् अन्यत्सर्वमपि परमिति एवंभूतः। एवमनात्मत्वं सर्वत्र श्रद्धया सम्यग्दर्शनिनाम्, भिन्नीकरणेन मुनीनाम्, भिन्नीभावेन जिनानाम्, सर्वथा अभावेन सिद्धानाम्, इतिश्रद्धया[२] स्थाप्यं तत्करणीयं नहि परभावकर्तृत्वभोक्तृत्वाश्रयत्वसंयोगित्वं चेतनस्य कार्यमिति साधकावकाशः । [80] **आत्मैव सामायिकं सामायिका-र्थम्** । [भग०श०१ उ०९ सू०७६] इत्याद्यर्हद्वाक्यानुसारि भवितव्यम् । उक्तं च **योगशास्त्रे**-

**अमूर्त्तस्य चिदानन्द-रूपस्य परमात्मनः ।**
**निरञ्जनस्य सिद्धस्य, ध्यानं स्याद्रूपवर्जितम् ॥१॥**

**इत्यजस्रं स्मरन् योगी, तत्स्वरूपावलम्बनः ।**
**तन्मयत्वमवाप्नोति, ग्राह्यग्राहकवर्जितम् ॥२॥**

**अनन्यशरणीभूय, स तस्मिन् लीयते तथा ।**
**ध्यातृध्यानोभयाभावो, ध्येयेनैकं यथा व्रजेत् ॥३॥**

**सोऽयं समरसीभावस्तदेकीकरणं मतम् ।**
**आत्मा यदपृथक्त्वेन, लीयते परमात्मनि ॥४॥**

**अलक्ष्यं लक्ष्यसम्बन्धात्, स्थूलात्सूक्ष्मं विचिन्तयेत् ।**
**सालम्बाच्च निरालम्बम्, विशुद्धं तत्त्वमञ्जसा ॥५॥**

[यो०शा० प्र० १०, श्लो० १-५]

इत्यात्मस्वरूपध्यानी सर्वं परमनात्मत्वेन जानाति स आत्मवित्[३]

---

१. तेषूत्पन्ना० B. 2., L.D.2, V.2, S.M. । २. विरतिश्रद्धया S.M., B. 2., L.D.2, ३. आत्मवत् सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रशंसां न करोति तदेवाह–

**गुणैर्यदि न पूर्णोऽसि, कृतमात्मप्रशंसया ।**
**गुणैरेवासि पूर्णश्चेत्, कृतमात्मप्रशंसया ॥१॥**

गुणैरिति–यदि गुणैः-केवलज्ञानादिभिः, पूर्णः न असि तर्हि आत्मप्रशंसया-व्यर्थात्मस्तुत्या, कृतं-नाम सृतम् । निर्गुणात्मनः का प्रशंसा ? पौद्गलिकोपाधिजा गुणा इति मूढा वदन्ति तैर्न प्रशंसा । चेद्-यदि सम्यग्दर्शनज्ञानचारित्रतपोरूपैः साधनगुणैः, क्षायिकज्ञान-दर्शन-चारित्ररूपैः सिद्धगुणैः पूर्णः तर्हि[१] वाचिकात्मप्रशंसया कृतं-सृतमित्यर्थः । प्राग्भाविताः गुणाः स्वत एव प्रकटीभवन्ति, नेक्षुयष्टिः पलालावृता चिरकालं तिष्ठतीति का स्वमुखात्स्वगुणशंसना ॥१॥

पुनर्व्यवहारेण दर्शयति–

**श्रेयोद्रुमस्य मूलानि, स्वोत्कर्षाम्भःप्रवाहतः ।**
**पुण्यानि प्रकटीकुर्वन्, फलं किं समवाप्स्यसि ? ॥२॥**

श्रेयोद्रुम इति–भो भद्र ! पुण्यानि-पवित्राणि श्रेयोद्रुमस्य मूलानि-कल्याणवृक्षास्तेषां मूलानि-स्वोत्कर्षाम्भःप्रवाहतः स्वस्य उत्कर्षः-औत्सुक्यं तदेव अम्भःप्रवाहः तस्मात् प्रकटीकुर्वन्-व्यक्तं कुर्वन्, किं फलं समवाप्स्यसि ? अपि तु नैव, यस्य द्रुमस्य मूलमुत्खातं तेन फलापत्तिर्न भवति ॥२॥

**आलम्बिता हिताय स्युः, परैः स्वगुणरश्मयः ।**
**अहो ! स्वयंगृहीतास्तु, पातयन्ति भवोदधौ ॥३॥**

आलम्बिता इति–स्वगुणरश्मयः-आत्मीयगुणरज्जवः, परैः-अन्यैः आलम्बिताः-स्मरणचिन्तनेन गृहीता हिताय-कल्याणाय स्युः-स्वसुखाय भवन्ति । अहो इति आश्चर्ये । स्वगुणाः स्वयंगृहीता भवोदधौ पातयन्ति [२]स्वमुखेन स्वगुणोत्कर्षः न कार्यः ॥३॥

---

१. तद्गुणैस्तर्हि B.2., V.2, L.D.2. । २. स्वमुखे S.M. विना ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उच्चत्वदृष्टिदोषोत्थ-स्वोत्कर्षज्वरशान्तिकम् ।**
**पूर्वपुरुषसिंहेभ्यो, भृशं नीचत्वभावनम् ॥४॥**

उच्चत्वदोषेति—अभ्यासात्प्राप्तज्ञानविनयतपोरूपगुणान्तर्ज्वलित-महामोहोदयेन आत्मनि उच्चत्वम् 'अहं गुणी, मया प्राप्तमिदं ज्ञानम्, [1]विनयगुणवानहमिति', उच्चत्वदृष्टिदोषेण उत्थो यः स्वोत्कर्षः स एव ज्वरः तस्य शान्तिकमुपशमकारणं पूर्वपुरुषाः-अर्हदादयः ते एव सिंहाः तेभ्यः आत्मन्यूनत्वभावनं मानोदयतापनिर्वापणं ज्ञेयम् ।

**धन्नो धन्नो वयरो, सालिभद्दो य थूलभद्दो अ ।**
**जेहिं विसयकसाया, चत्ता रत्ता गुणे नियए ॥१॥**

धन्याः पूर्वपुरुषाः ये वान्ताश्रवा अनादिभुक्तपरभावास्वादन-रामणीयकं त्यजन्ति, सदुपदेश[2]ज्ञातासत्तासुखेप्सया आत्मधर्मश्रवणसुख-मनुभूयमानाः चक्रिसम्पदा विपद इव मन्यन्ते, रमन्ते स्वगुणेषु । धन्यः स्थूलभद्रः यो ह्यत्यातुररक्तकोश्याप्रार्थनाऽकम्पितपरिणामः, अहं तु निरर्थक[3]कुविकल्पैः चिन्तयामि विषयविषोपायान् । उक्तं च-

[81] **संते वि कोवि उज्झइ, कोवि असंते वि अहिलसइ भोए ।**
**चयइ परपच्चयेण वि, पभवो दट्टुं जहा जम्बू ॥३७॥**

[उप०मा० गा०३७]

इत्यादिभावनया स्वदोषचिन्तनेन आत्मोत्कर्षपरिणामो निवार्यः ॥४॥

**शरीररूपलावण्य-ग्रामारामधनादिभिः ।**
**उत्कर्षः परपर्यायै-श्चिदानन्दघनस्य कः ॥५॥**

शरीरेति—चिदानन्दघनस्य चिद्-ज्ञानम्, आनन्दः-सुखम्. ताभ्यां घनस्य आत्मनः परपर्यायैः-संयोगसम्भवैः पुद्गलसन्निकर्षोद्भवैः, क

---

१. ज्ञानादि V.1, A.D. । २. ज्ञातसत्ता A.D., ज्ञानसत्ता V.1. । ३. विकल्पतल्पे V.1, A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कर्ष-उन्मादः ? कैरिति शरीराणि-औदारिकादीनि विनाशिस्वभावानि रूपं-संस्थाननिर्माणवर्णनामकर्मोद्भवम्, लावण्यं चातुर्य-सौभाग्य-नामोदयनिष्पन्नम्, वेदादिमोहसन्निकर्षसम्भवम्, ग्रामः-जननिवास-लक्षणः, आरामाः-वनोद्यानभूमयः, धनं-गणिमधरिमादि, तेषां द्वन्द्वः तैः, क उत्कर्षः ? परत्वात् कर्मबन्धनिबन्धनात् स्वस्वरूपरोधकात् । तत्संयोगः निन्द्य एव । तर्हि क उत्कर्षः ? उक्तं च **उत्तराध्ययने—**

**[82] धणेण किं धम्मधुराहिगारे, सयणेण वा कामगुणेहिं चेव ।**
**समणा भविस्सामो गणोहधारी, बहिं विहारा अभिगम्मभिक्खं ॥१७॥**

[अ० १४. गा० १७]

**[83] न तस्स दुक्खं विभजंति णायओ,**
**न मित्तवग्गा न सुआ न बंधवा ।**
**इक्को सयं पच्चणुहोइ दुक्खं,**
**कत्तारमेवं अणुजाइ कम्मं ॥२३॥** [अ० १३. गा० २३]

अतः आत्मगुणानन्दपरिणतानां कर्मोपाधिसम्भवे उत्कर्षो न भवति ॥५॥

**शुद्धाः प्रत्यात्मसाम्येन, पर्यायाः परिभाविताः ।**
**अशुद्धाश्चाप्रकृष्टत्वान्नोत्कर्षाय महामुनेः ॥६॥**

शुद्धा प्रत्यात्मेति—महामुनेः-निर्ग्रन्थस्य पाकोत्तीर्णजात्यकार्त्त-स्वरवद् गृहीतात्मस्वरूपस्य शुद्धाः पर्यायाः सम्यग्ज्ञानचरणध्यान-प्राग्भावरूपा आत्मपर्यायाः न उत्कर्षाय भवन्ति । कथं न भवन्ती-त्याह—प्रत्यात्मसाम्येन परिभाविताः-आत्मानमात्मानं प्रति प्रत्यात्म, तत्र साम्येन तुल्यत्वेन भाविताः । भावना च 'किमाधिक्यं मम जातं ? तेन एते ज्ञानादयो गुणाः सर्वात्मनि सन्त्येव सर्वसाधारणे क उत्कर्षः ? इति भाविताशयः सर्वजीवानां ज्ञानाद्यनन्तपर्यायत्वं तुल्यं सिद्धसंसारस्थयोः न सत्ताभेदः । उक्तं च **संवेगरङ्गशालायाम्-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नाणाइणंतगुणोववेयं, अरुवमणहं च लोगपरिमाणं ।**
**कत्ता भोत्ता जीवं मन्नहु सिद्धाण तुल्लमिणं ॥१॥**

**श्रीपूज्यैश्च-**

**[84] जीवो गुणपडिवन्नो नयस्स दव्वट्ठियस्स सामइयं ।**
**सो चेव पज्जवट्ठियनयस्स जीवस्स एस गुणो ॥२६४३॥**

[विशेषा०गा० २६४३]

**[85]** तथा **ठाणांगे 'एगे आया'** [अ०१, सू०३] इत्यादि पाठात् सर्वत्र तुल्यत्वे आत्मनः सद्गुणप्राकट्ये क उत्कर्षः ? अशुद्धाः पर्याया औदयिकाः शक्रचक्रित्वादयः अपकृष्टत्वात् तुच्छत्वात् दोषत्वात् गुणघाततत्त्वज्ञानरमणोपघातकत्वात् शोफरोगपुष्टत्ववत्[१] न उत्कर्षाय भवन्ति । किमेभिः पुद्गलोपचयरूपैः परोपाधिजैः संसर्गैश्च ? मे कदा निवृत्तिः[२] एभ्यः, इति संवेगनिर्वेदपरिणतानां नोन्माद इति ॥६॥

पुनः आत्मानमुपदिशति–

**क्षोभं गच्छन् समुद्रोऽपि, स्वोत्कर्षपवनेरितः ।**
**गुणौघान् बुद्बुदीकृत्य, विनाशयसि किं मुधा ॥७॥**

क्षोभं गच्छन्निति–हे हंस ! स्वतत्त्वजलपूर्णस्वरूपमानसनिवासरसिकस्त्वं समुद्रोऽपि-मुद्रा-साधुलिङ्गरूपा तया युक्तोऽपि स्वोत्कर्षपवनेरितः-साहंकारपवनप्रेरितः, क्षोभं गच्छन्-अध्यवसायैः एवमेवं भवन्, गुणौघान्-अभ्यासोत्पन्नान् श्रुतधरव्रतधरलक्षणान् आमर्षौषधिरूपान् बुद्बुदीकृत्य मुधा-व्यर्थम्, किं विनाशयसि ? प्राप्तगुणगम्भीरो भव । स्वगुणाः स्वस्यैव हितहेतवः, तत्रः किं परदर्शनेन ? मानोपहताः गुणाः तुच्छीभवन्ति अतो न मानो विधेयः ॥७॥

**निरपेक्षानवच्छिन्नानन्तचिन्मात्रमूर्त्तयः ।**
**योगिनो गलितोत्कर्षापकर्षानल्पकल्पनाः ॥८॥**

॥ इति अनात्मशंसाष्टकम् ॥१८॥

---

१. पुष्टि० सर्वप्रतिषु । २. निवृत्तः B.2., V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरपेक्षा इति—योगिनः-यमनियमाद्यष्टाङ्गयोगाभ्यासोत्पन्नरत्नत्रयी-लक्षणस्वयोगसिद्धाः ईदृशा भवन्ति । निरपेक्षाः-निर्गता अपेक्षा अपेक्षणं [1]येभ्यस्ते निरपेक्षाः अपेक्षारहिता इत्यर्थः। अनवच्छिन्नाः-विच्छेदरहिताः। अनन्तचिन्मात्रमूर्त्तयः-अनन्तं-प्रान्तरहितम्, चित्-ज्ञानं तन्मात्रा-ज्ञानमात्रा मूर्त्तिः येषां ते अनन्तचिन्मात्रमूर्त्तयः । इत्यनेन परभावानुगतचेतना-विकलाः स्वच्छस्वरूपानुगतचेतन[2]परिणताः गलितोत्कर्षापकर्षाः-गलितः उत्कर्षः-उन्मादः अपकर्षः-दीनता तयोः अनल्पाः कल्पनाः विकल्प-जालपटलाः(नि) येषाम्, एवंविधा योगिनो ज्ञानपरिणताः-ज्ञानैकरसाः तिष्ठन्ति । ते एव तत्त्वसाधनचिन्मया इत्यतो मानोन्मादजनकः स्वोत्कर्षो निवार्यः ॥८॥

॥ इति व्याख्यातम् अनात्मप्रशंसनाष्टकम् ॥१८॥

## अथ तत्त्वदृष्ट्यष्टकम् ।

विशिष्टोदयेन पुण्यप्राग्भावभारभारितस्य[3] क्षायोपशमिकमत्यादि-प्राग्भारोत्पन्नानैकान्तिकतात्त्विकविकल्पकल्पनागौरवगरिष्ठस्य तत्त्व-ज्ञानविकलसकलजगज्जन्तुकृतस्तवनापूरपूरितश्रवणस्य तत्त्वदृष्टिम् ऋते स्वोत्कर्षपरिहारो न भवति, अतस्तत्त्वदृष्टिः कार्या । तस्य भावः तत्त्वं-वस्तुस्वरूपम्, जीवे जीवत्वं तत्त्वमनन्तचैतन्यरूपम्, अजीवे अचैतन्य-स्वरूपम् । तत्त्वं नाम अविपरीतस्याद्वादगोचरं जीवादिपदार्थस्वरूपं तत्रापि स्वस्वस्थाने धर्माधर्माकाशपुद्गलजीवानां तत्त्वत्वम् । तथापि अस्य ममात्मनः मत्स्वरूपं शुद्धचिद्रूपम् अनन्तानन्दस्वरूपमसङ्ख्येय-प्रदेशानन्त[4]ज्ञानादिपर्यायपारिणामिकोत्पादव्ययध्रौव्यत्वषड्गुणपरिणता-गुरुलघुपारमार्थिकैकान्तिकात्यन्तिकनिरतिशयाबाधनिःश्रेयसरूपं स्व-तत्त्वम् । तत्र दृष्टिः-दर्शनं श्रद्धानं प्रतिप्रेक्षणं वा तत्त्वावलोकनं यथार्थाव-बोधयुक्ता श्रद्धादृष्टिः तत्त्वदृष्टिः । सा च नामतः उल्लापः अनेकानाम् ।

१. यैस्ते B.2. S.M. । २. चिन्तन A.D., V.1., विना । ३. सारितस्य B.1.2., A.D., S.M. V.2. । ४. ज्ञानपर्याय. S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापनातः तद्विचारणास्थिरचित्तानां मुद्रान्यासाद्यवलम्बिनाम् । द्रव्यतः संवेदनज्ञानं विविक्ततत्त्वानाम् । भावतः अनुभवात्मस्पर्शज्ञाननिमग्न-चित्तानाम् । संवेदनज्ञानं यावन्नयचतुष्टयम् । नयत्रयं स्पर्शज्ञानात्मक-सम्यग्दर्शनसम्यक्चारित्रैकत्वध्यानैकतानिष्पन्नकेवलज्ञानिनाम् उत्सर्गतः[1] तत्त्वदृष्टिर्बोद्धव्या सर्वोपायसमूहतः स्वतत्त्वे दृष्टिः कार्या । तदर्थमुपदेशः-

**रूपे रूपवती दृष्टिर्दृष्ट्वा रूपं विमुह्यति ।**
**मज्जत्यात्मनि नीरूपे, तत्त्वदृष्टिस्त्वरूपिणी ॥१॥**

रूपे इति—रूपवती दृष्टिः पौद्गलिका-पुद्गलात्मिका पुद्गल-स्वरूपग्राहिणी, दृष्टिः-चक्षुः, रूपं-श्वेतादिभेदं दृष्ट्वा रूपे-वर्णादौ वर्णगन्धरसस्पर्शलक्षणे, विमुह्यति-मोहसाद्भवति । तु-पुनः, अरूपिणी-रूपरहिता दृग् ज्ञानरूपा आत्मचैतन्यशक्तिलक्षणा तत्त्वदृष्टिः नीरूपे-निर्गतमूर्त्तधर्मिणि वर्णादिरहिते, आत्मनि-शुद्धचैतन्यलक्षणे मज्जति-मग्नतां प्राप्नोति स्वरूपलीना भवति । अतो बाह्यदृष्टित्वमनादीनं विहाय स्वरूपोपयोगे दृष्टिः कार्या ॥१॥

**भ्रमवाटी बहिर्दृष्टिर्भ्रमच्छाया तदीक्षणम् ।**
**अभ्रान्तस्तत्त्वदृष्टिस्तु, नास्यां शेते सुखाऽऽशया ॥२॥**

भ्रमवाटी इति[2]—बहिर्दृष्टिः-भ्रमोत्पन्ना भ्रमहेतुरिति निवारणीया भवहेतुत्वात् । तत्त्वदृष्टिः श्रेयोऽ[3]भ्रमवाटी । इति भो भव्य ! बहिर्दृष्टिः-बाह्यभावावलोकनम्- 'इदं शोभनम्, इदम् अशोभनम्, इदं कृतम्, इदं करोमि इदं कार्यमि'त्याद्यवलोकनरूपा दृष्टिः । भ्रमवाटी-भ्रमस्य वाटी रक्षिका[4] वृत्तिः भ्रमविकल्पवर्द्धनी बाह्यावलोकनेन तदिष्टानिष्टतादि-चिन्तनेन विकल्पकल्पना जायते । चेतना च परावलोकनव्याकु[5]लता स्वतत्त्वविमुखा तत्रैव रमते । उक्तं च-

---

१. उत्सर्ग० V.1., A.D. । २. सर्वप्रतिषु नास्ति । ३. श्रेयाभ्रम० B.2. S.M. A.D., V.1.2. । ४. रक्षका B.1.2., V.2. A.D., L.D.2., S.M. । ५. व्याकुला V.1., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रागे दोसे रत्तो, इट्ठाणिट्ठेहिं [१]भमसुहं पत्तो ।**
**कप्पेइ कप्पणाओ, मज्झेयं अहंपि एयस्स ॥१॥**

तदीक्षणं भ्रमप्रकाशः तादृग् एकान्तारोपजं ज्ञानं तु शुभ-पुद्गलसंयोगे सुखारोपः तदप्राप्तौ अशुभप्राप्तौ दुःखारोपरूपं ज्ञानं भ्रमच्छाया भ्रमस्य शीतलता तत्र भ्रमो[२]लव एव रमन्ते । तु-पुनः अभ्रा[३]न्तः-तत्त्वदृष्टिः, यथार्थतत्त्वे स्याद्वादे स्वपरस्वभावदर्शने दृष्टिः (यस्य) तत्त्वज्ञः स्वरूपानुभवरक्तः, अस्यां-भ्रमच्छायायां सुखाशया-सुखप्राप्तीच्छया न शेते । किन्तु पूर्वकर्मोदयेन तत्र वर्त्तमानोऽपि तप्तलोहशिलापादमोचनवत् सशङ्कः ससङ्कोचः च दुःखमेवेदमिति जानन् निर्वेदवानेव भवति । उक्तं च–

**एए विसया इट्ठा, तत्तो विन्नू[४]ण मिच्छदिट्ठीणं ।**
**विन्नाइयतत्ताणं, दुहमूला दुहफला चेव ॥१॥**

**जह चम्मकरो चम्मस्स, [५]गंधं नो णायइ य फले लुद्धो ।**
**तह विसयासी जीवा, विसये दुक्खं न जाणंति ॥२॥**

**सम्मद्दिट्ठी जीवो, तत्तरुई आयभावरमणपरो ।**
**विसये भुजंतो वि हु, नो रज्जइ नो वि मज्जेइ ॥३॥**

अतो बाह्यावलम्बिचेतनावीर्या कार्या च स्वरूपावलम्बिनी ॥२॥

**ग्रामारामादि मोहाय, यद् दृष्टं बाह्यया दृशा ।**
**तत्त्वदृष्ट्या तदेवान्तर्नीतं वैराग्यसम्पदे ॥३॥**

ग्रामारामादि इति–बाह्यया दृशा-बाह्यदृष्ट्या यद् ग्रामारामादि दृष्टं मोहाय भवति-असंयमवृद्धये भवति, तदेव ग्रामादिकं तत्त्वदृष्ट्या-स्वपरभेदकृत्रिमाकृत्रिमहन्त्र्या दृशा अन्तर्-आत्मोपयोगमध्ये नीतं-

१. कम्म V.2., B.2. । २. भ्रमालुवः सर्वप्रतिषु । ३. अभ्रान्तिः V.2., B.2., S.M. । ४. विन्नुण S.M., V.2. । ५. गंधि A.D. B.1.2. V.1.2 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रापितम्, वैराग्यसम्पदे-वैराग्यम्-औदासीन्यं तत्सम्पदावृद्धये भवति । उदाहरणम्-एगे आयरिआ नाणचरणप्पहाणा, सुअरहस्सपारगा, भव्वजीवाणं तारगा, अणेगसमणगणपरिवुडा, गामाणुगामं दुइज्जंता[1], वायणाइहिं समणसंघं [2]गायन्ता मग्गे, पंचसमिइतिगुत्तिजुत्ता, अणिच्चाईभावणाभावियसव्वसंजोगा, पत्ता एगं वणं अणेगलयाईणं नीलं, नीलाभासं सउणगणनिवासं, तओ [3]वणस्स पुप्फपत्तफललच्छीं पासिऊण निग्गंथाणं वयन्ति, इअ वणं भो भो निग्गंथा ! पासह, एए पत्ता पुप्फा गुला गुम्मा फला जे चेयणालक्खणाणंतसत्तिं आवरिऊण नाणावरणदंसणावरण-चरित्तमोह-मिच्छत्तमोहांतरायउदयेण दीणा हीणा दुहिया एगेंदियभावमावन्ना कंपंता महाबलहया दुहिया अत्ताणा असरणा जम्मणमरणावगाढा अहो अणुकंपाजुग्गए एक्को एस अणुकंपं कुणई मणसवणनयणविगलाणं । इअ भणिऊण जणिअसंवेगा चलंति पुरओ । ते निग्गंथावि नाणावरणाई बंधकारणे दुगछंता पंथओ चलिया । अहह-

**आया आयं हणइ, आयगुणे संतए विधंसेइ ।**
**रमई विसए रम्मे, चयई नाणाइगुणभावे ॥१॥**

इय चिंतता गच्छंति ताव पत्तं महानयरं, अणेगगीयवाइयरवेणं विवाहाईऊसवेण देवलोगरूपं[4] रमणिज्जं मूढाणं । ता आयरिओ समणसंघं भणइ-भो भो निग्गंथा ! अज्जं एयम्मि नयरे मोहधाडी निवडिया । तेण एए कहंति लोगा उच्छलंति भओविग्गा । ता अप्पाण न जुज्जई इत्थ पवेसो । मा कोवि घायविहलो हविज्जाहि । पासबद्धा लोगा अणुकंपणिज्जा, मोहसुरामत्ता नो उवएसजुग्गा । [5]अंग्गे निगगच्छह। ता साहवो भणंति-चारु कहियं मोहायसुपुट्ठे विसयपत्ते खित्ते गमणं न जुज्जई । इय वेरागपरा विहरई । तेणं आयसुहट्ठियाणं गामनगराई वेरग्गकारणं हवइ इति ॥३॥

---

१. दुयंज्जता B.1.2., V.1.2., S.M. । २. गाहंता V.1. ३. वणुस्स V.1. विना । ४. देवलोगभूयं V.1.A.D. । ५. अग्गा B.1.2.V.2.S.M.A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बाह्यदृष्टेः सुधासार-घटिता भाति सुन्दरी ।**
**तत्त्वदृष्टेस्तु सा साक्षाद्, विण्मूत्रपिठरोदरा ॥४॥**

बाह्यदृष्टेरिति—बाह्यदृष्टेः-संसाररक्तस्य, सुन्दरी-स्त्री सुधासारघटिता भाति-अमृतमयी इव भाति । तदर्थमर्जयन्ति धनम्, त्यजन्ति प्राणान्, मोहमत्ता मुञ्जादयोऽनेके । तु-पुनः, तत्त्वदृष्टेः- निर्मलानन्दात्मस्वरूपाव-लोकनदक्षस्य सा-सुन्दरी विण्मूत्रपिठरोदरा भाति विट्-विष्ठा मूत्रं-प्रस्रवणं पिठरम्-अस्थि तेषाम् उदरा-भाजनरूपा भाति । उक्तं च-

**[86] रसासृग्मांसमेदोऽस्थि-मज्जाशुक्रान्त्रवर्चसाम् ।**
**अशुचीनां पदं कायः, शुचित्वं तस्य तत्कुतः ? ॥७२॥**
[यो०शा० प्र० ४ श्लो० ७२]

**[87] वञ्चकत्वं नृशंसत्वम्, चञ्चलत्वं कुशीलता ।**
**इति नैसर्गिका दोषा, यासां तासु रमेत कः[१] ? ॥८४॥**

**भवस्य बीजं नरक-द्वारमार्गस्य दीपिका ।**
**शुचां कन्दः कलेर्मूलम्[२], दुःखानां खानिरङ्गना ॥८७॥**
[यो०शा० प्र० २ श्लो० ८४, ८७]

★(अन्यशास्त्रेऽपि—

**कान्ताकनकसूत्रेण, वेष्टितं सकलं जगत् ।**
**तासु तेषु विरक्तो यो, द्विभुजः परमेश्वरः ॥१॥)**

इत्यादि तत्त्वज्ञस्य नारी मोहहेतुत्वाद् भवबीजरूपा भाति ॥४॥

पुनः उपदिशति—

**लावण्यलहरीपुण्यम्, वपुः पश्यति बाह्यदृग् ।**
**तत्त्वदृष्टिः श्वकाकानाम्, भक्ष्यं कृमिकुलाकुलम् ॥५॥**

लावण्येति—बाह्यदृग्-लोकानुगतदृष्टिः, वपुः-शरीरं लावण्य-लहरीपुण्यं-(सौन्दर्यलहरी)पवित्रं पश्यति । तत्त्वदृष्टिः-सम्यग्ज्ञानी तत्तु

---

१. किम् - सर्वप्रतिषु, २. मूलां - सर्वप्रतिषु । ★ सर्वप्रतिषु नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वकाकानां-श्वानकाकानां भक्ष्यं पश्यति कृमिकुलाकुलं पश्यति-कृमिमयं पश्यति। उक्तं च–

**[88] नवस्रोतः स्रवद्विस्त्ररसनिस्यन्दपिच्छले ।**
**देहेऽपि शौचसंकल्पो, महन्मोहविजृम्भितम् ॥७३॥**

[यो०शा० प्र० ४ श्लो० ७३]

अतः कर्मोपाधिजं शरीरमहितं बन्धहेतुत्वात्, तत्र रागाभाव एव वरम् ॥५॥

**गजाश्वैर्भूपभुवनम्[१], विस्मयाय बहिर्दृशः ।**
**तत्राश्वेभवनात्कोऽपि भेदस्तत्त्वदृशस्तु न ॥६॥**

गजाश्वैर्भूप इति–बहिर्दृशः-(बहिर्दृष्टेः) नरस्य भूपभुवनं[२]-नृपगृहम्, गजाश्वैः-[३]वारणाश्वगणैर्व्याप्तं विस्मयाय-आश्चर्याय भवति । तत्त्वदृशः-तत्त्वज्ञानिनः तत्र-राजमन्दिरे अश्वेभवनात्-करितुरगवनात् कोऽपि भेदो न । अनन्तज्ञानानन्दाद्वैतात्मानुभवरक्ता वनं नगरतुल्यं जानन्ति ॥६॥

**भस्मना केशलोचेन, वपुर्धृतमलेन वा ।**
**महान्तं बाह्यदृग् वेत्ति, चित्साम्राज्येन तत्त्ववित् ॥७॥**

भस्मनेति–बाह्यदृग्-बाह्यदृष्टिः भस्मना केशलोचेन-केशाकर्षणेन वपुषा-शरीरेण धृतो मलो[४] येन तेन महत्वं-साधुत्वम् आचार्यत्वं वेत्ति । महत्त्वस्वरूपापरिज्ञानी जानाति । तत्त्ववित्-तत्त्वज्ञानी अरूपात्मस्वरूपावबोधी, चित्साम्राज्येन-ज्ञानसाम्राज्येन ज्ञानपूर्णत्वेन रत्नत्रयीपरिणमनेन शुद्धाखण्डानन्दसाधनप्रवृत्त्या स्वगुणप्राग्भावेन महान्तं वेत्ति-जानाति । उक्तं **षोडशके–**

**[51] बालः पश्यति लिङ्गम्, मध्यमवृत्तिः[५] विचारयति वृत्तम्।**
**आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥१।२॥**

---

१. भवनम् S.M.V.2.B.1.2. । २. भवनम्-V.2. । ३. वारणगुणे S.M. वारणगुणैः S.M. विना । ४. धृतं मलं सर्वप्रतिषु । ५. बुद्धिः सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तराध्ययनेऽपि—

[89] **न वि मुंडिएण समणो, न ऊँकारेण बंभणो ।**
**न मुणी रण्णवासेणं, कुसचीरेण न तावसो ॥२९॥**
**समयाए समणो होई, बंभचेरेण बंभणो ।**
**नाणेण य मुणी होई, तवसा होई तावसो ॥३०॥**
[अ० २५. गा०२९-३०]

**[80] आत्मा सामायिकं भवति,** इत्यादि **व्याख्यायाम्** । [भग० श० १, उ०९, सू०७६] अतः आत्मज्ञानरमणविश्रामानुभवलीना अदीना मुनयो भवन्ति ॥७॥

**न विकाराय विश्वस्यो-पकारायैव निर्मिताः ।**
**स्फुरत्कारुण्यपीयूष-वृष्टयस्तत्त्वदृष्टयः ॥८॥**

॥ इति तत्त्वदृष्ट्यष्टकम् ॥ १९ ॥

न विकाराय इति—आचार्यैः-गुरुभिः ग्रहणासेवनाशिक्षादानेन सूक्ष्मागमरहस्यशिक्षणेन यैः पाठकैः तत्त्वदृष्टयः पुरुषाः निर्मिताः-निष्पादिता विकाराय न-रागद्वेषोपाधिविवृद्धये न-किन्तु विश्वस्य त्रिभुवनस्य उपकाराय-सदुपदेशदानशुद्धतत्त्वोपलम्भाद्युपकाराय निर्मिता इति भावना । यथाऽनादिमिथ्यात्वासंयमग्रस्तानां वयं निर्यामकाः तथाऽन्येऽपि यथार्थभावनदक्षा[1] उपकाराय भविष्यन्ति, तेन एभ्यः श्रुतरहस्यं [2]दातव्यम् । उक्तं च **विधिप्रपायाम्**—

**निज्जामउ भवणवतारणसद्धम्मजाणवत्तंमि ।**
**मोक्खपहसत्थवाहो, अन्नाणंधाण चक्खू य ॥१॥**
**अत्ताणाणं ताणं, नाहो अनाहाण भव्वसत्ताणं ।**
**तेण तुमं सप्पुरिस, गुरुअगच्छभारे नियुत्तोऽसि ॥२॥**
[आयरियपयट्ठावणविही. २९... गा. १-२] इत्यादि ।

---

१. ज्ञानदक्षा-V.1. । २. वक्तव्यम् V.2., पातव्यम् S.M. (संशो.) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भद्दं बहुस्सुयाणं, बहुजणसंदेहपुच्छणिज्जाणं' ।**
**(उज्जोइय भुवणाणं, झीणंमि वि केवलमयंके ॥५०६॥)**
[भ०भा० गा०५०६]

**बहुश्रुताध्ययने–**

**[90] समुद्दगम्भीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया ।**
**सुयस्स पण्णा विउलस्स ताइणो, खवित्तु कम्मं गइमुत्तमं गया ॥३१॥**
[उत्तरा०अ० ११ गा. ३१]

इति । तत्त्वदृष्टित्वं हितम्, न अनेकशास्त्रव्यायामे बहुश्रुतत्वम्, निश्चितसमयज्ञो बहुश्रुतः । उक्तं च **सन्मतौ**–

**[91] ★जो हेउवायपक्खम्मि, हेउओ आगमे य आगमिओ ।**
**ससमयपण्णवओ सो, सिद्धंतविराहओ अन्नो ॥४५॥**
[कां–३. गा० ४५]

इति नयप्रमाणप्रमाणीकृतस्वपरसमयसाराः स्वरूपसाराभिरुद्ध-मोहप्रचाराः तत्त्वदृष्टयः । किम्भूता ? इत्याह– स्फुरन्ती कारुण्यं भव-समुद्रतारणोपकारित्वलक्षणं यत् पीयूषं तस्य वृष्टयः (वृष्टिः) वर्षा यत्र याः (येषु ये) इति जगज्जनतारणकरुणाऽमृतवृष्टिमया इत्यनेन कथम् एते लोकाः तत्त्वविमुखाः विषयरक्ताः आत्मानं ध्वंसयन्ति ? अहह सति जैनागमे, सति च अनन्तगुणपर्यायसत्तात्मके आत्मनि स्वभ्रान्त्या रमन्ते भवाटव्यामतः कथयामः धर्मरहस्यमित्युपकारपराः तत्त्वज्ञाः जगति महात्मानः स्तव्या इति बाह्यदृष्टित्वं परित्यज्य अन्तरतत्त्वावभासनरसिका भवन्तु भव्याः॥८॥

**॥ इति व्याख्यातं तत्त्वदृष्ट्यष्टकम् ॥१९॥**

**अथ सर्वसमृद्ध्यष्टकं व्याख्यायते ।**

सर्वा–समग्रा समृद्धिः–सम्पदा सर्वसमृद्धिः, तत्र नामसमृद्धिः

★ यतिल०समु० गा० १७६, उप०रह० गा० १५१ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उल्लापनरूपा जीवस्याजीवस्य, स्थापना समृद्धिः शक्तिरूपा, द्रव्यसमृद्धिः धनधान्यादिरूपा, शक्रचक्र्यादीनां लौकिका, लोकोत्तरा पुनः मुनीनां लब्धिसमृद्धिरूपा ।

**[92] आमोसहि[1] विप्पोसहि[2], खेलोसहि[3] जल्लमोसही[4] चेव ।**
**संभिन्नसोय[5] उज्जुमई[6], सव्वोसहि[7] चेव बोधव्वा ॥६९॥**
**चारण[8]आसीविस[9] केवली[10] य मणनाणिणो[11] य पुव्वधरा[12] ।**
**अरिहंत[13] [१]चक्कधरा[14] बलदेवा[15] वासुदेवा[16] य ॥७०॥**

[आव० नि० ६९-७०]

इत्यादिलब्धयः-ऋद्धयः । तत्र केवलज्ञानादिशक्तिर्लोकोत्तरा भाव-ऋद्धिः । सं-सम्यक् प्रकारेण ऋद्धिः-समृद्धिः सर्वा चासौ समृद्धिश्च सर्वसमृद्धिः । अत्र साधनानवच्छिन्नात्मतत्त्वसम्पद्मग्नानां या तादात्म्या-नुभवयोग्या[२] समृद्धिः, तस्याः अवसरः । नयाश्च प्रस्थकदृष्टान्तभावनया तत्कारणेषु, तद्योग्येषु, तदुद्यतेषु तपोयोगिषु आद्याः । तद्गुणेषु सापेक्षेषु-नैसर्गिकोत्सर्गरूपेषु[३] अन्त्याः इति । [४]अत्र प्रथमम् आत्मनि समृद्धिः पूर्णत्वं भासते तथा कथयति-

**बाह्यदृष्टिप्रचारेषु, मुद्रितेषु महात्मनः ।**
**अन्तरेवावभासन्ते, स्फुटाः सर्वाः समृद्धयः ॥१॥**

बाह्यदृष्टिप्रचारेषु इति- महात्मनः-स्वरूपपररूपभेदज्ञानपूर्वक-शुद्धात्मानुभवलीनाः (लीनस्य) सर्वसमृद्धयः स्फुटाः-प्रकटाः, अन्तरेव-आत्मान्तः एव स्वरूपमध्ये एव (अव)भासन्ते । यतः स्वरूपा-नन्दमयोऽहम्, निर्मलाखण्डसर्वप्रकाशकज्ञानवानहम्, इन्द्रचन्द्रादिऋद्धयः औपचारिकाः अक्षयानन्तपर्यायसम्पत्पात्रमहम्, स्वसत्ताज्ञानोपयुक्तस्य स्वात्मनि भासन्ते । कीदृशेषु सत्सु ? बाह्यदृष्टिप्रचारेषु मुद्रितेषु सत्सु । बाह्यदृष्टिः- विषयसञ्चारात्मिका तस्याः प्रचारा विस्ताराः तेषु मुद्रितेषु-

१. चक्कवट्टी V.1 । २. भवभोग्या V.1.A.D. । ३. V.1., A.D. प्रतौ अस्ति । ४. तत्र V.1., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोधितेषु न हि इन्द्रियप्रचारचलोपयोगैः आत्मनः अभ्यन्तरामूर्ताकर्मावृता स्वसत्तासंपद् ज्ञायते । रोधितेन्द्रियचापल्ये स्थिरप्रगुणचेतनोपयोगैः कर्ममले[1]पटलावगुण्ठिताप्यात्मसम्पद् ज्ञायते इति । इत्यनेन बहिर्गमनमुपयोगस्य न कर्त्तव्यमिति ॥१॥

**समाधिर्नन्दनं धैर्यम्, दम्भोलिः समता शची ।**
**ज्ञानं महाविमानं च, वासवश्रीरियं मुनेः ॥२॥**

समाधिरिति- मुनेः-स्वरूपज्ञानानुभवलीनस्य, इयम्- उच्यमाना वासवस्य-इन्द्रस्य, श्रीः-लक्ष्मीः शोभा वर्त्तते । अत्र मुनेः[2] पवित्ररत्नत्रयीपात्ररूपेन्द्रस्य समाधिः ध्यानध्याता(तृ)ध्येयैकत्वेन निर्विकल्पानन्दरूपा समाधिः, स[3] एव नन्दनं वनम् । हरेः नन्दनवनक्रीडा सुखाय उक्ता, साधोः समाधिक्रीडा सुखाय । तत्राप्यौपाधिकात्मीयकृतो महान् भेदः, स च अध्यात्मभावनया ज्ञेयः । अस्य धैर्यं-वीर्याकम्पता औदयिकभावाक्षुब्धतालक्षणं वज्रं-दम्भोलिः, पुनः समता-इष्टानिष्टेषु संयोगेषु अरक्तद्विष्टता । सर्वेऽपि पुद्गलाः[4] कर्करचिन्तामण्यादिपरिणताः जीवाश्च भक्ताभक्ततया परिणताः, ते सर्वे न मम, भिन्नाः एते, तेषु का रागद्वेषपरिणतिरित्यवलोकनेन समपरिणतिः समता, सा शची स्वधर्मपत्नी । ज्ञानं-स्वपरभावयथार्थावबोधरूपम्, विमानं सर्वावबोधकरं महाविमानम् । इत्यादिपरिवृतः मुनिः वज्रीव भासते । उक्तं च **श्रीयोगशास्त्रे–**

**पुंसामयत्नलभ्यं ज्ञानवतामव्ययं पदं नूनम् ।**
**यद्यात्मन्यात्मज्ञानमात्रमेते समीहन्ते ॥११॥**

**श्रयते सुवर्णभावम्, सिद्धरसस्पर्शतो यथा लोहम् ।**
**आत्मध्यानादात्मा, परमात्मत्वं तथाऽऽप्नोति ॥१२॥**

[प्र० १२ श्लो० ११-१२]

---

१. कर्ममय० B.2, V.2., S.M. (संशो.) । २. मुनिः सर्वप्रतिषु । ३. तदेव सर्वप्रतिषु । ४. पुद्गलानेक० V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विस्तारितक्रियाज्ञान-चर्मच्छत्रो निवारयन् ।**
**मोहम्लेच्छमहावृष्टिम्, चक्रवर्त्ती न किं मुनिः ? ॥३॥**

विस्तारितेति—"मुनिः"-समस्ताश्रवविरतः द्रव्यभावसंवररतः, किं चक्रवर्त्ती न ? अपि तु अस्त्येव । किं भूतः ? विस्तारितक्रियाज्ञान-चर्मच्छत्रः-क्रिया च ज्ञानं च क्रियाज्ञाने, चर्म च छत्रं च चर्मच्छत्रे, क्रियाज्ञाने एव चर्मच्छत्रे, क्रियाज्ञानचर्मच्छत्रे, विस्तारिते क्रियाज्ञान-चर्मच्छत्रे येन सः विस्तारितक्रियाज्ञानचर्मच्छत्रः इत्यनेन सत्क्रियोद्यतः सम्यग्ज्ञानोपयुक्तः । मोह एव म्लेच्छः तस्य महती वृष्टिः महावृष्टिः तां निवारयन् । मोहम्लेच्छाः-उत्तरखण्डनाथाः तत्प्रयुक्तमिथ्यात्वदैत्यकृता कुवासनावृष्टिः ताम्, शुद्धसम्यग्दर्शननिवारितकुवासनाचयः मुनिः भावचक्रवर्त्तीव भासते ॥३॥

**नवब्रह्मसुधाकुण्ड-निष्ठाधिष्ठायको मुनिः ।**
**नागलोकेशवद्भाति, क्षमां रक्षन् प्रयत्नतः ॥४॥**

नवब्रह्मेति—मुनिः-भेदज्ञानगृहीतात्मध्यानः, नागलोकेशवत्-उरग-पतिवद् भाति, किं कुर्वन् ? क्षमां पृथ्वीं मुनिपक्षे क्रोधापहरणपरिणतिः[१] वचनधर्मात्मिका[२] क्षमा[३] तां रक्षन् धारयन् इति । उरगपतेः क्षमाधारक-त्वं लोकोपचारतः, नहि रत्नप्रभाद्याः भूमयः केन धृताः, उपमा तु महत्त्वज्ञापिका[४] सामर्थ्यज्ञापिका[४] च । पुनः कथम्भूतो मुनिः ? नवं यद् ब्रह्मज्ञानं सा एव (तदेव) सुधा तस्याः कुण्डम्, तस्य निष्ठा-स्थितिः तस्या अधिष्ठायकः, इत्यनेन तत्त्वज्ञानामृतकुण्डस्थैर्यरक्षकः इति ॥४॥

**मुनिरध्यात्मकैलाशे, विवेकवृषभस्थितः ।**
**शोभते विरतिज्ञप्ति-गंगागौरीयुतः शिवः ॥५॥**

मुनिरध्यात्मेति, अत्र श्लोकत्रये महादेवकृष्णब्रह्माद्युपमानम् औप-चारिकम्, नहि ते कैलाशगङ्गासृष्टिकरणोद्यताः, किन्तु लोकोक्तिरेषा, तेन

१. परिणितं V.1.A.D. । २. धर्मात्मिकां सर्वप्रतिषु । ३. क्षमां सर्वप्रतिषु । ४. ज्ञापका सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लेषालङ्कारार्थं हि वाक्यपद्धतिः, न सत्या । मुनिः-तत्त्वज्ञानी अध्यात्म-आत्मस्वरूपैकत्वतारूपे कैलाशे-आस्थाने, विवेकः-स्वपरविवेचनं स एव वृषभः-(बलीवर्दः), तत्र स्थितः, विरतिः- चारित्रकलाऽऽश्रव-निवृत्तिः, ज्ञप्तिः-ज्ञानकला शुद्धोपयोगता, ते एव गङ्गागौर्यौ, ताभ्यां युतः शिवः-निरुपद्रवः, उपचारात् शिवः रुद्रः भासते । रुद्रस्य गङ्गायुतत्वं विद्याधरत्वे पार्वतीमनोरञ्जनाय विक्रियाकाले वाच्यम् ॥५॥

**ज्ञानदर्शनचन्द्रार्क-नेत्रस्य नरकच्छिदः ।**
**सुखसागरमग्नस्य, किं न्यूनं योगिनो हरेः ? ॥६॥**

ज्ञानदर्शनेति-योगिनः-रत्नत्रयपरिणतस्य, हरेः-कृष्णात् किं न्यूनम्? न किमपि, किम्भूतस्य योगिनः ? ज्ञानदर्शनचन्द्रार्कनेत्रस्य-ज्ञानं-सामान्यविशेषात्मके वस्तुनि विशेषावबोधः । सामान्यविशेषात्मके वस्तुनि सामान्यावबोधः दर्शनम् । तौ(ते) एव चन्द्रार्कौ नेत्रे यस्य स तस्य, हरेः चन्द्रार्कनेत्रत्वं तु लोकोक्तिरेव । पुनः किम्भूतस्य योगिनः?—नरकच्छिदः नरकगतिनिवारकस्य, हरेस्तु—नरकाभिधानशत्रुविदारकस्य, सुखसागरमग्नस्य, कृष्णार्थे इन्द्रियजसुखलीलासमुद्रमग्नत्वम्, योगिनस्तु सुखं सम्यग्ज्ञानदर्शनचारित्रसमाधिनिष्पन्नं तस्य सागरः तत्र मग्नस्य, आध्यात्मिकसुखपरिणामभाजनस्य साधोः केन सह न्यूनता ? न केनापि इति ॥६॥

**या सृष्टिब्रह्मणो बाह्या, बाह्यापेक्षावलम्बिनी ।**
**मुनेः परानपेक्षान्तर्गुणसृष्टिस्ततोऽधिका ॥७॥**

या सृष्टिर्ब्रह्मण इति—या सृष्टिः-रचना ब्रह्मणो-विधातुः सा बाह्या लोकोक्तिरूपा असत्या । पुनः बाह्या[१] अपेक्षा तस्या अवलम्बना-अवलम्बिका । मुनेः-स्वरूपसाधनसिद्धिमग्नस्य अन्तः-मध्ये आत्मनि व्यापकरूपा गुणानां सृष्टिः-रचना गुणप्राग्भावप्रवृत्तिपरिणतिरूपा, बाह्यभावतः अधिका । कथंभूता गुणसृष्टिः ? परानपेक्षा-परेषाम्

१. बाह्वी S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनपेक्षा-अपेक्षारहिता पराश्रयालम्बनविमुक्ता स्वरूपावलम्बनपरा गुण-रचना सा सर्वतोऽधिका इति ॥७॥

**रत्नैस्त्रिभिः पवित्रा या, स्रोतोभिरिव जाह्नवी ।**
**सिद्धयोगस्य साऽप्यर्हत्पदवी न दवीयसी ॥८॥**

॥ इति सर्वसमृद्ध्यष्टकम् ॥ २० ॥

रत्नैस्त्रिभिरिति सिद्धयोगस्याष्टाङ्गयोगसाधनसिद्धस्य साधोः, साऽपि अर्हत्पदवी-तीर्थकरपदवी ज्ञानाद्यनन्तचतुष्टयात्मकाष्टप्रातिहार्यान्विता जगद्धर्मोपकारिणी न दवीयसी-न दूरा इत्यर्थः । किम्भूता पदवी ?- त्रिभिः रत्नैः सम्यग्दर्शनज्ञानचारित्रैः पवित्रा पदवी । का इव ? स्रोतोभिः-प्रवाहैः जाह्नवी-गङ्गा इव । इति त्रैलोक्याद्भुतपरमार्थदाय-कत्वाद्यतिशयोपेता अर्हत्पदवी साधकपुरुषस्य यथार्थमार्गोपेतस्य न दवीयसी, आसन्ना एव इति । एवं सर्वमपि औपाधिकमपहाय स्वीय-रत्नत्रये साधना विधेया, येन सर्वा ऋद्धयः निष्पद्यन्ते ॥८॥

**॥ इति व्याख्यातं सर्वमृद्ध्यष्टकं विंशतितमम् ॥२०॥**

## अथ कर्मविपाकचिन्तनाष्टकम् ॥२१॥

अथावसरायातं निर्ग्रन्थत्वसाधनभावनार्थं समतानिष्पत्तिहेतुभूतं कर्मविपाकचिन्तनाष्टकं कथ्यते । तत्र यदुत क्रियते मिथ्यात्वादि-हेतुसमन्वितेन जीवेनेति कर्म-ज्ञानावरणादिकम् । अत्र कश्चित् कर्माभावं मन्यमानः प्राह-नास्ति कर्म, प्रत्यक्षानुमानादिप्रमाणागोचरत्वात् । तत्र न च तावत् प्रत्यक्षं कर्म अतीन्द्रियत्वात् । नाप्यनुमानसाध्यम् अनुमानस्य प्रत्यक्षपूर्वकत्वात् । धूमादिलिङ्गोपेतमहानसादौ दृष्टे चाहार्ये[१] च तावदनु-मानसम्भवः, न च तादृशं लिङ्गं कर्मानुमानजनकम्, तस्मात् नाप्यनु-मानगम्यम् । उपमायाः प्रत्यक्षत्वाभावात्, आगमस्य हि नानावाक्यात्, इति न कर्म । इत्याद्यनेकयुक्तिनिवहं वदन्तमाह-प्रत्यक्षं कर्म अस्ति,

१. वाह्नवे V.1. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केषां ?–सर्वज्ञानाम् । अन्येषामपि कार्यानुमानेन प्रत्यक्षमस्ति सुखदुःखानुभवस्य हेतुः, कार्यत्वादङ्कुरस्येवेति । अथ यदि भवतः प्रत्यक्षं कार्यं तर्हि कर्म । ममापि प्रत्यक्षं कस्मान्न भवति ? न हि यदेकस्य प्रत्यक्षं तेनापरस्यापि प्रत्यक्षेण भवितव्यम् । न हि सिंहशरभादयः सर्वस्य लोकस्य प्रत्यक्षाः, तथापि दक्षप्रत्यक्षाः मन्यन्ते, लोके[१] । एवं सर्वज्ञप्रत्यक्षम्[२] । कृतकर्म ज्ञानावरणीयं पुनः प्रतिप्राणिप्रसिद्धयोः सुखदुःखयोर्हेतुरस्ति, कार्यत्वादङ्कुरस्येव बीजमिति[३] । यश्चेह सुखदुःखयोर्हेतुः तत्कर्मैवेत्यस्ति । नन्विति स्यात् मतिः स्रक्चन्दनाङ्गनाविषकण्टकादय इति दृष्ट एव सुखदुःखयोर्हेतुरस्ति, किमदृष्टस्य कर्मणः तद्धेतुत्वकल्पनेन ? तदयुक्तम्, व्यभिचारात् । इह यस्तुल्यसाधनयोरिष्टशब्दादिविषयसुखसाधनसमेतयोरनिष्टार्थसाधनसम्प्रयुक्तयोश्च[४] बहूनां वा [५]फलं सुखदुःखानुभवलक्षणविशेषस्तारतम्यरूपो दृश्यते, नासौ अदृष्टहेतुमन्तरेणोपपद्यते । अनुमानान्तरं **श्रीविशेषावश्यके**–

**[93] किरियाफलभावाओ, दाणाईणं फलं किसीए व्व ।**
**तं च दाणाइफलं, मणप्पसायाइ जइ बुद्धी ॥१६१५॥**
**किरियासामन्नाओ, जं फलमस्सावि तं मयं कम्मं ।**
**तस्स परिणामरूवम्, सुहदुक्खफलं जओ भुज्जो ॥१६१६॥**
[गा. १६१५, १६]

इत्यादि **अग्निभूतिवादस्थले** ज्ञेयम् । तत्र नामस्थापना सुगमा, द्रव्यकर्म कर्मवर्गणागतपुद्गला बध्यमाना बद्धाः सत्तास्थाः, अथवा तद्धेतवोऽपि । भावतः कर्म ज्ञानावरणादिविपाकप्राप्ता गुणरोधादिस्वकार्यरूपाः । नैगमतः[६] मिथ्यात्वादिबन्धहेतुजनकपाखण्डिपरिचय–

---

१. लोकैः V.1.A.D. । २. प्रत्यक्षी A.D. । ३. मेति A.D.V.1 विना । ४. संयुक्तयोश्च A.D.V.1. विना । ५.फले V.1.A.D. विना । ६. नैगमेन S.M.V.2.B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रशंसादयः । संग्रहतः तद्योग्यताविशिष्टौ जीवपुद्गलौ । व्यवहारतः गृह्यमाणवर्गणासमूहः, प्राणातिपातादयश्च । ऋजुसूत्रतः बन्धहेतुपरिणता हेतुपरिणामाः सत्तास्थाः कर्मदलिका वा । शब्दतः चलोदीरणादिपूर्वकाः विपाकगतदलिकाः । समभिरूढतः ज्ञानाद्यनन्तगुणानां मध्ये यद्गुणरोधः तत्तस्यावरणम् । एवंभूततः स्वकर्तृता-ग्राहकता-वेत्तृता-व्यापकता-कर्म-कार्यकरणप्रवृत्ता[१] इति । **सिद्धसेनास्तु**–"कर्मकर्तृता ग्राहकता शब्दनये, वेदकता व्यापकता समभिरूढनये, गुणावरणत्वम् एवंभूतनये," इत्यादि भावना कार्या । तत्र विपाकप्राप्ते कर्मणि शुभाशुभोदये माध्यस्थ्यं करणीयं तदर्थमुपदेशः-

**दुःखं प्राप्य न दीनः स्यात्, सुखं प्राप्य च विस्मितः ।**
**मुनिः कर्मविपाकस्य, जानन्परवशं[२] जगत् ॥१॥**

दुःखं प्राप्य न दीनः स्यादिति–मुनिः-तत्त्वरसिकः दुःखम्-असातादि प्राप्य दीनः न स्यात्, [३]कृतभोगे का दीनता ? करणकाले अविचारितकरणेन तद्विपाक ईदृशः । एवं च पुनः सुखं- [४]शातादि राज्यैश्वर्यादि प्राप्य विस्मितो न स्यात् । को विस्मयः[५] ? स्वगुणा-वरणभूते विपाकमिष्टे कर्मणि । जगत्-लोकं कर्मविपाकस्य-शुभा-शुभोदयस्य, परवशं-पराधीनं जानन् । सर्वं जगत् कर्माधीनं तत्त्वज्ञानी एवं कर्मविपाकमवगणय्य तत्त्वसाधने यत्नवान् भवति ॥१॥

**येषां भ्रूभङ्गमात्रेण, भज्यन्ते पर्वता अपि ।**
**तैरहो कर्मवैषम्ये, भूपैर्भिक्षापि नाप्यते ॥२॥**

येषां भ्रूभङ्गेति–येषां-पुरुषाणाम्, भ्रूभङ्गमात्रेण-भ्रूविक्षेपेण, पर्वता-गिरिवरा अपि भज्यन्ते, तैर्भूपैः(कर्मवैषम्ये-)कर्मणां वैषम्यं कर्मजनिता विषमता तस्मिन् कर्मोदये दुःखावस्थायां भिक्षापि न आप्यते-न प्राप्यते, इति शुभाशुभविपाकवैचित्र्यम् ॥२॥

---

१. प्रवृत्त्या B.2, V.2, S.M. । २. वश्यं B.1 । ३. स्वकृत० V.1A.D. । ४. सुतादि A.D.V.1. विना । ५. विश्रयः V.1.A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जातिचातुर्यहीनोऽपि, कर्मण्यभ्युदयावहे ।**
**क्षणाद् रङ्कोऽपि राजा स्यात्, छत्रच्छन्नदिगन्तरः ॥३॥**

जातिचातुर्येति—कश्चिद् रङ्कोऽपि क्षणात्-क्षणमात्रेण, अभ्युदयावहे-शुभोदर्के कर्मणि राजा स्यात्-भवेत् । कथम्भूतः रङ्कः ? जातिः-मातृका चातुर्यं-दक्षत्वं ताभ्यां हीनः-रहितः अपि भूपो भवति । किम्भूतो राजा ? छत्रेण-(आतपत्रेण), छन्नं-छादितम् आक्रान्तं दिगन्तरम् तम्, आक्रान्तं दिगन्तरं येन स इति भूचक्री अखण्डाज्ञावान् भवति विपाकपाकेन । तत्र नाश्चर्यम् । दुर्लभं हि सम्यग्दर्शनज्ञानचारित्रं शुद्धात्मधर्मम् ॥३॥

**विषमा कर्मणः सृष्टिर्दृष्टा करभपृष्ठवत् ।**
**जात्यादिभूतिवैषम्यात्, का रतिस्तत्र योगिनः ॥४॥**

विषमा कर्मण इति-कर्मणः सृष्टिः-रचना करभपृष्ठवत् विषमा दृष्टा। कस्मात् ? जात्यादिभूतिवैषम्यात्-जातिः-कुलम् उच्चनीचादि-संस्थान-वर्ण-स्वर-सम्पदादिभेदाद् महद् वैषम्यं तस्मात् । उक्तं **प्रशमरतौ—**

**[94] [१]देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।**
**दृष्ट्वा कथमिह विदुषाम्, भवसंसारे रतिर्भवति ? ॥१०२॥**

इति । तत्र शुभोदये-ऐश्वर्यादिकाले अनेकाशुद्धाध्यवसाये-परसंयोगोत्पत्तिरूपे, योगिनः-रत्नत्रयीपरिणतस्य का रतिः ? न कापि । उक्तं च—

**सुभ[२]जोगो रइहेऊ, असुहजोगो अरइहेउत्ति ।**
**रागो वड्ढइ तेणं, अवरो दोसं विवड्ढेई ॥१॥**

**सिवमग्गविग्घभूया, कम्मविवागा चरित्तबाहकरा ।**
**धीराणं समया तेहिं, चायपरिणामओ चवई ॥२॥ इति ४॥**

कर्मस्वरूपस्य मोक्षमार्गध्वंसित्वं दर्शयति—

**आरूढाः[३] प्रशमश्रेणिम्, श्रुतकेवलिनोऽपि च ।**
**भ्राम्यन्तेऽनन्तसंसारमहो दुष्टेन कर्मणा ॥५॥**

१. जातिकुल० सर्वप्रतिषु । २. सुभा. S.M.V.2. । ३. आरूढः V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरूढा इति कश्चित् मुनिः-निश्चयरत्नत्रयीपरिणामतः तीव्रक्षयोपशमभावावाप्तसाधनः अपूर्वकरणबलेन उपशमश्रेणिम्-उपशमचारित्रपरिणतिम् आरूढः सर्वथा मोहोदयरहितः, च पुनः श्रुतकेवली अपि दुष्टेन कर्मणा सत्तागतेन मोहेन उदयावस्थायोग्यभूतेन, अथवा आयुःकर्मप्रान्तकरणेन[१] प्रतिपातमापन्नः चतुर्गतिषु भ्रमति । अतः अहो ! दुष्टेन मोहेन अनन्तसंसारं भ्राम्यन्ते। अतः कर्मायत्ता चेतना न करणीया । विपाककाले स्वकीयक्षयोपशमस्वरूपानुयायी रक्षणीयः । नहि विपाकः प्रतिपाताभिनवकर्मबन्धहेतुः, किन्तु स्वकीयचेतना वीर्यं च मोहोदयानुगतत्वेन हेतुत्वपरिणत्या बन्धः । अतः हेतुतैव वारणीया । उदयस्तु [२]गुणावारकः । न च तदेव हेतुः । तस्य हेतुत्वाङ्गीकारे सर्वकर्मोदयपुद्गला बन्धहेतवो भविष्यन्ति । तदा च परकृतैव कर्मकर्तृता, आत्मशक्तेः अप्रवृत्तमानत्वाद् न ह्यप्रवृत्ता शक्तिः कर्मकर्त्री । तेन नोदयानां हेतुता, किन्तु मिथ्यात्वादिहेतुभिरुदयभूतैः सम्यक्त्वादयो गुणा आच्छादिताः । पुनः चेतनावीर्यदानादयः क्षायोपशमिका दुर्विपरीतश्रद्धानभासनपररमणिकपरिणताभिनवकर्महेतुतामास्कन्दन्ति, अतोऽशुद्धतया परिणमितात्मापरिणतिरभिनवकर्महेतुः । निदर्शनं च सूक्ष्मैकेन्द्रियाणाम् अशुद्धानुगक्षयोपशमाल्पत्वेनाल्प(कर्म)बन्धकता[३], संज्ञिपञ्चेन्द्रियाणां तु अशुद्धानुगक्षयोपशमबाहुल्येन तीव्रबन्धकता इत्यादि भाव्यम् । उक्तं च— **अप्पा करेइ कम्माइं अप्पा वेएई परवसो एसो** इत्यादि । तथा च **भगवतीप्रज्ञापनादौ—अत्तकडा कम्मा बंधन्ति नो परकडा तेऽप्यवगाढा नाप्यनवगाढा ॥ उत्तराध्ययने—**

**[95] अत्ता कत्ता विकत्ता य सुहाण य दुहाण य ।**
**( अप्पा मित्तममित्तं च, दुप्पट्ठिय सुपट्ठिओ ॥३७॥ )**

[अध्य० २० गा. ३७] इत्यादि ।

---

१. कारणेन A.D. कारणे V.1. । २. गुणावरक A.D.V.1. । १. संबन्धकता B.1.2.S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः **आचाराङ्गे— [40] आयाणं सगडब्भि** [श्रुत०१, अ०३, उ०४, सू०७२] इत्यादि स्वतो योज्यम् । श्रेणिप्रतिपाताधिकारे **आवश्यकनिर्युक्तौ—**

[96] **★उवसामं उवणीया, गुणमहया जिणचरित्तसरिसंपि ।**
**पडिवायंति कसाया, किं पुण सेसे सरागत्थे ॥११८॥**
**जइ उवसंतकसाओ, लहइ अणंतं पुणो वि पडिवायं ।**
**न हु भे वीससियव्वं, थोवे वि कसायसेसंमि ॥११९॥**
**अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च ।**
**न हु भे वीससिअव्वं, थोवं पि हु तं बहू होइ ॥१२०॥**

[97] **दासत्तं देइ रिणं, अइरा मरणं वणो विसप्पंतो ।**
**सव्वस्स दाहमग्गी, दिंति कसाया भवमणंता ॥१३११॥**
[विशेषा०भा०गा. १३११]

इति कर्मोदयेन आत्मा दीनो भवति, इति ॥५॥

**अर्वाक् सर्वापि सामग्री, श्रान्तैव परितिष्ठति ।**
**विपाकः कर्मणः कार्यपर्यन्तमनुधावति ॥६॥**

अर्वाक् सर्वेति—सर्वापि सामग्री अर्वाक् श्रान्ता एव परितिष्ठति, नहि कार्यकरणसमर्था । कर्मणः विपाकः-उदयः कार्यपर्यन्तं-चरमकारणम् अनुधावति-अनुप्रवर्त्तते । अतो बाह्यसामग्री उपकरणरूपा हि कर्मोदयाश्रिता, तेन कर्मोदयो बलवत्तरः, अतः कर्मक्षयाय यतितव्यमिति ॥६॥

**असावचरमावर्त्ते, धर्मं हरति पश्यतः ।**
**चरमावर्त्तिसाधोस्तु, च्छलमन्विष्य[1] हृष्यति ॥७॥**

असाविति-असौ-कर्मविपाकः पश्यतः[2]-पश्यति सति पश्यन्नेव अचरमावर्त्ते चरमपुद्गलपरावर्त्तादर्वाक्, धर्मं हरति-चोरयति । तु-पुनः चरमावर्त्ति - चरमपुद्गलपरावर्त्तान्तर्वर्त्तमानमार्गानुसारिजनस्य साधोः-

★ विशेषा०गा०१३०६-९-१० । १. मन्विष्यन् S.M. । २. सर्वप्रतिषु नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्ग्रन्थस्य छलमन्विष्य[१]-गवेषयित्वा हृष्यति-हर्षं प्राप्नोति । इत्यनेन मार्गानुसारिनिर्ग्रन्थस्य क्षायोपशमिकगुणवत्त्वात् प्रमादादिदोषात्, शङ्का-द्यतिचारावसरे हृष्यति, नाम वर्धते इत्युपचारः, अतः कर्मविपाके रक्तद्विष्टता न करणीया ॥७॥

**साम्यं बिभर्त्ति यः कर्म-विपाकं हृदि चिन्तयन् ।**
**स एव स्याच्चिदानन्द-मकरन्दमधुव्रतः ॥८॥**

॥ इति कर्मविपाकध्यानाष्टकम् ॥२१॥

साम्यमिति यः-आत्मार्थी कर्मविपाकं-शुभाशुभविपाकं चिन्तयन्-विचारयन्, हृदि-चित्ते साम्यं-तुल्यत्वम् इष्टानिष्टतारहितं बिभर्त्ति, स एव योगी, चिदानन्दमकरन्दमधुव्रतः-ज्ञानानन्दस्य (न्द एव) मकरन्दः-रहस्यं तस्य[२] मधुव्रतः-रसास्वादी, स्यात्-भवति । आत्मानन्दभोगी भवति, इत्यनेन आत्मानन्दरसरसिकः शुभाशुभविपाकोदयेन रागद्वेषवान् न भवति, सर्वान् [प्रति] समवृत्तिः मुनिः ॥८॥

**॥ इत्येवं कर्मविपाके समानत्वचिन्तनाष्टकं समाप्तम् ॥२१॥**

## अथ भवोद्वेगाष्टकम् ॥२२॥

कर्मविपाकोद्विग्नभावात् संसाराद् उद्विजति, अतो भवोद्वेगाष्टकं लिख्यते । तत्र नामभवः रुद्रादिः । अथवा—तन्नाम [३]शब्दालापरूपः, स्थापनाभवः लोकाकाशः तदाकारो वा । द्रव्यभवः भवभ्रमणेन[४] हेतुरूपः धनस्वजनादिः । भावभवः चतुर्गतिरूपः जन्मरणादिलक्षणः । नयस्वरूपं च—द्रव्यनिक्षेपे यावत् नयचतुष्टयम्, भावनिक्षेपे शब्दादिनयत्रयं ज्ञेयम् । अत्र च भवमग्नानां जीवानां न धर्मेच्छा, इन्द्रियसुखास्वादलीना मत्ता इव निर्विवेकाः भ्रमन्ति । दुःखोद्विग्ना इतस्ततः दुःखापनोदार्थम् अनेकोपाय-चिन्तनव्याकुला भ्रमन्ति शूकरा इव । इति महामोहभवाम्भोधौ

---

१. मन्विष्यन् गवेषयन् । २. A.D.V.1. प्रतौ अस्ति । ३. सचोल्लाप० V.2.B.1. / एवोल्लाप० A.D. । ४. भ्रमणेन V.1.A.D. विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमन्यत् ? सर्वसिद्धिकरं श्रीमद्वीतरागवन्दनादिकं कुर्वन्ति इन्द्रियसुखार्थं च । तप-उपवासादिकष्टानुष्ठानमाजन्मकृतं हारयन्ति निदानदोषेण । न गणयन्ति मोक्षहेतुरूपं जैनशासनदेवादि सुखहेतुरूपम्, व्यामुह्यन्ति ऐश्वर्यादिषु भवाब्धिमत्स्या इव मिथ्यावासिता जीवाः । तेन भवोद्वेग एव करणीयः । यत्रात्मसुखहानिः तस्य कोऽभिलाषः सतामिति? इत्येवोपदिशति—

**यस्य गम्भीरमध्यस्याऽज्ञानं वज्रमयं तलम् ।**
**रुद्धा व्यसनशैलौघैः, पन्थानो यत्र दुर्गमाः ॥१॥**

**पातालकलशा यत्र, भृताः तृष्णामहानिलैः ।**
**कषायाश्चित्तसङ्कल्पवेलावृद्धिं वितन्वते ॥२॥**

**स्मरौर्वाग्निर्ज्वलत्यन्तर्यत्र स्नेहेन्धनः सदा ।**
**यो घोररोगशोकादिमच्छकच्छपसंकुलः ॥३॥**

**दुर्बुद्धिमत्सरद्रोह-विद्युद्दुर्वातगर्जितैः ।**
**यत्र सांयात्रिका लोकाः, पतन्त्युत्पातसंकटे ॥४॥**

**ज्ञानी तस्माद्भवाम्भोधेर्नित्योद्विग्नोऽतिदारुणात् ।**
**तस्य संतरणोपायम्, सर्वयत्नेन काङ्क्षति ॥५॥**

यस्येति १ पातालेति २ स्मरौर्वेति ३ दुर्बुद्धीति ४ ज्ञानीति ५ श्लोकपञ्चकं व्याख्यायते । ज्ञानी तस्य भवसमुद्रस्य सन्तरणोपायं-पारगमनोपायं सर्वयत्नेन काङ्क्षति-इच्छति इत्यर्थः । तस्य कस्य ? यस्य गम्भीरं मध्यं यस्य स गम्भीरमध्यस्तस्य अप्राप्तमध्यस्य भवार्णवस्य अज्ञानं जीवाजीवविवेकरहितं तत्त्वबोधशून्यं मिथ्याज्ञानम्, तदेव वज्रमयं तलं दुर्भेदं यत्र भवाम्भोधौ । व्यसनशैलौघैः-कष्टपर्वतसमूहैः रुद्धाः पन्थानः-मार्गाः-सद्गतिगमनप्रचाराः, दुर्गमा-गन्तुमशक्या भवन्ति । इत्यनेन अज्ञानतलातिगम्भीरमध्यस्य [1]संसारपारावारस्य रोग-

१. संसारापारपारा० V.1.A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोकवियोगादिकष्टपर्वतैः रुद्धमार्गस्य जन्तोः [१]सहगमनमशक्यं भवति । पुनः यत्र भवसमुद्रे कषायाः-क्रोधमानमायालोभरूपाः पातालकलशाः तृष्णा-विषयपिपासा [२]तद्रूपैः महानिलैः-महावातैः भृताः, चित्तं-मनः तस्य सङ्कल्पाः अनेकजलसमूहाः तद्रूपा वेला-जलप्रवाहरूपा तस्याः वृद्धि-वेलागमनं वितन्वते-विस्तारयन्ति । इत्यनेन कषायोदयात् तृष्णावातप्रेरणया विकल्पवेलां वर्द्धयन्ति भवजलधौ अबुधाः इति ॥२॥ यत्र जन्ममरणसमुद्रे स्मरः-कन्दर्पः तद्रूपः[३] अन्तर्मध्ये और्वाग्निः-वडवानलः ज्वलति । यत्राग्नौ स्नेहेन्धनः-स्नेहो-रागः स एव इन्धनः-ज्वलनयोग्यकाष्ठसमूहः अन्यत्र वडवाग्नौ जलेन्धनम्[४] इति । किम्भूतः रागः? यो रागः घोररोगशोकादयो मच्छकच्छपाः तैः संकुलः-व्याप्तः । इत्यनेन रागाग्निप्रज्वलनरोगशोक[५]तापतापितप्राणिगणः एवंरूपो भवाब्धिः । पुनः यत्र सांयात्रिकाः-प्रवहणस्थाः लोकाः, अत्रापि व्रतनियमादिपोतस्था जीवाः उत्पातसङ्कटे कष्टे पतन्ति । कैः ? दुष्टा बुद्धिः दुर्बुद्धिः, मत्सरम्-असहनसंयुक्ताहङ्कारः, द्रोहः-कापट्यम्, इत्यादय एव विद्युद्-दुर्वातगर्जिताः तैः । इत्यनेन दुर्बुद्धिविद्युता मत्सरदुर्वातेन द्रोहगर्जितेन व्रतादिपोताः [६]प्रवर्त्तमाना अपि कुमार्गगमने[७] पङ्कस्खलनाद्युत्पातान् लभन्ते । इत्यनेन महाभववारिधौ एते महाव्याघाताः सन्मार्गप्राप्तौ, तस्माद् अतिदारुणात्- महाभयानकाद् नित्योद्विग्नः-सदोदासीनः तस्य सन्तरणोपायं सम्यग्ज्ञान-दर्शन-चारित्ररूपं काङ्क्षति-अभिलषति । इति भवभीतः[८] इव तिष्ठति । चिन्तयति च मम-शुद्धज्ञानमयस्य, परमतत्त्व-रमणचारित्रपवित्रस्य, रागद्वेषक्षयसमुत्थपरमशमशीतलस्य, अनन्तानन्द-सुखमग्नस्य, सर्वज्ञस्य, परमदक्षस्य, शरीराहारसङ्गमुक्तस्यामूर्त्तस्य, कथं शरीरादिव्यसनसमूहभारभुग्नताभुग्नस्वशक्तिवत्त्वं युज्यते ? नाहं शरीरी

---

१. सहगमन० V.1. विना । २-३. एष पाठो नास्ति सर्वप्रतिषु । ४. जलेन्धनः A.D.V.1. । ५. शोकतापित० V.1.A.D. विना । ६. प्रवर्तन्तोऽपि, सर्वप्रतिषु । ७. गमने A.D.V.1 विना । ८. भवालीनभीतः-V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुद्गली सकर्मा[1] जन्ममरणी च तेन[2] मम कथम् महामोहावर्त्तः अयम् ? इत्युद्विग्नः । स्वरूपभासनरमणैकत्वमनोहरे(रम्), सम्यग्दर्शनप्रतिष्ठनम्, क्षान्त्यादिधर्माष्टादशशीलाङ्गसहस्रविचित्रफलकनिबिडघटनाविराजितम्, सम्यग्ज्ञाननिर्यामकान्वितम्, सुसाधुसंसर्गकाथसूत्रनिबिडबन्धनबद्धम्, संवरकीलप्रभग्ननिःशेषाश्रवद्वारम्, सूत्रितसामायिकच्छेदोपस्थापनीय-भेदविभिन्नरम्यभूमिकाद्वयम्, तदुपर्युपकल्पितसाधुसमाचारकरण-मण्डपम्, समन्ततो गुप्तित्रयप्रस्तरकागुप्तम्, असङ्ख्यशुभाध्यवसाय-सन्नद्धदुर्योधयोधसहस्रदुरवलोकम्, सर्वतो निवेशितसद्गुरूपदेशवल्ली-निकुरम्बमध्यव्यवस्थापितस्थिरतरातिसरलसद्बोधकूपस्तम्भम्, तद्विन्य-स्तप्रकृष्टशुभाध्यवसायसितपटम्, तदग्रसमारूढप्रौढसदुपयोगपञ्जरदौवा-रिकम्, तदवबद्धाप्रमादनगरनिकरसमायुक्तसर्वाङ्गसम्पूर्णतया प्रवहणं चारित्रयानपात्रम्, तेन चारित्रमहायानपात्रेण सन्तरणोपायं कुर्वन्ति ॥५॥

**तैलपात्रधरो यद्वद्, राधावेधोद्यतो यथा ।**
**क्रियास्वनन्यचित्तः स्याद्, भवभीतस्तथा मुनिः ॥६॥**

तैलपात्रधर इति—यथा तैलपात्रधरः मरणभयभीतः अप्रमत्तः तिष्ठति, तथा मुनिः–स्वगुणघातभयभीतः संसारे अप्रमत्तस्तिष्ठति । यथा केनचित् राज्ञा कश्चन पुरुषो लक्षणोपेतो वधाय अनुज्ञापितः । तदा सभाजनैः विज्ञप्तः स्वामिन् ! क्षमध्वमपराधम्, मा मारय एनम् । तेन [3]सभ्योक्तेन राज्ञा निवेदितम्, यदा महास्थालं तैलपूर्णं सर्वनगरचतुष्पथे अनेकनाटकवाद्यतूर्याकुले तैलबिन्दुमपतन्तं सर्वतो भ्रामयित्वा आनयति तदा न मारयामि । यदि च तैलबिन्दुपातः तदास्य तस्मिन्नवसरे प्राणापहारः करणीयः । इत्युक्तोऽपि स पुरुषस्तत्कार्यं स्वीचकार । तथैवानेकजनसङ्कुले मार्गे तैलस्थालं शिरसि धृत्वा सापेक्षयोगः अपतित-तैलबिन्दुः समागतः । तद्वन्मुनिः अनेकसुखदुःखव्याकुले भवेऽपि

---

१. कर्मी V.1. सकर्मी A.D. । २. जन्ममरणा च चेतना S.M. । ३. सत्योक्तेन सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वसिद्ध्यर्थी प्रमादरहितः प्रवर्त्तते । पुनः दृष्टान्तयति यथा—स्वयंवरे कन्यापरिणयनार्थी राधावेधोद्यतः स्थिरोपयोगयोगतया लघुलाघविकः स्थिरचित्तो भवति । तथा मुनिः भवभीतः-संसारसंसरणगुणावरणादि-महादुःखाद् भीतः क्रियासु-समितिगुप्तिकरणसप्ततिकरणरूपासु अनन्य-चित्तः भवति । न अन्यत्र-अपरभावे चित्तं-मनो यस्य स अनन्यचित्तः स्यात् एकाग्रमानसो भवति । उक्तं च—

**गाईज्जंती सुरसुंदरीहिं, वाइज्जंता वि वीणमाईहिं ।**
**तह वि हु समसब्भावा, चिट्ठंति मुणी महाभागा ॥१॥**

**पव्वयसिलायलगया, भावसिएहिं कडुअफासेहिं ।**
**उज्जलवेयणपत्ता, समचित्ता हुंति निग्गंथा ॥२॥**

**आमिसलुद्धेण वणे, सीहेण य दाढवक्कसंगहिआ ।**
**तहवि हु समाहिपत्ता, संवरजुत्ता मुणिवरिंदा ॥३॥ ६॥**

कथमीदृग्विपाके निर्भया निर्ग्रन्थाः ? इत्युपदिशन्नाह[1]-

**विषं विषस्य वह्नेश्च, वह्निरेव यदौषधम् ।**
**तत्सत्यं भवभीतानामुपसर्गेऽपि यन्न भीः ॥७॥**

विषं विषस्य इति—यथा कश्चित् विषार्त्तः विषस्य औषधं विषमेव करोति । यथा—सर्पदष्टः निम्बादिचर्वणे न बिभेति । अथवा—कश्चित् अग्निदग्धः पुनरपि अग्निदाहपीडावारणाय पुनः अग्नितापमङ्गीकरोति इति । तत्सत्यं यत्-यस्मात्कारणाद् भवभीतानां मुनीनामुपसर्गेऽपि भयं न । कर्मक्षपणोद्यतस्य उपसर्गे[2] बहुकर्मक्षपणत्वं मन्वानः साधुः तदुदयं वेदन्[3] न भयवान् भवति । साध्यकार्यस्य निष्पद्यमानत्वाद् इति ॥७॥

**स्थैर्यं भवभयादेव, व्यवहारे मुनिर्व्रजेत् ।**
**स्वात्मारामसमाधौ तु, तदप्यन्तर्निमज्जति ॥८॥**

॥ इति भवोद्वेगाष्टकम् ॥२२॥

---

१. दर्शयन्ना० V.2. । २. उपसर्गैः V.2.B.1.2. । ३. वेदयन् V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थैर्यं भवेति—मुनिः—तत्त्वज्ञानी भवभयात्—नरकनिगोददुःखोद्वेगाद् एव व्यवहारे—एषणादिक्रियाप्रवृत्तौ स्थैर्यं व्रजेत्—गच्छेत्, लभेत। स्वात्मारामसमाधौ—स्वकीयात्मारामः स्वचेतनः, तस्य समाधौ-ज्ञानानन्दादिषु तद्-भवभयम्, अन्तर्मध्ये निमज्जति—लयीभवति, स्वत एव विनश्यति। आत्मध्यानलीलालीनानां सुखदुःखे समानावस्थानां भयाभाव एव भवति, इत्यनेन संसारोद्विग्नः प्रथमज्ञानदर्शचारित्राचाराभ्यासतो दृढीकृतयोगोपयोगस्थः स्वरूपानन्तस्याद्वादतत्त्वैकत्वसमाधिस्थः सर्वत्र समावस्थो भवति। "मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः" इति। एवं स्वरूपलीनसमाधिमग्नानां निर्भयत्वमिति वस्तुस्वरूपावधारणेन विभावोत्पन्नकर्मोदयलक्षणे संसारे परसंयोगसम्भवे आत्मसत्ताभिन्नो निर्वेदः कार्यः ॥८॥

**॥ इति व्याख्यातं भवोद्वेगाष्टकम् ॥२२॥**

## अथ लोकसंज्ञात्यागाष्टकम् ॥ २३ ॥

अथ निर्वेदी जीवः मोक्षसाधनोद्यमवर्त्ती लोकसंज्ञया न मुह्यति, लोकसंज्ञा हि धर्मसाधनव्याघातकरी[1] आप्तैस्त्याज्या, इति तदुपदेशरूपं लोकसंज्ञात्यागाष्टकं विस्तार्यते। लोकः सप्तविधः—नामलोकः शब्दालापरूपः, स्थापनालोकः अक्षरलोकनालियन्त्रन्यासरूपः, रूप्यरूपिजीवाजीवात्मकः द्रव्यलोकः, ऊर्ध्वाधस्तिर्यग्लक्षणः क्षेत्रलोकः, समयावल्यादिकालपरिमाणलक्षणः काललोकः, नरनारकादिचतुर्गतिरूपः भवलोकः, औदयिकादिभावपरिणामः भावलोकः, द्रव्यगुणपर्यायपरिणमनरूपः पर्यवलोकः, इदं च सर्वमपि **[98] आवश्यकनिर्युक्ति**तो [गा. १०५७] ज्ञेयम्। अथवा—द्रव्यलोकः संसाररूपः, अप्रशस्तभावलोकः परभावैकत्वजीवसमूहः, अत्र [2]भवलोकाप्रशस्तभावलोकस्य संज्ञा त्याज्या। लोकसंज्ञा च नयसप्तकेन धर्मार्थिभिः परिहरणीया।

---

१. व्याघातकरा V.2.B.1.2. । २. भाव V.2.B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्राप्तः षष्ठं गुणस्थानम्, भवदुर्गाद्रिलङ्घनम् ।**
**लोकसंज्ञारतो न स्यान्मुनिर्लोकोत्तरस्थितिः ॥१॥**

प्राप्त इति–मुनिः–संयमी आश्रवविरतः, षष्ठं–सर्वविरतिलक्षणं प्रमत्ताख्यं प्राप्तः मुनिः लोकसंज्ञा लोकैः कृतं तत् कर्त्तव्यं गतानुगतिकतानीतिस्तत्र रतः–रागी गृहीतग्रहः न स्यात् । लोकैः कृतं तदेव करणीयमिति मतिं निवार्य आत्मसाधनोपायरतः स्यात् । किम्भूतं षष्ठं गुणस्थानं? भवः–संसारः स एव दुर्गाद्रिः–विषमपर्वतः तस्य लङ्घनम् । किंविशिष्टः मुनिः? लोकोत्तरस्थितिः–लोकातीतमर्यादया स्थितः । लोको हि विषयाभिलाषी, मुनिः निष्कामः । लोकः पुद्गलसम्पज्ज्येष्ठत्वमानी, मुनिर्ज्ञानादिसम्पदा श्रेष्ठः, अतः किल[१] किं[२] लोकसंज्ञया तेषाम् ॥१॥

**यथा चिन्तामणिं दत्ते, बठरो बदरीफलैः ।**
**हहा जहाति सद्धर्मम्, तथैव जनरञ्जनैः ॥२॥**

यथा चिन्तामणिमिति–यथा–येन प्रकारेण, कश्चित् बठरः– मूर्खः बदरीफलैः चिन्तामणिं दत्ते । तथैव मूढः जनरञ्जनैः–लोकश्लाघाभिलाषैः सद्धर्मं–द्रव्याचरणतत्त्वानुभवलक्षणम्, हहा इति खेदे जहाति–त्यजति, इत्यनेन जिनभक्तिश्रुतश्रवणाहारत्यागादिकं यशः-पूजादिना हारयन्ति । उक्तं च-

**त्वत्तः सुदुष्प्रापमिदं मयाप्तम्, रत्नत्रयं भूरिभवभ्रमेण ।**
**प्रमादनिद्रावशतो गतं तत्, कस्याग्रतो नायक ! पूत्करोमि ॥८॥**

**वैराग्यरङ्गः परवञ्चनाय, धर्मोपदेशो जनरञ्जनाय ।**
**वादाय विद्याध्ययनं च मेऽभूत्, कियद् ब्रुवे हास्यकरं स्वमीश ! ॥९॥**

[रत्नाकरपञ्चविंशतिः गा० ८-९]

**लोकसंज्ञामहानद्यामनुस्त्रोतोऽनुगा न के ।**
**प्रतिस्त्रोतोऽनुगस्त्वेको, राजहंसो महामुनिः ॥३॥**

---

१. V.1.A.D. प्रतौ नास्ति । २ S.M.,B.1.2.,V.2. प्रतौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**लोकसंज्ञेति—लोकसंज्ञा—लोकरीतिरूपा महानदी, तस्याः अनु-स्रोतः—प्रवाहः तस्य अनुगाः—अनुयायिनः के न भवन्ति ? अनेके इत्यर्थः।** तत्र प्रतिस्रोतोऽनुगः—सन्मुखप्रवाहचारी तु एक एव महामुनिः-शुद्धश्रमणः राजहंसः, नान्यः इति। तेन लोकरूढिरूढा बहवो जीवाः। निर्ग्रन्थस्तु रत्नत्रयसाधनोद्यतः स एव स्वरूपानुगामी। उक्तं च **दशवैकालिके**-

[96] **अणुसोअपट्ठिअ बहुजणंमि पडिसोअलद्धलक्खेणं।**
**पडिसोअमेव अप्पा, दायव्वो होउ कामेणं ॥२॥**
**अणुसोअसुहो लोगो, पडिसोओ आसवो[१] सुविहिआणं।**
**अणुसोओ संसारो, पडिसोओ तस्स उत्तारो ॥३॥**
[चूलिका २, गा० २-३.]

तेन मुनिर्लोकसंज्ञानुयायी न स्यात् ॥३॥

**लोकमालम्ब्य कर्त्तव्यम्, कृतं बहुभिरेव चेत्।**
**तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन ॥४॥**

[२]लोकमिति—चेत्—यदि, यत् बहुभिः कृतं तत् कर्त्तव्यं लोक-मालम्ब्य एवं क्रियते तदा मिथ्यादृशां धर्मः कदाचन—कदापि न त्याज्यः स्यात्। तच्च बहुभिः क्रियमाणत्वात्। [३]स्वेच्छाचरणो लोकः बहुतरः। यतः- अनार्येभ्यः आर्याः स्तोकाः, आर्येभ्यः जैनाचाराः स्तोकाः जैनाचारवर्त्तिषु जैनपरिणतिपरिणताः स्तोकाः। अतो बहु-लोकानुयायिना[४] न भवनीयमिति ॥४॥

**श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे न च[५]।**
**स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्मसाधकाः ॥५॥**

श्रेयोऽर्थिनो हि भूयांस इति—लोके—बाह्यप्रवाहे श्रेयोऽर्थिनः—धनस्वजनभुवनवनतनुकल्याणार्थिनः भूयांसः—प्रचुराः सन्ति। च-पुनः

---

१. आसमो V.1.2, S.M., B.1.2। २. लोकमालम्ब्येति A.D। ३. म्लेच्छा० S.M. V.1.,A.D.। ४. लोकानुयायी-सर्वप्रतिषु। ५. च न V.1., A.D.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकोत्तरे—अमूर्त्तात्मस्वभावाविर्भावलक्षणे, प्रवर्त्तमानाः न–नैवेति, हीति–निश्चितम्, रत्नवणिजः स्तोकाः, तथा च–पुनः, स्वात्मसाधकाः–स्व आत्मा तस्य साधकाः–निरावरणत्वनिष्पादकाः स्तोका इति ॥५॥

**लोकसंज्ञाहता हन्त !, नीचैर्गमनदर्शनैः ।**

**शंसयन्ति स्वसत्त्यागमर्मघातमहाव्यथाम् ॥६॥**

लोकसंज्ञेति—हन्त इति खेदे । लोकसंज्ञाहता–लोकसंज्ञाव्याकुलाः नीचैर्गमनदर्शनैः–वक्रीभूतशरीरभून्यस्तदृष्ट्या गमनस्य [1]दर्शनैः । स्व–सत्त्यागमर्मघातमहाव्यथां स्वीयो यः सत्त्यागः जैनवृत्तित्यागः स च लोकरञ्जनाध्यवसायबहुलेन मर्मणि घातं लभते । तस्य घातस्य महाव्यथां—महापीडां शंसयन्ति—ज्ञापयन्ति । वयं पीडिताः तेन वक्रशरीरा भ्रमामः इति शंसयन्ति—कथयन्ति वेति उत्प्रेक्षा । लोकोक्तिभीति–त्यागवन्तो जीवा आत्मस्वरूपघातका इति ॥६॥

**आत्मसाक्षिकसद्धर्म-सिद्धौ किं लोकयात्रया ? ।**

**तत्र प्रसन्नचन्द्रश्च, भरतश्च निदर्शनम्[2] ॥७॥**

[3]आत्मेति—हे उत्तम ! आत्मसाक्षिकः आत्मा एव साक्षिकः आत्मसाक्षिकः, स चासौ सन् शोभनः धर्मः, तस्य सिद्धौ निष्पत्तौ लोकयात्रया किं ? न किमपि । लोकानां ज्ञापनेन किमित्यर्थः । तत्र प्रसन्नचन्द्रः । च–पुनः, भरत इति निदर्शनं—दृष्टान्तः । सति द्रव्यतः कायोत्सर्गे प्रसन्नचन्द्रस्य नरकगतिबन्धः। असति लिङ्गे मोहकलाकेलि–भूतवनिताव्यूहपरिवृतोऽपि भरतः संप्राप्तात्मसाक्षिकत्वैकत्वरूपधर्म–परिणतः केवलं प्राप । इति आत्मसाक्षिको धर्मः, धर्मेऽधर्मे तौ दृष्टान्तः । अतः आत्मसाक्षिक एव धर्मः करणीय इति ॥७॥

**लोकसंज्ञोज्झितः साधुः, परब्रह्मसमाधिमान् ।**

**सुखमास्ते गतद्रोह-ममतामत्सरज्वरः ॥८॥**

इति लोकसंज्ञात्यागाष्टकम् ॥२३॥

---

१. दर्शनेन सर्वप्रतिषु । २. निदर्शने P.A.D. । ३. आत्मसाक्षिकेति A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकेति—साधुः-परमात्मसाधनोद्यतः, सुखम् आस्ते-तिष्ठति। कथम्भूतः साधुः ? लोकसंज्ञोज्झितः—लोकसंज्ञारहितः। पुनः किम्भूतः ? परब्रह्मणः—शुद्धात्मस्वरूपस्य समाधिः—स्वास्थ्यं तद्वान् तन्मयः आत्मज्ञानानन्दमग्नः। पुनः कथम्भूतः ? गतः—नष्टः द्रोहः—मोषणशीलः ममता—परभावेषु ममकारता, मत्सरः—अहंकारः एव ज्वरः—तापो यस्य सः। इत्यनेन कषायकालुष्यरहितः स्वात्मारामः स्वात्मज्ञानी तत्त्वानुभवयुक्तः मुनिः सुखं तिष्ठति। लोकसंज्ञात्यागेन स्वरूपयोगभोगसुखमग्ना निर्ग्रन्थाः औदयिकमिन्द्रियसुखं दह्यमान-स्वगृहप्रकाशवन्मन्यन्ते न सुखमस्ति ॥८॥

**॥ इति व्याख्यातं लोकसंज्ञा( त्यागा )ष्टकम् ॥ २३ ॥**

## अथ शास्त्राष्टकम् ॥ २४ ॥

अथ क्रमायातं यथार्थोपयोगकारणभूतं शास्त्राष्टकं प्ररूप्यते, तत्र शास्त्रस्वरूपम् ऐकान्तिकात्यन्तिक-निर्द्वन्द्व-निरामय-परमात्मपदसाधने[1]-स्याद्वादपद्धत्या यत्र शास्यते [2]तत् (शास्त्रं) शासनम्। नहि भारतरामा-यणादयः इहलोकशिक्षारूपाः [3]शास्त्रत्वव्यपदेशं लभन्ते। तथा—जैना-गममपि सम्यग्दृष्टिपरिणतस्य शुद्धवक्तुरेव मोक्षकारणम्, मिथ्यात्वोप-हतानां तु भवहेतुरेव। उक्तं च—**नन्दीसूत्रे** [4]तच्चैवम्—

**[100] दुवालसंगं गणिपिडगं सम्मत्तपरिग्गहिअं सम्मसुअं, मिच्छत्तपरिग्गहिअं मिच्छसुअं** ॥ [सू. ७१-७२]

तथा च **पूज्यैः**-

**[101] सदसदविसेसणाओ, भवहेऊ जदिच्छिओवलम्भाओ।**
**नाणफलाभावाओ, मिच्छादिट्ठिस्स अण्णाणं ॥११५॥**

[विशेषा०गा. ११५]

---

१. साधना V.1.,S.M.,B.2. । २. तत्र B.2. । ३. शास्त्रव्यप० V.1.,A.D. विना। ४. इच्चेवं A.D. विना।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि । जीवाजीवादिगुणपर्यायविभजनसर्वाश्रवत्यागकर्त्तुरपि तन्नैश्चयिकश्रद्धाकृतेन सम्यग्दर्शनम् । तेन यथार्थस्वपरविभागविभक्त-स्वरूपोपादेयत्वपरिहेयत्वविज्ञानपूर्वकनिमित्तोपादानकारणनिर्द्धारशुद्धा-विनश्वरस्वसिद्धपरिणतौ धर्मत्वप्रतीतिः सम्यग्दर्शनम् । इत्येवं सम्यग्दर्शनयुक्तस्य रुचिकृतपरमात्मभावस्य तत्साधनोपायानवच्छिन्न-कथनं शास्त्रम् । तच्च नामादिभेदतः, नामतः आचाराङ्गादि । स्थापनातः सिद्धचक्रादौ स्थापितं श्रुतज्ञानम् । द्रव्यतः पुस्तकन्यस्तम्, अथवा–अनुपयुक्तपुरुषस्य क्षयोपशमगतं जैनागमम् । नयविचारे तु–नैगमेन वचनोल्लापव्यञ्जनाक्षरादिकम् । संग्रहतः जीवपुद्गलौ–द्रव्येन्द्रिय-भावेन्द्रिये शास्त्रं तद्धेतुत्वात् । व्यवहारतः पठनपाठनश्रवणात्मकम् । ऋजुसूत्रतः मननिदिध्यासनरूपम् । शब्दतः तत् श्रुताधारात्मस्पर्शज्ञान-परिणामलक्षणं भावक्षयोपशमोपयुक्तस्य । समभिरूढतः तन्मयस्य सर्वाक्षरलब्धिवतः शुद्धोपयोगः[१] । एवंभूततः सर्वाक्षरसम्पन्नस्य । निर्विकल्पोपयोगकाले उत्सर्गभावशास्त्रपरिणमनोपयुक्तत्वात् इति । अतः परमकारुणिकोपदिष्टं शास्त्रं हितम् । उक्तं च **तत्त्वार्थभाष्ये**–

[102] **एकमपि जिनवचनाद्यस्मान्निर्वाहकं मोक्षं पदं भवति ।**
**श्रूयन्ते चानन्ताः, सामायिकमात्रपदसिद्धाः ॥२७॥**

**तस्मात्तत्प्रामाण्यात्समासतो व्यासतश्च जिनवचनम् ।**
**श्रेय इति निर्विचारम्, ग्राह्यं धार्यं च वाच्यं च ॥२८॥**

**न भवति धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् ।**
**ब्रुवतोऽनुग्रहबुद्ध्या, वक्तुस्त्वेकान्ततो भवति ॥२९॥**

**श्रममविचिन्त्यात्मगतम् तस्मात् श्रेयः सदोपदेष्टव्यम् ।**
**आत्मानं च परं च, हितोपदेष्टाऽनुगृह्णाति ॥३०॥** इति ।

अत एव शास्त्रादरोत्पादनार्थमुपदिशति–

---

१. योगे S.M.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चर्मचक्षुर्भृतः सर्वे, देवाश्चावधिचक्षुषः ।**
**सर्वतश्चक्षुषः सिद्धाः, साधवः शास्त्रचक्षुषः ॥१॥**

चर्मचक्षुर्भृत इति–सर्वे–तिर्यग्मनुष्याः चर्मचक्षुर्भृतः, मतिश्रुत-ज्ञानावरणीय-चक्षुर्दर्शनावरणीय-वीर्यान्तरायक्षयोपशममूलं[1] जातिनाम-कर्म-पर्याप्तिनामकर्म-शरीरनामकर्म-निर्माणनामकर्मोदयजन्यचक्षुर्भृतः तद्धराः[2] । च-पुनः, देवाः–(सुराः) अवधिचक्षुषः-अवधिज्ञानावरणीयावधिदर्शनावरणीयक्षयोपशमसमुत्थज्ञानदृष्टयः । सिद्धाः सर्वचक्षुर्धराः–सर्वप्रदेशकेवलोपयोगमयाः, साधवः–निर्ग्रन्थाः शास्त्रचक्षुषः-शास्त्रावलम्बिज्ञानधराः । उक्तं च–

**आगमचक्खू साहू, चम्मचक्खूणि सव्वभूआणि ।**
**देवा य ओहिचक्खु, सिद्धा पुण सव्वओ चक्खू ॥१॥**

अतः निर्ग्रन्थानां वाचनादिस्वाध्यायमुख्यत्वम् ॥१॥

**पुरःस्थितानिवोर्ध्वाधस्तिर्यग्लोकविवर्त्तिनः ।**
**सर्वान् भावानवेक्षन्ते, ज्ञानिनः शास्त्रचक्षुषा[3] ॥२॥**

पुरःस्थितानिति–ज्ञानिनः शास्त्रचक्षुषा–आगमोपयोगेन ऊर्ध्वाधस्तिर्यग्लोकविवर्त्तिनः–त्रैलोक्यवर्त्तिनः, भावान्–पदार्थस्वरूपान् सर्वान् सूक्ष्मबादरान् सहजान् विभावजान् परोक्षानपि क्षेत्रान्तरस्थानपि, आगमबलेन पुरःस्थितानिव-सन्मुखस्थानिव अवेक्षन्ते-पश्यन्ति । अत्र दर्शनं मानसं श्रुतक्षयोपशमजं ज्ञेयम् ॥२॥

**शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते ।**
**वचनं वीतरागस्य, तत्तु नान्यस्य कस्यचित् ॥३॥**

शासनादिति–बुधैः–विद्वद्भिः, च-पुनः, त्राणशक्तेः– भवभीत-कर्मावगुण्ठितविभावभुग्नजीवानां त्राणं-रक्षणं तस्य शक्तिः-सामर्थ्यं यस्य सः,

---

१. मूल० A.D.,V.2.,B.1. । २. धराः V.1.,B.2.,S.M. । ३. चक्षुषः V.1.,B.2.,A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य शासनात्—शिक्षणात् शास्त्रं निरूप्यते—व्युत्पाद्यते, **[103] मोक्षमार्गस्य शासनात् शास्त्रम् इति तत्त्वार्थकृत्** । [प्रशम०गा०१८८] तु-पुनः, तद् वीतरागस्य—सर्वमोहक्षयनिष्पन्नपरमशमस्वभावस्य वचनं-मोक्षमार्गोपदेशकम्। उक्तं च **उमास्वातिपूज्यैः**-

**[104] केवलमधिगम्य विभुः, स्वयमेव ज्ञानदर्शनमनन्तम् ।**
**लोकहिताय कृतार्थोऽपि, देशयामास तीर्थमिदम् ॥१८॥**

[त०का० श्लो० १८]

अतस्तस्यैव वचनं मोक्षाङ्गम् । अन्यस्य कस्यचित् असर्वज्ञस्य सर्वज्ञमानिनः वचनं न मोक्षहेतुः ॥३॥

**शास्त्रे पुरस्कृते तस्माद्, वीतरागः पुरस्कृतः ।**
**पुरस्कृते पुनस्तस्मिन्, नियमात्सर्वसिद्धयः ॥४॥**

शास्त्रे पुरस्कृत इति—तस्मात्कारणात् शास्त्रे—सिद्धान्ते पुरस्कृते—[१]मुख्यतां कृते वीतरागः—अर्हन् पुरस्कृतः—अग्रेसरीकृतः । पुनः तस्मिन्-वीतरागे पुरस्कृते नियमात्—निश्चयात् सर्वसिद्धयः भवन्ति । उक्तं च-

**[105] अस्मिन् हृदयस्थे सति, हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।**
**हृदयस्थिते च तस्मिन्, नियमात्सर्वार्थसंसिद्धिः ॥१४॥**

[षोड० प्र०षो०२, श्लो०१४]

पुनः आगमे—

**[106] आगमं आयरंतेण, अत्तणो हियकंखिणो ।**
**तित्थनाहो सयंबुद्धो, सव्वे ते बहुमन्निया ॥३५॥**

[सं०स०-गा०३५]

अतः आगमादरी अर्हन्मुनिसङ्गादरवान् इति ॥४॥

**अदृष्टार्थेऽनुधावन्तः, शास्त्रदीपं विना जडाः ।**
**प्राप्नुवन्ति परं खेदम्, प्रस्खलन्तः पदे पदे ॥५॥**

---

१. मुख्ये V.2.B.1.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदृष्टेति—जडाः—मूर्खाः, शास्त्रदीपं विना—आगमप्रकाशं विना अदृष्टे—अनुपलब्धे अर्थे—कार्ये संवरनिर्जरामोक्षाभिधाने (अनु-) धावन्तः पदे पदे प्रस्खलन्तः—स्खलनां प्राप्नुवन्तः परं—प्रकृष्टं खेदं—क्लेशं प्राप्नुवन्ति—लभन्ते, अज्ञातशुद्धमार्गाः—अनेकोपायप्रवृत्ता अपि स्खलनां लभन्ते इति ॥५॥

**शुद्धोञ्छाद्यपि शास्त्राज्ञानिरपेक्षस्य नो हितम् ।**
**भौतहन्तुर्यथा तस्य, पदस्पर्शनिवारणम् ॥६॥**

शुद्धोञ्छादीति—शास्त्राज्ञानिरपेक्षस्य-आगमोक्ताज्ञारहितस्य, शुद्धो-ञ्छाद्यपि—द्वाचत्वारिंशद्दोषरहिताहारग्राहकस्यापि नो हितं-न सुखकरम्, यथा भौतहन्तुः-तस्य स्वगुरोः पदस्पर्शनिवारणं न हितम् । अत्र यथा कस्य शबरस्य जीवद्भौतपदस्पर्शनिवारणम्, स मयूरपिच्छार्थी भौतं हत्वा पश्चात् स्पर्शं चकार । तथा आत्मानं हत्वा षट्जीवनिकायान् रक्षन् तद्वत्करोति । अतो मौढ्यं निवार्य तत्त्वज्ञानवता भवनीयम् । शुद्धाहारादिकं तनुयोगः, स्वरूपावलम्बनं महानुयोगः । इति तेन स्वरूपाचरणमन्तरेणाहारशुद्धात्मसाधनबुद्धयः भौतहिंसकवद् ज्ञेयाः ॥६॥

**अज्ञानाहिमहामन्त्रम्, स्वाच्छन्द्यज्वरलङ्घनम् ।**
**धर्मारामसुधाकुल्याम्, शास्त्रमाहुर्महर्षयः ॥७॥**

अज्ञानाहीति—महर्षयः-महामुनीश्वराः, अज्ञानमेव अहिः-सर्पः तद्दमने महामन्त्रम्, च-पुनः स्वाच्छन्द्यं—स्वेच्छाचारित्वं तदेव ज्वरः तदपगमाय लङ्घनं—पाचनं धर्मारामसुधाकुल्यां—धर्म एव आरामः तस्मिन् सुधा अमृतं तस्य कुल्या-नीकिः, तस्याममृतं शास्त्रमाहुः-अमृतं शास्त्रम् उक्तवान्, अतः शास्त्राभ्यासो महासुखायेति ॥७॥

**शास्त्रोक्ताचारकर्त्ता च, शास्त्रज्ञः शास्त्रदेशकः ।**
**शास्त्रैकदृग् महायोगी, प्राप्नोति परमं पदम् ॥८॥**

॥ इति शास्त्राष्टकम् ॥२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रोक्तेति—एवंविधो महायोगी परम्—उत्कृष्टं पदं—स्थानं प्राप्नोति। कथम्भूतः ? शास्त्रोक्ताचारकर्त्ता—शास्त्रे—जैनागमे उक्तः य आचारः तस्य कर्ता करणशीलः । शास्त्रज्ञः—शास्त्रं—स्याद्वादागमं जानातीति शास्त्रज्ञः । पुनः शास्त्रदेशकः—शास्त्रस्य देशकः—कथकः । पुनः कीदृशः ? (शास्त्रैकदृग्-) शास्त्रे एका—अद्वितीया रहस्यग्राहिणी दृग्—दृष्टिर्यस्य स इति । एवं शास्त्रोक्तमार्गकारी, तज्ज्ञः, तदुपदेशकः, परमम्—उत्कृष्टं पदं प्राप्नोति । अतः सर्वादरेण जैनागमाभ्यासः करणीयः, येन तत्त्वाप्तिः । ज्ञानी सिद्धिसाधकः अत एव निर्ग्रन्थाः वाचयन्ति प्रवचनम्, प्रच्छयन्ति रहस्यम्, परिवर्त्तयन्ति सूत्रालापकान्, अनुप्रेक्षयन्ति भावनया तदर्थम्, तन्मयीभवन्ति आगमतत्त्वेषु मग्नाश्चा-नन्दयन्ति स्वात्मीयम्, तल्लाभलीलालालितचेतसः कुर्वन्ति धर्मकथाम्, अनुमोदयन्ति च महासूरिनिवहम्, अत एव योगोपधानक्रियामारचयन्ति, वसन्ति यावज्जीवं गुरुकुले शास्त्रावबोधप्रवीणतामिच्छन्तः ॥८॥

**॥ इति व्याख्यातं शास्त्राष्टकम् ॥२४॥**

## अथ परिग्रहाष्टकम् ॥२५॥

परिग्रहे[1]ग्रहगृहीतस्यानेकोपार्जनसंरक्षणगोपनाविकलचेतनावतः न शास्त्रज्ञानं सम्यग् भवति, अतः परिग्रहत्यागोपदेशमुपदिशति । तत्र परि-समन्तात् ग्रहः ग्रहणरूपः परिग्रहः । तत्र द्रव्यतो धनधान्यादि । भावतः परवस्त्विच्छापरिणामः आशंसारूपः । तत्रात्मनः स्वपर्यायस्वामित्व-परिणतेः स्वपर्यायावरणेन[2] तदभावात्, अशुद्धबलवीर्यगृहीतकर्मविपाकेषु शुभेषु हेतुभूतेषु प्रशस्ताप्रशस्तपरिणामेषु ममकारः परिग्रहः । स्वशुद्ध-सत्तागतगुणेभ्यः अन्यममकारस्वीकारसंरक्षणापरिणतिरूपा चेतनादिवृत्तिः परिग्रहः । आत्मनः स्वस्वरूपभासनरमणानुभवव्याघातः[3] । अत एव त्याज्यः । द्रव्यपरिग्रहस्य भावपरिग्रहहेतुत्वात्, भावपरिग्रहस्याशुद्धोपा-

१. परिग्रहग्रहीतस्य B.1.2., V.2., S.M. । २. वरणे S.M., B.1.2. ।
३. भवघातः V.2., B.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानत्वात् त्याग एव । नयव्याख्यायां-जीवाजीवेषु परिग्रहत्वं संग्रहेण । **भाष्ये** च- **द्वितीयपञ्चमाश्रवौ सर्वद्रव्येषु** इति वाक्यात् व्यवहार-परिग्रहे[१]: धनादिकयुक्तः । ऋजुसूत्रेण तदभिलाषी, शब्दनयेन पुण्याशंसा इत्यादिना भावनीयम् । अतः तदुपदेशः-

**न परावर्त्तते राशेर्वक्रतां जातु नोज्झति ।**
**परिग्रहग्रहः कोऽयम् ?, विडम्बितजगत्त्रयः ॥१॥**

न परावर्त्तते इति- राशेः—अनादिराशितः परिग्रहो न परावर्त्तते—न निवर्त्तते, पुनः वक्रतां जातु—कदाचित् न उज्झति-न त्यजति, अत एव हे आत्मार्थिन् ! अयं दुःखमूलः [२]परिग्रहग्रहकः विडम्बितजगत्त्रयः त्रैलोक्यविडम्बनाहेतुः ईदृक् परिग्रहस्य कः दृढानुराग इति ॥१॥

**परिग्रहग्रहावेशाद्, दुर्भाषितरजःकिराः ।**
**श्रूयन्ते विकृताः किं न ?, प्रलापा लिङ्गिनामपि ॥२॥**

परिग्रहेति- लिङ्गिनामपि—जैनवेषविडम्बकानामपि प्रलापाः—असम्बद्धवचनव्यूहाः किं न श्रूयन्ते ? अपि तु श्रूयन्ते एव । कथम्भूताः प्रलापाः ? परिग्रहग्रहावेशात्-परिग्रहस्य ग्रहः ममत्वं तस्यावेशः, तस्मात् दुर्भाषितम्—उत्सूत्रवचनमेव रजसः—किराः समूहाः, अत एव विकृताः—विकारमया इति । एवं हि परिग्रहाभिलाषमग्ना ज्ञानपूजनाद्युपदेशेन परिग्रहमेलनासक्ताः उत्सूत्रं वदन्ति, पोषयन्ति विषयान्, परिग्रहीकुर्वन्ति ज्ञानोपकरणानि[३], महान्तयन्ति (?) ज्ञानोपकरणैः । उक्तं च **उपमिति-भवप्रपञ्चायाम्**- "स जातः कदाचिल्लब्धार्यकुलश्रावकसामग्रीसंयोगः श्रुततत्त्वोपदेशाप्तवैराग्यगृहीतव्रतः मुनिसंघसंयुतः श्रुतलाभेन संपूज्यमानः श्रावकवर्गैः ज्ञानभक्तोपरचितोल्लोचादिसदुपकरणः तैरेव रमणीयकता-ममत्वाहंकारदूषितः तीव्रज्ञानावरणीयकर्मवशात् पतितो निगोदे अनन्त-भवभ्रमणरूपे । इत्यावर्त्तस्वरूपं भावनीयमात्महिताय सद्भिः । अतो निवारणीयमेव धर्मलिङ्ग[४]तो विषयपरिग्रहपोषणादिकम् ॥२॥

---

१. परिग्रहयुक्तस्य S.M. । २. परिग्रहग्रहः कः V.1.2., B.2.,S.M. विना ।
३. ज्ञानोपकरणान् सर्वप्रतिषु । ४. धर्मलिङ्ग० B.1.2., V.2., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**यस्त्यक्त्वा तृणवद् बाह्यमान्तरं[1] च परिग्रहम् ।**
**उदास्ते तत्पदाम्भोजम्, पर्युपास्ते जगत्त्रयी ॥३॥**

यस्त्यक्त्वेति- यः—साधुः बाह्यं—धनादि, आन्तरं[2]—रागादि परिग्रहम्, तृणवत् त्यक्त्वा—संत्यज्य उदास्ते—उदासीनो भवति किं परिग्रहेण ? मोहकारणेन व्यासङ्गमूलेन आत्मपलिमन्थ[3]कल्पेन वस्तुतः निस्सारेण । न एष मम, नाहमनेन सुखी, मदिरामत्तपङ्कावलेपतुल्येन, अहं तु ज्ञानाद्यनन्तगुणपूर्णः कथं पुद्गलेषु रमे[4] ? इत्यादिभावनया त्यक्तपरिग्रहः । तत्पदाम्भोजं जगत्त्रयी—असुरनरामरश्रेणिः पर्युपास्ते—सेवते इत्यर्थः, स त्रिजगद्वन्द्यो भवति, तेन स्वरूपानन्दरसिकानां न परिग्रहासक्तिः ॥३॥

पुनः कस्य बाह्यत्यागेन निर्ग्रन्थत्वमानिनः शिक्षयति—

**चित्तेऽन्तर्ग्रन्थगहने, बहिर्निर्ग्रन्थता वृथा ।**
**त्यागात्कञ्चुकमात्रस्य, भुजगो न हि निर्विषः ॥४॥**

चित्तेऽन्तर्ग्रन्थ इति- अन्तः—चित्ते चेतनापरिणतौ, ग्रन्थः तेन गहने परिग्रहलालसामग्ने, बहिर्निर्ग्रन्थता वृथा—निष्फला, यथा-कञ्चुकमात्र-त्यागाद् भुजगः-सर्पः निर्विषो नहि भवति । एवं बाह्यत्यागेन त्यागी न भवति, अन्तर्ममत्वपरिहारेण त्यागो भवति ॥४॥

**त्यक्ते परिग्रहे साधोः, प्रयाति सकलं रजः ।**
**पालित्यागे क्षणादेव, सरसः सलिलं यथा ॥५॥**

त्यक्ते इति- साधोः परिग्रहे त्यक्ते सति सकलं रजः—कर्मसमूहः प्रयाति—गच्छति । दृष्टान्तयति—सरसः सलिलं-सरःपानीयं पालित्यागे अर्थात् पालिक्षये क्षणादेव क्षयं याति, एवम् । अतः सामान्यपरिणतौ लोभपरित्यागेन[5] अनुक्रमेण कर्माभावता भवति ॥५॥

---

१. मन्तरं S.M., V.2., B.1. । २. अन्तरं S.M., V.2., B.1. । ३. परिपन्थि S.M. । ४ रमामि सर्वप्रतिषु । ५. परित्यागे V.1.A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**त्यक्तपुत्रकलत्रस्य, मूर्च्छामुक्तस्य योगिनः ।**
**चिन्मात्रप्रतिबन्धस्य[१], का पुद्‌गलनियन्त्रणा ॥६॥**

त्यक्तपुत्रेति-त्यक्ते—दूरं नीते पुत्रकलत्रे सन्तानवनितासंयोगो येन सः तस्य, (मूर्च्छामुक्तस्य-) मूर्च्छा सतः परिग्रहस्य संरक्षणा, तया मुक्तस्य—रहितस्य योगिनः—सम्यग्दर्शनज्ञानचारित्रात्मनः, चिद्—ज्ञानं तन्मात्रे एव—ज्ञाने एव प्रतिबन्धः—आसक्तता यस्य स, एवंविधस्य तत्त्वमुनेः पुद्‌गल-नियन्त्रणा—पुद्‌गलैकता का ? न कापीत्यर्थः । भावना च पुत्रवनिता-सङ्गरहितस्य पुद्‌गलसंगोपनाविकल्पविकलस्य स्वरूपैकत्वकरणबद्ध-चेतनोपयोगस्य स्वभावानन्दविलासवर्णिकारूपशुद्धज्ञानानुभवभोगिनः अचेतननश्वरोच्छिष्टानन्दविमुक्तेषु पुद्‌गलेषु रागपरिणतिः न भवति, अत्र वृद्धसम्प्रदायेन दृष्टान्तः- अऊज्झानयरे सिरिवरो राया, अच्चंतमिच्छदिट्ठी । तस्स सिरिकन्तो कुमरो । रूवलावण्णसोहग्गकुसलो पुरन्दरो इव सोभन्तमाणसंठाणो, जीवाजीवाईतत्तविओ, सुत्तत्थसवणरसिओ, बाल-भावेण भोगलालसाविमुत्तो । सो अणेगाहिं रायकन्नासहस्सेहिं रूव-विम्हिएहिं नियसंपयाजुत्ताहिं परिणयणागयाहिं । एगया पुच्छियाओ कन्नाओ कुमरेणं- भो भद्दे ! कह तुब्भे पिउघरं विमुत्तूण इह समा-गयाओ ? ताओ तेण भणन्ति तुह रागभिलासणीओ, तुम्हं इट्ठं कंतं रागपयमिच्छामो । ताहे कुमारो भणइ- जिणंदवारियं कम्मबंधणमूलं भवविवड्ढणं को कुणई रागं ? लोलीभूए कारणेणं धम्मकरे एगत्तमागए देहे विनिवारिओ सव्वदंसीहिं । ता परदेहे रागो को करेइ सदक्खिन्नो ? निम्मलचरणावरणं केवलनाणस्स रोहगं रागं अरिहंताईसु वरं । तं पि निच्छयपए तच्चंताव अनत्थपहाणं विसयरागं कह करिज्जत्ति ? सुहिणो य वीयराया नियसहावे समासत्ता । ममं न जुज्जए रागो अन्नेसु, तुब्भंपि न जुज्जए । एवं इति उवएसेण पडिबोहियकन्ना-सहस्सपरिवरिओ समणो जाओ, कमेण अणुत्तरनाणदंसणचरणवीरिएणं

१. प्रतिबद्धस्य V.2., B.1.2., S.M., P. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तसुक्कज्झाणो सिद्धो । ताओ वि सिद्धाओ ॥ एवं रागत्यागः कार्यः । तर्हि परिग्रहरागो हि नात्महिताय कदापि ॥६॥

**चिन्मात्रदीपको गच्छेन्निर्वातस्थानसंनिभैः ।**
**निष्परिग्रहता स्थैर्यम्, धर्मोपकरणैरपि ॥७॥**

चिन्मात्रेति-अप्रमत्तसाधुः चिन्मात्रदीपकः-ज्ञानमात्रस्य प्रदीपः गच्छेत्–लभेत कैः? निर्वातस्थानसंनिभैः-पवनप्रेरणारहितस्थानसंयोगैः । तथा–ज्ञानदीपकस्य 'स्थैर्यं'–स्थिरत्वं निष्परिग्रहता-परिग्रहाभाव एव साधयति । इत्युपदिष्टे कश्चिद् धर्मोपकरणस्यापि परिग्रहत्वं जानन् तत्परिहाराय यतते । अतो धर्मोपकरणैः अपि स्थैर्यं वर्द्धते, इति [107] **धर्मसंग्रहण्यां** सर्वमप्युक्तम्- [गा० १०२८-२९] शीतातपदंशादिपरीषहोदये स्वाध्यायव्याघाते निःस्पृहत्वेन धर्मोपकरणग्रहणं समाधिस्थिरताहेतुः अमूर्च्छितस्य न तत्परिग्रहता । नहि पुद्गलजीवयोः एकक्षेत्रावगाहिता परिग्रहः । किन्तु चेतना तद्रागद्वेषपरिणतपरिग्रहग्रहत्वं[1] प्राप्नोति । अतः उपकरणानां निमित्तता एव तत्त्वसाधने । यथार्हद्गुरुसंसर्गः निमित्तम्, एवम् आत्मनि स्वरूपस्थे न पुद्गलस्कन्धा बाधकाः । आत्मैव तदनुगतः बाधकत्वं करोति ॥७॥

**मूर्च्छाच्छन्न[2]धियां सर्वम्, जगदेव परिग्रहः ।**
**मूर्च्छया रहितानां तु, जगदेवापरिग्रहः ॥८॥★**

॥ इति परिग्रहाष्टकम् ॥ २५ ॥

मूर्च्छाच्छन्नेति[3]-मूर्च्छा–ममत्वं तेन [4]छन्ना–छादिता धीः– बुद्धिः येषां ते तेषां मूर्च्छामग्नानां स्वकीयतया अप्राप्तमपि सर्वं जगत् परिग्रह एव । तस्य स्वामित्वभोगित्वसुखबुद्धेः समन्वितत्वात् । तु-पुनः मूर्च्छया

---

१. परिग्रहत्वं A.D., V.1. । २. च्छिन्न० V.1.2., A.D. । ३. च्छिन्नेति- V.2., A.D. । ४. च्छिन्ना V.1.2., A.D., S.M., B.1.2. ।

★ ॥२००॥ इयत्परिमिताः श्लोकाः संजाताः । V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रहितानां पुद्गलेषु भिन्नत्वाग्राह्यत्वेन त्यागवतां जगदेव न परिग्रहः, तत्र रमणाभावात् । उक्तं च **श्रीविशेषावश्यके**-

**[108]तम्हा किमत्थि वत्थुं, गंथोऽगंथो व सव्वहा लोए ? ।**
**गंथोऽगंथो व मओ, मुच्छममुच्छाहिं निच्छयओ ॥२५७३ ॥**
**वत्थाइं तेण जं जं, संजमसाहणमरागदोसस्स ।**
**तं तमपरिग्गहो च्चिय परिग्गहो जं तदुवघाई ॥२५७४ ॥**

[विशेषा० गा०-२५७३-७४]

अत एव आत्मनः परभावरसिकत्वं परिग्रहः, ततः तद्धर्मत्वाभावात् आत्मस्वरूपरमणं युक्तम् ॥८॥

**॥ इति व्याख्यातं परिग्रहत्यागाष्टकं पञ्चविंशतितमम् ॥२५॥**

## अथ अनुभवाष्टकम् ॥२६॥

अथ श्रुताभ्यासपरिग्रहत्यागादयोऽप्यनुभवयुक्तस्य मोक्षसाधकाः, अनुभवशून्यस्य नेति तत्प्रतिपादनायानुभवाष्टकं निरूप्यते । अनुभवशून्यं ज्ञानम् उदकपयःकल्पम्, अनुभवयुक्तं तु पीयूषोपमम् । ज्ञानं तु सानुभवस्य । तथा च **अनुयोगद्वारे**- **वायणा-पुच्छणा–परिअट्टणा-धम्मकहा-सर-अक्खरवंजणसुद्धा अणुप्पेहारहियस्स दव्वसुयम्, अणुप्पेहा भावसुयं**" इत्यनेन भावश्रुतं तु संवेदनरूपं न तत्त्वनिष्पादकम्, स्पर्शरूपं तत्त्वनिष्पादकमिति, **[109] हरिभद्रपूज्याः**- तत्स्पर्शज्ञानम् अनुभवयुक्तस्यैव, [षोड० १२, श्लो०१५] तल्लक्षणं च **योगदृष्टिसमुच्चया**नुसारेण लिख्यते- **यथार्थवस्तुस्वरूपोपलब्धिपरभावारमणस्वरूपरमणतदास्वादनैकत्वमनुभवः** हेयोपादेयज्ञानसुखास्वादरूपानुभवः । नामतः अभिधानम्, स्थापनातः स्थाप्यमानम्, द्रव्यानुभवः भुज्यमानशुभाशुभविपाकेषु अनुपयोगः **अणुवओगो दव्वं** इति वचनात्, भावानुभवः, अप्रशस्तः सांसारिकविषयकषायानामनुभवैकत्वम्, प्रशस्तः अर्हद्गुणानुरागैकत्वम् । शुद्धानुभवः स्वरूपानन्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यायपरिणतिवैचित्र्यज्ञानास्वादनैकत्वविश्रान्तिलक्षणः । अत्र भावानुभवावसरः । स च नैगमतः तदिच्छकस्य । संग्रहतः उपयुक्तानुपयुक्तस्य तत्कारणाश्रितयोग्यत्वे । व्यवहारतः श्रुताभ्यासवाचनाप्रच्छनाभोक्तुः । ऋजुसूत्रेण मनसो विकल्परोधपूर्वकतन्मयत्वे वर्त्तमानस्य । शब्दनयेन ज्ञानोपयोगगृहीतानन्तधर्मात्मकात्मद्रव्यानन्ता[1]ज्ञानानुभवे सति । समभिरूढनये तु मुख्यज्ञानदर्शनगुणात्मकत्वात्मनि तद्रमणतद्भोगतदैकत्वरूपानुभवः । एवंभूतनयेनैकमुख्यपर्यायतन्मयत्वानुभवः । अत्र यस्यानुभवस्तस्य भावना कार्या । इत्येवंस्वरूपानुभवमन्तरेण ज्ञाना[2]चरणादिकं द्रव्यरूपमेव, अतः सानुभवेन भवितव्यम् । सर्वत्र गुणपरिणतौ अनुभवेनैवानन्दता, नो चेत् शब्दज्ञानशून्यशब्दश्रवणवत् अपार्थकमेवेति । [3]श्रूयते च कष्टानुष्ठानकोटिकरणेऽपि न तत्त्वप्राप्तिः, कुलवालकादीनामिवानुभवमन्तरेण । परिग्रहप्रसंगोपचितविषयसङ्गसद्भावेऽपि अन्तर्मुहूर्त्तात्मानुभवलीनानां सर्वज्ञत्वसिद्धिः कूर्मापुत्रादीनाम् । तेनानुभवाभ्यासः साध्यः शुद्धसाध्यरसिकैः । तदादरोपदेशः उपदिश्यते–

**सन्ध्येव दिनरात्रिभ्याम्, केवलश्रुतयोः पृथक् ।**
**बुधैरनुभवो दृष्टः, केवलार्कारुणोदयः ॥१॥**

सन्ध्येव दिनरात्रिभ्यामिति– बुधैः–अवगततत्त्वस्वरूपैः, यथा दिनरात्रिभ्यां मध्यं सन्ध्या एव दृष्टा तथा केवलश्रुतयोः-केवलज्ञानश्रुतज्ञानयोः मध्यम् अनुभवो दृष्टः । श्रुतज्ञानस्य चिरकालाभ्यासितस्य कार्यरूपः केवलज्ञानस्य सम्यग्दृष्टिगुणस्थानकतः साध्यत्वेन लक्षीकृतस्यासाधारणकारणरूपोऽनुभवः अध्यात्मैकत्वानन्दरूपो दृष्टः । कथम्भूतोऽनुभवः ? केवलं-सकलासहायिज्ञानमेवार्कस्तस्य अरुणोदयः अरुणः–सूर्यसारथिस्तस्य उदयः । पूर्वम् अरुणोदयेन तत्सूर्योदयो भवति, एवम् अनुभवोदये केवलार्कोदयः अतोऽनुभवपूर्वकं केवलज्ञानम् । अनु–

---

१. द्रव्यस्यानन्तता V.1. द्रव्यानन्त S.M. । २. ज्ञानावरणा० सर्वप्रतिषु । ३. श्रूयन्ते V.1.2., S.M., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवश्च भावनाज्ञानैकत्वरूपः करणीय इति । उक्तं च **समुच्चये- मति श्रुतोत्तरभावी केवलाद् अव्यवहितपूर्वभावी प्रकाशोऽनुभवः** ॥१॥

**व्यापारः सर्वशास्त्राणाम्, दिक्प्रदर्शन एव हि ।**
**पारं तु प्रापयत्येकोऽनुभवो भववारिधेः ॥२॥**

व्यापार इति- सर्वशास्त्राणां च पुनरनुयोगकथकानाम्, व्यापारः— उद्यमः अभ्यासः, दिक्प्रदर्शन एव—(मार्गदर्शक एव) । यथाहि— पथिकस्य मार्गदर्शकः मार्गं दर्शयति, परं पुरप्राप्तिस्तु स्वचंक्रमणेनैव । एवं शास्त्राभ्यासः परमाप्रयासः स्वतत्त्वसाधनविधिदर्शकः, भव-वारिधेः— भवसमुद्रस्य पारं तु एकः अनुभवः प्रापयति नान्यः । **श्रीसूत्रकृताङ्गादिषु** अध्यात्मभावेन सिद्धिरित्युक्तत्वात् । तेन सद्गुरु-चरणचञ्चरीकैः आत्मस्वरूपभासनतन्मयत्वं निष्पाद्यम् ॥२॥

**अतीन्द्रियं परं ब्रह्म, विशुद्धानुभवं विना ।**
**शास्त्रयुक्तिशतेनापि, न गम्यं यद् बुधा जगुः ॥३॥**

अतीन्द्रियमिति- बुधाः—पण्डिता इति जगुः इतीति किं ? शास्त्र-युक्तिशतेनापि—शास्त्रस्य युक्तयः तेषां शतेनापि अनेकागमरहस्याव-बोधेनापि विशुद्धानुभवं विना—निर्मलानुभवमन्तरेण अतीन्द्रियम्-इन्द्रिय-ज्ञानागम्यम्, परम्-उत्कृष्टम्, ब्रह्म—चैतन्यं न गम्यं—न ज्ञातुं शक्यम् । न घटपटादिपदार्थसार्थसमर्थनशब्दसाधनस्वस्वमत[1]स्थन्यासमुद्राचिन्तन-विकल्पतल्पस्थाः सम्यग्ज्ञानिनः । स्याद्वादानेकान्तधर्मास्पदीभूतानन्त-पर्यायोत्पादव्ययपरिणमने[2]सर्वज्ञेयावबोधामूर्त्ताखण्डानन्दात्मस्वरूपज्ञानं तु तत्त्वानुभवलीना एवास्वादन्ते, न वचोयुक्तिव्यक्तीकृतवाग्विलासाः इति ॥३॥

**ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः ।**
**कालेनैतावता प्राज्ञैः, कृतः स्यात्तेषु निश्चयः ॥४॥**

१. मतन्यास० V.2.B.1.2. । २. परिणमनासर्वसंज्ञया V.1.2., S.M., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञायेरन् इति- यदि यावता कालेनातीन्द्रियाः-इन्द्रियागोचराः पदार्थाः-धर्मास्तिकायादयो हेतुवादेन-युक्तिप्रमाणसमूहेन ज्ञायेरन् । एतावता कालेन परमात्मभावश्रवण-चिन्तन-निदिध्यासनादिना स्वात्मस्वरूपे उपयोगानुभवः कृतः स्यात्, तदा तेषु धर्मास्तिकायादिषु शुद्धात्मनि च निश्चयः कृतः स्यात् प्राज्ञैः । इत्यनेन परद्रव्यचिन्तनकालमात्रेणात्मस्वरूपचिन्तने स्वपरावबोधो भवति परावबोधपरित्यागपरिणतिर्भवति । तेन सद्भिः स्वस्वभावभावने मतिः कार्या, येन निष्प्रयासत एव परावबोधपरित्यागपरिणतिर्भवति । **[110] जे एगं जाणइ से सव्वं जाणइ** इति वचनात् [आचा०श्रु०१,अ०३,उ०४.सू० १२२] ॥४॥

**केषां न कल्पनादर्व्वी, शास्त्रक्षीरान्नगाहिनी ।**
**विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥५॥**

केषां नेति- केषां—पुरुषाणाम्, कल्पना—मतिप्रवृत्तिरूपा दर्वी—पाककरणचाटुका शास्त्रमेव क्षीरान्नं—परमान्नं तस्य गाहिनी—अवगाहिनी न? अपि तु अस्त्येवेति, बुद्धिकल्पनया शास्त्रग्राहिणी मतिर्बहूनाम्, परम् अनुभवजिह्वया तद्रसास्वादविदः-तेषां शास्त्राणां रसः तद्रसः तस्यास्वादः तस्य विदः-ज्ञानिनः विरलाः-अल्पाः शास्त्रास्वादग्राहिणः इति ॥५॥

**पश्यन्ति ब्रह्म निर्द्वन्द्वम्, निर्द्वन्द्वानुभवं विना ।**
**कथं लिपिमयी दृष्टिर्वाङ्मयी वा मनोमयी ॥६॥**

पश्यन्ति इति- 'लिपिमयी'—संज्ञाक्षरमयी, 'वाङ्मयी'— व्यञ्जनाक्षरमयी, 'मनोमयी—लब्ध्यक्षरमयी, दृष्टिः-योगप्रवृत्तिरूपा, 'निर्द्वन्द्वानुभवं-परोपयोग[१]मुक्तशुद्धानुभवं शुद्धज्ञानं विना निर्द्वन्द्वं— परसंनिकर्षरहितं निर्मलम्, ब्रह्म-ज्ञानम् आत्मानं कथं पश्यन्ति ? न पश्यन्ति, नहि कर्मोपाधिरूपा बाह्यप्रवृत्तिः परब्रह्मग्राहिका भवति । अनुभवज्ञानी एव शुद्धात्मस्वरूपं पश्यति ॥६॥

१. परयोगे S.M., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न सुषुप्तिरमोहत्वान्नापि च स्वापजागरौ[१] ।**
**कल्पनाशिल्पविश्रान्तेस्तुर्यैवानुभवे दशा ॥७॥**

न सुषुप्तिरिति- तथा च **नयचक्रे** दशाः चतस्रः, तत्र बहुशयनरूपा मिथ्यात्वस्थानां शयनावस्था । सम्यग्दृशां जागरा, प्रमत्ताऽप्रमत्तमुनीनाम् । तुर्या च उत्तरा ध्यानस्थानाम्, उत्तरोत्तरा सयोगिकेवलिनाम्। पुनः **श्री-विंशतिकायाम्**- सुषुप्तिः तीव्रनिद्राघूर्णितचेतसां सा अनुभवज्ञानिनो न । कस्मात् ? अमोहत्वात् । अनुभवी-मोहरहितः, सुषुप्तिस्थः-मोहमयः, तेनानुभवज्ञानवतः सुषुप्तिर्न । तत्त्वानुभविनः स्वापदशा तथा जागरापि न, एतद्दशाद्वयं कल्पनोपेतम्, अनुभवः कल्पनाविकल्पचेतना[२], तस्याः शिल्पं-विज्ञानं तस्य विश्रान्तिः-अभाव इत्यर्थः, तस्मान्न । अतः अनुभवे तुर्या एव दशा वाच्या । यद्यपि तुर्या दशा सर्वत्र तथापि यथार्थश्रुत-भावितचेतनानां केवलकरणत्वेनोपचारात्[३] स्वरूपाच्च तुर्यैव दशा वक्तुं शक्या, नहि दशात्रयसंभवः । तेनानुभवः समाधिहेतुः ॥७॥ अथ सिद्धान्तीकरोति-

**अधिगत्याखिलं शब्द-ब्रह्म शास्त्रदृशा मुनिः ।**
**स्वसंवेद्यं परं ब्रह्मानुभवेनाधिगच्छति ॥८॥**

**इत्यनुभवाष्टकम् ॥२६॥**

अधिगत्येति- पूर्वपूर्वसेवनास्थाने शास्त्रदृशा—शास्त्रग्रहणबुद्ध्या अखिलं—समस्तं शब्दब्रह्म—षड्भाषावाङ्मयम्, अधिगत्य—ज्ञात्वा, तदनन्तरं मुनिः अनुभवेन—स्वरूपग्राहकदृष्ट्या स्वसंवेद्यं-स्वेन-आत्मना संवेद्यं—ज्ञानास्वादनयोग्यं[४] परं ब्रह्म—शुद्धात्मस्वरूपम् अधिगच्छति-प्राप्नोति । अतः उक्तं च आगमे—**ससमयं जाणेई, परसमयं जाणेई, ससमयं परसमयं जाणित्ता अप्पाणं भावित्ता भवई ॥** अत एव आगमाभ्यासपटुमतिः तत्त्वज्ञानानुभवेनात्मस्वरूपं प्राप्नोति । तेनानुभवाभ्यासो विधेयः ॥८॥

**॥ इति व्याख्यातमनुभवाष्टकम् ॥२६॥**

---

१. भवो सर्वप्रतिषु । २. विचेतना B.1.2., V.2. । ३. करणत्वो० B.1.2., S.M. । ४. ज्ञानस्वादन० V.2., B.1. ज्ञानस्वादने B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ योगाष्टकम् ॥२७॥

अथ योगाष्टकं वितन्यते । अत्र मिथ्यात्वादिहेतुगतमनोवाक्काययोगत्रयम् । तच्च कर्मवृद्धिहेतुत्वाद् न ग्राह्यम्, किन्तु मोक्षसाधनहेतुभूतं शुद्धो[1]ध्यात्मभावनाभावितचेतनावीर्यपरिणामसाधककारकप्रवर्त्तनरूपं ग्राह्यम् । द्रव्यभावभेदं बाह्याचारविशोधिपूर्वकाभ्यन्तराचारशुद्धिरूपम् ।

**मोक्षेण योजनाद्योगः, सर्वोऽप्याचार इष्यते ।**
**विशिष्य[2] स्थानवर्णार्थालम्बनैकाग्र्यगोचरः ॥१॥**

मोक्षेणेति- सकलकर्मक्षयो मोक्षः, तेन योजनाद् योगः उच्यते । स च सर्वोऽप्याचारः-जिनशासनोक्तचरणसप्ततिकरणसप्ततिरूपः, मोक्षोपायत्वाद् योग इष्यते । तत्र विशेषेण-(विशिष्य) स्थानं १ वर्णः २ अर्थः ३ आलम्बनम् ४ एकाग्रता ५ इति पञ्चप्रकारो योगः मोक्षोपायहेतुः मतः । [3]इत्यनेनानादिपरभावासक्तभवभ्रमणग्रहात् पुद्गलभोगमग्नानां न भवति । अयमभिप्रायः—यतोऽस्माकं मोक्षः साध्योऽस्ति स च गुरुवचनस्मरण-तत्त्वजिज्ञासादियोगेन स्वरूपं निर्मलं निस्सङ्गं परमानन्दमयं संस्मृत्य तत्कथाश्रवणप्रीत्यादिकं करोति । स परम्परया सिद्धियोगी भवति । नहि मरुदेवीवत् सर्वेषामल्पप्रयासात् सिद्धिः । तस्या हि अ[4]ल्पाशातनादोषकारकत्वेन निष्प्रयासा सिद्धिः । अन्यजीवानां चिराशातनाबद्धगाढकर्मणां तु स्थानादिक्रमेणैव भवति ॥१॥

अथ योगपञ्चके बाह्यान्तरङ्गसाधकत्वमुपदिशति-

**कर्मयोगद्वयं तत्र, ज्ञानयोगत्रयं विदुः ।**
**विरतेष्वेव नियमाद्, बीजमात्रं परेष्वपि ॥२॥**

कर्मयोगेति- तत्र मोक्षसाधने योगद्वयम्, कर्मयोगद्वयं क्रियाचरणायोगरूपं त्रयम् अर्थप्रमुखं ज्ञानयोगं विदुः—प्राहुः बुधाः । तत्र **विंशतिका**-

---

१. शुद्धात्म० A.D., v.1. विना । २. विशेष० S.M. (संशो.) । ३. इत्यनादि० B.2., S.M., V.2. । ४. अनल्पा० A.D., V.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुसारेण लक्षणादिकं निरूप्यते। तत्र स्थानस्वरूपं कायोत्सर्गादिजैनागमोक्त-क्रियाकरणे करचरणासनमुद्रारूपम्। उक्तं च **विंशतिकायाम्—**

**[111] ठाणुन्नत्थालंबणरहिओ तंतम्मि पंचहा एसो।**
**दुगमित्थ कम्मजोगो, तहा तियं नाणजोगो उ ॥२॥**

एष पञ्चप्रकारो योगः। विरतेषु-देशविरतसर्वविरतेषु[1] नियमाद् भवति। योगपञ्चकं हि चापल्यवारणम्, तेन योगवता भवितव्यम्। अपरेषु-मार्गानुसारिप्रमुखेषु बीजमात्रं भवति—किंचिन्मात्रं भवति। उक्तं च **विंशतिकायाम्—**

**[112] देसे सव्वे य तहा, नियमेणेसो चरित्तिणो होइ।**
**इयरस्स बीयमित्तं, इत्तु च्चिय केइ इच्छंति ॥३॥**

अत्र योगोत्पत्तिहेतवः प्रोच्यन्ते-

**कृपानिर्वेदसंवेग-प्रशमोत्पत्तिकारिणः।**
**भेदाः प्रत्येकमत्रेच्छाप्रवृत्तिस्थिरसिद्धयः ॥३॥**

कृपानिर्वेद इति- कृपा—अनुकम्पा, दुःखितेषु दुःखमोचनलक्षणः आर्द्रतापरिणामः। निर्वेदः—भवोद्वेगश्चतुर्गतिषु चारकवद्धासनम्। संवेगः—मोक्षाभिलाषः। प्रशमः—कषायाभावः। एते परिणामाः, योगो मोक्षोपायः। तस्योत्पत्तिकारिणः—करणशीलाः, एतादृक्परिणाम-परिणतस्य संसारोद्विग्नस्य[2] शुद्धात्मस्वादेच्छकस्य योगसाधना भवति। अत्र योगपञ्चके प्रत्येकम् एकैकस्य चत्वारो भेदा भवन्ति, ते च इमे-इच्छा १ प्रवृत्तिः २ स्थिरता ३ सिद्धिः ४ इत्येवं भेदा ज्ञेयाः। उक्तं च **विंशतिकायाम्—**

**[113] इक्किक्को य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो।**
**इच्छा-पवित्ति-थिर-सिद्धिभेयओ समयनीईए ॥४॥**

इत्यादि ॥३॥

१. देशविरति० B.1.2., S.M., V.2.। २. संसारे उद्विग्नस्य S.M., V.2.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इच्छा तद्वत्कथाप्रीतिः, प्रवृत्तिः पालनं परम् ।**
**स्थैर्यं बाधकभीहानिः, सिद्धिरन्यार्थसाधनम् ॥४॥**

इच्छा तद्वदिति- इच्छा—साधकभावाभिलाषः । तत् योगपञ्चकं येषु विद्यन्ते ते, तद्वन्तः श्रमणाः तेषां कथासु-गुणकथनादिषु प्रीतिः-इष्टता । उक्तं च **हरिभद्रपूज्यैः**—

**[114] तज्जुत्तकहापीईइ संगया विपरिणामिणी इच्छा ।**

इति तस्य सम्यग्दर्शनादिगुणप्रवृद्धिहेतुभूतं[1] क्रियाश्रुताभ्यासपालनं परं परा उत्कृष्टा सा प्रवृत्तिः । उक्तं च-

**सव्वत्थुवसमसारं, तप्पालणमो पवत्ती उ ॥५॥** इति ।
[योगविं० गा० ५]

इत्येवं योगद्वयं बाह्यरूपत्वात् क्रियामुख्यत्वात् साध्यावलम्बिनां कारणरूपम् । शेषाणां तु शुभबन्धनिबन्धनं स्थैर्यं बाधकाशुद्धाध्यवसाया अतिचाराः तेषां भीर्भयं [2]तस्या हानिः-अभावः । निरतिचारगुणपालनारूपं यत्र क्षयोपशमोऽपि अतिगुणसाधनापरिणमनेन सहजभावत्वाद् निर्दोषगुणसाधना भवति यत्र तत् स्थैर्यम् । उक्तं च—

**[115] तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं ।**

शुद्धानामर्थानां परमात्मरूपाणां साधनं स्वरूपालम्बनं शुद्धतत्त्वसाधनं सिद्धिः । उक्तं च—

**सव्वं परत्थसाहगरूवं पुण होइ सिद्धित्ति ॥ ६॥**
[योगविं० गा० ६]

एवं सप्रभेदं ज्ञेयम् ॥४॥

यावद् ध्यानैकत्वं न भवति तावद् न्यासमुद्रावर्णशुद्धिपूर्वकम् आवश्यकचैत्यवन्दनप्रत्युपेक्षणादिकम् उपयोगयोगचापल्यवारणार्थमवश्यं करणीयम्, महद्धितकरं सर्वजीवानाम्, तेन स्थानवर्णक्रमेण तत्त्वप्राप्तिरिति ।

---

१. वृद्धि० A.D., V.1. । २. तस्य सर्वप्रतिषु ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अर्थालम्बनयोश्चैत्य–वन्दनादौ विभावनम् ।**
**श्रेयसे योगिनः स्थान–वर्णयोर्यत्न एव च ॥५॥**

अर्थालम्बनयोरिति- अर्थो-वाक्यस्य भावार्थः, आलम्बनं-वाच्ये पदार्थे अर्हत्स्वरूपे उपयोगस्यैकत्वम् । अर्थश्च आलम्बनं च अर्थालम्बने तयोः, चैत्यवन्दनादौ-अर्हद्वन्दनाधिकारे विभावनंस्मरणं करणीयं श्रेयसे-कल्याणार्थम् । च-पुनः स्थानं वन्दनककायोत्सर्गशरीरावस्थानमासन-मुद्रादि[१] वर्णाः-अक्षराणि, तस्य (तेषां) शुद्धिस्तयोः यत्न एव श्रेयसे-कल्याणाय भवति । उक्तं **चावश्यके–**

**[116] जं वाइद्धं, वच्चामेलियं, हीणक्खरं, अच्चक्खरं, पय-हीणं, विणयहीणं, जोगहीणं, घोसहीणं, सुट्ठुदिन्नम्, दुट्ठुपडि-च्छियं, अकाले कओ सज्झाओ, काले न कओ सज्झाओ, (असज्झाइए सज्झाइयं, सज्झाइए न सज्झाइयं) तस्स मिच्छा मि दुक्कडं''** [ आ०नि०, पगामसिज्झासूत्रे] इत्यनेन द्रव्य-क्षेत्र-काल-विशुद्धौ भावसाधनसिद्धिः तेन द्रव्यक्रिया हिता ॥५॥

**आलम्बनमिह ज्ञेयम्, द्विविधं रूप्यरूपि च ।**
**अरूपि गुणसायुज्यम्, योगोऽनालम्बनं परम् ॥६॥**

आलम्बनमिति- इह–जैनमार्गे आलम्बनं द्विविधं ज्ञेयं–द्विप्रकारं ज्ञेयम्, एकं रूपि, अपरम् अरूपि । तत्र रूप्यालम्बनं–जिनमुद्रादिक-पिण्डस्थ-पदस्थ-रूपस्थपर्यन्तम्, यावदर्हदवस्थालम्बनं तावत्कार-णावलम्बनं शरीरातिशयोपेतं रूप्यवलम्बनम् । तत्र अनादिपरभावशरीर-धनस्वजनावलम्बी, परत्र परिणतचेतनः विषयैश्वर्याद्यर्थं[२] तीर्थंकराद्यव-लम्बनमपि भवहेतुः । तथैव यः स्वरूपानन्दपिपासितः स्वरूपसाधनार्थं प्रथमकारणरूपं जिनेश्वरं वीतरागादिगुणसमूहैः अवलम्बते, यावद् मुद्रा-द्यालम्बनी तावद् रूप्यवलम्बनी । स एव अर्हत्सिद्धस्वरूपं ज्ञानदर्शन-चारित्राद्यनन्तपर्यायविशुद्धशुद्धाध्यात्मधर्ममवलम्बते, इति अरूप्यालम्बनी ।

१. मुद्रादिकम्, V.1., A.D. । २. विषयाश्चर्या० सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र भाव्यते अनादितः जीवः मूर्त्तपुद्गलस्कन्धालम्बनपरिणतः, कथं प्रथमतः एवामूर्त्तानन्दरूपं स्वरूपमवलम्बते? अतः अतिशयोपेतवीतरागमुद्रादिकं परं मूर्त्तं चालम्ब्य विषयकषायवृद्धिकरं स्त्रीधनाद्यवलम्बनं त्यजति, इत्येका परावृत्तिः । पुनः स एव अतिशयादिरूपमूर्त्तं नालम्बनीयमहं तु अमूर्तः मूर्तभावरसिकत्वं नोपयुज्यते । यद्यपि अर्हतः सम्बन्धं तथापि औदयिकं नालम्बनम्, मम तु गुणालम्बनमुत्तममिति, गुणावलम्बनी मूर्त्तान् भावान् न रसिकत्वेन गृह्णाति, सापेक्षः परत्वेन पश्यति द्वितीया परावृत्तिः । एवममूर्त्तात्मगुणरसिको भवति । तेन परमेष्ठिस्वरूपं कारणेनावधार्य्य स्वकीयासंख्य[1]प्रदेशव्याप्यव्यापकभावावच्छिन्नद्रव्यास्तिकपर्यायास्तिकानन्तस्वभावममलामूर्त्तानन्दमयं ध्येयत्वेनावलम्बते, इति तृतीया परावृत्तिः । इति साधनपद्धतिः । सर्वेषां तत्स्वरूपसाधनमरूपिगुणाः सिद्धगुणाः, तेषां भावनं सायुज्यं तादात्म्यता, तया योगः, आत्मोपयोगयोजनम् । यद्यपि ईषदवलम्बनं श्रुतादीनाम्, तथापि अनालम्बनमेव परः उत्कृष्टो योगः । उक्तं च **पाठकैः**-

**[117] तत्राप्रतिष्ठितोऽयम्, यतः प्रवृत्तश्च तत्त्वतस्तत्र ।**
**सर्वोत्तमानुजः खलु, तेनाऽनालम्बनो गीतः ॥९॥**

[षोड० प्र०षो० १५, श्लो० ९]

निरालम्बनयोगेन धारावाही प्रशान्तवाहिता नाम चित्तं तस्य स्वरसत एव मनः सहजधारायां वर्त्तते, न प्रयासो भवति । उक्तं च **विंशतिकायाम्**-

**[118] आलंबणं पि एयं, रूवमरूवी य इत्थ परमु त्ति ।**
**तग्गुणपरिणइरूवो, सुहुमो अणालंबणो नाम ॥१९॥**

[योगविं० गा० १९]

एकाग्रयोगस्यैवापरनाम अनालम्बनयोग इति । एवं स्थानाद्याः पञ्च इच्छादेर्गुणिता विंशतिः(२०) भवन्ति, ते च प्रत्येकमनुष्ठानचतुष्कयोजिता

१. संख्येय० A.D., V.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अशीतिः प्रकारा (८०) भवन्ति । तत्स्वरूपनिरूपणायोपदिशति—

**प्रीतिभक्तिवचोऽसङ्गैः, स्थानाद्यपि चतुर्विधम् ।**
**तस्मादयोगियोगाप्तेर्मोक्षयोगः क्रमाद्भवेत् ॥७॥**

प्रीतिभक्तीति- एते स्थानादयः, प्रीतिः, भक्तिः, वचनम्, असङ्ग इति भेदचतुष्टयैरशीतिर्भेदा भवन्ति, तस्माद्-योगात्क्रमेण अयोगिनामा योगः, तस्याप्तिः- प्राप्तिः भवति । अयोगियोगः— शैलेशीकरणम् । सकलयोगचापल्यरहितो योगः प्राप्नोति । तेन पुनः क्रमान्मोक्षः— सर्वकर्माभावलक्षणः । आत्मनः तादात्म्यावस्थानं मोक्षः । एवं योगसंयोगः क्रमाद् अनुक्रमेण भवति । अथ—प्रीत्याद्यनुष्ठानस्वरूपं **षोडशक**तो लिख्यते । अस्य चानुष्ठानता सांसारिकपरिणतौ, सा च परावृत्य तत्त्वसाधने करणीया ।

[119] **यत्रादरोऽस्ति परमः, प्रीतिश्च हितोदया भवति कर्तुः ।**
**शेषत्यागेन करोति, यच्च तत्प्रीत्यनुष्ठानम् ॥३॥**

इति प्रीतिलक्षणम् ।

**गौरवविशेषयोगाद् बुद्धिमतो यद्विशुद्धतरयोगम् ।**
**क्रिययेतरतुल्यमपि, ज्ञेयं तद्भक्त्यनुष्ठानम् ॥४॥**

**अत्यन्तवल्लभा खलु पत्नी तद्वद्धिता च जननीति ।**
**तुल्यमपि कृत्यमनयोर्ज्ञातं स्यात्प्रीतिभक्तिगतम् ॥५॥**

इति भक्तिलक्षणम् ।

**वचनात्मिका प्रवृत्तिः, सर्वत्रौचित्ययोगतो या तु ।**
**वचनानुष्ठानमिदम्, चारित्रवतो नियोगेन ॥६॥**

इति वचनलक्षणम् ।

**यत्त्वभ्यासातिशयात्सात्मीभूतमिव चेष्टयते सद्भिः ।**
**तदसङ्गानुष्ठानं भवति त्वेतत्तदावेधात् ॥७॥**

१. दयोगयोगा० A.D., P., B.1.2., V.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चक्रभ्रमणं दण्डात्तदभावे चैव यत्परं भवति ।**
**वचनासङ्गानुष्ठानयोस्तु तज्ज्ञापकं ज्ञेयम् ॥८॥**
**अभ्युदयफले चाऽऽद्ये, निःश्रेयससाधने तथा चरमे ।**
**एतदनुष्ठानानां विज्ञेये इह गतापाये ॥९॥**

[षोड०प्र०षोड० १०, श्लो० ३-४-५-६-७-८-९]

इति एवं क्रमेण योगसाधनारतः सर्वयोगरोधं कृत्वा अयोगी भवति ॥७॥

**स्थानाद्ययोगिनस्तीर्थोच्छेदाद्यालम्बनादपि ।**
**सूत्रदाने महादोष, इत्याचार्याः प्रचक्षते ॥८॥**

॥ इति योगाष्टकम् ॥ २७ ॥

स्थानाद्येति—स्थानादिप्रवृत्तियोगरहितस्य सूत्रदानं महादोष इति आचार्या-हरिभद्रादयः प्रचक्षते—कथयन्ति । कस्मात् ? तीर्थोच्छेदा-द्यालम्बनात् । निरास्तिकस्य सूत्रदाने कदाचित् कुप्ररूपणाकरणेन तीर्थोच्छेदो भवति । उक्तं च **विंशतिकायाम्-**

[120] **तित्थसुच्छेयाइ वि, नालंबणमित्थ जं स एमेव ।**
**सुत्तकिरियाइ नासो, एसो असमंजसविहाणा ॥१४॥**
**सो एस वंकओ चिय, न य सयमयमारियाणमविसेसो ।**
**एयं पि भावियव्वं इह तित्थुच्छेयभीरुहिं ॥१५॥**
**मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं ।**
**सम्मं पयट्टियव्वं, बुहेणमइनिउणबुद्धीए ॥१६॥**

एवं प्रथमं स्थानादिविशुद्धिं कृत्वा इच्छादिपरिणतः क्रमेण स्वरूपावलम्बनादि गृहीत्वा प्रीत्याद्यनुष्ठानेन असङ्गानुष्ठाने गतः सर्वज्ञो भूत्वा अयोगीभूय सिद्धो भवति, अतः क्रमसाधना श्रेयस्करी ।

**॥ इति व्याख्यातं योगाष्टकम् ॥२७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ नियागाष्टकम् ॥२८॥

नियागः—कर्मदहनं तत्र नितरां निश्चयेन यागः—यजनं नियागः। उक्तं च —

**[121] सुसंवुडा पंचहिं संवरेहिं, इह जीवियं अणवकंखमाणा ।**
**वोसट्ठकाया सुइचत्तदेहा, महाजयं जयइ जन्नसेट्ठं ॥४२॥**

**के ते जोइ के व ते जोईठाणा, का ते सूया किं व ते कारिसंगं,**
**एहा य ते कयरा संति भिक्खू, कयरेण होमेण हुणासि जोइं ॥४३॥**

**तवो जोई जीवो जोइठाणं, जोगा सूया सरीरं कारिसंगं ।**
**कम्मं एहा संजमजोग संती, होमं हुणामि इसिणं पसत्थं ॥४४॥**

[उत्तरा० अ० १२, गा० ४२-४३-४४)]

**[122] (से बेमि जहा अणगारे उज्जुकडे) नियागपडिवण्णे, (अमायं कुव्वमाणे वियाहिए ॥ सू०१८) ॥ श्रीआचाराङ्गसूत्रे ।** [आचा०श्रुत०१, अ०१, उ०३, सू०१८] **[123] निर्युक्तितः** निक्षेपादिकं ज्ञेयम् [उत्तरा० अध्य० २५, निर्यु० गा० ४६०-६१-६२)] । तत्स्वरूपं निवेदयति-

**यः कर्म हुतवान् दीप्ते, ब्रह्माग्नौ ध्यानध्यायया ।**
**स निश्चितेन यागेन, नियागप्रतिपत्तिमान् ॥१॥**

यः कर्महुतवानिति- यः ब्रह्माग्नौ—आत्मस्वरूपैकत्वरूपाग्नौ ध्यानध्यायया— ध्यानेन्धनेन दीप्ते सति कर्म—ज्ञानावरणादिकं हुतवान्—होमं कृतवान्, स मुनिः निश्चितेन-आभ्यन्तरेण, यागेन-सम्यग्दर्शनज्ञान-चारित्रैकत्ववीर्यतीक्ष्णत्वरूपेण युक्तः नियागप्रतिपत्तिमान् उच्यते ॥१॥

**पापध्वंसिनि निष्कामे, ज्ञानयज्ञे रतो भव ।**
**सावद्यैः कर्मयज्ञैः किम् ?, भूतिकामनयाविलैः ॥२॥**

पापध्वंसिनीति[१] - भो दक्ष ! निष्कामे-सर्वपरभावाभिलाषरहिते

---

१. ध्वंसिनीत्यादि V.2., S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापध्वंसिनि-पापकर्मविनाशके आत्मस्वरूपे ज्ञानं-स्वपरावभासकं तद्रूपे यज्ञे रतो भव-तन्मयो भव, किं भूतिकामनया-इहलोकसुखेच्छया ? सावद्यैः-पापसहितैः आविलैः-म्लानैः यज्ञैः किं ? न किमपि, न हिताय, तेन तत्करणं न युक्तम् । आत्मस्वरूपोपयोगः-तन्मयैकत्व-परिणतिः कर्माभावकरी, तेन तत्र यतितव्यम् ॥२॥

**वेदोक्तत्वान्मनःशुद्ध्या, कर्मयज्ञोऽपि योगिनः ।**
**ब्रह्मयज्ञ इतीच्छन्तः, श्येनयागं त्यजन्ति किम् ? ॥३॥**

वेदोक्तत्वादिति- वेदोक्तत्वाद् मनःशुद्ध्या कर्मयज्ञः अपि ब्रह्मयज्ञ इति इच्छन्तः योगिनः श्येनयागं किं त्यजन्ति ? इति स्वमतकल्पनां कुर्वन्ति मूढाः । ते निषेधनीयाः । न हि संसारकामनया हिंसा [१]सुखकरी भवति साध्यशुद्धिमन्तरेण न प्रयासो हिताय । अतो नैव कर्त्तव्यमिति ॥३॥

**ब्रह्मयज्ञः परं कर्म, गृहस्थस्याधिकारिणः ।**
**पूजादि वीतरागस्य, ज्ञानमेव तु योगिनः ॥४॥**

ब्रह्मयज्ञ इति- गृहस्थस्य—सावद्यप्रवृत्तस्य अधिकारिणः—योग्यस्य न्यायोपार्जितादिवित्तवतः, वीतरागस्य पूजादिकर्मकरणं परम्—उत्कृष्टं ब्रह्मयज्ञ इति ज्ञेयम् । संवराभावे आश्रवाणां परावृत्तिः [२]प्रशस्तताकरणं युक्तम् । उक्तं च—

**[124] अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो ।**
**संसारपयणुकरणे, दव्वथए कूवदिट्ठंतो ॥१२२४॥**

[पञ्चव०प्र० गा० १२२४]

इति रागपापस्थानस्य प्रशस्तताकरणोपदेशः । आगमे सर्वाश्रवाणां प्रशस्तता साधने गृहीता, तथा च मुनिविनये शासनविनये हर्षादि (वर्षादि-)जीवघातोऽपि न बन्धाय । तथा— **[125] प्रज्ञापनायाम्** [प्रज्ञा० प० ११, सू०१७४] भाषाचतुष्टयमपि मुनीनाम्, इत्यादिकम्,

---

१. सुखकारी V.1., A.D. विना । २. प्रशस्तीकरणं B.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः श्रावकाणां तु हिंसादिसर्वपरवृत्तिर्गुणिभक्तिरूपा हिता । तु-पुनः, योगिनो ज्ञानं यज्ञम्[१], ज्ञानरमणमेव हितम्, न हि मुनिर्बाह्यप्रवृत्तिरतो ज्ञाने रममाणस्तत्त्वं साधयति ॥४॥

**भिन्नोद्देशेन विहितम्, कर्म कर्मक्षयाऽक्षमम् ।**
**क्लृप्तभिन्नाधिकारं च, पुत्रेष्ट्यादिवदिष्यताम् ॥५॥**

भिन्नोद्देशेनेति- भिन्नोद्देशेन-परमात्मसाधनोद्देशमन्तरेण भिन्नेन-पुण्यादिवाञ्छोद्देशेन विहितं—कृतम्, कर्म—पूजादिकार्यम्, कर्मक्षयाय अक्षमम्—असमर्थं भवति । न हि भिन्नसाध्येन कृतं दयादानादिकं धर्मसाध्यशून्यानां सत्प्रवृत्तिः, बालक्रीडातुल्या । कल्पितभिन्नाधिकारं कर्म कार्यं पुत्रेष्ट्यादिवत् इष्यतामिति । यथा च जलार्था वनिता कूपोपकण्ठे जलार्थं घटे च रज्जुबन्धं कुर्वती परपुरुषरूपव्याकुलितचित्ता स्वपुत्रमेव पाशबन्धं कृतवती दुःखभाजनं भवति । एवं साध्यच्युतानां क्रिया दुःखहेतुरूपा उक्ता ॥५॥

***ब्रह्मार्पणमपि ब्रह्म-यज्ञान्तर्भावसाधनम् ।**
**ब्रह्माग्नौ कर्मणो युक्तम्, स्वकृतत्वस्मये हुते ॥६॥**

ब्रह्मार्पणमपि ब्रह्म इति[२]—भो विद्वन् ! यदि त्वं ब्रह्मार्पणं सर्वं स्वकृतं ब्रह्मणि—परमेश्वरे यदर्पणं—प्रयच्छनं (प्रदानं) तत्रैवारोपणम् । एतत्सर्वं परमेश्वरकृतं जातं मत्कृतं न किंचनेति धीरिति यावत् । तद् ब्रह्मयज्ञान्तर्भावसाधनं-ब्रह्मयज्ञो-ज्ञानयज्ञस्तस्य योऽन्तर्भावः-आत्मीयभावफल-

---

१. A.D.V.1. प्रतौ एषपाठोऽस्ति । २. एतच्छ्लोकवृत्तिः सर्वप्रतिषु न ।

★ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यम्, ब्रह्मकर्मसमाधिना ॥१॥

कर्मण्यकर्म यः पश्येत्, अकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु, स युक्तः कृत्स्नकर्मकृत् ॥२॥

इत्यादि गीतोक्तनिश्चयनये । સર્વ સાધનને આત્મપરતાએ જાણવું. પણ નિરંજન બ્રહ્મને કર્મ તત્ફલાર્પણત V.1 टिप्पनके एषपाठोऽस्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्तिस्वीकारस्तस्य साधनं तन्निष्पादकत्वकारणं मन्यसे, यद्वा तत्फल-मिच्छसि । तर्हि त्वं तत्कृते स्वकृतत्वस्मये स्वस्य—जीवस्य यत्कृतं निर्मितं कर्म तद्भावस्तत्त्वं तद्रूपो यः स्मयोऽहंकारस्तस्मिन् निमित्तभूते । हुते हुतमग्नौ प्रक्षेपणं मया निर्मितमिति अहंकारहोमनिमित्त इति यावत् । कर्मणो—ज्ञानावरणादिकस्य । ब्रह्माग्नौ—ब्रह्म शुद्धतीव्रोपयोगिज्ञानं निराशंसतपश्च तद्रूपो योऽग्निरूर्ध्वं गच्छतीति व्युत्पत्तिमत्तेजस्तस्मिन् । आहुतिकरणं युक्तं—घटमानं न तु पश्वादेरित्यर्थः ॥६॥

अथ श्लोकद्वयेन स्वरूपफलदर्शनपूर्वकमुपसंहरति—

**ब्रह्मण्यर्पितसर्वस्वो, ब्रह्मदृग्ब्रह्मसाधनः ।**

**ब्रह्मणा जुह्वदब्रह्म, ब्रह्मणि ब्रह्मगुप्तिमान् ॥७॥**

ब्रह्मणि इति- 'ब्रह्मणि'[२]—आत्मनि अर्पितसर्वस्वः—[३]अर्पितं—स्थापितं सर्वस्वं—सर्वात्मपरिणमनरूपमित्यनेन[३] ज्ञानवीर्यलाभभोगादयः स्वक्षयोपशमीभूता भावा आत्मनि एवार्पिताः स्थापिता येन सः । तथा ब्रह्म[४]—आत्मा आत्मज्ञानं वा तत्रैव दृग्—दृष्टिर्दर्शनं श्रद्धानम् । ब्रह्मसाधनः-ब्रह्म ब्रह्मज्ञानमेव साधनं यस्य सः ब्रह्मसाधनः । अथवा—ब्रह्म—आत्मा एव साधने यस्य सः एवंविधः साधकजीवः ब्रह्मणि साधकावस्था-परिणतस्वात्मनि आधारभूते, ब्रह्मणी-आत्मज्ञानवीर्याभ्याम् अब्रह्म अज्ञानं-पुद्गलकर्म वात्मनः भिन्नं जुह्वत्-(होमं कुर्वत्) भस्मीचकार । कथम्भूतः साधकपुरुषः ? ब्रह्म-ब्रह्मचर्यं स्वरूपरमणरूपं तस्य गुप्ति-मान् तद्गुप्तियुक्तः । इत्यनेन आत्मा कर्त्ता आत्मस्वरूपेण करणभूतेन आत्मस्वरूपरोधकं ज्ञानावरणादिकर्म आत्मनि स्थितं निवारयति ॥७॥

**ब्रह्माध्ययननिष्ठावान्, परब्रह्मसमाहितः ।**

**ब्राह्मणो लिप्यते नाघैर्नियागप्रतिपत्तिमान् ॥८॥**

॥ इति नियागाष्टकम् ॥२८॥

---

२. ब्रह्म-आत्मनि सर्वप्रतिषु । ३. अर्पितः स्थापितः सर्वस्वः सर्वप्रतिषु । ४. रूपः इत्य० सर्वप्रतिषु । ४. ब्रह्मे V.2., S.M., B.1.2. ।

ब्रह्माध्ययनेति—ब्राह्मणो—मुनिः श्रमणो द्रव्य-भावब्रह्मचर्ये रतः ब्राह्मणः, अघैः-पापैः न लिप्यते-न लेपवान् भवति । कथम्भूतः ब्राह्मणः ? ब्रह्माध्ययनम्-आचाराङ्गप्रथमश्रुतस्कन्धनवमाध्ययनोक्त-निष्ठा—मर्यादा तद्वान्-तत्परिणतिपरिणतः । पुनः परब्रह्म-शुद्धात्म-स्वरूपम्, तेन समाहितः-समाधिमयः । पुनः नियोग[1]:-कर्मक्षपणम्, तस्य प्रतिपत्तिः तद्रूपतापरिणतः भिक्षुः पापैर्न लिप्यते, नावगुण्ठनावान् भवति । अत एव स्वस्वरूपभासनरमणपरिणतः अनादिकर्मपटलक्षयं कृत्वा सिद्धबुद्धः परमानन्दमयो भवति । अतो भावनियागः कर्मदहन-रूपः करणीय इति तत्त्वम् ॥८॥

## ॥ इति व्याख्यातं नियागाष्टकम् ॥२८॥

## अथ भावपूजाष्टकम् ॥२९॥

अथ द्रव्यपूजोपस्काररूपं भावपूजास्वरूपभावनोपचाररूपं भाव-पूजाष्टकं वितन्यते । तत्र गृहस्थः अनेकसंसारभारत्रस्तः कदाचिद् निर्विकारानन्दरूपां जिनमुद्रां विलोक्य प्राप्तवैराग्यः भवोद्विग्नः सर्वा-संयमत्यागाभिलाषी परमसंवररूपं परमेश्वरं सद्भक्त्या पूजयति । [2]स्वयोगस्वपरिग्रहादिकं सर्वथा त्यक्तुमसमर्थः सर्वमपि तीर्थकरभक्तियुक्तं करोति । ततश्च आत्मा स्वगुणपरिणतः स्वरूपसाधनारूपां भावपूजां करोति । तत्स्वं[3] रूपं नामतः पूजा इति कथनम् । स्थापनातस्तल्लिङ्गाचरणम् । द्रव्यतः चन्दनादिभिः शून्योपयोगेन च । भावतो गुणैकत्वरूपा सा व्याख्यायते–

**दयाम्भसा कृतस्नानः, सन्तोषशुभवस्त्रभृत् ।**
**विवेकतिलकभ्राजी, भावनापावनाशयः ॥१॥**

**भक्तिश्रद्धानघुसृणोन्मिश्रपाटीर[4]जद्रवैः ।**
**नवब्रह्माङ्गतो देवम्, शुद्धमात्मानमर्चय ॥२॥** [युग्मम्]

---

१.नियागं-सर्वप्रितषु । २. स्वयोगसपरि० V.1.A.D. विना । ३. तत्स्वरूपाम्-V.2.A.D.B.2. । ४. काश्मी B.2.1.V.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दयाम्भसा इति भक्तिश्रद्धानेति श्लोकद्वय[१]स्य युग्मतो व्याख्यानं दर्शयति । हे उत्तम ! एवंविधं शुद्धात्मानम् अनन्तज्ञानादिपर्यायम् [२]आत्मरूपं देवं नव इति नवप्रकारब्रह्मरूपाङ्गतः अर्चय–पूजय[३] । कीदृशो भूत्वा ? इत्याह–दया–द्रव्यभावस्वपरप्राणरक्षणारूपा सा एव अम्भः– जलं पानीयं तेन [४]कृतं स्नानं–पावित्र्यं येन सः । संतोषः- पुद्गलभावपिपासाशोकाभावरूपः ते एव [५]शुभानि वस्त्राणि तेषां भृत्– धारकः विवेकः–स्वपरविभजनरूपं ज्ञानं तदेव तिलकं तेन भ्राजी– शोभमानः । पुनः कथम्भूतः? भावना–अर्हद्गुणैकत्वरूपा तया पावनः– पवित्रः आशयः–अभिप्रायः यस्य सः । पुनः भक्तिः–आराध्यता श्रद्धा- प्रतीतिः 'एस अट्ठे परमट्ठे' एवंरूपा, (तद्रूपेण) घुसृणेन उन्मिश्रं पाटीरजं तस्य द्रवाः तैः शुद्धात्मा–परमेश्वरः स्वकीयात्मापि दीव्यति स्वरूपे इति देवस्तम् अर्चय–पूजय तद्भक्तिरतो भव इति ॥१॥२॥

अथ अनुक्रमेण पूजाप्रकारानाह–

**क्षमापुष्पस्त्रजं धर्म-युग्मक्षौमद्वयं तथा ।**
**ध्यानाभरणसारं च, तदङ्गे विनिवेशय ॥३॥**

क्षमापुष्पस्त्रजमिति– हे भव्य ! तदङ्गे–आत्मस्वरूपरूपे अङ्गे क्षमां–क्रोधोपशमवचनधर्मक्षमारूपाम्, स्त्रजं–पुष्पमालाम्, विनिवेशय- स्थापय । तथा–तथैव धर्मयुग्मं–श्रावकसाधुरूपं श्रुतचारित्ररूपं वा [६]क्षौमवस्त्रद्वयं निवेशय । च-पुनः, ध्याने–धर्मशुक्ले ते एव आभरणस्य सारं-प्रधानम्, परमब्रह्मणि निवेशय । इत्येवं गुणपरिणमनरूपां पूजां कुरु ॥३॥

**मदस्थानभिदात्यागैर्लिखाग्रे चाष्टमङ्गलीम् ।**
**ज्ञानाग्नौ शुभसंकल्प-काकतुण्डं च धूपय ॥४॥**

---

१. द्वयम् सर्वप्रतिषु । २. आत्मा० सर्वप्रतिषु । ३. पूजां कुरु L.D.1. । ४. कृतः स्नानः सर्वप्रतिषु । ५. शुभा-सर्वप्रतिषु । ६. क्षौम-चारित्रद्वयं S.M., B.1.2., V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदस्थानेति—मदः—मानोन्मादः तस्य स्थानानि[1] तानि एव भिदाः-भेदाः तासां[2] त्यागैः-वर्जनैः, अष्टमङ्गलीम् अग्रे लिख । तथा ज्ञानाग्नौ शुभसंकल्पः-शुभरागपरिणामः तद्रूपं काकतुण्डं-कृष्णागरुं धूपय । इत्यनेन रागाध्यवसायाः शुभाः पुण्यहेतवः सिद्धिसाधने त्याज्या एव । अतः ज्ञानबलेन तत्त्यागो भवति ॥४॥

**प्राग्धर्मलवणोत्तारम्, धर्मसंन्यासवह्निना ।**
**कुर्वन् पूरय सामर्थ्य—राजन्नीराजनाविधिम् ॥५॥**

प्राग्धर्मेति—अत्रात्मस्वरूपार्चने धर्मसंन्यासवह्निना धर्मः— स्वरूपसत्ता सहजपारिणामिकलक्षणः चन्दनगन्धतुल्यः (तस्य[3]) सम्यग् न्यासः—स्थापनं स एव वह्निः तेन प्राक्—पूर्वसाधनरूपः धर्मः— सविकल्पभावनारूपस्तदेव(स एव)लवणं तस्योत्तारः[4] निवारणं निर्विकल्पसमाधौ साधकस्यापि—सविकल्पकधर्मस्य त्याग एव भवति । एवं भावरूपम् अपवादसाधनरूपलवणोत्तारं कुर्वन् सामर्थ्यराजन्नीराजनाविधिं—पूर्वसामर्थ्ययोगस्वरूपा राजन्ती-शोभमाना नीराजना-आरात्रिका तस्याः [5]विधिस्तं पूरय । सामर्थ्ययोगस्वरूपं च यत्र कर्मबन्धहेतुषु प्रवर्त्तमानवीर्यस्य न तादृक् प्रवृत्तिः स्वात्मधर्मसाधनानुभवैकत्वे प्रवर्त्तमानः निष्प्रयासत्वेन प्रवर्त्तते स योगः सामर्थ्य उच्यते ॥५॥

**स्फुरन्मङ्गलदीपं च, स्थापयानुभवं पुरः ।**
**योगनृत्यपरस्तौर्यत्रिकसंयमवान् भव ॥६॥**

स्फुरन्मङ्गलेति—च—पुनः स्फुरत्-देदीप्यमानम्, मङ्गलदीपं—सर्वद्रव्यभावोपद्रवमुक्तं दीपं-भावप्रकाशम्, अनुभवं—स्पर्शज्ञानमात्मस्वभावास्वादनयुक्तं ज्ञानम्, पुरः—अग्रे स्थापय योगाः—मनोवाक्कायरूपास्तेषां साधनप्रवर्त्तनरूपं नृत्यं-(ताण्डवं) तत्र तत्परः सोद्यमः सन् परमाध्यात्मधारणाध्यानसमाधिरूपसाधनयोगाङ्गपरिणमनरूपतूर्यादि-

---

१. स्थानास्ते सर्वप्रतिषु । २. तेषां-सर्वप्रतिषु । ३. सर्वप्रतिषु नास्ति । ४. त्तारं-B.1.2., S.M. । ५. विधिस्तां-सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूजात्रयमयो भव । इत्यनेन आभ्यन्तरपूजया तत्त्वानन्दमयं स्वचैतन्य-लक्षणं स्वात्मानं तद्रूपं कुरु ॥६॥

**उल्लसन्मनसः सत्य-घण्टां वादयतस्तव ।**
**भावपूजारतस्येत्थं, करक्रोडे महोदयः ॥७॥**

उल्लसन्मनस इति—इत्थं भावपूजारतस्य तव महोदयः—मोक्षः करक्रोडे—हस्ततलेऽस्ति । किं कुर्वतः ? उल्लसन्मनसः—भावोल्लास-युक्तचित्तस्य सत्पर्यायरूपां घण्टां वादयतः—शब्दं कुर्वतः । इत्यनेन सहर्षसत्यमनउल्लासरूपां घण्टां नादयतः सतः पूर्वोक्तपूजाकरणेन सर्व-स्वशक्तिप्रादुर्भावरूपो मोक्षो भवति ॥७॥

**द्रव्यपूजोचिताभेदो-पासना गृहमेधिनाम् ।**
**भावपूजा तु साधूनामभेदोपासनात्मिका ॥८॥**

॥ इति व्याख्यातं भावपूजाष्टकम् ॥२९॥

द्रव्यपूजेति- गृहमेधिनां—गृहस्थानाम्, भेदोपासनारूपा—आत्मनः सकाशाद् अर्हन् परमेश्वरः भिन्नः निष्पन्नानन्दचिद्विलासी । तस्यो-पासना— सेवना निमित्तालम्बनरूपा द्रव्यपूजा उचिता-योग्या । तु-पुनः साधूनामभेदोपासनात्मिका परमात्मना स्वात्माभेदरूपा भावपूजा उचिता। यद्यपि सविकल्पकभावपूजा गुणस्मरणबहुमानोपयोगरूपा भावपूजा गृहिणां भवति, तथापि निर्विकल्पोपयोगस्वरूपैकत्वरूपा भावपूजा निर्ग्रन्थानामेव । एवमाश्रवकषाययोगचापल्यपरावृत्तिरूपे[1]द्रव्यपूजाभ्यासेन अर्हद्गुणस्वात्मधर्मैकत्वरूपे[2]भावपूजावान् भवति, तेन च तन्मयतां प्राप्य सिद्धो भवति । इत्येवं साधनेन साध्योपयोगयुक्तेन सिद्धिः निष्कर्मता भवति ॥८॥

**॥ इति व्याख्यातं भावपूजाष्टकम् ॥२९॥**

---

१-२. रूपा-सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ ध्यानाष्टकम् ॥३०॥

अथ ध्यानाष्टकं विस्तार्यते । ध्यानलक्षणं **निर्युक्तौ—**

**[21] अंतोमुहुत्तमित्तं, चित्तावत्थाण एगवत्थुंमि ।**
**छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ॥३॥**

[ध्या०श० गा० ३]

नामादिकं स्वतो वाच्यम् । तत्र ध्यानस्वरूपं निरूपयन्नाह-

**ध्याता ध्येयं तथा ध्यानम्, त्रयं यस्यैकतां गतम् ।**
**मुनेरनन्यचित्तस्य, तस्य दुःखं न विद्यते ॥१॥**

ध्याता ध्येयमिति—यस्य—पुरुषस्य ध्याता तथा ध्येयं तथा ध्यान-मेतत् त्रयं यस्य जीवस्य एकताम्—एकभावं गतम्, तस्य मुनेः अनन्यचित्तस्य—तद्रूपचेतनामयस्य अर्हत्स्वरूपात्मस्वरूपतुल्योपयोग-गृहीतस्य दुःखं—स्वगुणावरणरूपं पुद्गलसंनिकर्षजन्यम्, न विद्यते-नास्तीत्यर्थः । उक्तं च **प्रवचनसारे—**

**[126] जो जाणदि अरिहंते, दव्वत्त-गुणत्त-पज्जवत्तेहिं ।**
**सो जाणदि अप्पाणं, मोहो खलु जादि तस्स लयं ॥८०॥**

ध्याता-आत्मा, ध्येयं-तत्स्वरूपम्, ध्यानं-तत्रैकाग्रता । तत्र अभेदता, एतत् त्रयमेकत्वं प्राप्तं मोहक्षयाय भवति ॥१॥

**ध्यातान्तरात्मा ध्येयस्तु, परमात्मा प्रकीर्त्तितः ।**
**ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ॥२॥**

ध्यातेति—ध्यातृस्वरूपं चोक्तं- **श्रीहेमसूरिपूज्यैः—**

**अमुञ्चन् प्राणनाशेऽपि, संयमैकधुरीणताम् ।**
**परमप्यात्मवत्पश्यन्, स्वस्वरूपापरिच्युतः ॥२॥**

**उपतापमसंप्राप्तः, शीतवातातपादिभिः ।**
**पिपासुरमरीकारि, योगामृतरसायनम् ॥३॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रागादिभिरनाक्रान्तम्, क्रोधादिभिरदूषितम् ।**
**आत्मारामं मनः कुर्वन्, निर्लेपः सर्वकर्मसु ॥४॥**
**विरतः काम[1]भोगेभ्यः, स्वशरीरेऽपि निःस्पृहः ।**
**संवेगह्रदनिर्मग्नः, सर्वत्र समतां श्रयन् ॥५॥**
**नरेन्द्रे वा दरिद्रे वा, तुल्यकल्याणकामनः ।**
**अमात्रकरुणापात्रम्, भवसौख्यपराङ्मुखः ॥६॥**
**सुमेरुरिव निष्कम्पः, शशीवानन्ददायकः ।**
**समीर इव निःसङ्गः, सुधीर्ध्याता प्रशस्यते ॥७॥**

[यो०शा० प्र० ७. श्लो० २-७]

इति ध्यातृस्वरूपम् । एवंविधो ध्याता अन्तरात्मा-साधकात्मा । तु-पुनः, ध्येयः[2]-ध्यातुं योग्यः, परमात्मा-क्षीणघातिकर्मा अर्हन्, नष्टाष्टकर्मा सिद्धो वा । वस्तुवृत्त्या सत्तागतः सिद्धात्मा ध्येयः प्रकीर्त्तितः । च-पुनः, ऐकाग्र्यसंवित्तिः-ऐकाग्र्यं तन्मयत्वेन परमात्मस्वरूपे अनन्त-पर्यायात्मके एकाग्रत्वेन संवित्तिः-ज्ञानं ध्यानमुच्यते । इत्यनेन अर्हदादि-शुद्धगुणज्ञानसंवेदनतन्मयता ध्यानम् । चेतनावीर्यादीनां सर्वक्षयोपशमानां स्वरूपोपयोगलीनत्वं ध्यानम् । तत्र ध्यातुः ध्येये [3]तदेकाग्रतारूपे ध्याने समापत्तिः निर्विकल्पता तारतम्यरहिता चित्परिणतिः एकता ज्ञेया ॥२॥

तत्र दृष्टान्तेन कथयति-

**मणौ बिम्बप्रतिच्छायासमापत्तिः परात्मनः ।**
**क्षीणवृत्तौ भवेद् ध्यानादन्तरात्मनि निर्मले ॥३॥**

मणौ बिम्बेति– यथा मणौ–रत्ने, बिम्बस्य प्रतिच्छाया तथा अन्तरात्मनि–स्वात्मस्वरूपे, परात्मनः–निर्मलात्मनः ध्यानात् समापत्तिः-सिद्धात्मत्वस्वात्मत्वैकतारूपा भवेत् । कथम्भूते अन्तरात्मनि ? निर्मले-

---

१. रागेभ्यः, S.M., V.1., B.1., रोगेभ्यः A.D., V.2. । २. ध्येयं S.M., A.D., B.1.2.. V.2. । ३. तदैकाग्र्यता० A.D.V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कषायविकल्पमलरहिते । पुनः किम्भूते ? क्षीणवृत्तौ-क्षीणा वृत्तिः पराजीविका यस्य सः क्षीणवृत्तिः । तस्मिन् एव समापत्तौ ध्यानसिद्धिः भवति इत्थं पूर्वोक्तप्रकारेण । अन्यत्रोक्तम्-

[127] **मणेरिवाभिजातस्य, क्षीणवृत्तेरसंशयम् ।**
**तात्स्थ्यात्तदञ्जनत्वाच्च, समापत्तिः प्रकीर्त्तिता ॥१०॥**

[द्वा०द्वा० २०, श्लो०१०]

अन्तरात्मनि परमात्मनः[३]-अभेदारोपो ध्यानफलं तच्च संसर्गारोपतो भवति । संसर्गश्चात्र निष्पन्नानन्ततात्त्विकसिद्धात्मनामुपयोगः स च चलचित्तानामिन्द्रियरोधमन्तरेण न भवति । इन्द्रियरोधश्च जिनप्रतिमादि-कारणमन्तरेण न जायते । अतः स्थापना तत्त्वोपकारकारिका ॥३॥

**आपत्तिश्च ततः पुण्य-तीर्थकृत्कर्मबन्धतः ।**
**तद्भावाभिमुखत्वेन, सम्पत्तिश्च क्रमाद्भवेत् ॥४॥**

आपत्तिश्चेति-च–पुनः आपत्तिः-जिनभक्तितन्मयत्वं ततः पश्चात् 'पुण्यतीर्थकृत्कर्मबन्धतः-पुण्यप्रकृतिरूपं तीर्थकृद्-विश्वोपकारिसंघ-स्थापकातिशयरूपं नामकर्म तस्य बन्धतः तद्भावाभिमुखत्वेन तदुदय-योगेन क्रमात् सम्पत्तिः भवेत्-परमैश्वर्यं भवेत् । इदं च निरनुबन्धरूपं फलं दर्शितम् ॥४॥

अथ ध्यानशून्यत्वेन सफलं नेति दर्शयति-

**इत्थं ध्यानफलाद्युक्तम्, विंशतिस्थानकाद्यपि ।**
**कष्टमात्रं त्वभव्यानामपि नो दुर्लभं भवेत् ॥५॥**

इत्थमिति-इत्थं-पूर्वोक्तप्रकारेण, 'ध्यानफलात्'-त्रिविधध्यानोपयो-गाद् विंशतिस्थानकाद्यपि-विंशतिस्थानतपःप्रमुखं गुणिबहुमानेन, युक्तं-कर्तुमुचितम् । अभव्यानां तु-अन्यत् सम्यग्दर्शनादिगुणिबहुमान-ध्यानोपयोगशून्यं विंशतिस्थानादितपोव्यूहम्, कष्टमात्रं-कायक्लेशरूपम्,

---

३. परमात्मतः B.1.2.S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवे-संसारे, नो दुर्लभं बाह्याचरणं जैनोक्तमपि बहुशः अभव्यैः कृतपूर्वमिति ॥५॥

अथ ध्यानकारकस्य स्वस्वरूपं निदर्शयन् श्लोकत्रयमाह-

**जितेन्द्रियस्य धीरस्य, प्रशान्तस्य स्थिरात्मनः ।**
**सुखासनस्य नासाग्र-न्यस्तनेत्रस्य योगिनः ॥६॥**

**रुद्धबाह्यमनोवृत्तेर्धारणाधारया रयात् ।**
**प्रसन्नस्याप्रमत्तस्य चिदानन्दसुधालिहः ॥७॥**

**साम्राज्यमप्रतिद्वन्द्वमन्तरैव वितन्वतः ।**
**ध्यानिनो नोपमा लोके, सदेवमनुजेऽपि हि ॥८॥**

॥ इति ध्यानाष्टकम् ॥३०॥

जितेन्द्रियेति, रुद्धबाह्येति, साम्राज्यमिति, एवंविधस्य ध्यानिनः हीति निश्चितम्, सदेवमनुजेऽपि लोके-ससुरनरे लोके । तिर्यग्नारकाग्रहणं तु तयोर्दुर्गतित्वात् । इत्यनेन त्रिभुवने उपमानासादृश्यम् । तत्त्वज्ञानानुभवलीनस्य सहजानन्दविलासकस्य तुलना केन क्रियते ? इति । किं कुर्वतस्तस्य ? अन्तरेव-आत्मान्तरमध्ये एव अप्रतिद्वन्द्वं-बाह्याभ्यन्तरविपक्षरहितं सर्वपरभावागम्यं साम्राज्यं-स्वगुणसम्पत्स्वभावपरिवारोपेतं राज्यं स्वाधीनं वितन्वतः-विस्तारयतः स्वगुणानन्दासंख्येयप्रदेशनिर्व्याघातं स्वराज्यमनुभवतः । अतः सर्वाण्यपि [१]षष्ठ्यन्तानि ध्यानिनो विशेषणानि[२] संयोज्यानि । कथम्भूतस्य ध्यानिनः? जितेन्द्रयस्य-जितानि स्वरूपोपयोगीकृतानि[३] पौद्गलिकवर्णादिष्वपरिणमनाद् जितानि इन्द्रियाणि येन सः तस्य । धीरस्य-स्ववीर्यसामर्थ्येन परीषहोपसर्गेऽकम्पस्य स्वरूपनिष्ठस्य । पुनः प्रशान्तस्य-कषायनोकषायोद्रेकरहितस्य । धीरः प्रशान्त[४] एव आत्मानमास्वादयति, पुनः स्थिरात्मनः-स्थिरः आत्म-

---

१. षष्ठ्यन्ता L.D.1 विना । २. विशेषणाः संयोज्याः L.D.1. विना । ३. क्लृप्ता V.1. । ४. शान्त S.M., B.1.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरूपरमणे आत्मा यस्य सः तस्य । सुखासनस्य-साधनपरिणतौ सुखमय आत्मा यस्य सः तस्य । पुनः (नासाग्रन्यस्तनेत्रस्य-) नासाग्रे चापल्यरोधनाय न्यस्ते स्थापिते नेत्रे येन[१] सः तस्य । योगिनः-सम्यग्-दर्शनज्ञानचारित्ररत्नत्रयीपरिणतस्य, (रुद्धबाह्यवृत्तेः)-रुद्धा बाह्येन्द्रियानु-सारिणी मनसः वृत्तिर्येन स तस्य, इन्द्रियानुयायिमनोवृत्तिनिवृत्तस्य, कस्माद् ? (धारणाधारया रयात्) ध्येये चित्तस्य स्थिरबन्धनं धारणा, तस्या धारा [२]तया रयाद्-वेगाद् । रुद्धमनसः तत्त्वध्यानं सुनिश्चितं भवति । पुनः प्रसन्नस्य-कालुष्यरहितस्य, अप्रमत्तस्य-अज्ञानाद्यष्टप्रमादनिवृत्तस्य । पुनः चिदानन्दसुधालिहः-चित्-ज्ञानं तस्यानन्दः, स एव सुधा अमृतं [३]तां लिह्यतीति (लेढीति) तस्य लिहः-ज्ञानानन्दास्वादकस्य एतादृशस्य ध्यानिनः आत्मिकसाम्राज्यानुभवं विस्तारयतः तुल्यत्वं केन भवति ? न केनापि । अतः सर्वपरभावपरित्यागस्वरूपावलोकनतत्त्वैकत्वध्यानामृत-स्वभोग्य-भोक्तुः परमसाम्राज्यम् । अतः सर्वप्रकारेण तदेव करणीयम् । यदर्थं रचयन्ति यमनियमप्रचारान्, संकोचयन्ति शरीरमासनमुद्रादिभिः, साधयन्ति रेचकपूरककुम्भकैः[४] प्राणम्, वसन्ति निर्जने वने, त्यजन्ति सर्वेन्द्रियविषयान्, तत्साम्यसुखमूलमात्मैकत्वोपयोगं साध्यं स्वहितार्थिभिः ॥६-७-८॥

**॥ इति व्याख्यातं ध्यानाष्टकम् ॥३०॥**

## अथ तपोऽष्टकम् ॥३१॥

अथ तपोऽष्टकं वितन्यते । तत्र पौद्गलिकसुखाभिलाषरङ्काणां यत्कष्टक्षमणम्, अथवा लोकसंज्ञाभीतानां पराधीनानां दीनतया आहार-त्यागरूपं न तपः, आश्रवमूलत्वेन कषायोदयाश्रितत्वात् कर्मबन्ध-कत्वाच्च । पूर्वान्तरायोदयासातावेदनीयविपाक एव **श्रीप्रज्ञापनावृत्तौ**

---

१. यस्य A.D., V.1. । २. तस्या रयात्-वेगात् L.D.1. । ३. तत् L.D.1 । ४. कुम्भकप्राणायामान् S.M., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरूपित एव । **आचाराङ्गचूर्णौ** चापि **अङ्गत्थसुत्तं सव्वमविवागं** इति वचनात् । अतोऽभिनवेन्द्रियसुखाभिलाषरहितस्य निर्मलात्मद्रव्य-साधकस्य कष्टाचरणं तप इति । अत्र **पञ्चवस्तुके** उपवासादिषु असातानिर्जरेति भोजने सातानिर्जरा साम्ये उपवासादिकरणं किमर्थ-मिति ? तत्रोच्यते- भोजनादिषु षट्कायपरिमन्थः[1], उपवासे च तदभावाद् अशुभनवकर्मबन्धाभावे संवरपूर्वकसकामनिर्जरामूलत्वाद् हितम् । तथा चास्यात्मनः साताविपाके सरागहेतुत्वेन इष्टसंयोगैकत्वता अनादिसहजपरिणमनाद् आतापनादिषु कर्मविपाकोपयोगत्वेन [2]तथा परिणमनाद् असङ्गताकारणत्वात् त्याग एव साधनमूलं च । भरतादयः निदर्शनम्, तच्चाल्पकालसाधनासिद्धिवताम् । नहि चिरकालसाधनावतां सातादि । शुभसंनिकर्षे अव्यापकत्वपरिणामः । उक्तं च **विशेषाव-श्यके**-"रतिक्षमत्वं त्वल्पानां तेनातापनादिकरणमुचितं मुनीनाम्" । निक्षेपनयानां व्याख्या तु—नामतपः स्थापनातपः, सुगमम् । द्रव्यतपः-आहारत्यागादि, भावतपः-आत्मस्वरूपैकाग्रत्वरूपम् । अत्र द्रव्यपूर्वक-भावतपोग्रहणमिति ।

**ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात्तपः ।**
**तदाभ्यन्तरमेवेष्टम्, बाह्यं तदुपबृंहकम् ॥१॥**

ज्ञानमेव बुधाः प्राहुरिति-बुधाः-पण्डिताः, कर्मणाम्-आत्म-प्रदेशसंश्लिष्टानाम्, तापनात् तीक्ष्णं ज्ञानमेव तपः प्राहुः । तत्तपः आभ्य-न्तरमन्तरङ्गं प्रायश्चित्तादिकमिष्टम्, बाह्यमनशनादिकम्, तदुपबृंहक-माभ्यन्तरतपोवृद्धिहेतुः । द्रव्यनिक्षेपस्य कारणरूपत्वात्, द्रव्यतपसोऽपि भावतपसः कारणत्वमेव, तेन इष्टम् ॥१॥

**[3]आनुस्रोतसिकी वृत्तिर्बालानां सुखशीलता ।**
**प्रातिस्रोतसिकी वृत्तिर्ज्ञानिनां परमं तपः ॥२॥**

---

१. पलिमन्थ० S.M., V.2., B.2. पलिपन्थः L.D.1. । २. तया S.M., B.2., V.1.2. L.D.1. । ३. अनु० B.2., V.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ[१]नुस्रोतसिकीति—संसारप्रवाहपद्धतिः अनादिप्रवृत्तिः आनु[२]-स्रोतसिकी वृत्तिः बालानां-मूढानाम्, सुखशीलता-इन्द्रियसुखमग्नता, सुखाभिलाषता । प्रातिस्रोतसिकी-प्रवाहसंमुखे[३]ता, संसारसंमुखत्वमपहाय संसारपराङ्मुखी प्रवृत्तिः, तदेव परमं तपः ज्ञानिनामुक्तमिति । आत्म-धर्मानुगसंसारप्रतिकूलप्रवृत्तिस्तप उच्यते । इत्यनेन प्रायश्चित्तादि भावतपः-परिणामः स्वरूपतन्मयत्वं तत्करणीयम् । तत्तपसा एव सकलकर्मक्षयः ॥२॥

**धनार्थिनां यथा नास्ति, शीततापादि दुस्सहम् ।**
**तथा भवविरक्तानाम्, तत्त्वज्ञानार्थिनामपि ॥३॥**

धनार्थिनामिति—यथा धनार्थिनां शीततापादि दुस्सहं नास्ति, धनोपार्जनकुशलाः शीतादिकं सर्वमपि क्षमन्ते । तथा तत्त्वज्ञानार्थिनां-भवविरक्तानामनशनादिकं तपो न दुस्सहम् । कार्यार्थी कारणे न प्रमाद्यति । अतः परमानन्दकार्यकर्त्ता अनशनादितपःकष्टानुष्ठाने न दुस्सहत्वं मन्यते॥३॥

**सदुपायप्रवृत्तानामुपेयमधुरत्वतः ।**
**ज्ञानिनां नित्यमानन्द-वृद्धिरेव तपस्विनाम् ॥४॥**

सदुपायेति-तपस्विनां-तीव्रतपोमग्नानां मा[४]सादिषण्मासान्तं सर्वा-हारपरिहारातापनाकायोत्सर्गादिजिनकल्पपरिहारविशुद्धिमुनीनाम्-ज्ञानिनां सूक्ष्मानन्तस्वपरपर्यायविवेकमग्नीकृतचैतन्यानाम्, [५]तपस्विनां परीषहादौ वननदीगह्वरवासेऽपि आनन्दवृद्धिरेव । यथाहि—कश्चिदधमर्णः प्राप्तद्रव्यो-पचयः उत्तमर्णाय द्रविणं ददन् आत्मानं धन्यमेव मन्यते, अथवा लब्धिसिद्ध्यर्थी पूर्वसेवायामुद्बाहुः अधोमुखादि महाकष्टानुष्ठानमपि तत्सिद्धिसाध्याभिलाषी यथात्यन्तकष्टं चेष्टते तथा हर्षमेति । एवं परमानन्दाव्ययशुद्धात्मसिद्धिसाधनार्थी तद्विघा[६]तककर्मक्षयाय तपःकष्टादिषु

---

१. अनु० L.D.1. । २. अनु० S.M., B.2., V.1.2. । ३. संमुखम् L.D.1 । ४. साधिकषण्मा० L.D.1. । ५. तपसि A.D.V.1. । ६. तद्विघातकर्म० L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मानमानन्दयति । कुतः? इत्याह—उपेयमधुरत्वतः-उपेयस्य-मोक्षस्य निर्मलाव्ययपदस्य यन्मधुरत्वं-माधुर्यं तस्मात्, सिद्धिमाधुर्यरतस्य[1] तत्साधनोपायभूतं निष्परिग्रहत्वादि सर्वं हितं जानाति । कथंभूतानां तपस्विनाम्? सदुपायप्रवृत्तानाम्- [2]सन्-शोभनः उपायः-साधनं संवरनिर्जरारूपम् तत्र प्रवृत्तानाम्-उद्यतानाम् । इत्यनेन स्वधर्मसाधने साधूनामानन्दः, न दुःखम् । यस्य साधने कष्टत्वबुद्धिः स न साधकः । उक्तं च **षोडशके**[3]-

**( खेदोद्वेगक्षेपोत्थानभ्रान्त्यन्यमुद्रुगाऽसङ्गैः ।**
**युक्तानि हि चित्तानि, प्रबन्धतो वर्जयेन्मतिमान् ॥१४।३॥)**

**इत्थं च दुःखरूपत्वात्, तपो व्यर्थमितीच्छताम् ।**
**बौद्धानां निहता बुद्धिर्बौद्धानन्दपरिक्षयात् ॥५॥**

इत्थं च दुःखेति- इत्थं-यत्तपः कष्टमिति भासनपूर्वकं तत्तपः व्यर्थं-निष्फलम् । कस्मात्? दुःखरूपत्वात् । तपःकरणे एव दुःखोद्वेगौ । यत्रानादरः स कथं हिताय भवति ? तथा इच्छताम् इति परभावसुखमिच्छतां-वाञ्छताम्, बौद्धानां बुद्धिः निहता-निश्चयेन हता । कस्मात् बौद्धानन्दपरिक्षयात्-बौद्धानन्दः [4]बौद्धं-ज्ञानं तस्य आनन्दः तस्य परिक्षयात् ज्ञानानन्दधाराक्षयात् कष्टरूपं तपः निष्फलम् ॥५॥

**यत्र ब्रह्म जिनार्चा च, कषायाणां तथा हतिः[5] ।**
**सानुबन्धा जिनाज्ञा च, तत्तपः शुद्धमिष्यते ॥६॥**

यत्र ब्रह्मेति, यत्र—यस्मिन् तपसि, ब्रह्म—मैथुनत्यागः विषयानभिष्वङ्गः अस्ति । यत्र जिनानामर्चा-पूजा-तत्त्वभक्तिर्वर्द्धते । पुनः यत्र कषायाणां—क्रोधादीनां [6]हतिः—नाशः, च—पुनः यत्र जिनाज्ञा—

---

१. माधुर्यरतः L.D.1. । २. सत्-शोभनम् उपायं...सर्वप्रतिषु । ३. अत्र किञ्चित् त्रुटितं भाति सर्वप्रतिषु, योग्यत्वादेष श्लोको गृहीतः । ४. बोधो-ज्ञानं L.D.1. । ५. हतिः S.M., V.2., B.2. D.1. । ६. हतिः S.M., B.1.2., V.2., A.D. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीवीतरागोक्तप्रवचनपद्धतिः सानुबन्धा-सापेक्षा, तत्तपः शुद्धमिष्यते । भावना च- प्रथममिन्द्रियाभिलाषनिरासे शान्तपरिणत्या सिद्धान्तोक्त-विधिना निरभिलाषस्य तपः विशुद्धं भवति । अनादिपरभावसुखस्पृहया किं केन न कृतं कष्टानुष्ठानम् ? यच्च स्वरूपनिरावरणार्थं निःसङ्ग-निर्मोहतत्त्वैकत्वरूपं व्याघातकपरभावाहारादिग्रहणनिवारणलक्षणं तपः श्रेष्ठमिति। उक्तं च-

**निरणुट्ठाणं मयमोहरहियं सुद्धतत्तसंजुत्तं ।**
**अज्झत्थभावणाए तं तवं कम्मखयहेउं ॥१॥ ॥६॥**

**तदेव हि तपः कार्यम्, दुर्ध्यानं यत्र नो भवेत् ।**
**येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि वा ॥७॥**

तदेव हीति-हीति निश्चितम्, तदेव तपः कार्यं-करणीयम् [1]यत्र दुर्ध्यानं-पुद्गलाशंसारूपमनिष्टतारूपं नो भवेत् । येन तपसा योगाः-मनोवाक्कायरूपाः, न हीयन्ते स्वरूपरमणं तत्त्वानुभवतः न हीयन्ते । यत्र इन्द्रियाणि न क्षीयन्ते धर्मसाधनस्वाध्यायाहिंसादि तत्कार्यप्रवृत्तिर्न क्षीयते क्षयं न लभते । इत्यनेन साधनीभूतचेतनावीर्याणां हानिः न स्यात्, तत्तपः शुद्धं कार्यं-कर्त्तव्यमिति ॥७॥

**मूलोत्तरगुणश्रेणिप्राज्य[2]साम्राज्यसिद्धये ।**
**बाह्यमाभ्यन्तरं चेत्थम्, तपः कुर्यान्महामुनिः ॥८॥**

॥ इति तपोऽष्टकम् ॥३१॥

मूलोत्तरगुणेति महामुनिः-परमनिर्ग्रन्थः इत्थं तपः कुर्यात् । किंभूतं तपः ? मूलोत्तरगुणश्रेणिप्रा[3]ज्यसाम्राज्यसिद्धये-मूलाः-मूलभूता ज्ञान-चारित्रादयः गुणाः, उत्तराः-समितिगुप्त्यादयः गुणाः, तेषां श्रेणिः-विशेषतः गुणप्राग्भावरूपा, तया प्राज्यं-प्रचुरं यत् साम्राज्यं-प्रभुत्वं तस्य सिद्धिः-निष्पत्तिः तस्यै इत्यनेन स्वकीयगुणप्रभुत्वनिष्पत्त्यर्थं बाह्यं

---

१. तत्र V.1. । २. प्राज्यं A.D., V.1. । ३. प्राज्यं मूलाः V.1., A.D., B.1.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकोल्लासकारणत्वात् प्रभावकतामूलमाभ्यन्तरम् अन्यलोकैः ज्ञातुमशक्यं[1] स्वगुणैकतारूपं च तपः कार्यम् ।

तपो द्विविधम् । संवरात्मकं निर्जरात्मकम् । तत्र संवरात्मकं ज्ञान-चारित्रयोः तीक्ष्णत्वम्, सचेतनावीर्यादीनां स्वरूपैकत्वम् । द्वितीयं तु ज्ञानचारित्रवीर्यभोगगुणसंकरसंभवं गुणास्वादैकत्वानुभववत् सर्वपरभावा-स्पृहतारूपम् । जघन्यतः अंशत्यागपूर्वकदेशतोऽनीहा[2]गुणैकत्वम्, उत्कृष्टतः शुक्लध्यानचरमाध्यवसायलक्षणम् । परभावास्वादनलोला-शुद्धपरिणाममपहाय स्वरूपानन्दमग्नतारूपं करणीयम् । अभिनवकर्मा-ग्रहणरूपसंवरः पूर्वसत्तागतादिकर्मनिर्जरणात्मकं तपः । तपसा हि देवादि-फलाभिलाष एव न युक्तः । निर्जरात्मकेन कथं शुभबन्धः ? यच्च [3]तपोवद्धि देवायुःप्रभृति निबद्धं [4]तत्तपो रागादिप्रशस्ताध्यवसाय-हेतुकमिति । [5]अतः सर्वकर्मापगमप्रादुर्भूतानन्तज्ञानदर्शनसिद्धिसुखं तस्योत्सर्गकारणं तपः । आध्यात्मिकं परभावशून्यस्वभावैकत्वानुभव-तीक्ष्णत्वलक्षणं परमं साधनम् । **इति व्याख्यातं तपोऽष्टकम्** ॥३१॥ तद्व्याख्याने च साधनस्वरूपमपि व्याख्यातम् ।

## ॥ अथ सर्वनयाश्रयणाष्टकम् ॥ ३२ ॥

अथानेकनयात्मके जैनमार्गे एकान्ततापक्षपातपरित्यागेन सर्वनयेषु समभावरूपपरिणामः रागद्वेषाभावलक्षणस्वस्वस्थानसाधनविज्ञानरमणा-ध्यवसायः कार्यः । एकान्तग्रह एव मिथ्यात्वम् । सर्वत्र सापेक्षता सम्यग्दर्शनम् । तच्च—यथार्थोपयोगिनां यथार्थप्रवृत्तिमतां च भवति । अतः एकताग्रहत्यागसर्वनयसमाश्रयणोपदेशकं द्वात्रिंशत्तममष्टकमुवाच श्रीमद्**यशोविजयोपाध्यायः** परमरहस्यज्ञाता ।

अरे ! नास्ति धर्मः बाह्यपद्धत्या । निमित्तकारणरूपा सा । **श्रीपञ्चमाङ्गे** प्राणातिपातसंवरादयः सर्वे अमूर्ता जीवस्वरूपा उक्ताः ।

---

१. ज्ञातुमेवाशक्यं L.D.1. । २. हीन V.2.। ३. तपोविद्धिः L.D.1. S.M. । ४. तत्त्वशोक० S.M. । ५. अपूर्वतः S.M. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येन हि जीवस्वभावरूपः शुद्धनिर्विकल्परत्नत्रयीलक्षणधर्मः प्रतीतः । स एव सम्यग्दृष्टिः । न हि कुशकासावलम्बनेन समुद्रतरणं भवति । उक्तं च **श्रीहरिभद्र**पूज्यैः–

**आयप्पभवं धम्मं, आयंतियं अप्पणो सरूवं च ।**
**दंसणनाणचरित्तेगत्तं जीवस्स परिणामं ॥१॥**

रे भव्य ! हिताय वदामः । सर्वागमेषु धर्म आत्मनः शुद्धा परिणतिरेव । निमित्तस्योपादानप्राकट्यहेतुत्वाद् बाह्याचरणादिकं साधकै-रभ्यस्यम्[१], तथापि धर्महेतुत्वेनोपादेयं श्रद्धावद्भिः तत् । स्वात्मक्षेत्र-व्यापकरूपानन्तपर्यायलक्षणं धर्मः **उत्तराध्ययनावश्यकादि**सर्व-सिद्धान्ताशयः इति । तच्च (स च) रागद्वेषरहितानां भवति । राग-द्वेषाभावः सर्वजीवेषु सर्वपुद्गलेषु समत्वं कृत्वा आत्मगुणेषु ज्ञानादिषु कारणकार्यरूपेषु बहुपरिणतिपरिणतेषु रागद्वेषाभावपरिणतेषु गौणमुख्य-त्वतारूपपरिणामपरिहारः समः साध्यः, पूर्वं मिथ्यात्वोदयेन मुख्ये मुख्यत्वबोधपूर्वकैकान्तवादः । स च सम्यग्दर्शनेन कारणकार्यतया अयं मुख्यश्चायं गौणः । न ह्यनन्तपर्यायात्मके वस्तुनि कस्यापि स्वपर्यायस्य गौणमुख्यत्वे, क्षयोपशमज्ञानेन सर्वधर्माणामेकसमयावबोधो दुर्लभः, असंख्येयसमयेनापि देशज्ञायकत्वात् । तस्य ज्ञानं गौणमुख्यतारूपेण प्रवर्त्तते । उक्तं च **तत्त्वार्थे–[128] अर्पितानर्पितसिद्धेः** [अ० १ सू० ३१] सूत्रस्य व्याख्याने, सर्वज्ञानां तु सर्वमपि एकसमयेनैव ज्ञातत्वाद् न गौणमुख्यताज्ञानम् । वचसि क्रमवर्त्तित्वाद् भवति । एवं न्यूनशक्त्या गौणमुख्यत्वम्, न रागद्वेषपरिणत्या । रागद्वेषपरिणामो बन्धहेतुः । अतः नयस्वरूपेण यथार्थबोधाय वस्तुविवेचनं हितम्, न रक्तद्विष्टता । तेन ज्ञानसाम्यं करणीयम् । ज्ञानसाम्यमेव चारित्रम् । तदर्थमेव निरूपयति–

१. रभ्यस्यते L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**धावन्तोऽपि नयाः सर्वे, स्युर्भावे कृतविश्रमाः ।**
**चारित्रगुणलीनः स्यादिति सर्वनयाश्रितः ॥१॥**

धावन्तोऽपि नया इति- सर्वे नयाः धावन्तः— स्वस्वपक्षस्थापन-पुरःसरा अपि भावे-शुद्धात्मधर्मणि कृ[1]तविश्रमाः स्युः-स्थिरा भवन्ति । अतः मुनिः—चारित्रगुणलीनः-चयरिक्तीकरणं चारित्रं तदेव गुणः, तत्र लीनः-वर्द्धमानपर्यायः सर्वनयाश्रितः स्यात् । द्रव्यनये-कारणत्वग्राहके, भावनये-तत्कार्यत्वग्राहके, क्रियानये-साधनोद्यमरूपे, ज्ञाननये-तद्विश्राम-रूपे, आश्रितः-आसक्तः स्यात्—भवेदित्यर्थः । उक्तं **चानुयोगद्वारे—**

[129] **सव्वेसिं पि नयाणं बहुविहवत्तव्वयं निसामित्ता ।**
**तं सव्वनयविसुद्धं, जं चरणगुणट्ठिओ साहू ॥१॥**

[सू० ६०६, प० १४१]

अत उक्तं **श्रीभगवतीटीकायाम्—**

[48] **जइ जिणमयं पव्वज्जह, ता मा ववहारणिच्छए मुयह ।**
**इक्केण विणा तित्थं, छिज्जइ अन्नेण उ तच्चं ॥**

अतः साम्यं हितम्, पुनस्तदेव द्रढयति-

**पृथग् नया मिथः पक्ष-प्रतिपक्षकदर्थिताः ।**
**समवृत्तिसुखास्वादी, ज्ञानी सर्वनयाश्रितः ॥२॥**

पृथग्नया इति- एते मिथः-परस्परम्, पृथग्-भिन्नं भिन्नम्, पक्ष-प्रतिपक्षकदर्थिताः-वादप्रतिवादकदर्थनाविडम्बिता नया दुर्नया इत्यर्थः । अत एव ज्ञानी यथार्थभासनया सर्वनयाश्रितः-सर्वनयमार्गसापेक्षाव-बोधमग्नो भवति । कथम्भूतो ज्ञानी ? समवृत्तिः-इष्टानिष्टत्वताभावः, तस्य सुखास्वादनशीलः । उक्तं च-

---

१. कृतविश्रामाः S.M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[130] अन्योऽन्यपक्षप्रतिपक्षभावाद्, यथा परे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छन्, न पक्षपाती समयस्तथा ते ॥३०॥
[स्याद्वा०मं०गा०३०]

[131] उदधाविव सर्वसिन्धवः, समुदीर्णास्त्वयि नाथ[1] ! दृष्टयः ।
न च तासु भवान् प्रदृश्यते, प्रविभिन्नासु सरित्स्विवोदधिः ॥ ॥
[सिद्धसेनीया द्वा० द्वा०१४-५]

तथा च **सन्मतौ**-

[132] ण य तइओ अत्थि णओ, ण य सम्मत्तं ण तेसु पडिपुन्नं।
जेण दुवे एगंता, विभज्जमाणा अणेगंतो ॥१४॥
जह एए तह अण्णे, पत्तेयं दुण्णया णया सव्वे ।
हंदि हु मूलणयाणं, पण्णवणे वावडा ते वि ॥ १५ ॥
सव्वनयसमूहम्मि वि, णत्थि णओ उभयवायपण्णवओ।
मूलणयाण उ आणं, पत्तेय विसेसियं बिंति ॥१६॥
[कां०१ गा०१४-१५-१६]

[71] तम्हा सव्वे वि णया, मिच्छादिट्ठी सपक्खपडिबद्धा ।
अण्णोण्णणिस्सिया [2]उण, हवंति सम्मत्तसब्भावा ॥२१॥
इत्यादि ॥२॥
[कां०१ गा०२१]

साम्यतां कथयन्नाह-

**नाप्रमाणं प्रमाणं वा, सर्वमप्यविशेषितम् ।**
**विशेषितं प्रमाणं स्यादिति सर्वनयज्ञता ॥३॥**

नाप्रमाणमिति—सर्वं वाक्यमेकान्तेन अप्रमाणं न, वा-अथवा प्रमाणमपि न, विधिनिषेधोपदेशः । प्रथमं तदेव प्रमाणम् । गुणवृद्धौ ध्यानलीनानां तदेवाप्रमाणम् । यच्चानेषणीयादिकं पूर्वमप्रमाणं तदेव गीतार्थादिषु प्रमाणम् । **भगवतीटीकातो** ज्ञेयम् । [3]तथापि गाथा-

---

१. सर्व० पाठान्तरम् । २. पुण L.D.1. S.M. । ३. तत्रापि A.D.B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[63] परमरहस्समिसीणं, सम्मत्तगणिपिडगहत्थसाराणं ।**
**परिणामियं पमाणं, णिच्छयमवलंबमाणाणं ॥६०२॥**

[पञ्चव०प्र०गा० ६०२]

**पञ्चवस्तुकटीकायाम्—एसणमाई तणुयोगा** इत्यादि सर्वमप्यविशेषितम् । अन्यसमयस्थं सद्वचनं विशेषरहितम् । विशेषितं विशेषणसंयोजितं प्रमाणं स्यात् । विषयपरिशोधकनययोजितं प्रमाणं स्यात् । उपलक्षणात् स्वसमयवचनमपि अननुयोगोक्तमप्रमाणं भवति, **पञ्चमाङ्गे मण्डुकश्रावका**धिकारतो ज्ञेयम् । उक्तं च-

**[133] सुत्तत्थो खलु पढमो, बीओ निज्जुत्तिमीसिओ भणिओ ।**
**तइओ य निरविसेसो, एस विही होइ अणुओगे ॥२४॥**

[आव० नि० गा०-२४]

अनुयोगशून्यं वचनं न प्रमाणं भवति । उक्तं च-

**[134] अपरिच्छियसुअणिहसस्स, केवलमभिन्नसुत्तचारिस्स ।**
**सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडइ ॥४१५॥**

[उप०मा० गा०-४१५]

पुनः हेमाचार्यैः [हरिभद्राचार्यैः]-

**[135] तत्रापि न च द्वेषः, कार्यो विषयस्तु यत्नतो मृग्यः ।**
**तस्यापि न सद्वचनम्, सर्वं च यत्प्रवचनादन्यत् ॥१३॥**

[षोड०प्र०षो०-१६श्लो०१३]

इति विचार्य [1]स्याद्वादोपयोगेन सर्वनयज्ञता कार्या । पुनः साम्यमवलम्बनीयं पक्षपरिहारेण आत्मधर्मनिष्ठता हिता ॥३॥

**लोके सर्वनयज्ञानाम्, ताटस्थ्यं वाप्यनुग्रहः ।**
**स्यात्पृथङ्नयमूढानाम्, स्मयार्त्तिर्वातिविग्रहः ॥४॥**

१. स्याद्वादोपयोगं सर्वं नयवता कार्यम् L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोके सर्वेति–लोके- दक्षजनसमूहे (सर्व) 'नयज्ञानां-सर्वनय-रहस्यविज्ञानां तार्टस्थ्यं[1]-तटस्थत्वं पार्श्ववर्त्तित्वम्, वा इति व्यवस्थायाम् । अपि-समुच्चये, अनुग्रहः-उपकाराय भवति । सर्वत्र परीक्षकत्वं हितम् । पृथङ् नयमूढानाम्-एकैकनयपक्षग्रहवर्त्तिनाम्, स्मयार्त्तिः-मानोन्मादपीडा, वा-अथवा, अतिविग्रहः-कदाग्रहः स्यात्- भवति । उक्तं च-

**[136] ★कालो सहावणियई, पुव्वकयं पुरिसकारणेगंता।**
**मिच्छत्तं ते चेव उ समासओ होंति सम्मत्तं ॥५३॥**

[सन्म०-कां०-३ गा० ५३]

अत्र पुरुषाकारस्य उपादानकारणत्वात् मुख्यत्वम्, कालस्वभाव-पूर्वकृतानां[2] तु निमित्तासाधारणापेक्षा कारणत्वम्, नियतेश्च कारणत्व-मौपचारिकम्, अस्या अनित्यत्वं **विचारामृतसंग्रहे** उक्तमस्ति, इति नियतपक्षः आजीविकानां मिथ्याग्रहरूपः, न जैनानाम्, एवमंशस्यापि जैनमार्गे विवक्षितत्वात् समुच्चयवचनम् ॥४॥

एवं सापेक्षा श्रद्धा कार्या इत्युपदिशन्नाह-

**श्रेयः सर्वनयज्ञानाम्, विपुलं धर्मवादतः ।**
**शुष्कवादविवादाच्च, परेषां तु विपर्ययः ॥५॥**

श्रेयः सर्वेति–अत्र च **[137] श्रीहरिभद्रोक्ताष्टके** [अष्ट०१२, श्लो०१] **वादत्रयस्वरूपं तद् यथा शुष्कवादः, विवादः, धर्मवादः । कण्ठतालुशोषण-मात्रः शुष्कवादः, यथार्थताशून्यः कषायोपष्टम्भत्वात् त्याज्यः । परपक्षपरा-जयबुद्ध्या स्वपक्षस्थापनपुरःसरः विवादः, सोऽपि हेयः । तत्त्वज्ञानी परस्पर[3]-**

---

१. माध्यस्थ्यम् L.D.1. । २. पूर्वकृता A.D.V.1. विना । ३. परस्य तत्त्वा० S.M. विना ।

★ कालो सहाव णियइ, पुव्वकयं पुरिषकारणे पंच ।
समवाये समत्तं, एगत्ते होइ मिच्छत्तं ॥१॥ सर्वप्रतिषु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वावबोधाय तत्त्वार्थिनं प्रति यद्वदति स धर्मवादः । सर्वनयज्ञानां-सर्वनयज्ञानवताम्, धर्मवादतो वक्ता-तत्त्वकथनरसिकः, श्रोता च तत्त्वज्ञानरसिक इति उभयोर्यथार्थयोगे धर्मकथनतो विपुलं श्रेयः-कल्याणम्। यदि च न श्रोता तादृक् तथापि तत्त्वे[१]बोधनेच्छया धर्मकथनं हिताय । च-पुनः, शुष्कवादात्, च पुनः, विवादात् परेषामेकान्तदृष्टीनां विपर्ययः-अश्रेयः-अकल्याणम् । सूक्ष्मार्थकथनं पात्रयोग्यतया धर्महितकरणं तु भावानुकम्पा ॥५॥

अथ सन्मार्गप्रशंसनामाह-

**प्रकाशितं जनानां यैर्मतं सर्वनयाश्रितम् ।**
**चित्ते परिणतं चेदम्, येषां तेभ्यो नमो नमः ॥६॥**

प्रकाशितमिति—यैः-सर्वज्ञाचार्योपाध्यायैः-सम्यग्दर्शनज्ञानचारित्रपरिणतैः श्रीहरिभद्रादिभिः संविग्नपाक्षिकैः यथार्थोपदेशकैः, सर्वनयाश्रितं-सर्वनयसापेक्षं स्याद्वादगर्भितं मतमिष्टं शासनं मोक्षाङ्गरूपं प्रकाशितम्, तेभ्यो नमः । शुद्धोपदेशका एव विश्वे पूज्याः । उक्तं च **भवभावनायाम्—**

**भद्दं बहुस्सुआणं, बहुजणसंदेहपुच्छणिज्जाणं ।**
**उज्जोइअभुवणाणं, झीणंमि वि केवलमयंके ॥५०६॥**
**ते पुज्जा तियलोए, सव्वत्थ वि जाण निम्मलं नाणं ।**
**पुज्जाण वि पुज्जयरा, नाणी य चरित्तजुत्ता य ॥५०५॥**

[गा० ५०६. ५०५]

तथा **उपदेशमालायाम्-**

**[138] सावज्जजोगपरिवज्जणाओ सव्वुत्तमो जइधम्मो ।**
**बीओ सावगधम्मो, तइओ संविग्गपक्खपहो ॥५११॥**

१. तत्त्वावबो० L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुज्झइ जई सुचरणो, सुज्झइ सुस्सावगो वि गुणकलिओ।**
**ओसन्नचरणकरणो, सुज्झइ संविग्गपक्खरुई ॥५१३॥**

**संविग्गपक्खियाणं, लक्खणमेयं समासओ भणियं ।**
**ओसन्नचरणकरणा वि, जेणं कम्मं विसोहंति ॥५१४॥**

**सुद्धं सुसाहुधम्मं, कहेइ निंदइ य नियमायारं ।**
**सुतवस्सियाण पुरओ, होई सव्वोमरायणिओ ॥५१५॥**

**वंदई न य वंदावइ, किइकम्मं कुणइ कारवइ नेव ।**
**अत्तट्ठा न वि दिक्खइ, देइ सुसाहूण बोहेउं ॥५१६॥**

[गा० ५१३-५१४-५१५-५१६]

इत्यादि गुणोपेतैर्यदुपदिष्टं तत्सत्यम् । च–पुनः, इदं-स्याद्वाद-गर्भितं[१]-तत्त्वधर्मस्वरूपं येषां चित्ते परिणतं श्रद्धानभासनरमणादरतया व्याप्तं तेभ्योऽपि नमः-प्रणामोऽस्तु । सर्वज्ञोक्तमार्गानुसारिणोऽपि धन्याः, किं तत्परिणामपरिणतानाम् । नमः सर्वज्ञशासनाय । नमः सर्वज्ञमार्ग-वर्त्तिपुरुषसंघाय ॥६॥

**निश्चये व्यवहारे च, त्यक्त्वा ज्ञाने च कर्मणि ।**
**एकपाक्षिकविश्लेषमारूढाः शुद्धभूमिकाम् ॥७॥**
**अमूढलक्ष्याः[२] सर्वत्र, पक्षपातविवर्जिताः ।**
**जयन्ति परमानन्दमयाः सर्वनयाश्रयाः ॥८॥**

॥ इति सर्वनयाश्रणाष्टकम् ॥ ३२ ॥

निश्चय इति अमूढलक्ष्या इति—एवंविधाः पुरुषाः जयन्ति-सर्वो-त्कर्षेण वर्त्तन्ते इति । कथम्भूताः पुरुषाः ? निश्चये—शुद्धात्मपरिणति-रूपे, च-पुनः, व्यवहारे—वीर्यप्रवर्त्तनरूपे, च-पुनः, ज्ञाने-उपयोगलक्षणे,

---

१. गर्भित० L.D.1. S.M. B.1.2. । २. लक्षाः सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणि—क्रियापक्षे, एकपाक्षिकविश्लेषम्-एकान्तग्रहरूपं भ्रमस्थानं त्यक्त्वा-अपहाय, शुद्धभूमिकां—ज्ञानपरिपाकरूपां भूमिकामारूढाः-प्राप्ताः ज्ञानानुभवस्थानस्थाः । पुनः—अमूढलक्ष्याः- लक्ष्यं[१]-वेध्यं अथवा—लक्ष्यं[२]—शुद्धात्मस्वरूपं तत्र अमूढाः-मूढतारहिता अमूढाः । लक्ष्ये[३]-तत्स्वरूपे ये ते सर्वत्र जीवाजीवादौ इष्टानिष्टवस्तुनि पक्षपातः-एकान्तताग्रहरूपः, तेन विवर्जिताः—रहिताः परमः—अमूर्त्तः आनन्दो येषां ते तन्मयाः । सर्वे च ते नयाश्च सर्वनयाः तेषाम् आश्रयाः—आधाराः सर्वनयाश्रयाः । एवंस्वरूपाः पुरुषाः जयन्ति सम्यग्दर्शनादि-गुणपूर्णाः । इत्यनेन स्वसत्ताधर्मसाधनोद्यतस्वकायचेतनादिपरिणतिरूप-चक्रस्य साधनव्यापारप्रवृत्तस्य प्रेरकाः समस्तपरभावप्रसङ्गवर्जिताः स्याद्वादनयमार्गोपलक्षितयथार्थवस्तुस्वरूपा आचार्योपाध्यायाः जयन्ति । विश्वविश्वव्यामोहनिवारणप्र[४]वणवाक्यामृतदाननिरस्तानादिमोहकालकूटाः स्वतत्त्वानन्तसंपदः[५] विलासलीलाकलिताः निर्ग्रन्था अपि महाराजाः[६], असङ्गा अपि अनन्तगुणसंधारणाव्याप्ताः, निराकुला अपि स्वतत्त्वसाधन-व्याकुलाः, वनवासिनोऽपि स्वपर्यायमकरन्दपानमग्नाः श्रीमत्सर्वज्ञोक्ता-ज्ञानिर्वाहधौर्याः, मार्गानुसारितो यथाशक्तिगुणप्रवर्द्धनानिबद्धलक्षाः, द्रव्य-भावसाधनेन शुद्धपरमात्मसाध्यदत्तदृष्टयः ते एव ज्ञानसारग्रहणकुशला इति ॥७-८॥

### ॥ इत्यनेन सर्वनयाश्रयणाष्टकं व्याख्यातम् ॥३२॥

द्वात्रिंशदष्टकविवरणं निरूपितम् । सांप्रतमुपसंपहारायाह- सर्वाष्टकानां भावनाभिधानकथनं निर्दिशति[७]-

---

१. लक्षः-वेध्यः सर्वप्रतिषु । २. लक्ष्यः शुद्धात्मस्वरूपः सर्वप्रतिषु । ३. लक्षे सर्वप्रतिषु । ४. प्रवहण V.1. । ५. संपद्विलास० V.1. विना सर्वप्रतिषु । ६. महाराजानः सर्वप्रतिषु । ७. निदर्शयति V.1.B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पूर्णो मग्नः स्थिरोऽमोहो, ज्ञानी शान्तो जितेन्द्रियः ।**
**त्यागी क्रियापरस्तृप्तो, निर्लेपो निःस्पृहो मुनिः ॥१॥**

पूर्ण इति—अनादिपरभावानन्तग्रासग्रसनेऽप्ययं जीवस्तृष्णाव्याप्तत्वादपूर्ण एव । स स्वरसास्वादनेन स्वतत्त्वानन्तकपूर्णः, तदास्वादाबाधादिसर्वगुणनिष्पत्तौ पूर्ण इति पूर्णत्वस्वरूपाभिधायकं **प्रथमाष्टकम्** । यः पूर्णः स एव मग्नः, तदनुभवे लीनः सा एव लीनता या स्वरूपे भवति, परभावलीनता हि अनन्तसंसारभ्रमणमूलम्, अत एव सा मग्नता अनादीना त्याज्या, या स्वरूपमग्नता सा एव मग्नता इति तत्प्रतिपादनारूपं **द्वितीयाष्टकम्** । यो मग्नः स स्थिरो भवति, न्यूनस्य ग्रहणेच्छया चापल्यम्, पूर्णस्य ग्राह्याभावात् स्थैर्यम् (अतः **स्थिराष्टकम्**) । यः स्थिरः स अमोहः-मोहरहितः-(अतः **अमोहाष्टकम्**) । मोहरहितस्यैव तत्त्वज्ञता भवति, तेन **तत्त्वज्ञानाष्टकं पञ्चमम्** । यो ज्ञानी स शान्तः-उपशमवान् भवति अतः **शमाष्टकम्** । यः शान्तः स एव इन्द्रियाणि जयति अतः **इन्द्रियजयाष्टकम्** । यः इन्द्रियविजयी स एव त्यागी-परभावपरिहारी भवति । उक्तं च-

**[139] बान्धवधनेन्द्रियत्यागात् त्यक्तभयविग्रहः साधुः ।**
**त्यक्तात्मा निर्ग्रन्थः, त्यक्ताहंकारममकारः ॥१७३॥**

[प्रशम०श्लो०१७३]

(अतः **त्यागाष्टकम्**) । स एव वचनानुक्रमतोऽसङ्गक्रियारतो भवति अतः **क्रियाष्टकम्** । अत एव तृप्तः-आत्मा सन्तुष्टः तेन **तृप्त्यष्टकम्** । यस्तृप्तः स निर्लेपः—रागादिलेपरहितः तेन **निर्लेपाष्टकम्** । निर्लेपो निःस्पृहो भवति तेन **निःस्पृहाष्टकम्** । (यः निःस्पृहः स मुनिः मौनवान् भवति तेन **मौनाष्टकम्** ) ॥१॥ पुनः—

**विद्याविवेकसंपन्नो, मध्यस्थो भयवर्जितः ।**
**अनात्मशंसकस्तत्त्वदृष्टिः सर्वसमृद्धिमान् ॥२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्याविवेकेति- एवंविधः शुचिः, विद्याविवेकसम्पन्नः-विद्या-श्रुताभ्यासः, विवेकः-स्वपरविभजनात्मकः, ताभ्यां सम्पन्नः, तत्कथिते[1] **विद्याष्टक-विवेकाष्टके** । यो हि विद्याविवेकसम्पन्नः, स मध्यस्थः-इष्टानिष्टे वस्तुनि रागद्वेषरहितो भवति, तेन **माध्यस्थ्याष्टकम्** । मध्यस्थो हि भयरहितः, तेन **भयविवर्जनाष्टकम्** । भयरहितस्य नात्मश्लाघा इष्टा इत्यनेन अनात्मशंसा भवति **तन्निरूपणाष्टकम्** । यः लौकिकश्लाघा-कीर्त्याद्यभिलाषरहितः स तत्त्वदृष्टिः, तेन **तत्त्वदृष्ट्यष्टकम्** । यस्य तत्त्वदृष्टिः स एव सर्वसमृद्धिः[2] परमसंपदावान् भवति, तेन (सर्व-) **समृद्ध्यष्टकम्** ॥२॥

**ध्याता कर्मविपाकानामुद्विग्नो भववारिधेः ।**
**लोकसंज्ञाविनिर्मुक्तः, शास्त्रदृग् निष्परिग्रहः ॥३॥**

ध्यातेति—यः समृद्धः स काले विचित्रविपाकोदये कर्मविपाकानां ज्ञाता ध्याता च भवति, (अतः **कर्मविपाकाष्टकम्**) । यः कर्म-विपाकध्यानी स एव भवात्-संसारात् उद्विग्नः भवति, अत एव **भवोद्वेगाष्टकम्** । यः भवोद्विग्नः स लोकसंज्ञामुक्तो भवति, तेन **लोकसंज्ञात्यागाष्टकम्** । स एव शास्त्रदृग् च पुनः निष्परिग्रहः भवति । अत एव **तत्प्ररूपकाष्टकद्वयम्**[3] । (शास्त्राष्टकं परिग्रहाष्टकं च) ॥३॥

**शुद्धानुभववान् योगी, नियागप्रतिपत्तिमान् ।**
**भावार्चाध्यानतपसां भूमिः सर्वनयाश्रयी ॥४॥**

शुद्धेति, यो निष्परिग्रहः स एव शुद्धात्मतत्त्वानुभववान् भवति, तेना**नुभवाष्टकम्** । यः स्वरूपानुभवी स एव योगी-योगध्यानमयः, यः योगी स एव निश्चयेन कर्मयागकर्ता तत्प्ररूपकाष्टकद्वयम् (योगाष्टकं नियागाष्टकं च) । स एव भावार्चा-भावपूजा तथा ध्यानं-ध्येयैकत्वं

१. तत्कथकौ विद्याष्टक-विवेकाष्टकौ सर्वप्रतिषु । २. सर्वसमृद्धिमान् L.D.1. । ३. तत्स्वरूप० L.D.1. ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेव तपः तेषां भूमिः स्थानं भवति, एतत्स्वरूपनिरूपकमष्टकत्रयम्, (भावपूजाष्टकं ध्यानाष्टकं तपोऽष्टकं च) । ततः सर्वनयाश्रयणं सम्यग्ज्ञानं तत्प्ररूपकं द्वात्रिंशत्तममष्टकम् ॥४॥

एवं कारणकार्यपूर्वकाधिकारद्वात्रिंशत्फलकोपेतं ज्ञानसारं नाम यानपात्रम् । यदारूढाः मिथ्याज्ञानभ्रमणभीषणमतत्त्वैकत्वतारूपजलगम्भीरम्, असंयमपाथोधिमुल्लङ्घ्य सम्यग्दर्शनप्रतोलीमण्डितम्, सम्यग्ज्ञाननिधानोपेतम्, सम्यक्चारित्रानन्दास्वादमधुरम्, असंख्येयप्रदेशस्वसंवेद्यतत्त्ववेदकतासंपत्प्रवणम्, जिनप्रवचनप्राकारोत्सर्गापवादपरिखासंयुतम्, नयगमनिक्षेपानेकगुणौघं लभन्ते स्याद्वादपत्तनं भव्याः । इति ज्ञानसारफलोपदेशकं ग्रन्थस्य मौलिरूपमन्त्याधिकारमाह श्रीमत्पाठकेन्द्रः ॥४॥

**स्पष्टं निष्टङ्कितं तत्त्वम्, अष्टकैः प्रतिपन्नवान् ।**
**मुनिर्महोदयं ज्ञानसारं समधिगच्छति ॥५॥**

स्पष्टं निष्टङ्कितमिति—मुनिः—त्रिकालाविषयी, अष्टकैः स्पष्टं—प्रकटम्, तत्त्वं—वस्तुधर्म आत्मपरिणमनरूपम् निष्टङ्कितं—निर्द्धारितम्, प्रतिपन्नवान्—अङ्गीकृतवान् । स मुनिः महोदयं—मोक्षरूपं ज्ञानसारं—ज्ञानस्य सारं चारित्रम्, तथा परां—मुक्तिम्, समधिगच्छति—प्राप्नोति । उक्तं च –

**[140] सामाइअमाईअं, सुअनाणं जावबिंदुसाराओ ।**
**तस्स वि सारो चरणं, सारं चरणस्स निव्वाणं ॥११२६॥**

[विशेषा० गा० ११२६]

तं प्राप्नोति ॥५॥

**निर्विकारं निराबाधम्, ज्ञानसारमुपेयुषाम् ।**
**विनिवृत्तपराशानाम्, मोक्षोऽत्रैव महात्मनाम् ॥६॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्विकारमिति- महात्मनां-सम्यगात्मभावपरिणतानाम्, अत्रैव- अस्मिन्नेव भवे मोक्षः । यद्यपि सकर्मकत्वे मोक्षाभावः एव, तथापि अत्रानन्दसमताशीलानां स्वभावसुखलीनानां वर्णिकारूपेण मोक्षस्यारोपः कथितः । कथंभूतानां महात्मनाम् ? निर्विकारं-विकाररहितम्, निराबाधं-सर्वबाधा पुद्गलसंयोगरूपा तया रहितम्, ज्ञानं-तत्त्वबोधः, तस्य सारं-तत्त्वैकत्वरूपं चारित्रम् उपेयुषां-प्राप्नुवताम् । पुनः कथंभूतानां महात्मनाम्? विनिवृत्ता परस्य आशा येषां ते तेषां विनिवृत्तपराशानां-सर्वथा पुद्गलाशा-रहितानां निर्वाञ्छकानाम् इहैव मोक्ष इति ॥६॥

**चित्तमार्द्रीकृतं ज्ञान-सारं सारस्वतोर्मिभिः ।**
**नाप्नोति तीव्रमोहाग्निश्लेषशोककदर्थनाम् ॥७॥**

चित्तमिति-[१]ज्ञानसाराभिधं ग्रन्थं तस्य सरस्वती-वाणी तस्या इमे ऊर्मयः-कल्लोलास्तैः येषां चित्तम् आर्द्रीकृतम् तेषां जीवानां तीव्रो मोहाग्नेः आश्लेषः-तेन यः शोकः तस्य कदर्थना-पीडा, तां नाप्नोति । इत्यनेन ज्ञानसारासारवर्षणार्द्रीकृतचित्तानां मोहाग्नितापो न भवति ॥७॥

पुनस्तदेव कथयति-

**अचिन्त्या का[२]पि साधूनाम्, ज्ञानसारगरिष्ठता ।**
**गतिर्ययोर्ध्वमेव स्यादधःपातः कदापि न ॥८॥**

अचिन्त्या कापीत्यादि भो भव्य ! साधूनां-परमपदनिष्पादकानाम्, [३]कापि अचिन्त्या-चिन्तितुमशक्या, ज्ञानसारगरिष्ठता अस्ति । ज्ञानं-यथार्थस्वपरावबोधः, तस्य सारं चारित्रं-वैराग्यता तस्य गरिष्ठता-गरिमा गुरुत्वं तत्स्वरूपमचिन्त्यं-दुर्विचारम् । अन्या गुरुता अधोगमनहेतुः, ज्ञानगुरुत्वम् ऊर्ध्वताहेतुः, अत एवाचिन्त्येति । यया-गरिष्ठतया

---

१. ज्ञानसाराभिधानं S.M., B.2. । २-३. क्वा S.M. विना सर्वप्रतिषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वगतिरेव स्यात्, अधःपातः कदापि न भवति, ऊर्ध्वता-द्रव्यतो जीवेभ्य उच्चत्वगोत्रोदयादिरूपा[१], क्षेत्रतः ऊर्ध्वलोकगमनरूपा, (कालतः....?) भावतः सम्यक्त्वाद्युत्तरोत्तरगुणारोहणरूपा, तेन यो ज्ञान-गरिष्ठः स ऊर्ध्वत्वं-स्वर्गापवर्गलक्षणं सम्यक्चारित्रादिगुणलक्षणम् ऊर्ध्वत्वं प्राप्नोति ॥८॥

पुनः ज्ञानक्रियाभ्यां मोक्षः न ह्येकस्यापि विरोधकः साधको भवति, क्रिया हि वीर्यविशोधिरूपा, ज्ञानं च चेतनाविशोधिरूपम्, चेतना-वीर्ययोः शोधिप्राप्तयोः सतोः एव सर्वसंवरः । तथापि क्रियातः ज्ञानस्याधिक्यं दर्शयति-

**क्लेशक्षयो हि मण्डूकचूर्णतुल्यः क्रियाकृतः ।**
**दग्धतच्चूर्णसदृशो, ज्ञानसारकृतः पुनः ॥९॥**

क्लेशक्षयो हीति—हीति निश्चितम्, क्रियाकृतः-क्रियोद्यमविहितः क्लेशक्षयः कर्मक्षयो मण्डूकचूर्णतुल्यो ज्ञेयः । यथा मण्डूकचूर्णं पुनः घनयोगतस्तत्रानेकाभिनवमण्डूकोत्पत्तिर्भवति, तथा—क्रियया अशुभकर्म क्षयति, तथापि शुभानां प्रचुरा वृद्धिः, पुनः शुभोपभोगकाले अशुभानां वृद्धिः इति ज्ञेयम् । पुरा-पूर्वम्, ज्ञानसारकृतः कर्मक्षयः दग्ध-तच्चूर्णसदृशः इति, इत्यनेन ज्ञानानन्देन[२] कृतः कर्मक्षयः पुनः न प्रभवति । यथा—मण्डूकचूर्णः दग्धो न मण्डूकोत्पत्तिहेतुर्भवति, **[46]** एत**दुपदेश-पदा**त्सर्वं ज्ञेयम्, [उपदेशप० प्र० गा०१९१] आगमेऽपि— **[141] सीलं सेयं सुअं सेयं,** [भगवती० श० ८, उ० १०, सू० ३५५] इत्यालाप-केन तथा **पञ्चनिर्ग्रन्थीशतके** मुनीनाम् अल्पश्रुतवताम् आहारादि-संज्ञास्ति, बहुश्रुतानाम् आहारादिसंज्ञानिषेध इति सर्वत्र योज्यम् ॥९॥

---

१. गोत्रोदयादि V.1., B.1.2., S.M. । २. ज्ञानानन्दकृतः L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ज्ञानपूतां परेऽप्याहुः, क्रियां हेमघटोपमाम् ।**
**युक्तं तदपि तद्भावम्, न यद्भग्नापि सोज्झति ॥१०॥**

ज्ञानपूतामिति–ज्ञानपूतां–ज्ञानेन पवित्राम्, क्रियां–शुभयोगव्यापारात्मकाम्, हेमघटोपमां (सुवर्णकलशसदृशीम्), परेऽपि–अन्ययूथिका अपि आहुः । एतद् युक्तम् । तदपि-हेमघटे भग्ने अपि, तद्भावं-हेममौल्यं नोज्झति । तथा सद्ज्ञानयुक्ता क्रिया, ततः पतितस्य भग्नस्यापि नाधिकस्थितिबन्धः । **बंधेण न वोलई कयावि** इति वचनात् । ज्ञानी क्रियायुक्तः स्थितिक्षयं करोति । ततः पतितोऽपि तत् स्थितिस्थानं नातिक्रामति । अतो ज्ञानपूर्वका एव तथ्या । तथा च **औपपातिकाङ्गे** मिथ्यादृष्टिः एकान्तेन द्रव्ययतिलिङ्ग[१]क्रियायुक्तः नवमग्रैवेयकान्तं गच्छति । तथापि स्थितौ पूर्णबन्धक एव । सम्यग्दृष्टिप्रतिपत्तौ[२] तत्पतितोऽपि मिथ्यात्वभावं गतोऽपि एककोटाकोट्यन्तरस्थितिं बध्नाति, नाधिकां बध्नाति । अतः ज्ञानस्याधिकत्वम् ॥१०॥

पुनः द्रढयति-

**क्रियाशून्यं च यद् ज्ञानम्, ज्ञानशून्या च या क्रिया ।**
**अनयोरन्तरं ज्ञेयम्, भानुखद्योतयोरिव ॥११॥**

क्रियाशून्यमिति-यद् ज्ञानं–तत्त्वावबोधः सत्स्वसंवेद्य[३]वेदनरूपम् क्रियाशून्यं–द्रव्यक्रिया आश्रवरोधनात्मिका तया शून्यम्, च-पुनः, क्रिया ज्ञानशून्या-तयोः अन्तरं भानुखद्योतयोरिव ज्ञेयम् । भानुतुल्यं ज्ञानम्, खद्योतप्रकाशतुल्या क्रिया ज्ञानशून्या ज्ञेया इति ॥११॥

**चारित्रं विरतिः पूर्णा, ज्ञानस्योत्कर्ष एव हि ।**
**ज्ञानाद्वैतनये[४] दृष्टिर्देया तद्योगसिद्धये ॥१२॥**

---

१. लिङ्गी V.1. । २. प्रतिपतितात् पतितोऽपि S.M. विना । ३. स्वसंवेदन० L.D.1. । ४. नयैः S.M., B.2. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रमिति—पूर्णा विरतिः चारित्रं स्वरूपरमणम्, तत् ज्ञानस्यैव उत्कर्षः हीति निश्चितं ज्ञेयम् । ज्ञानस्य उत्कृष्टावस्था चारित्रम्, ज्ञाने एवैकत्वं चारित्रम्। आत्मनः मूलव्याख्यायां ज्ञानदर्शनगुणद्वयमयत्वमेव । उक्तं च-**श्रीविशेषावश्यके**, **[142] उववाई उपांगे**ऽपि—**असरीरा जीवघणा उवउत्ता दंसणे य नाणेहिं** [सू०४३] इत्यादिवचनात् । अतो ज्ञाने स्थिरत्वं चारित्रम् । ज्ञानस्यानन्दः सुखं ज्ञानप्रकर्षावबोधः सुखम्, इति **भाष्योक्तेः** । तथा ज्ञानस्यास्वादनं भोगः एवं भावना पृथग्गुणानां भावनापि **विशेषावश्यके**- यतः चारित्रज्ञानादयः पृथग्गुणा इच्छन्ति । इत्यादिकं तेन अत्रोपयोगमयस्यात्मनः ज्ञानं मुख्यत्वेनोच्यते । ज्ञानाद्वैतनये ज्ञानमेवात्मा ज्ञानमेव साध्यम्, ज्ञाननिरावरणता सिद्धिः, एवं दृष्टिः देया, किमर्थं ? तद्योगसिद्धये, ज्ञानयोगस्य सिद्ध्यर्थं-निष्पत्त्यर्थम् । अतो ज्ञानपूर्विका क्रिया हिता । तेन ज्ञाने स्पर्शाख्ये महान्[१] अभ्यासो विधेयः, इति रहस्यम् । ज्ञानत्यागेन सिद्धिः, सर्वत्र साधने ज्ञानमेव प्रधानमिति ज्ञानसारस्यार्थितया भवितव्यम् ॥१२॥

अथ **श्रीमद्यशोविजयोपाध्यायैः** एतद् **ज्ञानसारा**भिधं शास्त्रं रचितम् । तत्क्षेत्रादिप्रतिपादकं वृत्तमुच्यते-

**सिद्धिं सिद्धपुरे पुरन्दरपुरस्पर्द्धावहे लब्धवान्,**
**चिद्दीपोऽयमुदारसारमहसा दीपोत्सवे पर्वणि ।**
**एतद्भावनभावपावनमनश्चञ्चच्चमत्कारिणाम्,**
**तैस्तैर्दीपशतैः सुनिश्चयमतैर्नित्योऽस्तु दीपोत्सवः** ॥१३॥

सिद्धिं सिद्धपुरे इति—अयं ग्रन्थः **सिद्धपुरे** नगरे सूत्ररचनया सिद्धिं लब्धवान् । पुनः उदारसारमहसा—प्रधानसारतेजसा दीपोत्सवे पर्वणि-दीपालिकादिने सम्पूर्णतां गतः । कथम्भूतोऽयं ग्रन्थः ? चिद्दीपः-ज्ञान-

१. महदभ्या० V.1., B.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदीपः । एतद्भावनभावपावनमनश्चञ्चच्चमत्कारिणां जीवानामेतस्य ग्रन्थस्य (भावनं)-भावना-आत्मतन्मयता तस्या भावा-अर्थोल्लासाः समाध्य-वसायाः तैः पावनं—पवित्रं मनः—चित्तं तत्र चञ्चन्—मनोहारी चमत्कारो येषां ते तेषाम् । तैस्तैः निर्मलोपयोगलक्षणैः दीपशतैः सुष्ठु निश्चयो वस्तुधर्मः तस्य यद् ज्ञानं तदेव मतमिष्टं तेषां ज्ञानचमत्कारिणां दीपोत्सवः नित्यः-निरन्तरः, अस्तु-भवतु । इत्यनेन यथार्थज्ञानगृही-तात्मरसमग्नानां नित्यं दीपोत्सव एवास्ति ॥१३॥

**केषांचिद्विषयज्वरातुरमहो चित्तं परेषां विषा-**
**वेगोदर्ककुतर्कमूर्च्छितमथान्येषां कुवैराग्यतः ।**
***लग्नालर्कमबोधकूपपतितं चास्तेऽपरेषामपि,**
**स्तोकानां तु विकारभाररहितं तद् ज्ञानसाराश्रितम् ॥१४॥**

केषांचिदिति—अहो इति आश्चर्ये, केषांचिज्जीवानां चित्तं—मनः विषया—इन्द्रियाभिलाषाः एव ज्वरः, तेन आतुरं—क्लिष्टं मनः अस्ति । पुनः परेषां केषांचित् मनः 'विषावेगोदर्ककुतर्कमूर्च्छितम्' इति विषस्य-मिथ्यात्वस्य आवेगः-त्वरा तस्य उदर्कः-उदयः तेन कुतर्कस्तेन मूर्च्छितं-व्याकुलीभूतं मनः अस्ति । अन्येषां-जीवानाम्, कुवैराग्यतः-दुःखगर्भ-मोहगर्भवैराग्यतः 'लग्नालर्कं-लग्नः आलर्कः-हडकवाय इति लोक-भाषा तेन पतितं मनः अस्ति । च-पुनः, अपरेषां-कुगुरुवाहितानां कुबोधपतितं—कुज्ञानपतितं मनः अस्ति । तु-पुनः, विकारा—इन्द्रियकामाः। तेषां भारः, तेन रहितम्, ज्ञानसाराश्रितं ज्ञानसारे—परमात्मस्वरूपे आश्रितं व्याप्तं मनः स्तोकानामस्ति । इह खलु जगति कामोद्विग्नाः-स्वरूपोप-योगलीनचित्ताः शुद्धसाध्यदृष्टयः पुरुषाः स्तोका एव ॥१४॥

---

* इह श्लोके 'अबोधकूपपतितम्' इति पदं वर्तते टीकायां तु कुबोधपतितम् इति पदस्य वृत्तिर्दृश्यते किमर्थमेतद् ? इत्यारेका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः ग्रन्थाभ्यासरूपं फलं दर्शयति-

**जातोद्रेकविवेकतोरणततौ धावल्यमातन्वते, (ति)**
**हृद्गेहे समयोचितः प्रसरति स्फीतश्च गीतध्वनिः ।**
**पूर्णानन्दघनस्य किं सहजया तद्भाग्यभङ्ग्याऽभवद्,**
**[1]नैतद्ग्रन्थमिषात्करग्रहमहश्चित्रं चरित्रश्रियः ॥१५॥**

जातोद्रेकेति—एतद्ग्रन्थमिषात्-ज्ञानसार[2]ग्रन्थाभ्यासव्याजात् चारित्रश्रियः करग्रहमहः-पाणिग्रहणमहोत्सवः प्रसरति इति संटङ्कः, शेषं स्वत ऊह्यम् ॥१५॥

**भावस्तोमपवित्रगोमयरसैः लिप्तैव सर्वत्र भूः,**
**[3]संसिक्ता [4]समतोदकैरथ पथि न्यस्ता विवेकस्रजः ।**
**अध्यात्मामृतपूर्णकामकलशश्चक्रेऽत्र शास्त्रे पुरः,**
**पूर्णानन्दघने पुरं प्रविशति स्वीयं कृतं मङ्गलम् ॥१६॥**

भावस्तोम इत्यादि वृत्तं- पूर्णानन्दघने—[5]शुद्धात्मज्ञाने पुरं प्रविशति स्वीयं कृतं मङ्गलमिति वाक्यमित्यनादिसंसारसंसरणमिथ्यात्वासंयमकषाययोगहेतुचतुष्टयोपचितज्ञानावरणादिकर्मवृतानन्तपर्यायस्य अलब्धात्मसाधनस्य विषमरोगशोकादिकण्टकाकुलायामन्तरायोदयालब्धाहारादियोगारतितापतप्तायाम्, महाव्यसनसहस्रसिंहव्याघ्र[6]व्याप्तायाम्, कुप्रावचनिकलुण्टाकधाटीहुङ्कारगर्जितभीषणायाम्, कुदेववेतालत्रासितायाम्, इन्द्रिय[7]विषयसुखबुद्धिलक्षणभ्रान्तिमरुमरीचिकाभूमि[8]भूतायाम्, स्त्रीविलासादिविषवृक्षच्छायायुतायाम्, महाटव्यां धनादि[9]पिपासाव्यालोल-

---

१. चैतद्० A.D., S.M., B.1. । २. ग्रन्थाभ्यासात् सर्वप्रतिषु । ३. संसक्ता B.1., V.1.2. । ४. समितो० V.1.2., A.D. । ५. शुद्धात्मज्ञानपुरे प्रविशतः V.1.2., A.D., B.1.2., S.M. L.D.1. । ६. व्यथायाम् L.D.1 । ७. विषये सुख० L.D.1 । ३८ भूमिभ्रमियाताम् L.D.1 । ९. पिपासया लोल्यमात्रस्य L.D.1 ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेत्रस्य, तल्लाभादियोजनादिग्मूढस्य, परिभ्रमतः जीवस्य, कदाचित् जगदुपकारपरविद्याधरवरः गुरुः, तस्य संयोगो जातः । गुरुणापि मार्ग-भ्रष्टमित इतः परिभ्रमन्तं दीनमशरणमवलोक्योक्तं[1] हे भद्र ! शृणु, तवानन्दकन्दोपमं महोदयनगरस्य मार्गम्, यत्र सदागमसरांसि तत्त्व-पीयूषपूर्णानि, आचार्योपाध्यायनिर्ग्रन्थादयो नागरिकाः सम्यग्दर्शन-ज्ञानोपयोगनिर्द्धारितमार्गप्रचाराः, यत्र क्षान्त्यादिधर्मसम्यक्त्वादिगुण-स्थानान्येव विश्रामभूमयः, स्वाध्यायविधिगीतवृन्दमनोहरा पद्धतिः, तत्त्वानुभवतत्त्वैकत्वादयः श्रममन्तरेण मार्गलङ्घनोपायाः, यमनियमा-द्यष्टाङ्गानि वाहनानि, श्रीमदर्हन्महाराजनीतिनिगृहीततस्कराकुटिलाचारित्रा-चारप्रवीणसामायिकादिसंयमस्थानसंनिवेशाः, यत्र श्रद्धाधारणानिर्द्धारित सिद्धिपुरगमननिर्व्याघातप्रचारं रत्नत्रयीलक्षणम् । प्रवर्त्तय तद्मार्गे, येन कर्माष्टशत्रुव्यूहक्षयं कृत्वा निर्मलानन्दं शुद्धमव्याबाधमपुनरावृत्ति महित-मनन्तज्ञानदर्शनपूर्णपरमाव्ययममूर्त्तासङ्गनिरामयं निर्वाणनगरं द्रक्ष्यसि निराबाधम् । तेन भव्येन श्रमणादिसहायेन गृहीतस्तन्मार्गः[2] । ततो गुरुणापि पाथेयोपमं दत्तं ज्ञानसाराख्यम्, यथार्थोपदेशमूलं शुद्धानुभवा-स्वादमधुरतरास्वादं समतारसशीतलजलम्, तेन निर्विकल्पं प्रवृत्तो मार्गोल्लङ्घनेन । अतः परमपाथेयोपमं ज्ञानसारं मोक्षमार्गं गच्छता[3] सुख-निर्वाहार्थमभ्यस्यम् । तस्य च चिरकालीनाक्षयतत्त्वहेतुभूता तदास्वाद-वृद्धिकरणार्थं विहितेयं टीका **तत्त्वार्थ-विशेषावश्यक-धर्मसंग्रहणी-कर्मप्रकृत्यादि**ग्रन्थालम्बनपूर्वकं मया **देवचन्द्रेण** स्व-परोपकाराय **तत्त्वबोधनी** नाम्नी, सा च चिरं नन्दतादाचन्द्रार्कम् । अत्र च यन्मया स्वमतिदोषेण भ्रामिकं भाषितं तच्छोधयन्तु दक्षाः परोपकारप्रवणाः । सन्तो हिं गुणग्राहका एव, न खलु पुनः मत्सरिणो भवन्ति । तेन सतां प्रौढानन्दकारी एवैषा टीका समाप्ता इति ॥१५॥

---

१. दीनमनशनमव० L.D.1 । २. गृहीतं तन्मार्गं V.1.2., B.1., A.D. L.D.1 ।
३. गच्छतां B.2., V.1.2., A.D. L.D.1. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र सूत्रकृत्-**श्रीयशोविजयो**पाध्यायाः न्यायाचार्या वाग्वादिनी-लब्धवराः दुर्वादिमदाभ्रपटलखण्डनपवनोपमाः, तेषां प्रशस्तिः-

**गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,**
**प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।**
**तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशोः,**
**श्रीमन्न्यायविशारदस्य कृतिनामेषा कृतिः प्रीतये**[1] ॥१७॥

इतिश्रीज्ञानसारसूत्रं सम्पूर्णम् । (ग्रन्थाग्रं २८१ इयत्परिमिताः श्लोकाः)

गच्छेति–तपागच्छे श्री**विजयदेव**सूरिवराणां गच्छे श्री**जीत-विजय**प्राज्ञाः, तेषां सातीर्थ्यधराः श्री**नयविजय**प्राज्ञाः, तेषां शिष्येण श्रीमद्–**यशोविजयो**पाध्यायेन विहितोऽयं **ज्ञानसाराख्यः** द्वात्रिंशदष्टक-प्रमाणो ग्रन्थः सूत्रतः । तद्टीका च शुद्धमार्गदर्शकेन **श्रीखरतर-गच्छीयेन** सदुपाध्याय**श्रीदीपचन्द्राणां** शिष्येण **देवचन्द्रगणिना** कृता **ज्ञानमञ्जरी** इति श्रेयः ।

**॥ इति श्री ज्ञानसारसूत्रं संपूर्णम् ॥**

● ● ●

१. श्रेयसे S.M.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टीकाकारः स्वप्रशस्ति निवेदयति –

नमः स्याद्वादरूपाय, सर्वज्ञाय महात्मने ।
देवेन्द्रवृन्दवन्द्याय, वीराय विगतारये ॥१॥

श्रीगौतमादिज्ञानधरा मुनीशा,
देवर्द्धिपर्यन्तममेयबोधाः ।
तेषां सुवंशे वरभास्कराभः,
श्रीवर्द्धमानो मुनिराड् बभूव ॥२॥

संवेगरङ्गशाला-ग्रन्थार्थकथनसूत्रधरतुल्यः ।
सूरिर्जिनेश्वराख्यः, सिद्धिविधिसाधने धीरः ॥३॥

तच्छिष्या जिनचन्द्राख्याः, सूरयो गुणभूरयः ।
तच्छिष्याभयदेवार्या, गच्छे खरतरेश्वराः ॥४॥

येन नवाङ्गीवृत्तिरुपपातिकोपाङ्गवृत्तिविस्तारः ।
विदधे पञ्चाशकादिवृत्तिर्या बोधवृद्धिकरा ॥५॥

तत्पट्टे जिनवल्लभ-सूरिजिनदत्तसूरयोऽभूवन् ।
पट्टानुक्रमभानुर्जातो जिनकुशलसूरिगुरुः ॥६॥

तेषां वंशे जातो, गुणमणिरत्नाकरो महाभाग्यः ।
कलिकालपङ्कमग्नाँल्लोकान्निस्तारणे धीरः ॥७॥

श्रीमज्जिनचन्द्राह्वः, सूरिर्नव्यार्कदीधितिप्रतापः ।
यस्यावदातसंख्या, गण्यते नो सुराधीशैः ॥८॥

तच्छिष्याः पाठकाः श्रीमत्पुण्यप्रधानसंज्ञिताः ।
सुमतेः सागराः शिष्यास्तेषां विद्याविशारदाः ॥९॥

तच्छिष्याः साधुरङ्गाख्या, राजसाराः सुपाठकाः ।
सर्वदर्शनशास्त्रार्थतत्त्वदेशनतत्पराः ॥१०॥

तच्छिष्या ज्ञानधर्माख्याः, पाठकाः परमोत्तमाः ।
जैनागमरहस्यार्थ-दायका गुणनायकाः ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां शिष्या महापुण्यकार्यसंसाधनोद्यता: ।
पाठका दीपचन्द्राख्या:, शिष्यवर्गसमन्विता: ।।१२।।

येन शंत्रुञ्जये तीर्थे, कुन्थुनाथार्हत: पुन: ।
चैत्ये समवसरणे च, प्रतिष्ठा विहिता वरा ।।१३।।

चतुर्मुखे सोमजिता-कृते य: पूर्णतां व्यधात् ।
प्रतिष्ठां नैकबिम्बानाम्, चक्रे सिद्धाचले गिरौ ।।१४।।

अहम्मदावादमध्ये, सहस्त्रफणाद्यनेकबिम्बानाम् ।
चैत्यानां च प्रतिष्ठाम्, चकार यो धर्मवृद्धये ।।१५।।

तच्छिष्येण स्वबोधार्थम्, देवचन्द्रेण धीमता ।
व्याख्याता सुगमा शुद्धा, टीकेयं तत्त्वबोधनी ।।१६।।

स्याद्वादस्य रहस्यानाम्, ज्ञानाल्लब्धोदयेन च ।
देवचन्द्रेण बोधार्थम्, सुटीकेयं विनिर्मिता ।।१७।।

संवद्रसनिधिजलधिचन्द्र मिते ( १७९५ ) कार्त्तिके सिते पक्षे ।
पञ्चम्यां नव्यपुरे, कृतेयं ज्ञानमञ्जरी ।।१८।।

वाचनात्पठनादस्या, यो लाभो मे समागत: ।
तेनाहं भव्यसंघश्च, भवतां धर्मसाधक: ।।१९।।

जयतु जिनराजस्य, शासनं दु:खनाशनम् ।
ज्ञानानन्दविलासाढ्यम्, सर्वसंपद्विवर्द्धनम् ।।२०।।

मङ्गलं भगवान्वीरो, मङ्गलं गौतम: प्रभु: ।
मङ्गलं स्थूलभद्राद्या, जैनधर्मोऽस्तु मङ्गलम् ।।२१।।

इति श्रीज्ञानसारटीका ज्ञानमञ्जरी सम्पूर्णा ।

श्रीशुभं भूयात् ।

[सर्वाक्षरगणनया ग्रन्थाग्रं टीकाश्लोका: ३८०० इयत्परिमिता पफाल]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# परिशिष्टम्-१

**[1] "जेसिं अवड्ढपुग्गलपरिअट्टो सेसओ अ संसारो ।**
**ते सुक्कपक्खिया खलु अवरे पुण किण्हपक्खीया" ॥७२॥**

व्याख्या—जेसिमिति येषाम् अपार्द्धपुद्गलपरावर्तः शेषसंसारः, येषामर्द्धपुद्गलपरावर्तोऽवशिष्टः संसार इत्यर्थः । ते शुक्लपाक्षिकाः, खलु-निश्चयेन । कृष्णपाक्षिकलक्षणमाह-अहिए-अधिके, अर्धपुद्गलपरावर्तादधिकसंसारः कृष्णपाक्षिका इति । (श्रावकप्रज्ञप्तिः गा० ७२) । **1/8**

**[2] प्राणायामः प्राणयमः, श्वास-प्रश्वासरोधनम् ।**
**प्रत्याहारस्त्विन्द्रियाणाम्, विषयेभ्यः समाहृतिः ॥८३॥**

प्राणस्य मुखनासिकासञ्चारिणो वायोरासमन्ताद् यमनं गतिच्छेदः प्राणायामः एवं प्राणस्य यमनं प्राणयमः । बाह्यस्य वायोराचमनं श्वासः, कौष्ठ्यस्य वायोर्निःश्वसनं-प्रश्वासः, श्वास-प्रश्वासयोः रोधनं-गतिच्छेदः श्वास-प्रश्वासरोधनम् । यद्योगशास्त्रम्—

**प्राणायामो गतिच्छेदः, श्वास-प्रश्वासयोर्मतः ।**
**रेचकः पूरकश्चैव, कुम्भकश्चेति स त्रिधा ॥**

[योगशास्त्रम्-प्रकाशः-५ श्लो० ४]

इति । द्वे श्वास-प्रश्वासरोधनस्य ॥

विषयेभ्यः इन्द्रियाणां समाहृतिः-संक्षेपः, तन्नामैकं प्रत्याहारः । प्रतीपमाहरणं प्रत्याहारः । प्रत्याङ्पूर्वः "हृञ्-हरणे" (भ्वा० उ० अ०) भावे घञ् । एकमिन्द्रियाणां विषयेभ्यः सङ्कोचनस्य ॥८३॥ [अभि०चिं०ना०श्लो० ८३] **2/1**

**[3] समाधिस्तु तदेवार्थ-मात्राभासनरूपकम् ।**
**एवं योगो यमाद्यङ्गैरष्टाभिः सम्मतोऽष्टधा ॥८५॥**

सम्यगाधीयते मनोऽत्रेति समाधिः । समाङ् पूर्वः "डुधाञ् धारण-पोषणयोः" (ह्वा०उ०अ० ) उपसर्गे धोः किः ३।३।९२ इति किः । तदेव इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्छब्देन ध्यानं परामृश्यते । ध्यानमेव अर्थमात्राभासनरूपकं ध्येयाकारमात्रावलम्बनं तस्य नामैकं समाधिरिति । संग्रहमाह...एवममुना प्रकारेण पूर्वोक्तैः अष्टभिः यमाद्यङ्गैः अष्टधा योगः सम्मतः, योगिनां मान्य इत्यर्थः ॥८५॥ [अभि०-चिं०ना० श्लो० ८५] 2/1

**[4] ते कत्तिया पएसा, सव्वागासस्स मग्गणा होइ ।**
**ते जत्तिया पएसा, अविभाग तओ अणंतगुणा ॥४५१२॥**

'ते' चारित्रस्य प्रदेशाः 'कियन्तः'-किंप्रमाणा इति चिन्तायां निर्वचनमाह—सर्वस्य लोकालोकगतस्याकाशस्य मार्गणा भवति । यावन्तः किल 'ते' सर्वाकाशस्य प्रदेशाः 'ततः'—तेभ्यः सर्वाकाशप्रदेशेभ्यश्चारित्रस्य अविभागपरिच्छेदा अनन्तगुणाः सर्वजघन्येऽपि संयमस्थाने प्रतिपत्तव्याः । एषा अविभागपरिच्छेद-प्ररूपणा १।

सर्वजघन्यात् संयमस्थानाद् यद् द्वितीयं संयमस्थानं तत् तस्मादनन्तभाग-वृद्धम्। किमुक्तं भवति ?—प्रथमसंयमस्थानगतनिर्विभागभागापेक्षया द्वितीये संयमस्थाने निर्विभागा भागा अनन्ततमेन भागेनाधिका भवन्तीति । एषा स्थानान्तरप्ररूपणा २।

तस्मादपि यदनन्तरं तृतीयं तत् ततोऽनन्तभागवृद्धम्, एवं पूर्वस्मादुत्तरोत्तराणि अनन्ततमेन भागेन वृद्धानि निरन्तरं संयमस्थानानि तावद् वक्तव्यानि यावदङ्गुल-मात्रक्षेत्रासङ्ख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति । एतावन्ति च समुदितानि स्थानानि कण्डकमित्युच्यते । एषा कण्डकप्ररूपणा ३।

अस्माच्च कण्डकात् परतो यदन्यदनन्तरं संयमस्थानं भवति तत् पूर्वस्माद-सङ्ख्येयभागाधिकम् । एतदुक्तं भवति—पाश्चात्यकण्डकसत्कचरमसंयमस्थान-गतनिर्विभागभागापेक्षया कण्डकानन्तरे संयमस्थाने निर्विभागा भागा असङ्ख्येय-तमेन भागेनाधिकाः प्राप्यन्ते । ततः पराणि पुनरपि कण्डकमात्राणि संयमस्थानानि यथोत्तरमनन्तभागवृद्धानि भवन्ति, ततः पुनरेकमसङ्ख्येयभागाधिकं संयमस्थानम्, भूयोऽपि ततः पराणि कण्डकमात्राणि संयमस्थानानि यथोत्तरमनन्तभागवृद्धानि भवन्ति, ततः पुनरप्येकमसङ्ख्येयभागाधिकं संयमस्थानम्, एवमनन्तभागाधिकैः कण्डकप्रमाणैः संयमस्थानैर्व्यवहितानि असङ्ख्येयभागाधिकानि संयमस्थानानि तावद् वक्तव्यानि यावत् तान्यपि कण्डकप्रमाणानि भवन्ति । ततश्चरमादसङ्ख्येय-भागाधिकसंयमस्थानात् पराणि यथोत्तरमनन्तभागवृद्धानि कण्डकमात्राणि संयम-स्थानानि भवन्ति, ततः परमेकं सङ्ख्येयभागाधिकं संयमस्थानम्, ततो मूलादारभ्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावन्ति संयमस्थानानि प्रागतिक्रान्तानि तावन्ति भूयोऽपि तेनैव क्रमेणाभिधाय पुनरप्येकं सङ्ख्येभागाधिकं संयमस्थानं वक्तव्यम्, इदं द्वितीयं सङ्ख्येयभागाधिकं संयमस्थानम्, अनेनैव क्रमेण तृतीयम्, यावत् सङ्ख्येयभागाधिकानि संयमस्थानानि कण्डकमात्राणि भवन्ति तावद् वाच्यम् । तत उक्तक्रमेण भूयोऽपि सङ्ख्येयभागाधिकसंयमस्थानप्रसङ्गे सङ्ख्येयगुणाधिकमेकं संयमस्थानं वक्तव्यम्, ततः पुनरपि मूलादारभ्य यावन्ति संयमस्थानानि प्रागतिक्रान्तानि तावन्ति भूयोऽपि वक्तव्यानि, ततः पुनरप्येकं सङ्ख्येयगुणाधिकं संयमस्थानं वक्तव्यम्, ततो भूयोऽपि मूलादारभ्य तावन्ति संयमस्थानानि तथैव वक्तव्यानि, ततः पुनरप्येकं सङ्ख्येयगुणाधिकं संयमस्थानम्, अमून्यप्येवं सङ्ख्येयगुणाधिकानि संयमस्थानानि तावद् वक्तव्यानि यावत् कण्डकमात्राणि भवन्ति । तत उक्तक्रमेण पुनरपि सङ्ख्येयगुणाधिकसंयमस्थानप्रसङ्गेऽसङ्ख्येयगुणाधिकं संयमस्थानं वक्तव्यम्, ततः पुनरपि मूलादारभ्य यावन्ति संयमस्थानानि प्रागतिक्रान्तानि तावन्ति तेनैव क्रमेण भूयोऽपि वक्तव्यानि, ततः पुनरप्येकमसङ्ख्येयगुणाधिकं संयमस्थानं वक्तव्यम्, ततो भूयोऽपि मूलादारभ्य तावन्ति संयमस्थानानि तथैव वक्तव्यानि, ततः पुनरप्येकमसङ्ख्येयगुणाधिकं संयमस्थानं वक्तव्यम्,, अमूनि चैवमसङ्ख्येयगुणाधिकसंयमस्थानानि तावद् वक्तव्यानि यावत् कण्डकप्रमाणानि भवन्ति । ततः पूर्वपरिपाट्या पुनरप्यसङ्ख्येयगुणाधिकसंयमस्थानप्रसङ्गे अनन्तगुणाधिकं संयमस्थानं वक्तव्यम्, ततो भूयोऽपि मूलादारभ्य यावन्ति संयमस्थानानि प्रागतिक्रान्तानि तावन्ति तथैव क्रमेण भूयोऽपि वक्तव्यानि, ततः पुनरप्येकमनन्तगुणाधिकं संयमस्थानं वक्तव्यम्, ततो भूयोऽपि मूलादारभ्य तावन्ति संयमस्थानानि तथैव वक्तव्यानि, ततः पुनरप्येकमनन्तगुणाधिकं संयमस्थानं वक्तव्यम्, एवमनन्तगुणाधिकानि तावद् वक्तव्यानि यावत् कण्डकमात्राणि भवन्ति । ततो भूयोऽपि तेषामुपरि पञ्चवृद्ध्यात्मकानि संयमस्थानानि मूलादारभ्य तथैव वक्तव्यानि, यत् पुनरनन्तगुणवृद्धिस्थानं तन्न प्राप्यते, षट्स्थानस्य परिसमाप्तत्वात् । इत्थम्भूतान्यसङ्ख्येयानि कण्डकानि समुदितानि षट्स्थानकं भवति । तस्माच्च प्रथमषट्स्थानकादूर्ध्वमुक्तक्रमेणैव द्वितीयं षट्स्थानकमुत्तिष्ठति, एवमेव च तृतीयम्, एवं षट्स्थानकान्यपि तावद् वाच्यानि यावदसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति । उक्तं च—

**छट्ठाणगअवसाणे, अन्नं छट्ठाणयं पुणो अन्नं ।**
**एवमसंखा लोगा, छट्ठाणाणं मुणेयव्वा ॥** [पञ्चसं० गा० ४४४]

इत्थम्भूतानि चासङ्ख्येयलोकाकाशप्रदेशप्रमाणानि षट्स्थानकानि संयम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेणिरुच्यते । तथा चोक्तम्—

**छट्ठाणा उ असंखा, संजमसेढी मुणेयव्वा** ॥ [पिण्डनि० भा० गा० २९]

तदेवं कृता अविभागपरिच्छेद-स्थानान्तर-कण्डक-षट्स्थानकानां प्ररूपणा ४। साम्प्रतमधःस्थानप्ररूपणा क्रियते—

प्रथमादसङ्ख्येयभागवृद्धात् स्थानादधः कियन्ति संयमस्थानान्यनन्तभागवृद्धानि ? उच्यते—कण्डकमात्राणि । तथा प्रथमात् सङ्ख्येयभागवृद्धात् स्थानादधः कियन्ति असङ्ख्येयभागवृद्धानि स्थानानि ? उच्यते—कण्डकमात्राणि । एवमुत्तरोत्तरस्थानादधोऽध आनन्तर्येण तावद् मार्गणा कर्त्तव्या यावत् प्रथमादनन्तगुणवृद्धात् स्थानादधः कियन्ति असङ्ख्येयगुणवृद्धानि ? उच्यते—कण्डकमात्राणि । इदानीमेकान्तरिता मार्गणा क्रियते—तत्र प्रथमात् सङ्ख्येयभागवृद्धात् स्थानादधः कियन्त्यनन्तभागवृद्धानि स्थानानि ? उच्यते—कण्डकवर्गः कण्डकं च । तथा प्रथमात् सङ्ख्येयगुणवृद्धात् स्थानादधः कियन्ति असङ्ख्येयभागवृद्धानि स्थानानि? उच्यते—कण्डकवर्गः कण्डकं च । [तथा प्रथमादसङ्ख्येयगुणवृद्धात् स्थानादधः कियन्ति सङ्ख्येयभागवृद्धानि स्थानानि ? उच्यते—कण्डकवर्गः कण्डकं च ।] तथा प्रथमादनन्तगुणवृद्धात् स्थानादधः कियन्ति सङ्ख्येयगुणवृद्धानि स्थानानि ? उच्यते—कण्डकवर्गः कण्डकं च । एवमुक्तप्रकारेण द्व्यन्तरिता त्र्यन्तरिता चतुरन्तरिता च मार्गणा स्वधिया परिभावनीया ।

अथ पर्यवसानद्वारम्—तत्रानन्तगुणवृद्धकण्डकादुपरि पञ्चवृद्ध्यात्मकानि सर्वाणि स्थानानि गत्वा पुनरनन्तगुणवृद्धं स्थानं न प्राप्यते, षट्स्थानस्य परिसमाप्तत्वात् । ततस्तदेव सर्वान्तिमं स्थानं षट्स्थानकस्य पर्यवसानम् ॥४५१२॥(बृ०क०सू०गा० ४५१२) **2/5**

**[5] जे इमे अज्जत्ताए समणा निग्गंथा एते णं कस्स तेउल्लेसं वीतीवयंति ? गोयमा मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेउल्लेसं वीतीवयन्ति एवं दुमासपरियाए समणे णिग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेउलेसं वीतीवयन्ति, एएणं अभिलावेणं तिमासपरियाए समणे निग्गंथे असुरकुमारिंदाणं देवाणं तेउलेसं वीतीवयइ, चउमासपरियाए समणे निग्गंथे चंदिमसूरियवज्जियाणं गहगण-नक्खत्ततारारूवाणं जोतिसियाणं तेउलेसं वीईवयइ, पंचमास परियाए समणे निग्गंथे चंदिमसूरियाणं जोइसियाणं तेउलेसं वीतीव्रयइ, छम्मास-परियाए समणे निग्गंथे सोहम्मीसाणाणं तेउल्लेसं वीतीवयइ, सत्तमासपरियाए समणे निग्गंथे सणंकुमारमाहिंदाण तेउलेसं वीइवयइ, अट्ठमासपरियाए समणे निग्गंथे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बंभलोग-लंतगदेवाणं तेउलेसं (वीइवयइ), नवमासपरियाए समणे निग्गंथे महासुक्क-सहस्साराणं देवाणं तेउलेसं वीइवयइ, दसमासपरियाए समणे [निग्गंथे] आणय-पाणय-आरण-अच्चुआणं देवाणं [तेउलेसं वीइवयइ] एक्कारसमासपरियाए समणे (निग्गंथे) गेवेज्जाणं देवाणं (तेउलेसं वीइवयइ) बारसमासपरियाए [समणे निग्गंथे] अणुत्तरोववाइयाणं देवाणं तेउलेसं [वीइवयइ] तेण परं सुक्के सुक्काभिजाती भवित्ता सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ त्ति ।।५३७।।**

जे इमे इत्यादि ये इमे प्रत्यक्षाः अज्जत्ताए त्ति आर्यतया पापकर्मबहिर्भूततया अद्यतया वा- अधुनातनतया वर्तमानकालतयेत्यर्थः तेयलेस्सं ति तेजोलेश्यां- सुखासिकां तेजोलेश्या हि प्रशस्तलेश्योपलक्षणं सा च सुखासिकाहेतुरिति कारणे कार्योपचारात्तेजोलेश्याशब्देन सुखासिका विवक्षितेति । वीइवयंति-व्यतिव्रजन्ति व्यतिक्रामन्ति । असुरिंदवज्जियाणं ति चमरबलवर्जितानां तेण परं ति-ततः संवत्सरात्परतः सुक्के त्ति शुक्लो नामाभिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्धी इति निरतिचारचरण इत्यन्ये सुक्काभिजाइ त्ति शुक्लाभिजात्यः परमशुक्ल इत्यर्थः । **2/5** [भगवती०श०१४,उ०९, सू०५३७]

**[6] आकिञ्चन्यं मुख्यम्, ब्रह्मापि परं सदागमविशुद्धम् ।**
**सर्वं शुक्लमिदं खलु, नियमात् संवत्सरादूर्ध्वम् ।।१२।१३।।**

आकिञ्चन्यं-निष्किञ्चनत्वं बाह्याभ्यन्तरपरिग्रहत्यागरूपम्, मुख्यं-निरुपचरितम्, ब्रह्मापि – ब्रह्मचर्यमपि अष्टादशभेदशुद्धम्, परं-प्रधानं, सदागमः-भगवद्वचनं तेन विशुद्धं-निर्दोषम्, सर्वमिदं-दशविधमपि क्षान्त्यादि, शुक्लं-निरतिचारम्, खलुशब्दो वाक्यालङ्कारे नियमात्-निश्चयात्, संवत्सरादूर्ध्वम्-वर्षपर्यायव्यतिक्रमे क्रियामलत्यागेन तदुत्तरं शुक्लीभवनस्वभावत्वात् । (षोड०प्र०षो०१२,श्लो०१३) **2/5**

**[7]** एतदेव समर्थयन्नाह-

**उक्तं मासादिपर्यायवृद्ध्या द्वादशभिः परम् ।**
**तेजः प्राप्नोति चारित्री, सर्वदेवेभ्य उत्तमम् ।।३६।।**

उक्तं-निरूपितं **भगवत्याम्**, किमित्याह-मासादिपर्यायवृद्ध्या-मासेन द्वाभ्याम् त्रिभिरित्यादिक्रमेण पर्यायस्य वृद्धौ सत्यां यावद् द्वादशभिर्मासैः परं-प्रकृष्टं, तेजः- चित्तसुखलाभलक्षणं प्राप्नोति-अधिगच्छति, चारित्री-विशिष्टचारित्रपात्रं पुमान्,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परत्वमेव व्यनक्ति-सर्वदेवेभ्यो-भवनवासिप्रभृतिभ्योऽनुत्तरसुरावसानेभ्यः सकाशादुत्तमं सर्वसुरसुखातिशायीति भावः [अ०६श्लो०३६] । भगवतीसूत्रं चेदम्- जे इमे अज्जत्ताए समणा निग्गंथा एते णं कस्स तेउल्लेसं वीतीवयंति ? मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेउल्लेसं वीइवयइ एवं दुमासपरियाए समणे निग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेउलेसं वीतीवयइ, तिमासपरियाए समणे निग्गंथे असुरकुमारिंदाणं देवाणं तेउलेसं वीतीवयइ, चउमासपरियाए समणे निग्गंथे चंदिमसूरियवज्जियाणं गह-गण-नक्खत्त-तारारूवाणं जोतिसियाणं तेउलेसं वीईवयइ, पंचमासपरियाए समणे निग्गंथे चंदिम-सूरियाणं जोइसियाणं तेउलेसं वीतीवयइ, छम्मासपरियाए समणे निग्गंथे सोहम्मीसाणाणं तेउलेसं वीतीवयइ, सत्तमासपरियाए समणे निग्गंथे सणंकुमार-माहिंदाण तेउलेसं वीइवयइ, अट्ठमासपरियाए समणे निग्गंथे बंभलोग-लंतगदेवाणं तेउलेसं (वीइवयइ), नवमासपरियाए समणे निग्गंथे महासुक्क-सहस्साराणं देवाणं तेउलेसं वीइवयइ, दसमासपरियाए समणे [निग्गंथे] आणय-पाणय-आरण-अच्चुआणं देवाणं [तेउलेसं वीइवयइ] एक्कारसमासपरियाए समणे (निग्गंथे) गेवेज्जाणं देवाणं (तेउलेसं वीइवयइ) बारसमासपरियाए [समणे निग्गंथे] अणुत्तरोववाइयाणं देवाणं तेउलेसं [वीइवयइ] तेण परं सुक्के सुक्काभिजाती भवित्ता सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ त्ति ॥२१९॥ (धर्म०बिं०अ०६, श्लो०३६) **2/5**

**[8]** भगवानाह–

**जत्तो च्चिय पच्चक्खं सोम्म ! सुहं नत्थि दुक्खमेवेदं ।**
**तप्पडियारविभत्तं तो पुण्णफलं ति दुक्खं ति ॥२००५॥**

सौम्य ! प्रभास ! यत एव दुःखेऽनुभूयमाने कस्याप्यविपर्यस्तमतेः सुखं प्रत्यक्षं नास्ति, सुखानुभवः स्वसंविदितो न विद्यतेऽत एवास्माभिरुच्यते- 'दुक्खमेवेदम्' इति, यत् किमप्यत्र संसारचक्रे स्रक्-चन्दना-ऽङ्गनासम्भोगादिसमुत्थमपि विद्यते तत् सर्वं दुःखमेवेत्यर्थः । केवलं तस्याङ्गनासंभोगादिविषयौत्सुक्यजनितारतिरूपस्य दुःखस्य प्रतीकारोऽङ्गनासंभोगादिकस्तत्प्रतीकारस्तेन तत्प्रतीकारेण दुःखमपि सद् विभक्तं मूढैर्भेदेन व्यवस्थापितम्-तत्प्रतीकाररूपं कामिनीसंभोगादिकं पामाकण्डूयनादिवत् सुखमध्यवसितम्, शूलारोपण-शूल-शिरोबाधादिव्याधि-बन्ध-वधादिजनितं तु दुःखमिति । रमणीसंभोग-चक्रवर्तिपदलाभादि सुखं स्वसंविदितं 'दुःखम्' इति वदतां प्रत्यक्षविरोध इति चेत् । तदयुक्तम्, मोहमूढप्रत्यक्षत्वात् तस्य, तल्लाभौत्सुक्यजनितारतिरूपदुःखप्रतीकाररूपत्वाद् दुःखेऽपि तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखाध्यवसायः, पामाकण्डूयनापथ्याहारपरिभोगादिवत्, तथा चोक्तम्—

''नग्नः प्रेत इवाविष्टः, क्वणन्तीमुपगृह्य ताम् ।
गाढायासितसर्वाङ्गः, स सुखी रमते किल ॥१॥

औत्सुक्यमात्रमवसादयति प्रतिष्ठा, क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापगमनाय यथा श्रमाय, राज्यं स्वहस्तगतदण्डमिवातपत्रम् ॥२॥

भुक्ताः श्रियः सकलकामदुघास्ततः किम् ?
संप्रीणिताः प्रणयिनः स्वधनैस्ततः किम् ? ।
दत्तं पदं शिरसि विद्विषतां ततः किम् ?
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ? ॥३॥

इत्थं न किञ्चिदपि साधनसाध्यजातम्, स्वप्नेन्द्रजालसदृशं परमार्थशून्यम् ।
अत्यन्तनिर्वृतिकरं यदपेतबाधम्, तद् ब्रह्म वाञ्छत जनाः ! यदि चेतनास्ति ॥४॥''

इत्यादिना 'पुण्णफलं ति दुक्खं ति' यत एवमुक्तप्रकारेण दुःखेऽपि सुखाभिमानः, तस्मात् पुण्यफलमपि सर्वं तत्त्वतो दुःखमेवेति ॥२००५॥ (विशेषा०भा०गा०२००५) **2/6...10/8**

एतदेव प्रपञ्चयति—

**विसयसुहं दुक्खं चिय दुक्खपडियारओ तिगिच्छ व्व ।**
**तं सुहमुवयाराओ न उवयारो विणा तच्चं ॥२००६॥**

विषयसुखं तत्त्वतो दुःखमेव, दुःखप्रतीकाररूपत्वात् कुष्ठ-गण्डा-ऽर्शोरोग क्वाथपान-च्छेदन-दम्भनादिचिकित्सावत् ॥ यश्च लोके तत्र सुखव्यपदेशः प्रवर्तते, स उपचारात् । न चोपचारस्तथ्यं पारमार्थिकं विना क्वापि प्रवर्तते, माणवकादौ सिंहाद्युपचारवदिति ॥२००६॥ (विशेषा०भा०गा० २००६) **2/6...10/8**

यदुक्तम्-'आधारो देहो च्चिय जं सुह-दुक्खोवलद्धीणं' इति (गा०२००३) तत्राह—

**साया-ऽसायं दुक्खं, तव्विरहम्मि य सुहं जओ तेणं ।**
**देहिंदिएसु दुक्खं, सोक्खं देहिंदियाभावे ॥२०११॥**

ननु यत् पुण्यफलं सातं सुखतया लोकव्यवहारतो रूढं तत् सर्वं दुःख-मेवेत्यनन्तरमेव समर्थितम्, असातं तु पापफलत्वाद् निर्विवादं दुःखमेव । एवं च सति सर्वं दुःखमेवास्ति संसारे, न सुखम् । तच्च दुःखं सिद्धस्य सर्वथा क्षीणम् । अतस्तद्विरहे यद्-यस्मात् सिद्धस्य स्वाभाविकम्, निरुपमम्, अनन्तं च युक्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धमेव सुखम्, तेन-तस्मात् कारणात् पारिशेष्यन्यायात् संसारिणामेव जीवानां देहेन्द्रियेष्वाधारभूतेषु यथोक्तस्वरूपं दुःखम्, सुखं तु देहेन्द्रियाभाव एव, सिद्धस्य क्षीणनिःशेषसुखदुःखत्वेन तस्य तत्र युक्तिसिद्धत्वादिति ॥२०११॥ (विशेषा०भा० गा० २०११) **2/6...10/8**

**[9] लब्भइ सुरसामित्तं, लब्भइ य पहुत्तणं न संदेहो ।**
**एगं नवरि न लब्भइ, दुल्लहरयणं व सम्मत्तं ॥ १४ ॥**

व्याख्या-लभ्यते - प्राप्यते पुण्यानुभावात् सुरा अमरास्तेषां स्वामित्वमीश्वरत्वमिन्द्रत्वमित्यर्थः । यदुक्तम्- मणिरयणकिरीडधरो, चिंचइओ चवलकुंडलाहरणो । सक्को हिओवएसा, एरावणवाहणो जाओ ॥ १ ॥ तथा च शब्दः पुनरर्थः, पुनः प्रभुत्वं-स्वामित्वम् अर्थात् पृथिव्याः नरनाथत्वमित्यर्थः, लभ्यते नात्र सन्देहो द्वापरः। नवरम् इति विशेषः, एगं इति देशसर्वविरतिरहितम् एकं केवलम् सम्यक्त्वं - तत्त्वश्रद्धानम्, आस्तां तद्युक्तम्, दुर्लभरत्नवत् चिन्तामणिवन्न लभ्यते । यथा लोके भाग्यविहीनानां चिन्तामणिर्दुष्प्रापस्तथा सम्यक्त्वमल्पपुण्यैर्न प्राप्यत इति । ग्रन्थान्तरेऽप्युक्तम् - लब्भंति अमरनरसंपयाओ, सोहग्गरूवकलियाओ । न य लब्भइ सम्मत्तं, तरंडयं भवसमुद्दस्स ॥१॥ (संबोधसप्तति: गा०१४) **2/7**

**[10]** एवं च परित्यक्तसमस्तबाह्याभ्यन्तरोपधिक एकत्वभावनां भावयति तामाह-

**एगो मे सासओ अप्पा, नाणदंसणसंजुओ ।**

**सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥२६॥**

एगो मे० एक एवात्मा मे-मम शश्वद्भवनीय अगमनाच्च शाश्वतः सहचारी ज्ञानदर्शनयुक्तः शेषा ये केचन मे-मम बाह्या भावाः पदार्थाः पुत्रकलत्रादिकास्ते सर्वे संयोगलक्षणा एव-कृत्रिममेलापका एव, येषां संयोगस्तेषामवश्यं भावी वियोग इति परमार्थः ॥ २६ ॥

कथं वियोगदुःखानीत्याह-

**संजोगमूला जीवेण, पत्ता दुक्खपरंपरा ।**
**तम्हा संजोगसंबंधं, सव्वं तिविहेण वोसिरे ॥२७॥**

संजो० संयोग एव मूलं यासां ताः संयोगमूलाः । जीवेन-सांसारिप्राणिना, प्राप्ता-अनुभूता दुःखपरंपरा-अनिष्टकष्टसंतत्यः, यस्मादेवं तस्मात् कारणात् संयोगसंबन्धं-समवायाभिलाषं सर्वं भावेन-स्वाभिप्रायेण व्युत्सृजामि ॥२७॥ [आतुरप्रत्याख्यानपयन्ना गा०२६-२७] **4/1**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[11]** ज्ञानात् तु न कर्म प्रभवतीत्याह—

> **स्वत्वेन स्वं परमपि परत्वेन जानन् समस्ता-**
> **ऽन्यद्रव्येभ्यो विरमणमितश्चिन्मयत्वं प्रपन्नः ।**
> **स्वात्मन्येवाभिरतिमुपयन् स्वात्मशीली स्वदर्शी-**
> **त्येवं कर्ता कथमपि भवेत् कर्मणां नैष जीवः ॥१/२६॥**

**व्या०—स्वम्**-आत्मानं **स्वत्वेन जानन्**-शुद्धस्वलक्षणनिर्ज्ञानात् परद्रव्याहं-बुद्धिहेतुभूतमिथ्यादर्शनापगमाच्चात्मानमात्मत्वेनावगच्छन् । तथा **परं**-सुख-दुःखादिरूपपुद्गलपरिणामं तन्निमित्ततथानुभवं पुद्गलप्रचयात्मकं शरीरादिकं च **परत्वेन जानन्** परस्परविशेषनिर्ज्ञानाच्छरीरादावात्माऽऽत्मीयबुद्धिमकुर्वन् इत्यर्थः । तथा **समस्तानि यान्यन्यद्रव्याणि** आत्मनः पृथग्भूतानि पुद्गलादीनि **तेभ्यो विरमणमितः** स्वत्वभावाव्याप्यतया परत्वेन ज्ञात्वा विरतिं **प्रपन्नः** परद्रव्यप्रवृत्ति-मनादधान इत्यर्थः । अत एव **चिन्मयत्वं प्रपन्नः** सकलसङ्कल्पविकल्पनिरोधा-च्छुद्धात्मनिष्ठां बिभ्रत् । तथा **स्वात्मन्येवाभिरतिमुपयन्** अनादिमोहेन स्वात्मनोऽ-पकृष्य बहिर्नीतायाः सततं परद्रव्यचङ्क्रमणशीलायाश्चिद्वृत्तेर्निरोधात् पारावार-मध्यसृत्वरैकपोतकूपस्तम्भपतत्रीवाऽनन्यशरणतयाऽनन्तसहजचैतन्यात्मनि क्रीडां कलयन् तथा स्वात्मानं शीलयति अभ्यस्यति परिचिनोतीति **स्वात्मशीली** । आत्मनो ज्ञायकस्वभावत्वावधारणेन ज्ञेयज्ञायकसम्बन्धस्यानौपाधिकत्वेन दुस्त्यजत्वान्निखिलद्रव्यैः समं मम ज्ञेयज्ञायक एव सम्बन्धः, नान्ये स्व-स्वामि-भावादय इत्येवं तेषु ममत्वव्युदासेन विषयपरिशीलनां गरनिगरणादप्यत्यन्तविरसां मत्वा स्वरूपमेव परिशीलयन्नित्यर्थः । तथा **स्वदर्शी** आसंसारात् परद्रव्यविश्रान्तं ज्ञानं परद्रव्याद् व्यपोह्य निष्कम्पतया स्वरूप एव लीनं कुर्वन् । **एवमिति** दृग्-ज्ञप्ति-वृत्तात्मकात्मत्वैकाग्र्येण वर्तमान **एष जीवः कथमपि कर्मणां**-द्रव्य-भावभेदभाजां-**कर्ता न भवेत्** । आत्मानं रागादितयाऽपरिणमयंस्तन्निमित्तीकृत्य कर्मभावेन परिणममानानां पुद्गलानामपि स्वस्मिन्नवकाशं न ददातीत्यर्थः । इदमत्र तात्पर्यं-सकलज्ञेयाकारकरम्बितचिद्वृत्तिमात्मानं जानानोऽनुभवन्नपि यदि स्वरूप एव नियम्य न वर्तते तदाऽनादिवासनोपजनितपरद्रव्यप्रवृत्तेश्चिद्वृत्तेर्निरर्गल-परद्रव्यप्रसरस्य हठेन व्यावृत्त्य भावात् स्वस्मिन्नवस्थानेऽज्ञानोत्थितकर्तृ-कर्म क्लेशानापायाद् निरुपरागात्मतत्त्वोपलम्भाभावः । अत आत्मज्ञानानुभवसंयतानां यौगपद्य एव पारमार्थिककर्मकर्तृत्वं सिध्यति ॥२६॥ (अ०बिं०द्वा०१,श्लो०-२६) 4/3

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[12]** ननु कश्चन कामभोगेषु सत्सु (न) वीतरागः सम्भवति, तत्कथमस्य दुःखाभावः ? उच्यते-

**न कामभोगा समयं उर्विति, न यावि भोगा विगइं उविंति ।**
**जे तप्पओसी य परिग्गही य, सो तेसु मोहा विगइं उवेइ ॥१०१॥**

'न'-नैव, 'कामभोगाः'-उक्तरूपाः, 'समतां'-रागद्वेषाभावरूपाम्, 'उपयान्ति'-उपगच्छन्ति हेतुत्वेनेति गम्यते, तद्धेतुत्वे हि तेषां न कश्चिद्रागद्वेषवान् भवेत्, न चापि 'भोगाः'-भुज्यमानतया सामान्येन शब्दादयः 'विकृतिं'-क्रोधादिरूपाम्, इहापि हेतुत्वेनोपयान्तीत्यन्यथा न कश्चन रागद्वेषरहितः स्यात् कोऽनयोस्तर्हि हेतुः ? इत्याह-यः 'तत्प्रदोषी च' तेषु-विषयेषु प्रद्वेषवान् 'परिग्रही च' परिग्रहबुद्धिमान्, तेष्वेव रागीत्युक्तं भवति, स 'तेषु'-विषयेषु 'मोहात्'-रागद्वेषात्मकात् मोहनीयात् विकृतिमुपैति, रागद्वेषरहितस्तु समतामित्यर्थादुक्तम्, उक्तं हि पूर्वं—'सतोरेव रागद्वेषयोरुदीरकत्वेन शब्दादयो हेतव' इति, आह—"समो य जो तेसु स वीयरागो" इत्यनेन गतार्थमेतत्, सत्यम्, तस्यैव त्वयं प्रपञ्चः, उक्तं हि 'त एव विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चोच्यते' इति सूत्रार्थः ॥ (उत्तरा०अ०३२, गा०१०१) **4/3**

**[13]** साम्प्रतं ज्ञानशब्दस्य संबन्धिशब्दत्वाद्येषां तज्ज्ञानं तान्यभिधातुमाह-

**एयं पंचविहं नाणं, दव्वाण य गुणाण य ।**
**पज्जवाणं च सव्वेसिं, नाणं नाणीहिं देसियं ॥५॥**

'एतद्-' अनन्तरोक्तं पञ्चविधं ज्ञानम्, द्रवन्ति-गच्छन्ति तांस्तान् पर्यायानिति द्रव्याणि वक्ष्यमाणलक्षणानि तेषाम्, 'चः'-तद्गतानेकभेदख्यापको, गुणानां-रूपादीनाम्, चः-प्राग्वत्, परीति-सर्वतः, कोऽर्थः ? द्रव्येषु गुणेषु सर्वेष्ववन्ति—गच्छन्तीति पर्यवास्तेषां च, 'सर्वेषाम्'-अशेषाणाम्, केवलापेक्षया चायं द्रव्यकार्त्स्न्ये सर्वशब्दः शेषज्ञानापेक्षया तु प्रकारकार्त्स्न्ये, प्रतिनियतपर्यायग्राहित्वात्तेषाम्, 'ज्ञानम्'-अवबोधकम्, 'ज्ञानिभिः'-अतिशयज्ञानोपेतैः केवलिभिरितियावत् 'देशितं'-कथितम् । अनेन च यदाहुः-ज्ञानं ज्ञानस्वरूपस्यैव ग्राहकम्, बाह्याभिमतस्य वस्तुनो ज्ञानातिरिक्तस्यासत्त्वाद् अत एवोक्तं-'स्वरूपस्य स्वतो गति'रिति, तन्निरस्तम्, अन्तः सुखादिप्रतिभासवद्-बहिः स्थूलप्रतिभासस्यापि स्वसंविदितत्वात्, न च युगपद्वेद्यमानयोरेकस्य तात्त्विकमितरस्य त्वन्यथात्वमिति निमित्तं विना कल्पयितुं शक्यम्, अथैकत्राविद्योपदर्शितत्वं तत्कल्पननिमित्तम्, न, यतस्तदितरत्रापि किं न कल्प्यते ? निमित्तं विना कल्पनाया उभयत्राविशेषात्, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च ज्ञानस्याप्यभावेन सर्वशून्यतापत्तिरित्यलं प्रसङ्गेनेति सूत्रार्थः ॥ अनेन द्रव्यादिविषयत्वं ज्ञानस्योक्तम् । (उत्तरा०अ०२८, गा०५) । **5/1**

**[14] नाम-स्थापना-द्रव्य-भावतस्तन्न्यासः (१/५)**

तथा द्रव्यज्ञानमनुपयुक्तावस्था, भावज्ञानमुपयोगपरिणतिविशेषावस्था । (तत्त्वार्थ०अ०१, सू०५) । **5/1**

**[15] पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए ।**
**अन्नाणी किं काही, किं वा नाही छेअपावगं ॥ ४/१० ॥**

पढमं णाणमित्यादि-प्रथमम्-आदौ, ज्ञानं-जीवस्वरूपसंरक्षणोपायफलविषयं ततः-तथाविधज्ञानसमनन्तरं 'दया'-संयमस्तदेकान्तोपादेयतया भावतस्तत्प्रवृत्तेः, एवम्-अनेन प्रकारेण ज्ञानपूर्वकक्रियाप्रतिपत्तिरूपेण तिष्ठति-आस्ते सर्वसंयतः-सर्वः प्रव्रजितः, यः पुनः अज्ञानी-साध्योपायफलपरिज्ञानविकलः स किं करिष्यति ? सर्वत्रान्धतुल्यत्वात् प्रवृत्तिनिवृत्तिनिमित्ताभावात्, किं वा कुर्वन् ज्ञास्यति छेकं-निपुणं हितं कालोचितं "पापकं वा" अतो विपरीतमिति, ततश्च तत्करणं भावतोऽकरणमेव, समग्रनिमित्ताभावात्, अन्धप्रदीप्तपलायनघुणाक्षरकरणवत्, अत एवान्यत्राप्युक्तम्-"गीअत्थो अ विहारो, बीओ गीअत्थमीसिओभणिओ । इत्यादि अतो ज्ञानाभ्यासः कार्यः ॥ १०॥ [श्री दशवै० अध्य० ४ गा० १०] **5/1**

**[16] से किं तं आगमओ दव्वावस्सयं ? आगमतो दव्वावस्सयं जस्स णं आवस्सए त्ति पदं सिक्खितं ठितं जितं मितं परिजितं णामसमं घोससमं अहीणक्खरं अणच्चक्खरं अव्वाइद्धक्खरं अक्खलियं अमिलियं अवच्चामेलियं पडिपुण्णं पडिपुण्णघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं । से णं तत्थ वायणाए पुच्छणाए परियट्टणाए धम्मकहाए णो अणुप्पेहाए । कम्हा ? अणुवओगो दव्वमिति कट्टु । ( सू० १४ )**

[चू० १४] तत्थ जं आगमतो दव्वावस्सयं तं इमं - **जस्स आवस्सए त्ति पदं सिक्खितं** इत्यादि । जं आदितो आरब्भ पढंतेण अंतं णीतं तं **सिक्खितं**। तं चेव हितए अविस्सरणभावट्ठितं **ठितं** भन्नति । जं परावत्तयतो परेण वा पुच्छितस्स आदिमज्झंते सव्वं वा सिग्घमागच्छति तं **जितं** । जं वण्णतो लहु-गुरुय-बिंदु-मत्ताहिं पद-पाद-सिलोगादिहि य संखित्तं तं **मितं** भण्णति । जं कमेण य उक्कमेण य अणेगधा आगच्छति तं **परिजितं** । जधा सणामं सिक्खितं ठितं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेण समं जं तं **णामसमं**। अधवा गुरूवदिट्ठं जं सिक्खितं तं **णामसमं** स्वनामवत्। उदत्तादिया घोसा, ते जधा गुरूहिं उच्चरिता तधा गहितं ति **घोससमं**। [ **अहीणक्खरं** ति ] एगदुगादिअक्खरहीणं ण भवति। **अणच्चक्खरं** ति अधियक्खरं ण भवति। **अव्वाइद्धं** अविवरीतक्खरं पद-पाद-सिलोगादीहि य। उवलबहुलभूमीए जधा हलं खलते तधा जं परावत्तयतो खलते तं **खलितं**, ण खलितं **अक्खलितं**। अण्णोन्नसत्थमिस्सं तं मिलितं, दिट्ठंतो असमाणधण्णमेलोव्व, एवं जं ण मिलितं तं **अमिलितं**। उच्चरतो वा पद-पाद-सिलोगादीहिं वा **अमिलितं**, विच्छिण्णय-तीत्यर्थः। एगातो च्चेव सत्थातो जे जे एकाधिकारिसुत्ता ते सव्वे वीणीउं एगतो करेति एवं विच्चामेलितं, अहवा समतिविकप्पिते तस्समाणे सुत्ते कातुं छुभतो विच्चामेलितं, दिट्ठंतो कोलियकतपायसोव्व अहवाभेरीकंथव्व, एवं ण विच्चामेलितं **अविच्चामेलितं**, जधा **गणधर**दब्धस्वभावस्थितमेवेत्यर्थः। बिंदुमत्तादिएहिं जं अणूणातिरित्तं तं **पडिपुन्नं** भण्णति। जातिबद्धं वा छंदेण लहुगुरुअंसेहिं **पडिपुण्णं**। अत्थेण वा **पडिपुण्णं**। उदत्तादिएहिं वा घोसेहिं उच्चरतो **पडिपुन्न( न्नघोसं? )**, गुरुणा अव्वत्तं ण भासितं बालमूकभणितं व। कहं वा भासतो गहितं ? उच्यते, कंठे वट्टितेण परिफुडओट्ठविप्पमुक्केण सरेण भासतो गहितं। एवं **गुरुसमीवातो वायणागतं**, ण कण्णाहाडितं पोत्थयातो वा अधीतं। तमेवं आवस्सए त्ति सुतपदं अधिज्जित्ता से णं 'सः' अधीतश्रुतः तत्थेति आवस्सतसुते अणुवयोगतो वा वायणादी करेज्ज। **णो अणुप्पेहाए** त्ति दव्वावस्सयं ण लब्भति, जतो नियमा अणुप्पेहा उवयोगपुव्विया भवति। पर आह-सेसेसु कम्हा दव्वावस्सयं? उच्यते-**अणुवयोगो दव्वमिति कट्टु**, जम्हा वायणादिसु उवयोगाऽनुपयोगसंभव इत्यर्थः।

**[ हा० १४ ] से किं त**मित्यादि, **आगमतो द्रव्यावश्यकं जस्स ण**मित्यादि, यस्य कस्यचिद् **ण**मिति वाक्यालङ्कारे, **आवश्यकमित्ये**तत् **पदम्**, इह चाधिकृतपक्षालम्बनं शास्त्रमभिगृह्यते, **शिक्षितं** भवति, स तत्र वाचनादिभिर्वर्त्तमानोऽपि द्रव्यावश्यकमिति क्रिया। अत्र च सुपां सुलुग् [पा० ७/१/३९] इत्यादिना च्छन्दसि एन (इते ?) शिक्षितमित्यपि भवति। तत्र **शिक्षित**मिति अन्तं नीतम्, अधीतमित्यर्थः। **स्थित**मिति चेतसि स्थितम्, न प्रच्युतमिति यावत्। **जित**मिति परिपाटिं कुर्वतो द्रुतमागच्छतीत्यर्थः। **मित**मिति वर्णादिभिः परिसंख्यातमिति हृदयम्। **परिजित**मिति सर्वतो जितं परिजितम्, परावर्तनां कुर्वतो यदुत्क्रमेणाप्यागच्छतीत्यभिप्रायः। नाम्ना समं **नामसमम्**, नाम अभिधानम् एतदुक्तं भवति-स्वनामवत् शिक्षितादिगुणोपेतमिति। घोषाः उदात्तादयः, वाचनाचार्याभिहितघोषैः समं **घोषसमम्**। अक्षरन्यूनं हीनाक्षरम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न हीनाक्षर**महीनाक्षरम्** । अधिकाक्षरम् अत्यक्षरम् नाधिकाक्षरमनत्यक्षरमिति । विपर्यस्तरत्नमालागतरत्नानीव न व्याविद्धानि अक्षराणि यस्मिँस्त**दव्याविद्धाक्षरम्।** उपलाकुलभूमिलाङ्गलवन्न स्खलित**मस्खलितम्** । न मिलित**ममिलितम्,** असदृशधान्यमेलकवन्न विपर्यस्तपद-वाक्य-ग्रन्थमित्यर्थः, असंसक्तपदवाक्यविच्छेदं वेति । अनेकशास्त्रग्रन्थसङ्करात् अस्थानच्छिन्नग्रन्थनाद्वा न व्यत्याम्रेडितं कोलिकपायसवद् भेरीकन्थावच्चे**त्यव्यत्याम्रेडितम्** । अस्थानच्छिन्नग्रन्थनेन व्यत्याम्रेडितं यथा-प्राप्तराज्यस्य रामस्य राक्षसा निधनं गते (ता इ) त्यादि । **प्रतिपूर्णं** ग्रन्थतोऽर्थतश्च, तत्र ग्रन्थतो मात्रादिभिर्यत् प्रतिनियतप्रमाणं छन्दसा वा नियतमानमिति, अर्थतः प्रतिपूर्णं नाम न साकाङ्क्षमव्यापकं स्वतन्त्रं वेति । उदात्तादिघोषाविकलं **परिपूर्णघोषम्** । आह-**घोषसम**मित्युक्तम्, ततोऽस्य को विशेषः ? इति, उच्यते-घोषसममिति शिक्षितमधिकृत्योक्तम्, प्रतिपूर्णघोषं तूच्चार्यमाणं गृह्यत इत्ययं विशेषः। कण्ठश्चौष्ठौ च **कण्ठोष्ठम्**, प्राण्यङ्गत्वादेकवद्भावः, तेन **विप्रमुक्त**मिति विग्रहः, नाव्यक्त(क्तं) बालमूकभाषितवत् । **वाचनया उपगतं** गुरुवाचनया हेतुभूतयाऽवाप्तम्, न कर्णाघाटकेन शिक्षितमित्यर्थः, पुस्तकाद्वा अधीतमिति । **सः** इति सत्त्वः, **ण**मिति वाक्यालङ्कारे, **तत्र** आवश्यके **वाचनया प्रतिप्रश्नेन परावर्त्तनेन धर्मकथया** 'वर्तमानो द्रव्यावश्यक'मिति वाक्यशेषः, **नोऽनुप्रेक्षया** व्यापृतो द्रव्यावश्यकम्, **कस्माद् ? अनुपयोगो द्रव्यमिति कृत्वा,** अनुप्रेक्षया च तदभावात् । तत्र ग्रन्थतः शिष्याध्यापनं **वाचना ।** अनवगतार्थादौ गुरुं प्रति **प्रश्नः** । ग्रन्थस्य पुनः पुनरभ्यसनं **परावर्त्तनम्**। अहिंसादिलक्षणधर्मान्वाख्यानं **धर्मकथा** । ग्रन्थार्थानुचिन्तन**मनुप्रेक्षा** । आह-आगमतोऽनुपयुक्तो द्रव्यावश्यकमित्येतावतैवाभिलषितार्थसिद्धेः शिक्षितादिश्रुतगुणकीर्त्तन-मनर्थकमिति, उच्यते-शिक्षितादि-श्रुतगुणकीर्त्तनं कुर्वन्निदं ज्ञापयति-यथेह सकलदोष-विप्रयुक्तमपि श्रुतं निगदतो द्रव्यश्रुतं भवति द्रव्यावश्यकं च, एवं सर्व एव ईर्यादि-क्रियाविशेषाः अनुपयुक्तस्य विकला इति, उपयुक्तस्य तु यथा स्खलितादिदोषदुष्ट-मपि निगदतः [भाव ?] श्रुतम्, एवमीर्यादयोऽपि क्रियाविशेषाः कर्ममलापगमायेति।

एत्थ य अवायदंसणत्थं हीणक्खरम्मि उदाहरणम्-इहऽड्डभरहम्मि रायगिहं नगरं । तत्थ राया **सेणिओ** नाम होत्था । तस्स पुत्तो पयाणुसारी चउव्विहबुद्धिसंपन्नो **अभओ** णाम होत्था । अण्णया तेणं कालेणं तेणं समएणं समणे भगवं **महावीरे इहऽड्डभरहम्मि** विहरमाणे तम्मि णगरे समोसरिंसु । तत्थ य बहवे सुर-सिद्ध-विज्जाहरा धम्मसवणनिमित्तं समागच्छिसु । ततो धम्मकहावसाणे णियणियभवणाणि गच्छंताणं एगस्स विज्जाहरस्स णहगामिणीए विज्जाए एक्कमक्खरं पम्हुट्ठमासी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तओ तं वियलविज्जं णियगभवणं गंतुमचाएंतं मंडुक्कं वोप्पदणिवयमाणं **सेणिए** अदक्खु । ततो से भगवंतं पुच्छिसु । से य भगवं **महावीरे** अकहिंसु । तं च कहिज्जमाणं निसुणेत्ता **सेणियपुत्ते अभए** विज्जाहरं एवं वयासि-जइ ममं सामण्णसिद्धिं करेसि ततोऽहंते अक्खरं लभामि पयाणुसारित्तणओ । सेय कहिंसु । ततो से **अभए** तमक्खरं लभिंसु, लभित्ता य विज्जाहरस्स कहिंसु । ततो से य पुण्णविज्जो तीए विज्जाए **अभयस्स** साहणोवायं कहेत्ता णियगभवणं गमिंसु त्ति । एस दिट्ठंतो । अयमत्थोवणओ - जहा तस्स विज्जाहरस्स हीणक्खरदोसेणं णहगमणमेव पम्हुट्ठमासी, तम्मि य अहुंते विहला विज्जा । एवं हीनाक्षरेऽर्थभेदः, अर्थभेदात् क्रियाभेदः, ततो मोक्षाभावः, तदभावे च दीक्षावैयर्थ्यमिति ।

अहियक्खरम्मि उदाहरणम्-[५]**पाडलिपुत्ते** नगरे **चंदगुत्त**पुत्तस्स **बिंदुसार**स्स पुत्तो **असोगो** नाम राया । तस्स **असोग**स्स पुत्तो **कुणालो** नाम, **उज्जेणी** से कुमारभोत्ती[ए] दिण्णा । सो खुड्डुओ । अण्णता तस्स रण्णो निवेदितं जहा कुमारो साइरेगट्ठवासो जाओ त्ति । ताहे रण्णा सयमेव लेहो लिहिओ जहाऽहीयतु कुमारो । कुमारस्स य मादीसवक्कीए रण्णो पासट्ठियाए [तत्थ पच्छण्णो बिन्दू पाडिओ, रण्णा अवाइय] [६]मुद्दित्ता **उज्जेणिं** पेसिओ, वाइओ । वायगा पुच्छिया - किं लिहियं ? ते णेच्छंति कहिउं । ताहे कुमारेण सयमेव वाइओ, चिंतियं च णेणं- अम्हं **मोरिय**वंसियाणं अपडिहया आणाओ कहमहं अप्पणो पिउणो आणं भंजामि?। तओ अणेण तत्तसलागाए अच्छीणि अंजियाणि । ताहे रण्णा णायं । परितप्पित्ता **उज्जेणी** अण्णस्स कुमारस्स दिण्णा । तस्स वि कुमारस्स अण्णो गामो दिण्णो । अण्णया तस्स **कुणाल**स्स अंधयस्स पुत्तो जाओ । णामं च से कयं **संपती** । सो अंधयकुणालो गंधव्वे अतीव कुसलो । अण्णया य अण्णायउ(च) ज्जाए गायंतो हिंडइ । तत्थ रण्णो निवेदियं - जहा एरिसो तारिसो गंधव्विओ अंधलउ त्ति । तओ रण्णा भणियं - आणेह त्ति । ताहे आणिओ जवणियंतरिओ गायति । जाहे अतीव **असोगो** अक्खित्तो ताहे भणति - किं ते देमि ? । तओ एत्थ **कुणालेण** गीतं -

**चंदगुत्त**पवोत्तो उ, **बिंदुसार**स्स णत्तुओ ।
**असोगसिरिणो** पुत्तो, अंधो जायति कागणिं ॥१॥ [कल्पभा० गा० २९४]

ताहे रण्णा पुच्छितं - को एस तुमं ? । तेण कहितं-तुब्भं चेव पुत्तो । ततो जवणियं अवसारेउं कंठे पघेत्तुं अंसुपातो कओ, भणियं च - किं देमि ते?। तेण भणियं - कागणिं मे देहि । रण्णा भणियं - किं कागणिए व(वि) तुमं वा(ना) रिहसि जं कागणिं जायसि ? । ततो अमच्चेहिं भणियं - सामि !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रायपुत्ताणं रज्जं कागणि भण्णति । रण्णा भणियं- किं तुमं काहिसि रज्जेणं ? । **कुणालेण** भणियं- मम पुत्तो अत्थि **संपती** णाम कुमारो । तओ से दिण्णं रज्जं। सो च्चेव उवणओ, णवरमहियक्खरेणं ति अभिलावो कायव्वो ।

अहवा भावाहिए लोकियं इमं अक्खाणयं - कामियसरस्स तने(डे)व वंजुलरुक्खो महतिमहालओ । तत्थ किर रुक्खे अवलगिउं जो सरे पडति सो जइ तिरिक्खजोणिओ तो मणुस्सो होति, अह मणुस्सो पडति ततो देवो होति, अह पुणो बीयं वारं पडति तो पुण सो च्चेय होइ । तत्थ वाणरो सपत्तिओ ओयरति पतिदिणं पाणितं पातुं । अण्णया पाणि[य]पिणयट्ठयाए आगतो संतो वंजुलरुक्खाओ मणुस्सित्थिमिहुणगं कामसरे पडितं, ततो तं देवमिहुणगं जायं पेच्छति । तओ वाणरो सपत्तिओ संपहारेति जहा रुक्खेऽवलग्गिउं सरे पडामो जा देवमिहुण्णं भवामो । तओ पडिताणि, उरालं माणुसजुयलं जायं । सो भणइ - [पुणो] पडामो, जाहे देवजुयलगं भवामो । इत्थी वारेती-को जाणति मा ण होमो देवा ?। पुरिसो भणति - जइ ण होज्जामो, किं माणुसत्तणं पि णस्सिहिति ? । तीए भणियं - को जाणइ त्ति । ततो सो तीए वारिज्जमाणो वि पडिओ, पुणो वि वाणरो चेव जाओ, पच्छा सा रायपुरिसेहिं गहिया रण्णो भज्जा जाया । इतरो वि मायारएहिं गहिओ, खेड्डाओ सिक्खावितो । अण्णया य ते मायारगा रण्णो पुरओ पेच्छं देंति । राया वि सह तीए देवीए पेच्छति । ताहे सो वाणरो देविं निज्झाएंतो अहिलसति, तओ तीए अणुकंपाए वाणरो भणिओ —

जो जहा वट्टए कालो, तं तहा सेव वाणरा ! ।
मा वंजुलपरिब्भट्ठो, वाणरा ! पडणं सर ॥१॥ [कल्पभा०गा० २९५]

उपनयः पूर्ववत् ।

भावहीणाधितोभए वि उदाहरणम्-जहा काइ अगारी पुत्तस्स गिलाणस्स णेहेणं तित्त-कटुभेसयाइं मा णं पीलेज्ज ऊणए देइ ।
पउणति ण तेहिं अहिएहिं मरति बालो तहाऽऽहारे ॥१॥ [कल्पभा०गा० २८९]

**(हे०)**अत्राद्यभेदजिज्ञासुराह-से किं तमित्यादि० अथ किं **तदागमतो द्रव्यावश्यक**मिति, आह-'**आगमतो दव्वावस्सयं जस्स ण**'मित्यादि, 'ण'मिति पूर्ववत्, '**जस्स**'त्ति यस्य कस्यचित् '**आवस्सएत्ति पयं**'ति आवश्यकपदाभिधेयं शास्त्रमित्यर्थः, ततश्च यस्य कस्यचिदावश्यकशास्त्रं **शिक्षितं स्थितं जितं** यावत् **वाचनोपगतं** भवति, '**से णं तत्थे**'ति स-जन्तुस्तत्र आवश्यकशास्त्रे वाचना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रच्छना-परिवर्त्तना-धर्म्मकथाभिर्वर्त्तमानोऽप्यावश्यकोपयोगे अवर्त्तमानः 'आगमतः' आगममाश्रित्य द्रव्यावश्यकमिति समुदायार्थः । अत्राह—नन्वागममाश्रित्य द्रव्यावश्यकमित्यागमरूपमिदं द्रव्यावश्यकमित्युक्तं भवति, एतच्चायुक्तम्, यत आगमो ज्ञानम्, ज्ञानं च भाव एवेति कथमस्य द्रव्यत्वमुपपद्यते ? सत्यमेतत्, किन्त्वागमस्य कारणमात्मा तदधिष्ठितो देहः शब्दश्चोपयोगशून्यसूत्रोच्चारणरूप इहास्ति, न तु साक्षादागमः, एतच्च त्रितयमागमकारणत्वात्कारणे कार्योपचारादागम उच्यते, कारणं च विवक्षितभावस्य द्रव्यमेव भवतीत्युक्तमेवेत्यदोषः ।

तत्रादित आरभ्य पठनक्रियया यदन्तं नीतं त**च्छिक्षित**मुच्यते, तदेवाविस्मरणतश्चेतसि स्थितत्वात् **स्थित**मप्रच्युतमित्यर्थः, परावर्त्तनं कुर्व्वतः परेण वा क्वचित् पृष्टस्य यच्छीघ्रमागच्छति त**ज्जितम्**, विज्ञातश्लोकपदवर्णादिसंख्यं मितम्, परि-समन्तात्सर्वप्रकारैर्जितं **परिजितम्**, परावर्त्तनं कुर्व्वतो यत्क्रमेणोत्क्रमेण वा समागच्छतीत्यर्थः, नाम-अभिधानम्, तेन समं **नामसमम्**, इदमुक्तं भवति—यथा स्वनाम कस्यचिच्छिक्षितं जितं मितं परिजितं भवति तथैतदपीत्यर्थः, घोषा-उदात्तादयः, तैर्वाचनाचार्याभिहितघोषैः समं **घोषसमम्**, यथा गुरुणा अभिहिता घोषास्तथा शिष्योऽपि यत्र शिक्षते तत् घोषसममिति भावः, एकद्व्यादिभिरक्षरैर्हीनं हीनाक्षरम्, न तथा **अहीनाक्षरम्**, एकादिभिरक्षरैरधिकमत्यक्षरम्, न तथा **अनत्यक्षरम्**, '**अव्वाइद्धक्खरं**'ति विपर्यस्तरत्नमालागतरत्नानीव व्याविद्धानि-विपर्यस्तान्यक्षराणि यत्र तद्व्याविद्धाक्षरम्, न तथाऽव्याविद्धाक्षरम्, '**अव्वाइद्ध**'मिति क्वचित्पाठः, तत्रापि व्याविद्धाक्षरयोगाद् व्याविद्धम्, न तथाऽव्याविद्धम्, उपलशकलाद्याकुलभूभागे लाङ्गलमिव स्खलति यत्तत् स्खलितम्, न तथा**ऽस्खलितम्**, अनेकशास्त्रसम्बन्धीनि सूत्राण्येकत्र मीलयित्वा यत्र पठति तत् मिलितमसदृशधान्यमेलकवत्, अथवा परावर्त्तमानस्य यत्र पदादिविच्छेदो न प्रतीयते तन्मीलितम्, न तथा**ऽमीलितम्**, एकस्मिन्नेव शास्त्रेऽन्यान्यस्थाननिबद्धान्येकार्थानि सूत्राण्येकत्र स्थाने समानीय पठतो व्यत्याम्रेडितम्, अथवा **आचारादि**सूत्रमध्ये स्वमतिचर्चितानि तत्सदृशानि सूत्राणि कृत्वा प्रक्षिपतो व्यत्याम्रेडितम्, अस्थानविरतिकं वा व्यत्याम्रेडितम्, न तथा**ऽव्यत्याम्रेडितम्**, सूत्रतो बिन्दुमात्रादिभिरन्यूनमर्थतस्त्वध्याहाराकाङ्क्षादिरहितं **प्रतिपूर्णम्**, उदात्तादिघोषैरविकलं **प्रतिपूर्णघोषम्** । अत्राह-घोषसममित्युक्तमेव तत्क इह विशेष इति, उच्यते, घोषसममिति शिक्षाकालमधिकृत्योक्तम्, प्रतिपूर्णघोषं तु परावर्त्तनादिकालमधिकृत्येति विशेषः, कण्ठश्चौष्ठश्च कण्ठौष्ठमिति प्राण्यङ्गत्वात्समाहारस्तेन विप्रमुक्तम्, **कण्ठौष्ठविप्रमुक्तम्**,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालमूकभाषितवद्यदव्यक्तं न भवतीत्यर्थः, गुरुप्रदत्तया वाचनया उपगतं-प्राप्तं गुरुवाचनोपगतम् न तु कर्णाघाटकेन शिक्षितं न वा पुस्तकात् स्वयमेवाधीतमिति भावः । तदेवं यस्य जन्तोरावश्यकशास्त्रं शिक्षितादिगुणोपेतं भवति स जन्तुस्तत्रावश्यकशास्त्रे **वाचनया**-शिष्याध्यापनलक्षणया **प्रच्छनया**ऽनवगतार्थादेर्गुरुं प्रति प्रश्नलक्षणया **परावर्त्तनया**-पुनः पुनः सूत्रार्थाभ्यासलक्षणया **धर्मकथया**-अहिंसादिधर्म्मप्ररूपणस्वरूपया वर्त्तमानोऽपि, अनुपयुक्तत्वादिति साध्याहारम्, आगमतो द्रव्यावश्यकमित्यनेन सम्बन्धः ।

ननु यथा वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकं भवति तथाऽनुप्रेक्षयाऽपि तत्र वर्त्तमानस्तद्भवति ? नेत्याह-'**नो अणुप्पेहाए**'त्ति अनुप्रेक्षया-ग्रन्थार्थानुचिन्तनरूपया, तत्र वर्त्तमानो न द्रव्यावश्यकमित्यर्थः, अनुप्रेक्षाया उपयोगमन्तरेणाभावाद्, उपयुक्तस्य च द्रव्यावश्यकत्वायोगादिति भावः । अत्राह परः—'**कम्हा**'त्ति, ननु कस्माद्वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकम् ? कस्माच्चानुप्रेक्षया तत्र वर्त्तमानो न तथा ? इति प्रच्छकाभिप्रायः, एवं पृष्टे सत्याह—'**अणुवओगो दव्वमितिकट्टु**'त्ति अनुपयोगो द्रव्यमितिकृत्वा, उपयोजनमुपयोगो-जीवस्य बोधरूपो व्यापारः, स चेह विवक्षितार्थे चित्तस्य विनिवेशस्वरूपो गृह्यते, न विद्यतेऽसौ यत्र सोऽनुपयोगः पदार्थः, स विवक्षितोपयोगस्य कारणमात्रत्वात् द्रव्यमेव भवति 'इतिकृत्वा' अस्मात् कारणाद् अनन्तरोक्तमुपपद्यत इति शेषः, एतदुक्तं भवति-उपयोगपूर्व्वका अनुपयोगपूर्वकाश्च वाचनाप्रच्छनादयः संभवन्त्येव, तत्रेह द्रव्यावश्यकचिन्ताप्रस्तावादनुपयोगपूर्व्वका गृह्यन्ते, अत एव सूत्रेऽनभिहित-स्याप्यनुपयुक्तत्वस्याध्याहारस्तत्र कृतः, अनुपयोगस्तु भावशून्यता, तच्छून्यं च वस्तु द्रव्यमेव भवतीत्यतो वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकम्, अनुप्रेक्षा तूपयोगपूर्विकैव संभवति, अतस्तत्र वर्त्तमानो न तथेति भावार्थः ।

अत्राह—नन्वागमतोऽनुपयुक्तो वक्ता द्रव्यावश्यकमित्येतावतैवेष्टसिद्धेः शिक्षितादिश्रुतगुणसमुत्कीर्त्तनमनर्थकम्, अत्रोच्यते, शिक्षितादिगुणोत्कीर्त्तनं कुर्व्वन्निदं ज्ञापयति—यदुतैव भूतमपि निर्दोषं श्रुतमुच्चारयतोऽनुपयुक्तस्य द्रव्यश्रुतं द्रव्या-वश्यकमेव भवति । किं पुनः सदोषम् ? उपयुक्तस्य तु स्खलितादिदोषदुष्टमपि निगदतः भावश्रुतमेव भवति, एवमन्यत्रापि प्रत्युपेक्षणादिक्रियाविशेषाः सर्वे निर्दोषा अप्यनुपयुक्तस्य तथाविधफलशून्या एव संपद्यन्ते, उपयुक्तस्य तु मतिवैकल्यादितः सदोषा अप्यमी कर्ममलापगमायैवेत्यलं विस्तरेण ।

अत्राह—ननु भवत्वेवम्, किन्तु हीनाक्षरे सूत्रे समुच्चारिते को दोषो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येनोक्तमहीनाक्षरमिति, अत्रोच्यते, लोकेऽपि तावद्विद्यामन्त्रादिभिरक्षररादिहीनैरुच्चार्यमाणैर्विवक्षितफलवैकल्यमनर्थावाप्तिश्च दृश्यते, किं पुनः परममन्त्रकल्पे सिद्धान्ते? तथाहि-राजगृहनगरे समवसृतस्य भगवतश्चरमतीर्थाधिपतेर्वन्दनार्थं विबुधविद्याधरनरनिवहः श्रेणिकश्च सपुत्रः समाययौ, ततो भगवदन्तिके धर्मं श्रुत्वा प्रतिनिवृत्तायां परिषदि कस्यचिद्विद्याधरस्य गगनोत्पतनहेतुविद्यासंबन्ध्येकमक्षरं विस्मृतिपथमवततार, विस्मृते च तस्मिन्किञ्चिन्नभस्युत्पत्य पुनर्निपतत्यसौ, पुनरुत्पतति पुनश्च निपतति । एवं च कुर्वन्तममुं विलोक्य श्रेणिकेन भगवान् पृष्टः किमित्ययं महाभागः खेचरो विधुरितपक्षः पक्षीव नभसि किञ्चिदुत्पत्य पुनर्निपततीति ? भगवता च विद्याक्षरविस्मरणव्यतिकरस्तस्मै निवेदितः, तं च निवेद्यमानं श्रुत्वा अभयकुमारः खेचरमुपसृत्यैवमवादीत्-भोः खेचर ! यदि मां समानसिद्धिकं करोषि तदा त्वद्विद्याऽक्षरमुपलभ्य कथयामि, प्रतिपन्नं च तेन । अभयकुमारस्य चैकस्मादपि पदादनेकपदाभ्यूहनशक्तिरस्तीति शेषाक्षरानुसारेणोपलभ्य तदक्षरं निवेदितं खेचरस्य, सोऽपि संजातसंपूर्णविद्यो हृष्टः श्रेणिकसुताय विद्यासाधनोपायं कथयित्वा गतः समीहितप्रदेशमिति एष दृष्टान्तः । उपनयस्त्वयम्-यथा तस्य विद्याधरस्य हीनाक्षरतादोषान्नभोगमनमुपरतम्, तदुपरमे च व्यर्थेव विद्या, तथेहापि हीनाक्षरतायामर्थभेदः, तद्भेदे क्रियाभेदः, तद्भेदे च मोक्षाभावस्तदभावे च दीक्षादिग्रहणवैयर्थ्यमेवेति । एवमधिकाक्षरादिष्वपि दोषाः सदृष्टान्ता अभ्यूह्य वाच्याः ॥१३॥ (अनु०द्वार सू० १४) । **5/3**

**[17]** संप्रति करणानामेव स्वरूपमाविश्चिकीर्षुराह-

**अणुसमयं वड्ढंतो, अज्झवसाणाण णंतगुणणाए ।**
**परिणामट्ठाणाणं, दोसु वि लोगा असंखिज्जा ॥९॥**

अणुसमयं त्ति-अनुसमयं- समये समयेऽध्यवसानानामनन्तगुणनया विशुद्ध्या प्रतिसमयमनन्तगुणवृद्ध्याऽध्यवसानानां विशुद्ध्येत्यर्थः । प्रवर्धमानो यावत् करणसमाप्तिर्भवति तावन्निरन्तरं वर्धते । कियन्ति पुनरध्यवसानानि करणेषु प्रत्येकं भवन्तीति चेदुच्यते—'परिणामेत्यादि' द्वयोरपि यथाप्रवृत्तापूर्वकरणयोः परिणामस्थानानामनुसमयं लोका असंख्येया भवन्ति । एतदुक्तं भवति—यथाप्रवृत्तकरणेऽपूर्वकरणे च प्रतिसमयमसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि अध्यवसायस्थानानि भवन्ति । तथाहि—यथाप्रवृत्तकरणे प्रथमसमये विशोधिस्थानानि नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणानि । द्वितीयसमये विशेषाधिकानि ततोऽपि तृतीयसमये विशेषाधिकानि । एवं तावद्वाच्यं यावच्चरमसमयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमपूर्वकरणेऽपि द्रष्टव्यम् । अमूनि चाध्यवसायस्थानानि यथाप्रवृत्तापूर्वकरणयोः संबन्धीनि स्थाप्यमानानि विषमचतुरस्रं क्षेत्रमास्तृणन्ति । तयोरुपरि चानिवृत्त-करणाध्यवसायस्थानानि मुक्तावलीसंस्थानानि भवन्ति । उपर्युपरिमुखानि चामून्य-नुचिन्त्यमानानि प्रतिसमयमनन्तगुणवृद्ध्या प्रवर्धमानान्यवगन्तव्यानि, तिर्यक् षट्स्थानपतितानि । स्थापना चेयम् ॥९॥ (कर्मप्र०उप०क०गा०९) **5/6**

**[18] मंदविसोही पढमस्स, संखभागाहि पढमसमयम्मि ।**
**उक्कस्सं उप्पिमहो, एक्केक्कं दोण्हं जीवाणं ॥१०॥**

**आचरमाओ सेसुक्कोसं पुव्वप्पवत्तमिइनामं ।**
**बिइयस्स बिइयसमए, जहण्णवि अणंतरुक्कस्सा ॥११॥**

मंदविसोहीत्यादि–इह कल्पनया द्वौ पुरुषौ युगपत्करणप्रतिपन्नौ विवक्ष्येते । तत्रैकः सर्वजघन्यया श्रेण्या प्रतिपन्नः, अपरस्तु सर्वोत्कृष्टया विशोधिश्रेण्या । तत्र प्रथमस्य जीवस्य प्रथमसमये मन्दा सर्वजघन्या विशोधिः सर्वस्तोका । ततो द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या विशोधिर-नन्तगुणा, एवं तावद्वाच्यं यावद्यथाप्रवृत्तकरणस्य संख्येयो भागो गतो भवति । ततः प्रथमसमये द्वितीयस्य जीवस्योत्कृष्टं विशोधिस्थानमनन्तगुणं वक्तव्यम् । ततोऽपि यतो जघन्यस्थानान्निवृत्तस्तस्योपरितनी जघन्या विशोधिरनन्तगुणा । ततोऽपि द्वितीये समये उत्कृष्टा विशोधिरनन्तगुणा । तत उपरि जघन्या विशोधिरनन्तगुणा । एवमुपर्यधश्चैकैकं विशोधिस्थानमनन्तगुणतया द्वयोर्जीवयोस्तावन्नेयं यावच्चरमसमये जघन्या विशोधिः । तत आ चरमात् चरममभिव्याप्य यान्यनुक्तानि स्थानानि उत्कृष्टानि विशोधिस्थानानि तानि क्रमेण निरन्तरमनन्तगुणानि वक्तव्यानि । तदेवं समाप्तं यथाप्रवृत्तकरणम् (१ क०) । अस्य च यथाप्रवृत्तकरणस्य पूर्वप्रवृत्तमिति द्वितीयं नाम, शेषकरणाभ्यां पूर्वं प्रथमं प्रवृत्तं पूर्वप्रवृत्तमिति । अस्मिंश्च यथाप्रवृत्तकरणे स्थितिघातो रसघातो गुणश्रेणिर्वा न प्रवर्तते, केवलमुक्तरूपा विशोधिरेवानन्तगुणा । यानि चाप्रशस्तानि कर्माण्यत्र स्थितो बध्नाति तेषामनुभागं द्विस्थानकं बध्नाति । यानि च शुभानि तेषां चतुःस्थानकम् । स्थितिबन्धेऽपि च पूर्णे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसंख्येयभागन्यूनं बध्नाति ।

संप्रत्यपूर्वकरणमभिधीयते– 'बिइयस्सेत्यादि' द्वितीयस्य करणस्या-पूर्वकरणाख्यस्य यो द्वितीयः समयस्तत्र जघन्यमपि विशोधिस्थानमनन्तरोत्कृष्टात् प्रथमसमयभाविन उत्कृष्टात् विशोधिस्थानात् अनन्तगुणं वक्तव्यम् । एतदुक्तं भवति– नेह यथाप्रवृत्तकरणे इव प्रथमतो निरन्तरं जघन्यानि विशोधिस्थानान्यनन्तगुणतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तव्यानि । किन्तु प्रथमसमये प्रथमतो जघन्या विशोधिः सर्वस्तोका वाच्या । सापि च यथाप्रवृत्तकरणचरमसमयभाविन उत्कृष्टाद्विशोधिस्थानादनन्तगुणा । ततः प्रथमसमय एवोत्कृष्टा विशोधिरनन्तगुणा । ततोऽपि द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तस्मिन्नेव द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तस्मिन्नेव तृतीयसमये उत्कृष्टा विशोधिरनन्तगुणा । एवं प्रतिसमये तावद्वाच्यं यावच्चरमसमये उत्कृष्टा विशोधिरिति ॥१०-११॥

**निव्वयणमवि ततो से, ठिइरसघायठिइबंधगद्धा उ ।**
**गुणसेढी वि य समगं, पढमे समये पवत्तंति ॥१२॥**

निव्वयणंति—ततः 'से' तस्यापूर्वकरणस्य निर्वचनं निश्चयमन्वर्थानुयायि वचनमभिधानं वक्तव्यम् । तद्यथा—अपूर्वाणि अपूर्वाणि करणानि स्थितिघात-रसघात-गुणश्रेणि-स्थितिबन्धादीनां निवर्तनानि यस्मिन् तत् अपूर्वकरणम् । तथाहि—अपूर्वकरणे प्रविशन् प्रथमसमय एव स्थितघातं रसघातं गुणश्रेणिं स्थितिबन्धं चान्यं युगपदारभते। तथा चाह—'ठिइरसेत्यादि' स्थितिघातो रसघातः स्थितबन्धाद्धा गुणश्रेणिरपि च । एते चत्वारः पदार्थाः समकं युगपत् प्रथमे समये प्रवर्तन्ते ॥१२॥

तत्र स्थितिघातप्रतिपादनार्थमाह—

**उयहिपुहत्तुक्कस्सं, इयरं पल्लस्स संखतमभागो ।**
**ठिइकंडगमणुभागा-णणंतभागा मुहुत्तंत्तं (तो) ॥१३॥**

**अणुभागकंडगाणं, बहुहिं सहस्सेहिं पूरए एक्कं ।**
**ठिइकंडगं सहस्सेहिं, तेसिं बीयं सहस्सेहिं ॥१४॥**

उयहि त्ति—स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षत उदधिपृथक्त्वम् उदधिपृथक्त्व -प्रमाणं प्रभूतसागरोपमशतप्रमाणमित्यर्थः । जघन्येन पुनः पल्योपमसंख्येयभागमात्रं स्थितिकण्डकमुत्किरति । उत्कीर्य च याः स्थितीरधो न खण्डयिष्यति तत्र तद्दलिकं प्रक्षिपति । अन्तर्मुहूर्तेन च कालेन तत् स्थितिकण्डकमुत्कीर्यते । ततः पुनरप्यधस्तात् पल्योपमसंख्येयभागमात्रं स्थितिकण्डकमन्तर्मुहूर्तेन कालेनोत्किरति । प्रागुक्तप्रकारेणैव च निक्षिपति । एवमपूर्वकरणाद्धायां प्रभूतानि स्थितखण्डसहस्राणि व्यतिक्रामन्ति । तथा च सति यत् अपूर्वकरणस्य प्रथमसमये स्थितिसत्कर्मासीत्, तत्तस्यैव चरमसमये संख्येयगुणहीनं जातम् । संप्रति रसघातोऽभिधीयते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अणुभागाणेत्यादि' अशुभानां प्रकृतीनां यदनुभागसत्कर्म तस्यानन्ततमं भागं मुक्त्वा शेषाननन्ताननुभागभागान् अन्तर्मुहूर्तेन कालेनाशेषानपि विनाशयति । ततः पुनरपि तस्य प्रागमुक्तस्यानन्ततमस्यानन्ततमं भागं मुक्त्वा शेषान् अनुभागभागान् अन्तर्मुहूर्तेन कालेन विनाशयति । एवमनेकान्यनुभागखण्डसहस्राणि एकस्मिन् स्थितिखण्डे व्यतिक्रामन्ति । तेषां च स्थितिखण्डानां सहस्रैर्द्वितीयमपूर्वकरणं परिसमाप्यते । संप्रति स्थितिबन्धाद्धा भण्यते-अपूर्वकरणस्य प्रथमसमयेऽन्य एवापूर्वः पल्योप-मसंख्येयभागहीनः स्थितिबन्ध आरभ्यते । स्थितिघातस्थितिबन्धौ युगपदेवारभ्येते, युगपदेव च निष्ठां यातः ॥१३-१४॥ (कर्मप्र० उप०क० गा० ११-१४) **5/6**

**[19]** अधुना गुणश्रेणिस्वरूपमाह–

**गुणसेढी निक्खेवो, समये समये असंखगुणणाए ।**
**अद्धादुगाइरित्तो, सेसे सेसे य निक्खेवो ॥१५॥**

गुणसेढि त्ति–यत्स्थितिकण्डकं घातयति तन्मध्याद्दलिकं गृहीत्वा उदय-समयादारभ्य प्रतिसमयमसंख्येयगुणनया निक्षिपति । तद्यथा–उदयसमये स्तोकम् । द्वितीयसमयेऽसंख्येयगुणम् । ततोऽपि तृतीयसमयेऽसंख्येयगुणम् । एवं तावद्वक्तव्यं यावदन्तर्मुहूर्तचरमसमयः । तच्चान्तर्मुहूर्तमपूर्वकरणानिवृत्तिकरणकालात् मनागतिरिक्तं वेदितव्यम् । अक्षरयोजना त्वियं गुणश्रेण्यां निक्षेपः समये समयेऽसंख्येयगुणनया पूर्वपूर्वसमयापेक्षया उत्तरोत्तरसमये वृद्ध्यात्मकया । सोऽपि च निक्षेपोऽद्धाद्वि-कातिरिक्तः अपूर्वकरणानिवृत्तिकरणकालमभ्यधिकः । एष प्रथमसमयगृहीतदलिक-निक्षेपविधिः । एवं द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपविधिर्द्रष्टव्यः । अन्यच्च गुणश्रेणिरचनाय प्रथमसमये दलिकं यद् गृह्यते तत्स्तोकम् । द्वितीय-समयेऽसंख्येयगुणम् । ततोऽपि तृतीयसमयेऽसंख्येयगुणम्, एवं तावद्वाच्यं यावद् गुणश्रेणिकरणचरमसमयः । तथाऽपूर्वकरणसमयेषु अनिवृत्तिकरणसमयेषु चानुभवतः क्रमशः क्षीयमाणेषु सत्सु गुणश्रेणिदलिकनिक्षेपः शेषे शेषे भवति, उपरि च न वर्धते (क० २) ॥१५॥

संप्रत्यनिवृत्तिकरणस्वरूपमाह–

**अनियट्टिम्मि वि एवं, तुल्ले काले समा तओ नामं ।**
**संखिज्जइमे सेसे, भिन्नमुहुत्तं अहो मुच्चा ॥१६॥**

**किंचूणमुहुत्तसमं ठिइबंधद्धाए अंतरं किच्चा ।**
**आवलिदुगेक्कसेसे, आगाल उदीरणा समिया ॥१७॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनियट्टिम्मि त्ति— यथाऽपूर्वकरणप्रथमसमयादारभ्य स्थितिघातादयो युगपत्प्रवर्तमाना उक्ता एवमनिवृत्तिकरणेऽपि वक्तव्याः । 'तुल्ले काले समा तओ नामं ति' तुल्ये समाने काले यतः समा सर्वेषामपि तत्प्रविष्टानां विशोधिर्भवति, न विषमा, ततो नाम सान्वयं निर्वचनीयं अनिवृत्तिकरणमिति । एतदुक्तं भवति— अनिवृत्तिकरणस्य प्रथमसमये ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते तेषां सर्वेषामपि समा-एकरूपा विशोधिः । द्वितीयसमयेऽपि च ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते, तेषामपि सर्वेषां परस्परं समा विशोधिः । नवरं प्रथमसमयभावि-विशोध्यपेक्षयाऽनन्तगुणा । एवं तावद्वक्तव्यं यावदनिवृत्तिकरणचरमसमयः । तत एवमस्मिन् करणे प्रविष्टानां तुल्यकालानामसुमतां परस्परमध्यवसानानां या निवृत्तिर्व्यावृत्तिः सा न विद्यत इत्यनिवृत्तिकरणमिति नाम । अस्मिंश्चानिवृत्तिकरणे यावन्तः समयास्तावन्ति अध्यवसायस्थानानि पूर्वस्मात् पूर्वस्मादनन्तगुणवृद्धानि (भवन्ति) । 'संखिज्जेत्यादि' अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिंश्च भागे संख्येयतमे शेषे तिष्ठति अन्तर्मुहूर्तमात्रमधो मुक्त्वा मिथ्यात्वस्यान्तरकरणं करोति । अन्तरकरणकरणकालश्चान्तर्मुहूर्तप्रमाणः प्रथमस्थितेः किंचिन्न्यूनोऽभिनवस्थितिबन्धाद्धया समः । तथाहि—अन्तरकरणकरणप्रथमसमये एवान्यं स्थितिबन्धं मिथ्यात्वस्यारभते । स्थितिबन्धान्तरकरणे च युगपदेव परिसमापयति । अन्तरकरणे च क्रियमाणे गुणश्रेणेः संख्येयतमं भागमन्तरकरण-दलिकेन सहोत्किरति उत्कीर्यमाणं च दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति । अन्तरकरणाच्चाधस्तनी स्थितिः प्रथमा स्थितिरित्युच्यते । उपरितनी तु द्वितीया । प्रथमस्थितौ च वर्तमान उदीरणाप्रयोगेण दलिकं प्रथमस्थितिसत्कं दलिकं समाकृष्योदयसमये प्रक्षिपति सा उदीरणा । यत्पुनः द्वितीयस्थितेः सकाशादुदीरणा-प्रयोगेण समाकृष्योदये प्रक्षिपति स आगाल इति । उदीरणाया एव विशेषप्रति-पत्त्यर्थमिदं द्वितीयं नाम पूर्वसूरिभिरावेदितम् । उदयोदीरणाभ्यां च प्रथमां स्थिति-मनुभवन् तावद् गतो यावदावलिकाद्विकं शेषं तिष्ठति । तस्मिंश्च स्थिते आगालो न भवति, किंतु केवलोदीरणैव । साप्युदीरणा तावद्यावदावलिकाशेषो न भवति । आवलिकायां च शेषीभूतायामुदीरणापि निवर्तते । ततः केवलेनैवोदयेन तामा-वलिकामनुभवति । तस्यामपि चापगतायामुदयोऽपि मिथ्यात्वस्य विनिवर्तते, तद्दलिकाभावात् । तस्मिंश्चापगते सत्यौपशमिकं सम्यक्त्वमवाप्नोति ॥१६-१७॥ (कर्मप्र० उप० क० गा०१६-१७) **5/6**

**[20]** तथा चाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मिच्छत्तुदए खीणे, लहए सम्मत्तमोवसमियं सो ।**
**लंभेण जस्स लब्भइ, आयहियमलद्धपुव्वं जं ॥१८॥**

मिच्छत्तुदए त्ति–मिथ्यात्वस्योदये क्षीणे सति स जीव उक्तेन प्रकारेणौपशमिकं सम्यक्त्वं लभते । यस्य सम्यक्त्वस्य लाभेन यदात्महितमलब्धपूर्वमर्हदादितत्त्वप्रतिपत्त्यादि तल्लभ्यते । तथाहि–सम्यक्त्वलाभे सति जात्यन्धस्य पुंसश्चक्षुर्लाभे ए(इ)व जन्तोर्यथावस्थितिवस्तुतत्त्वावलोको भवति । महाव्याध्यभिभूतस्य व्याध्यपगमे इव महांश्च प्रमोदः । तदुक्तं–"जात्यन्धस्य यथा पुंसश्चक्षुर्लाभे शुभोदये । सद्दर्शनं तथैवास्य सम्यक्त्वे सति जायते ॥१॥ आनन्दो जायतेऽत्यन्तं तात्त्विकोऽस्य महात्मनः । सद्व्याध्यपगमे यद्वद् व्याधितस्य सदौषधात् ॥२॥" इति ॥१८॥

**तं कालं बीयठिइं, तिहाणुभागेण ( भागं तु ) देसघाइ त्थ ।**
**सम्मत्तं सम्मिस्सं, मिच्छत्तं सव्वघाईओ ॥१९॥**

तं त्ति–तं कालं तस्मिन् काले यतोऽनन्तरसमये औपशमिकसम्यग्दृष्टिर्भविष्यति, तस्मिन् प्रथमस्थितौ चरमसमये इत्यर्थः । मिथ्यादृष्टिः सन् द्वितीयं द्वितीयस्थितिगतं दलिकमनुभागेनानुभागभेदेन त्रिधा करोति । तद्यथा–शुद्धमर्धविशुद्धमविशुद्धं च । तत्र शुद्धं सम्यक्त्वम्, तच्च देशघाति, देशघाति-रसोपेतत्वात्। अर्धविशुद्धं सम्यग्मिथ्यात्वम्, तच्च सर्वघाति, सर्वघातिरसोपेतत्वात्। अशुद्धं मिथ्यात्वम्, तदपि सर्वघाति । तथा चाह-समिश्रं-मिश्रसहितं मिथ्यात्वं सर्वघाति ॥१९॥

**पढमे समए थोवो, सम्मत्ते मीसए असंखगुणो ।**
**अणुसमयमवि य कमसो, भिन्नमुहुत्ता हि विज्झाओ ॥२०॥**

पढमे त्ति–औपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वदलिकं गुणसंक्रमेण सम्यक्त्वसम्यग्मिथ्यात्वयोः संक्रमयति । तच्चैवं–प्रथमसमये स्तोको दलिकनिक्षेपः सम्यक्त्वे । ततो मिश्रेऽसंख्येयगुणः । ततोऽपि द्वितीये समये सम्यक्त्वेऽसंख्येयगुणः । ततोऽपि तस्मिन्नेव द्वितीये समये सम्यग्मिथ्यात्वेऽसंख्येयगुणः । एवमनुसमयं प्रतिसमयं क्रमशः क्रमेण तावद्वक्तव्यं यावदन्तर्मुहूर्तम्। ततः परं विध्यातसंक्रमः प्रागभिहितस्वरूपः प्रवर्तते ॥२०॥

**ठिइरसघाओ गुणसेढी वि य तावं पि आउवज्जाणं ।**
**पढमठिइएँ एग-दुगावलिसेसे त्ति मिच्छत्ते ॥२१॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठिइ त्ति—यावद्गुणसंक्रमस्तावदायुर्वर्जानां सप्तानां कर्मणां स्थितिघातो रसघातो गुणश्रेणिर्वा प्रवर्तते । गुणसंक्रमे च निवर्तमाने ता अपि निवर्तन्ते । मिथ्यात्वस्य पुनः प्रथमस्थितौ यावदेका आवलिकाशेषा न भवति, तावन्मिथ्यात्वस्य स्थितिघातरसघातौ भवतः । आवलिकायां तु शेषीभूतायां तौ निवृत्तौ । यावच्च प्रथमस्थितौ द्वे आवलिके शेषे न भवतस्तावद्गुणश्रेणिरपि मिथ्यात्वस्य प्रावर्त्तिष्ट । आवलिकाद्विके तु शेषीभूते गुणश्रेणिर्निवृत्ता । तदेवमन्तरकरणे प्रविष्टः सन् प्रथमसमयादारभ्य औपशमिकसम्यग्दृष्टिस्तावदभूत् यावदन्तर्मुहूर्तम् ॥२१॥

ततः संप्रति यत्करोति तदाह—

**उवसंतद्धा अंते, विहिणा ओकड्डियस्स दलियस्स ।**
**अज्झवसाणणुरूवस्सुदओ तिसु एक्कयरयस्स ॥२२॥**

उवसंतद्ध त्ति—औपशमिकसम्यक्त्वाद्धाया अन्ते-पर्यन्ते किञ्चित्समधिकावलिकाशेषे वर्तमानस्त्रयाणामपि द्वितीयस्थितिगतानां सम्यक्त्वादिपुञ्जानां दलिकमध्यवसायविशेषेण समाकृष्यान्तरकरणपर्यन्तावलिकायां प्रक्षिपति । तत्र प्रथमसमये प्रभूतम् । द्वितीयसमये स्तोकम् । तृतीयसमये स्तोकतरम् । एवं तावद्वाच्यं यावदावलिकाचरमसमयः । तानि चैवं दलिकानि निक्षिप्यमाणानि गोपुच्छसंस्थानसंस्थितानि भवन्ति । तत आवलिकामात्रे कालेऽन्तरकरणस्य शेषे अमीषां त्रयाणामेकतरस्य दलिकस्योदयो भवति । किंविशिष्टस्येत्याह—अध्यवसायानुरूपस्य । एतदुक्तं भवति—यदि तदानीं शुभः परिणामस्तर्हि सम्यक्त्वदलिकस्योदयः । मध्यमश्चेत्परिणामस्तर्हि सम्यग्मिथ्यात्वदलिकस्य । जघन्यश्चेत्ततो मिथ्यात्वदलिकस्येति ॥२२॥

**सम्मत्तपढमलंभो, सव्वोवसमा तहा विगिट्ठे य ।**
**छालिगसेसाए परं, आसाणं कोइ गच्छेज्जा ॥२३॥**

सम्मत्त त्ति—एष औपशमिकसम्यक्त्वप्रथमलाभो मिथ्यात्वस्य सर्वोपशमाद् भवति, नान्यथा । तथा प्रथमस्थित्यपेक्षया विप्रकर्षश्च बृहत्तरमन्तर्मुहूर्तकालप्रमाणश्च । एष सम्यक्त्वप्रथमलाभः । अस्मिंश्च सम्यक्त्वे लभ्यमाने सति कश्चित्सम्यक्त्वेन समं देशविरतिं सर्वविरतिं वा प्रतिपद्यते । उक्तं च शतकबृहच्चूर्णौ—"उवसमसम्मद्दिट्ठी अंतरकरणट्ठिओ कोई देसविरयं पि लभेइ, कोई पमत्तापमत्तभावं पि, सासायणो पुण न किं पि लहेइ त्ति" एतत्सम्यक्त्वाद्धायां च जघन्यतः समयशेषायां परम् उत्कर्षतः षडावलिकाशेषायां कश्चिद् आसादानं सासादनत्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याति। स च नियमात्तदनन्तरं मिथ्यात्वमेव प्रपद्यते ॥२३॥ (कर्मप्र०, उप० क० गा०१८-२३) **5/6**

**[21]** अधुना ध्यानमेव कालस्वामिभ्यां निरूपयन्नाह -

**अंतोमुहुत्तमेत्तं, चित्तावत्थाणमेगवत्थुंमि ।**
**छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ॥३॥**

व्याख्या—इह मुहूर्तः-सप्तसप्ततिलवप्रमाणः कालविशेषो भण्यते । उक्तं च— कालो परमनिरुद्धो अविभज्जो तं तु जाण समयं तु । समया य असंखेज्जा भवन्ति ऊसासनीसासा ॥१॥ हट्ठस्स अणवगल्लस्स, णिरुवकिट्ठस्स जंतुणो । एगे ऊसासनीसासे, एस पाणुत्ति वुच्चइ ॥२॥ सत्त पाणूणि से थोवे, सत्त थोवाणि से लवे । लवाणं सत्तहत्तरीए, एस मुहुत्ते वियाहिए ॥३॥ अन्तर्मध्यकरणे, ततश्चान्तर्मुहूर्तमात्रं कालमिति गम्यते, मात्रशब्दस्तदधिककालव्यवच्छेदार्थः, ततश्च भिन्नमुहूर्तमेव कालम्, किं ? चित्तावस्थानमिति चित्तस्य-मनसः अवस्थानं चित्तावस्थानम्, अवस्थितिः-अवस्थानम्, निष्प्रकम्पतया वृत्तिरित्यर्थः । क्व ? एकवस्तुनि, एकम्-अद्वितीयं वसन्त्यस्मिन् गुणपर्याया इति वस्तु-चेतनादि, एकं च तद्वस्तु च एकवस्तु तस्मिन् २ छद्मस्थानां ध्यानमिति तत्र छादयतीति छद्म-पिधानं तच्च ज्ञानादीनां गुणानामावारकत्वात् ज्ञानावरणादिलक्षणं घातिकर्म, छद्मनि स्थिताश्छद्मस्था-अकेवलिन इत्यर्थः। तेषां छद्मस्थानाम्, ध्यानं प्राग्वत्, ततश्चायं समुदायार्थः-अन्तर्मुहूर्तकालं यच्चित्तावस्थानमेकस्मिन् वस्तुनि तच्छद्मस्थानां ध्यानमिति, योगनिरोधो जिनानां त्विति तत्र योगाः-तत्त्वत औदारिकादि-शरीरसंयोगसमुत्था-आत्मपरिणामविशेषव्यापारा एव, यथोक्तम्-औदारिकादि-शरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः, तथौदारिक-वैक्रियाहारक-शरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः, तथौदारिक-वैक्रियाहारकशरीरव्यापाराहृतमनोद्रव्यसमूहसाचिव्याज्जीवव्यापारो मनोयोगः इति, अमीषां निरोधो योगनिरोधः, निरोधनं निरोधः, प्रलयकरणमित्यर्थः, केषाम् ? जिनानां-केवलिनाम्, तुशब्द एवकारार्थः, स चावधारणे योगनिरोध एव न तु चित्तावस्थानं चित्तस्यैवाभावाद्, अथवा योगनिरोधो जिनानामेव ध्यानं नान्येषाम् अशक्यत्वादित्यलं विस्तरेण, यथा चायं योगनिरोधो जिनानां ध्यानं यावन्तं च कालमेतद्भवत्येतदुपरिष्टाद् वक्ष्याम इति गाथार्थः ॥३॥(ध्या०श०गा०३)**6/4...30/1**

**[22]** आह-ननु जीवाकुले लोकेऽवश्यमेव जीवघातः संभाव्यते, जीवांश्च घ्नन् कथं हिंसको न स्यात् ? इत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न य घायउ त्ति हिंसो नाघायंतो निच्छियमहिंसो ।**
**न विरलजीवमहिंसो न य जीवघणं ति तो हिंसो ॥१७६३॥**
**अहणंतो वि हु हिंसो दुट्ठत्तणओ मओ अहिमरोव्व ।**
**बाहिंतो न वि हिंसो, सुद्धत्तणओ जहा विज्जो ॥१७६४॥**

न हि घातकः इत्येतावता हिंस्रः, न चाघ्नन्नपि निश्चयनयमतेनाहिंस्रः, नापि विरलजीवम् इत्येतावन्मात्रेणाहिंस्रः, न चापि जीवघनम् इत्येतावता च हिंस्रः इति। किं तर्हि ? अभिमरो गजादि-(राजादि)-घातकः स इव दुष्टाध्यवसायोऽघ्नन्नपि हिंस्रो मतः । बाधमानोऽपि च शुद्धपरिणामो न हिंस्रो यथा वैद्यः, इति घ्नन्नप्यहिंस्रः, अघ्नन्नपि च हिंस्रः उक्तः ॥१७६३-६४॥ स इह कथंभूतो ग्राह्यः इत्याह-

**पञ्चसमिओ तिगुत्तो, नाणी अविहिंसओ न विवरीओ ।**
**होउ व संपत्ती से मा वा जीवोवरोहेणं ॥१७६५॥**

पञ्चभिः समितिभिः समितः, तिसृभिः गुप्तिभिश्च गुप्तो ज्ञानी जीवस्वरूपः-तद्रक्षाक्रियाभिज्ञः सर्वथा जीवरक्षापरिणामपरिणतः, तत्प्रयतश्च कथमपि हिंसन्नप्यविहिंसको मतः । एतद्विपरीतलक्षणस्तु नाहिंसकः, किन्तु हिंस्र एवायम्, अशुभपरिणामत्वात् । बाह्यजीवहिंसायास्तु जीवोपरोधेन जीवस्य कीटादेरूप-रोधेनोपघातेन संपत्तिर्भवतु, मा भूद् वा स तस्य साध्वादेः, हिंसकत्वे तस्या अनैकान्तिकत्वादिति ॥१७६५॥

कुतस्तस्या अनैकान्तिकत्वम् ? इत्याह-

**असुभो जो परिणामो, सा हिंसा सो उ बाहिरनिमित्तं ।**
**को वि अवेक्खेज्ज नवा जम्हाऽणेगंतियं बज्झं ॥१७६६॥**

यस्मादिह निश्चयनयतो योऽशुभपरिणामः स एव हिंसा इत्याख्यायते स च बाह्यासत्त्वातिपातक्रियालक्षणं निमित्तं कोऽप्यपेक्षते, कोऽपि पुनस्तन्निरपेक्षोऽपि भवेत्, यथा तन्दुलमत्स्यादीनाम्, तस्मादनैकान्तिकमेव बाह्यनिमित्तम्, तत्सद्भावेऽप्यहिंसकत्वात्, तदभावेऽपि च हिंसकत्वादिति ॥१७६६॥

नन्वेवं तर्हि बाह्यो जीवघातः किं सर्वथैव हिंसा न भवति ? । उच्यते-कश्चिद् भवति कश्चित्तु न । कथम् ? इत्याह

**असुभ परिणामहेऊ जीवाबाहोत्ति तो मयं हिंसा ।**
**जस्स उ न सो निमित्तं, संतो वि न तस्स सा हिंसा ॥१७६७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तस्माद् यो जीवाबाधोऽशुभपरिणामस्य हेतुः, अथवा, अशुभपरिणामो हेतुः कारणं यस्यासावशुभपरिणामहेतुर्जीवाबाधो जीवघातः स एव हिंसा इति मतं तीर्थकरगणधराणाम् । यस्य तु जीवाबाधस्य सोऽशुभपरिणामो न निमित्तं स जीवाबाधः सन्नपि तस्य साधोर्न हिंसेति । (विशेषा०भा०गा०१७६५-६७) **6/4**

**[23] वन्दिज्जमाणा न समुक्कसंति हीलिज्जमाणा न समुज्जलंति ।**
**दंतेण चित्तेण चरंति धीरा, मुणी समुग्घाइयरागदोसा ॥८६६॥**

व्याख्या-वन्द्यमानाः न समुक्कसन्ति-न समुत्कर्षं यान्ति, तथा हील्यमाना न समुज्ज्वलन्ति-न कोपाग्निं प्रकटयन्ति किं तर्हि ? दान्तेन-उपशान्तेन, चित्तेन चरन्ति धीरा-मुनयः समुद्घातितरागद्वेषा इति गाथार्थः ॥८६६॥ (आव०नि० गा०८६६) **6/6...16/4**

**[24] बालाभिरामेसु दुहावहेसु, न तं सुहं कामगुणेसु रायं ।**
**विरत्तकामाण तवोधणाणं, जं भिक्खुणो सीलगुणे रयाणं ॥१७॥**

तथा बालानां–विवेकरहितानामभिरामाः–चित्ताभिरतिहेतवो ये तेषु 'दुःखावहेषु' उक्तन्यायेन दुःखप्रापकेषु न तत्सुखं 'कामगुणेषु' मनोज्ञशब्दादिषु, सेव्यमानेष्विति शेषः, 'राजन् !'-पृथ्वीपते ! 'विरत्तकामाणं'त्ति प्राग्वत्, कामविरक्तानां-विषयपराङ्मुखानां तप एव धनं येषां ते तपोधनास्तेषां यत्सुखमिति सम्बन्धः, 'भिक्षूणां'-यतीनां शीलगुणयोर्वा सूत्रत्वाद् 'रतानाम्'-आसक्तानामिति सूत्रद्वयार्थः ॥ (उत्तरा० अ० १३ गा०१७) **6/6**

**[25] सल्लं कामा विसं कामा, कामा आसीविसोपमा ।**
**कामे पत्थेमाणा, अकामा जंति दुग्गइं ॥५३॥**

व्या०–शलति-देहान्तश्चलतीति शल्यं-शरीरान्तःप्रविष्टं तोमरादि शल्यमिव शल्यम्, के ते ? काम्यमानत्वात् कामाः-मनोज्ञशब्दादयः, यथा हि शल्यमन्तश्चलद्विविधबाधाविधायि तथैतेऽपि, तत्त्वत एषामपि सदा बाधाविधायित्वात्, तथा वेवेष्टि-व्याप्नोतीति विषं-तालपुटादि, विषमिव विषं कामाः, यथैव हि तदुपभुज्यमानं मधुरमित्यापातसुन्दरमिवाऽऽभाति, अथ च परिणतावतिदारुणमेवमेतेऽपि कामाः, तथा कामाः आस्यो दंष्ट्रास्तासु विषमस्येत्याशीविषस्तदुपमाः, यथा ह्ययमज्ञैरवलोक्यमानः स्फुरन्मणिफणाभूषित इति शोभन इव विभाव्यते, स्पर्शनादिभिरनुभूयमानश्च विनाशायैव भवति तथैतेऽपि कामाः, किञ्च-कामान् 'प्रार्थयमाना' अभिलषन्तोऽपिशब्दस्य लुप्तनिर्दिष्टत्वात् प्रार्थयमाना अपि 'अकामा' इष्यमाणकामाभावात् 'यान्ति'-गच्छन्ति, 'दुर्गतिं'-दुष्टां नरकादिगतिं, तदनेन न केवलं शल्यादिवदनुभूयमाना एवामी दोषकारिणः, किन्तु प्रार्थ्यमाना अपीत्युक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति । तथा च-'यः सद्विवेको नासौ प्राप्तमप्राप्तकाङ्क्षया' इत्यादौ सद्विवेकत्व-मनैकान्तिको हेतुः, न ह्ययमेकान्तः यथा प्राप्तमप्राप्तार्थे न परिह्रियते, प्राप्तस्याप्य-पायहेतोः तदुच्छेदकाप्राप्त्यर्थं विवेकिभिः परिह्रियमाणत्वाद्, अनभ्युपगतोपालम्भ-श्चायम्, मुमुक्षूणां क्वचिदाकाङ्क्षाया एवासम्भवात् उक्तं हि-'मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः इति सूत्रार्थः ॥ (उत्तरा० अ०९ गा०५३) **7/1...3**

**[26] सुवण्णरूपस्स य पव्वया भवे, सिया हु केलाससमा असंखया ।**
**नरस्स लुद्धस्स न तेहि किंचि, इच्छा हु आगाससमा अणंतया ॥४८॥**

व्या०—सुवर्णं च रूप्यं च सुवर्णरूप्यमिति समाहारस्तस्य, 'तुः'-पूरणे, यद्वाऽऽर्षत्वाद् विभक्तिलोपः, तुशब्दः समुच्चये, ततः स्वर्णस्य रूप्यस्य च पर्वता इव पर्वताः-पर्वतप्रमाणाः राशयो 'भवन्ति'-भवेयुः, पर्वतप्रमाणत्वेऽपि च लघुपर्वतप्रमाणा एव स्युरत आह-'सिया हु'त्ति स्यात्-कदाचित्, हुरवधारणे भिन्नक्रमश्च, ततः 'केलाससमा' एव कैलासपर्वततुल्या एव, न त्वन्य-लघुपर्वतप्रमाणाः, तेऽपि 'असङ्ख्यकाः' सङ्ख्याविरहिताः, न तु द्वित्रा एव, नरस्य लुब्धस्य, उपलक्षणत्वात् स्त्रियाः पण्डकस्य वा, न तैः कैलाशसमैरपि सुवर्णरूप्यपर्वतैः 'किञ्चिदपि' अल्पमपि परितोषोत्पादनं प्रतिक्रियत इति शेषः पठ्यते च न तेणं ति अत्र च सूत्रत्वाद् वचनव्यत्ययः, कुतः पुनरिदमित्याह-इच्छा-अभिलाषः, हुरिति यस्मादाकाशेन समा तुल्या आकाशसमा अनन्तिका-अन्तरहिता तथा चैतदनुवादी वाचकः-न तुष्टिरिह शताज्जन्तोर्न सहस्रान्न कोटितः । न राज्यान्नैव देवत्वान्नेन्द्रत्वादपि विद्यते ॥१॥ (उत्तरा०अ०९ गा०४८)**7/2**

**[27] विसयविसं हालाहलं, विसयविसं उक्कडं पियंताणं ।**
**विसयविसाइन्नं पिव, विसयविसविसूइया होइ ॥२१३॥**

'विसय०' गाहा, विषया एव मारणात्मकत्वात् विषं हालाहलं सद्योघाति, तत्पिबतां विषयविषविसूचिका भवतीति सम्बन्धः । किमिवेत्याह-विशदविषं-स्पष्टविषम् उत्कटं-तीव्रं कालकूटादिकं पिबतां विशदविषाजीर्णमिव प्रकट-विषाजरणमिव मारणात्मकं विषये-गोचरे विषविसूचिका तदजीर्णातिरेकलक्षणा सा भवति, कालकूटादिविषभोजिन इव शब्दादिविषयभोजिनोऽनन्तसंसाररूपं तद्विपा-कान्मरणं प्राप्नुवन्तीत्यर्थः ॥२१३॥ (उप०माला गा० २१३) **7/3**

**[28] द्वितीयापूर्वकरणे, प्रथमस्तात्त्विको भवेत् ।**
**आयोज्यकरणादूर्ध्वम्, द्वितीय इति तद्विदः ॥१०॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'द्वितीयापूर्वकरण' इति, ग्रन्थिभेदनिबन्धनप्रथमापूर्वकरणव्यवच्छेदार्थं द्वितीयग्रहणम्, प्रथमेऽधिकृतसामर्थ्ययोगाऽसिद्धेः अपूर्वकरणं त्वपूर्वपरिणामः शुभोऽनादावपि भवे तेषु तेषु धर्मस्थानेषु वर्तमानस्य तथाऽसञ्जातपूर्वो ग्रन्थिभेदादिफल उच्यते । तत्र प्रथमेऽस्मिन् ग्रन्थिभेदः फलम्, अयं च सम्यग्दर्शनफलः, सम्यग्दर्शनं च प्रशमादिलिङ्ग आत्मपरिणामः । यथोक्तं "प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं **तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्**" (त० भाष्य० १-२) इति, यथाप्राधान्यमयमुपन्यासः चारुश्च पश्चानुपूर्व्येति समयविदः । द्वितीये त्वस्मिंस्तथाविधकर्मस्थितेस्तथाविधसंख्येयसागरोपमातिक्रमभाविनि 'प्रथमस्तात्त्विको भवेत्' इति, 'प्रथमो'-पारमार्थिको भवेत्, क्षपकश्रेणियोगिनः क्षायोपशमिकक्षान्त्यादिधर्मनिवृत्तेः, अतोऽयमित्थमुपन्यास इति । अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति प्रवृत्तिलक्षणधर्मसंन्यासायाः प्रव्रज्यायाः ज्ञानयोगप्रतिपत्तिरूपत्वात् ।

अत एवास्या भवविरक्त एवाधिकार्युक्तः, यथोक्तं-"अथ प्रव्रज्यार्हः (१) आर्यदेशोत्पन्नः, (२) विशिष्टजातिकुलान्वितः, (३) क्षीणप्रायकर्ममलः, (४) तत एव विमलबुद्धिः, (५) 'दुर्लभं मानुष्यम्, जन्म मरणनिमित्तम्, संपदश्चपलाः, विषया दुःखहेतवः संयोगे वियोगः, प्रतिक्षणं मरणम्, दारुणो विपाकः' इत्यवगतसंसारनैर्गुण्यः, (६) तत एव तद्विरक्तः, (७) प्रतनुकषायः, (८) अल्पहास्यादिः, (९) कृतज्ञः, (१०) विनीतः (११) प्रागपि राजामात्यपौरजनबहुमतः (१२) अद्रोहकारी, (१३) कल्याणाङ्गः, (१४) श्राद्धः, (१५) स्थिरः, (१६) समुपसंपन्नश्च इति ।" न ह्यनीदृशो ज्ञानयोगमाराधयति, न चेदृशो नाराधयतीति भावनीयम् । सर्वज्ञवचनमागमः, तन्नायमनिरूपितार्थ इति ।

'आयोज्यकरणादूर्ध्वम्' इति केवलाभोगेनाऽचिन्त्यवीर्यतया 'योज्यं'-तथातथा तत्कालक्षपणीयत्वेन भवोपग्राहिकर्मणस्तथावस्थानभावे (भावेन) 'करणं' कृतिरायोज्यकरणं शैलेश्यवस्थाफलमेतत् । अत एवाह 'द्वितीय इति तद्विदयोगसंन्याससंज्ञितः सामर्थ्ययोग इति तद्विदोऽभिदधति शैलेश्यवस्थायामस्य भावात् ।

सर्वमिदमागमिकं वस्तु, तथा चैतत्संवाद्यार्षम्-

"करणं अहापवत्तं, अपुव्वमणियट्टिमेव भव्वाणं ।
इयरेसिं पढमं चिय, भण्णइ करणं ति परिणामो ॥१॥
जा गण्ठी ता पढमं, गण्ठि समइच्छओ भवे बीयं ।
अणियट्टीकरणं पुण, सम्मत्तपुरक्खडे जीवे ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गण्ठि त्ति सुदुब्भेओ, कक्खडघणरूढगूढगण्ठि व्व ।
जीवस्स कम्मजणिओ, घणरागद्दोसपरिणामो ॥३॥
एत्तो विवज्जओ खलु, भिन्ने एयम्मि सम्मणाणं तु ।
थोवं पि सुपरिसुद्धं, सच्चासम्मोहहेउ त्ति ॥४॥
सम्मत्तंमि उ लद्धे, पलियपुहत्तेण सावओ होइ ।
चरणोवसमखयाणं, सागरसंखन्तरा होन्ति'' ॥५॥

[विशेषावश्यकगता इमा गाथा १२०२. १२०३, ११९५-१२२२] इत्यादि लेशतः परिभावितार्थमेतत् ॥१०॥ (योगदृष्टिसमु० श्लो० १०) **8/4**

**[29] नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते अ ।**

**धन्ना आवकहाए, गुरुकुलवासं न मुंचंति ॥५७१३॥**

**व्या० ज्ञानस्य**-श्रुतज्ञानादेर्**भवति** स्याद् **भागी**-भाजनं गुरुकुले वसन्निति प्रकृतम् प्रत्यहं वाचनादिभावात् । तथा **स्थिरतरकः**-पूर्वप्रतिपन्नदर्शनोऽपि सन्नतिशयस्थिरो भवति **दर्शने**-सम्यक्त्वे, अन्वहं स्वसमयपरसमयतत्त्वश्रवणात् तथा **चरित्रे**-चरणे स्थिरतरो भवति, अनुवेलं वारणादिभावात् **चशब्दः** समुच्चये, यत एवं ततो **धन्या**-धर्मधनं लब्धारो **यावत्कथं**-यावज्जीवम्, **गुरुकुलवासं**-गुरुगृहनिवसनम्, **न मुञ्चन्ति**-न परित्यजन्तीति गाथार्थः। (बृ०क०भा०-५७१३) **8/5**

**[30]** इत्थं सम्यक्त्वस्य लिङ्गान्यभिधाय संप्रति तस्यैव माहात्म्यमुपदर्शयन्निदमाह-

**णादंसणिस्स नाणं, नाणेण विणा न हुंति चरणगुणा ।**
**अगुणिस्स नत्थि मुक्खो, नत्थि अमुक्खस्स निव्वाणं ॥३०॥**

अन्यच्च नादर्शनिनः-दर्शनविरहितस्य ज्ञानमिति सम्यग्ज्ञानम्, ज्ञानेन विना ज्ञानविरहिताः न भवन्ति-न जायन्ते, के ते ? चरणगुणाः, तत्र च चरणं-व्रतादि, गुणाः-पिण्डविशुद्ध्यादयः, अगुणिनः-अविद्यमानगुणस्य चरणाविनाभावित्वाद्यथोक्तगुणानामविद्यमानचरणस्य च, यदिवा प्राक्चरणान्तर्गता गुणाश्चरणगुणा इति व्याख्यातास्तत इहापि त एव गृह्यन्ते, नास्ति मोक्षः सकलकर्मक्षयलक्षणो, नास्त्यमुक्तस्य कर्मणेति गम्यते निर्वाणं-निर्वृतिर्मुक्तिपदप्राप्तिरितियावत्, तदत्र पूर्वसूत्रेण मुक्त्यनन्तरहेतोरपि चारित्रस्य सम्यक्त्वभावः एव भवनं तन्माहात्म्यमुक्तम् अनन्तरसूत्रेण तूत्तरोत्तरव्यतिरेकदर्शनिना शेषगुणानाम्, व्यतिरेकस्यान्वयाक्षेपकत्वादिति सूत्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयार्थः ॥ ३० ॥ (उत्तरा० अ०२८ गा०३०) **9/1**

**[31] सण्णाणनाणोवगए महेसी, अणुत्तरं चरियं धम्मसंचयं ।**
**अणुत्तरेणाणधरे जसंसी, ओभासइ सूरिएवंतलिक्खे ॥२३॥**

ततः स कीदृगभूदित्याह-'सः' इति समुद्रपालनामा मुनिर्ज्ञानमिह श्रुतज्ञानं तेन ज्ञानम्—अवगमः, प्रक्रमाद् यथावत्क्रियाकलापस्य तेनोपगतो—युक्तो ज्ञानज्ञानोपगतः, पाठान्तरतः—सन्ति-शोभनानि 'नाने'त्यनेकरूपाणि ज्ञानानि सङ्गत्यागपर्यायधर्माभिरुचितत्त्वाद्यवबोधात्मकानि, तैरुपगतः सन्नानाज्ञानोपगतः, 'धर्मसञ्चयं'-क्षान्त्यादियतिधर्मसमुदयम्, 'अणुत्तरेणाणधरे'त्ति एकारस्यालाक्षणिकत्वादनुत्तरज्ञानं — केवलाख्यं तद्धारयत्यनुत्तरज्ञानधरः, पठ्यते च—'गुणुत्तरे णाणधरे'त्ति, तत्र च गुणोत्तरो-गुणप्रधानो, ज्ञानं-प्रस्तावात्केवलज्ञानं तद्धरः, एकारस्यालाक्षणिकत्वाद् गुणोत्तरं यद् ज्ञानं तद्धरो वाऽत एव यशस्वी 'ओभासइ य'त्ति अवभासते प्रकाशते सूर्यवदन्तरिक्षे, यथा नभसि सूर्योऽवभासते तथाऽसावप्युत्पन्नकेवलज्ञान इति त्रयोदशसूत्रार्थः ॥ (उत्तरा० अ०२१ गा०२३) **9/2**

**[32] तम्हा निच्चसइए, बहुमाणेणं च अहिगयगुणंमि ।**
**पडिवक्खदुगंछाए, परिणइ आलोयणेणं च ॥३६॥**

**तित्थंकरभत्तीए सुसाहुजणपज्जुवासणाए य ।**
**उत्तरगुण सद्धाए अप्पमाओ होइ कायव्वो ॥३७॥**
**एवमसंतोऽवि इमो जायइ जाओऽवि ण पडइ कयाई।**
**ता एत्थं बुद्धिमया अपमाओ होइ कायव्वो ॥३८॥**

प्रस्तावितोपदेशमेवाह-'तम्हे'त्यादि, यस्मादसन्नपि विरतिपरिणामः ग्रहणादुपरिप्रयत्नाज्जायते प्रयत्नं विना चाकुशलकर्मोदयात् सन्नपि प्रतिपतति तस्मात्कारणान्नित्यस्मृत्या सार्वदिकस्मरणेन, भवति यतितव्यमिति सम्बन्धः, तथा बहुमानेन-भावप्रतिबन्धेन, चशब्दः समुच्चये, अधिकृतगुणे-अङ्गीकृतगुणे सम्यक्त्वाणुव्रतादौ, इदं च पदं पूर्वपदाभ्यामुत्तरपदेन च सह प्रत्येकं योज्यते, तथा प्रतिपक्षजुगुप्सया-मिथ्यात्वप्राणिवधाद्युद्वेगेन, तथा परिणत्यालोचनेन अधिकृतगुणविपक्षभूता मिथ्यात्वप्राणातिपातादयो दारुणफला अधिकृतगुणा वा सम्यक्त्वाणुव्रतादयः परमार्थहेतव इत्येवं विपाकपर्यालोचनेन । चशब्दः समुच्चय एवेति गाथार्थः ॥३६॥ 'तित्थ'-मित्यादि, तथा तीर्थंकरभक्त्या-परमगुरुविनयेन, तथा सुसाधुजनपर्युपासनया-भावयतिलोकसेवया, चशब्दः समुच्चय एव, तथोत्तरगुणश्रद्धया- प्रधानतरगुणाभिलाषेण,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्वे सति अणुव्रताभिलाषेण अणुव्रतेषु सत्सु महाव्रताभिलाषेणेति भाव:, चशब्द: समुच्चय एव, अत्र-सम्यक्त्वाणुव्रतादिव्यतिकरे तत्प्रतिपत्त्युत्तरकालं सदा-सर्वकालं भवति-युज्यते यतितव्यम्-उद्यम: कर्तव्य इति गाथाद्वयार्थ: ॥३७॥ अनन्तरोक्तोपदेशमेव फलदर्शनेन निगमयन्नाह-'एवे'त्यादि, एवम्-उक्तन्यायेन नित्यस्मृत्यादिना यत्नेनासन्नपि-अविद्यमानोऽपि, संस्तु जात एवेत्यपिशब्दार्थ:, 'इमो'त्ति अयं सम्यक्त्वपरिणामो विरतिपरिणामश्च, जायते-भवति, जातश्च-संपन्न: पुन: न पतति-नापैति कदाचित्-क्वचिदपि काले, 'ता' इति यस्मादेवं तस्मादत्र-नित्यस्मृत्यादिके प्रयत्ने, बुद्धिमता-धीमता, अप्रमाद:-उद्यम: भवति-वर्तते कर्तव्य इति गाथार्थ: ॥३८॥ (पञ्चा०प्र०पञ्चा०१, गा० ३६-३७-३८) **9/5**

**[33]** अथ चतु:शरणादिकृत्ये यत्फलं स्यात् तद्गाथाद्वयेनाह-

**सुहपरिणामो णिच्चं, चउसरणगमाइ आयरं जीवो ।**
**कुसलपयडी उ बंधइ, बद्धाउ सुहाणुबंधाउ ॥ ५९॥**

शुभपरिणाम:- प्रशस्तमनोध्यवसाय: सन् नित्यं-सदैव चतु:शरणगमनादि-चतु:शरणगमन-दुष्कृतगर्हा-सुकृतानुमोदनान्याचरन्-कुर्वन् साधुप्रभृतिको जीव: कुशलं-पुण्यं तत्प्रकृती: सा उच्चगोअ मणुदुगेत्यादि गाथोक्ता: द्विचत्वारिंशत्संख्या: बध्नाति शुभाध्यवसायबध्यमानत्वात्तासाम्, तथा ताश्च प्रकृतीर्बद्धा: सती: शुभाध्यवसायवशाच्छुभोऽनुबन्ध: उत्तरकालफलविपाकरूपो यासां ता: शुभानुबन्धा: एवंविधा: करोतीत्यर्थ: ॥ ५९ ॥ (चउ०प० गा० ५९) **9/5**

**[34]** अथ कस्माद् वन्दनायां मुद्राविन्यासादिरात्यन्तिकप्रयत्नो विधीयत इत्याह-

**खाओवसमिगभावे, दढजत्तकयं सुहं अणुट्ठाणं ।**
**परिवडियं पि हु जायइ पुणो वि तब्भाववुड्ढिकरं ॥२४॥**

व्याख्या-क्षायोपशमिकभावे मिथ्यात्वमोहनीयादिकर्मविगमविशेषविहितात्मपरिणामे सति न तु लाभाद्यर्थित्वलक्षणौदयिकभावे दृढयत्नकृतं परमादरविहितम् । शुभं-प्रशस्तम् । अनुष्ठानमाचरणं चैत्यवन्दनादि । इह यत्तदिति विशेषो दृश्य: प्रतिपतितमपि तथाविधकर्मदोषाद् भ्रष्टमपि, आस्तामप्रतिपतितम् । हुशब्दोऽवधारणार्थ: । तत्प्रयोगश्च दर्शयिष्यते । जायत एव भवत्येव । पुनरपि- भूयोऽपि । किंभूतं जायत इत्याह-यस्मिन् भावे क्षायोपशमिके वर्त्तमाने तच्छुभमनुष्ठानं विहितं तद्भावस्य तस्याध्यवसायस्य वृद्धिकरं-वर्धनकारि तद्भाववृद्धिकरमत: शुभभावस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोक्षहेतोर्वृद्धिकरत्वाद् वन्दनायां प्रयत्नः संगत एवेति गाथार्थः ॥२४॥ [पञ्चा० प्र० पञ्चा०-३ गा०२४] **9/6**

**[35] उच्चागोत्तस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गोयमा ! उच्चागोत्तस्स कम्मस्स जीवेणं बद्धस्स जाव अट्ठविहे अणुभावे पण्णत्ते तं जहा-जातिविसिट्ठया १ कुलविसिट्ठया २ बलविसिट्ठया ३ रूवविसिट्ठया ४ तवविसिट्ठया ५ सुयविसिट्ठया ६ लाभविसिट्ठया ७ इस्सरियविसिट्ठया ८ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाव अट्ठविधे अणुभावे पन्नत्तं ॥ २९२ ॥**

तत्रोच्चैर्गोत्रविषयं सूत्रमाह-'उच्चागोयस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमष्टविधोऽनुभावः प्रज्ञप्तः, तदेवाष्टविधत्वं दर्शयति-'जाइविसिट्ठया' इत्यादि, जात्यादयः सुप्रतीताः, शब्दार्थस्त्वेवम् - जात्या विशिष्टो जातिविशिष्टस्तद्भावो जातिविशिष्टता इत्यादि 'जं वेएइ पुग्गलं वा' इत्यादि यं वेदयते पुद्गलं बाह्यद्रव्यादिलक्षणम्, तथाहि-द्रव्यसम्बन्धाद्राजादिविशिष्टपुरुषसम्परिग्रहाद् वा नीचजातिकुलोत्पन्नोऽपि जात्यादिसम्पन्न इव जनस्य मान्य उपजायते, बलविशिष्टताऽपि मल्लानामिव लकुटिभ्रमणवशात्, रूपविशिष्टता प्रतिविशिष्टतादृग्वस्त्रालङ्कारसम्बन्धात्, तपोविशिष्टता गिरिकूट्याद्यारोहणेनातापनां कुर्वतः श्रुतविशिष्टतामनोज्ञभूदेशसम्बन्धात् स्वाध्यायं कुर्वतः, लाभविशिष्टता प्रतिविशिष्टरत्नादियोगात्, ऐश्वर्यविशिष्टता धनकनकादिसम्बन्धादिति, 'पुग्गले वा' इति यान् बहून् पुद्गलान् वेदयते पुद्गलपरिणामं दिव्यफलाद्याहारपरिणामरूपं विस्रसया वा यं पुद्गलानां परिणामम् अकस्मादभिहितजलदागमसंवादादिलक्षणं तत्प्रभावादुच्चैर्गोत्रं वेदयते-उच्चैर्गोत्रकर्मफलं जातिविशिष्टत्वादिकं वेदयते, एतेन परत उदय उक्तः, सम्प्रति स्वतस्तमाह-'तेसिं वा उदएणं' तेषां वा उच्चैर्गोत्रकर्मपुद्गलानाम् उदयेन जातिविशिष्टत्वादिकं भवति । [प्रज्ञा० प०-२३, उ०-१ सू. २९२] **9/6**

**[36]** ननु यदि मिथ्यात्वबहुलतायां विशुद्धसम्यक्त्वकथनमपि दुर्लभम्, तर्हि विद्यादिगुणवतां द्रव्यलिङ्ग्यादीनामनुवृत्तिः क्रियतां यथा कृतानुवृत्तयस्ते सम्यक्त्वाङ्गीकारपरायणेषु धार्मिकेषु न द्विषन्तीत्याशङ्क्योत्सूत्राऽभिनिवेशसंक्लिष्टमनसां तेषां सङ्गमपि महानर्थकरं मन्वानो निवारयन्नाह-

**बहुगुणविज्झानिलओ, उस्सुत्तभासी तहा वि मुत्तव्वो ।**
**जह वरमणिजुत्तो वि हु विग्घकरो विसहरो लोए ॥ १८ ॥**

व्याख्या-उत्सूत्रभाषी मोक्तव्य इत्यन्वयः । यद्यपि बहुगुणविद्यानिलयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहवः प्रभूता गुणा निष्ठुरक्रियाकरणादिरूपा यस्य स बहुगुणः विद्याश्चतुर्दश श्रुताभ्यासरूपा वा तासां निलय इव निलयो गृहमिति यावत्ततश्च कर्मधारयः । अथवा बहुगुणेति विद्याविशेषणं बहुगुणत्वं च विद्याया लोके लोकोत्तरे च सिद्धम्, तदुक्तम्-

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-
ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ॥
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनम्,
येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ ६८॥ (भर्तृहरेः)

जह जह सुयमवगाहइ, अइसयरसपसरसंजुयमपुव्वं ।
तह तह पल्हाइमुणी, नव नव संवेग सद्धाए ॥६९॥

ततो यद्यपि बहुगुणविद्यानिलयस्तथापि तदपि उत्सूत्रभाषीसिद्धान्तविरुद्ध-मार्गोपदेष्टा चेत् तर्हि मोक्तव्य एव-त्याज्य एव । तदुक्तं-

उम्मग्गदेसणाए चरणं, नासंति जिणवरिंदाणं ।
वावन्नदंसणा खलु, नहु लब्भा तारिसा दट्ठुं ॥७०॥

अमुमेवार्थं द्रढयन् दृष्टान्तमाह-जहेत्यादि-यथेत्यौपम्ये, वरः-प्रधानो विषादि-दोषनिराकरणेन मणीरत्नं-वरमणिस्तेनयुक्तोऽपि-सहितोऽपि, हुरवधारणे, स चाग्रे यो जयिष्यते । विषधरो-भुजगो लोके विघ्नकर एव-जीवितादिप्रत्यूहकर एव तस्मान्मोक्तव्य इति । यथा हि विषधरो वरमणियुक्तोऽपि विघ्नकर एव तथोत्सूत्रभाषी मणिसमानबहुगुणविद्यावानपि धर्मविघ्नकर एवेति मोक्तव्य इत्यर्थः ॥१८॥ (षष्टिशतकप्र० गा०१८) **9/8**

**[37] आया चेव अहिंसा, आया हिंसत्ति निच्छओ एसो ।**
**जो होइ अप्पमत्तो, अहिंसओ हिंसओ इयरो ॥ ७५५ ॥**

आत्मैवाहिंसा आत्मैव हिंसा इत्ययं निश्चय इत्यर्थः । कथमसावहिंसकः कथं वा हिंसकः ? इत्यत आह—'जो होइ' इत्यादि, यो भवति 'अप्रमत्तः' प्रयत्नवानित्यर्थः स खल्वेवंविधोऽहिंसको भवति, 'हिंसओ इयरो'त्ति 'इतरः' प्रमत्तो यः स हिंसको भवतीत्ययं परमार्थः । अथवाऽनेनाभिप्रायेणेयं गाथा व्याख्यायते, तत्र नैगमस्य जीवेष्वजीवेषु च हिंसा, तथा च वक्तारो लोके दृष्टाः, यदुत जीवोऽनेन हिंसितो—विनाशितः, तथा घटोऽनेन हिंसितो—विनाशितः, ततश्च सर्वत्र हिंसाशब्दानुगमात् जीवेष्वजीवेषु च हिंसा नैगमस्य, अहिंसाऽप्येवमेवेति, संग्रहव्यवहारयोः षट्सु जीवनिकायेषु हिंसा, संग्रहश्चात्र देशग्राही द्रष्टव्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामान्यरूपश्च नैगमान्तर्भावी, व्यवहारश्च स्थूलविशेषग्राही लोकव्यवहरणशीलश्चायम्, तथा चाह-लोको बाहुल्येन षट्स्वेव जीवनिकायेषु हिंसामिच्छतीति, ऋजुसूत्रश्च प्रत्येकं प्रत्येकं जीवे जीवे हिंसां व्यतिरिक्तामिच्छतीति, शब्दसमभिरूढैवंभूताश्च नया आत्मैवाहिंसा आत्मैव हिंसेति, एतदभिप्रायेणैवाह-'आया चेव' इत्यादि, आत्मैवाहिंसा आत्मैव हिंसा इत्ययं निश्चयनयाभिप्रायः, कुतः ? यो भावतोऽप्रमत्तो जीवः स खल्वहिंसकः, इतरश्च प्रमत्तः, ततश्च स एव हिंसको भवति, तस्मादात्मैवाहिंसा आत्मैव हिंसा अयं निश्चयः-परमार्थ इति । (ओघनिर्यु०-गा०-७५५) **10/1**

**[38] अच्चेइ जाईमरणस्स वट्टमग्गं विक्खायरए, सव्वे सरा नियट्टंति, तक्का जत्थ न विज्जइ, मई तत्थ न गाहिया, ओए, अप्पइट्ठाणस्स खेयन्ने, से न दीहे न हस्से न वट्टे न तंसे नं चउरंसे न परिमंडले न किण्हे न नीले न लोहिए न हालिद्दे न सुक्किल्ले न सुरभिगंधे न दुरभिगंधे न तित्ते न कडुए न कसाए न अंबिले न महुरे न कक्खडे न मउए न गरुए न लहुए न उण्हे न निद्धे न लुक्खे ( न सिए )न काऊ न रुहे न संगे न इत्थी न पुरिसे न अन्नहा परिन्ने सन्ने उवमा न विज्जए, अरूवी सत्ता अपयस्स पयं नत्थि, ( सू० १७० )**

'**अत्येति**' अतिक्रमति जातिश्च मरणं च जातिमरणं तस्य '**वट्टमग्गं**'ति पन्थानं मार्गमुपादानं कर्म्मेतियावत्, तदत्येति-अशेषकर्म्मक्षयं विधत्ते, तत्क्षयाच्च किंगुणः स्यादित्याह-विविधम्-अनेकप्रकारं प्रधानपुरुषार्थतयाऽऽरब्धशास्त्रार्थतया तपःसंयमानुष्ठानार्थत्वेन व्याख्यातो मोक्षः-अशेषकर्म्मक्षयलक्षणो विशिष्टाकाशप्रदेशाख्यो वा तत्र रतो व्याख्यातरतः, आत्यन्तिकैकान्तिकानाबाधसुखक्षायिकज्ञानदर्शनसंपदुपेतोऽनन्तमपि कालं संतिष्ठते । किम्भूत इति चेत्, न तत्र शब्दानां प्रवृत्तिः, न च सा काचिदवस्थाऽस्ति या शब्दैरभिधीयेत इत्येतत्प्रतिपादयितुमाह-'**सर्वे**-' निरवशेषाः '**स्वरा**'-ध्वनयस्तस्मान्निवर्त्तन्ते, तद्वाच्यवाचकसम्बन्धे न प्रवर्त्तन्ते, तथाहि-शब्दाः प्रवर्त्तमाना रूपरसगन्धस्पर्शानामन्यतमे विशेषे सङ्केतकालगृहीते तत्तुल्ये वा प्रवर्त्तेरन् न चैतत्तत्र शब्दादीनां प्रवृत्तिनिमित्तमस्ति, अतः शब्दानभिधेया मोक्षावस्थेति । न केवलं शब्दानभिधेया, उत्प्रेक्षणीयाऽपि न सम्भवतीत्याह-सम्भवत्पदार्थविशेषास्तित्वाध्यवसाय ऊहस्तर्कः-एवमेवं चैतत्स्यात्, स च यत्र न विद्यते ततः शब्दानां कुतः प्रवृत्तिः स्यात् ? । किमिति तत्र तर्काभाव इति चेदाह-मननं मतिः-मनसो व्यापारः पदार्थचिन्ता सौत्पत्तिक्यादिका चतुर्विधाऽपि मतिस्तत्र न ग्राहिका, मोक्षावस्थायाः सकलविकल्पातीतत्वात्, तत्र च मोक्षे कर्म्मांशसमन्वितस्य गमनमाहोश्विन्निष्कर्म्मणः?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न तत्र कर्म्मसमन्वितस्य गमनमस्तीत्येतद्दर्शयितुमाह-'**ओजः**' एकोऽशेषमलकलङ्काङ्करहितः, किं च-न विद्यते प्रतिष्ठानमौदारिकशरीरादेः कर्म्मणो वा यत्र सोऽप्रतिष्ठानो-मोक्षस्तस्य, '**खेदज्ञो-**' निपुणो, यदिवा अप्रतिष्ठानो-नरकस्तत्र स्थित्यादिपरिज्ञानतया खेदज्ञो, लोकनाडिपर्यन्तपरिज्ञानादनेन च समस्तलोकालोकखेदज्ञता आवेदिता भवति। सर्वस्वरनिवर्त्तनं च येनाभिप्रायेणोक्तवांस्तमभिप्रायमाविष्कुर्वन्नाह-'**स**'-परमपदाध्यासी लोकान्तक्रोशषड्भागक्षेत्रावस्थानोऽनन्तज्ञानदर्शनोपयुक्तः संस्थानमाश्रित्य न दीर्घो न ह्रस्वो न वृत्तो न त्र्यस्रो न चतुरस्रो न परिमण्डलो, वर्णमाश्रित्य न कृष्णो न नीलो न लोहितो न हारिद्रो न शुक्लो, गन्धमाश्रित्य न सुरभिगन्धो न दुरभिगन्धो, रसमाश्रित्य न तिक्तो न कटुको न कषायो नाम्लो न मधुरः, स्पर्शमाश्रित्य न कर्कशो न मृदुर्न लघुर्न गुरुर्न शीतो नोष्णो न स्निग्धो न रुक्षो '**न काऊ**' इत्यनेन लेश्या गृहीता, यदिवा न कायवान् यथा वेदान्तवादिनाम्-'**एक एव मुक्तात्मा तत्कायमपरे क्षीणक्लेशा अनुप्रविशन्ति आदित्यरश्मय इवांशुमन्तमिति**', तथा न रुहः 'रुह बीजजन्मनि प्रादुर्भावे च' रोहतीति रुहः, न रुहोऽरुहः, कर्म्मबीजाभावादपुनर्भावीत्यर्थः, न पुनर्यथा शाक्यानां दर्शननिकारतो मुक्तात्मनोऽपि पुनर्भवोपादानमिति, उक्तं च-"**दग्धेन्धनः पुनरुपैति भवं प्रमथ्य, निर्वाणमप्यनवधारितभीरुनिष्ठम् । मुक्तः स्वयंकृतभवश्च परार्थशूरस्त्वच्छासनप्रतिहतेष्विह मोहराज्यम्** ॥१॥" तथा च न विद्यते सङ्गोऽमूर्त्तत्वाद्यस्य स तथा, तथा न स्त्री न पुरुषो नान्यथेति-न नपुंसकः, केवलं सर्वैरात्मप्रदेशैः परिः-समन्ताद्विशेषतो जानातीति परिज्ञः, तथा सामान्यतः सम्यग्जानाति पश्यतीति संज्ञः, ज्ञानदर्शनयुक्त इत्यर्थः, यदि नाम स्वरूपतो न ज्ञायते मुक्तात्मा तथाऽप्युपमाद्वारेणादित्यगतिरिव ज्ञायत एवेति चेत्, तन्न, यत आह-उपमीयते सादृश्यात् परिच्छिद्यते यया सोपमातुल्यता सा मुक्तात्मनस्तज्ज्ञानसुखयोर्वा न विद्यते, लोकातिगत्वात्तेषां, कुत एतदिति चेदाह-तेषां मुक्तात्मनां या सत्ता सा अरूपिणी, अरूपित्वं च दीर्घादिप्रतिषेधेन प्रतिपादितमेव ।

किं च-न विद्यते पदम्-अवस्था-विशेषो यस्य सोऽपदः, तस्य पद्यते-गम्यते येनार्थस्तत्पदम्-अभिधानं तच्च 'नास्ति' न विद्यते, वाच्यविशेषाभावात्, तथाहि-योऽभिधीयते स शब्दरूपगन्धरसस्पर्शान्यतरविशेषेणाभिधीयते, तस्य च तदभाव इत्येतद्दर्शयितुमाह, यदिवा दीर्घ इत्यादिना रूपादिविशेषनिराकरणं कृतम् । (आचा० श्रुत०-१ अध्य-५ उ० ६ सू० १७०) **10/6**

**[39] भणंता अकरिंता य, बंधमोक्खपइन्निणो ।**
**वायाविरियमित्तेण, समासा संति अप्पयं ॥ १० ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्या—'भणन्तः'-प्रतिपादयन्तः, प्रक्रमात् ज्ञानमेव मुक्त्यङ्गमिति, 'अकुर्वन्तश्च' मुक्त्युपायानुष्ठानम्, बन्धमोक्षौ-उक्तरूपौ, तयोः प्रतिज्ञा-अभ्युपगमः तद्वन्तः, सूत्रत्वाच्चेना निर्देश अस्ति बन्धोऽस्ति च मोक्ष इत्येवंवादिन एव केवलं न तु तथाऽनुष्ठायिनः वाचि वीर्यम् आत्मशक्तिर्वाग्वीर्यं वाचालतेति यावत्, तदेवानुष्ठानशून्यं वाग्वीर्यमात्रं तेन 'समाश्वासयन्ति' विज्ञानादेव वयं मुक्तिगामिन इति स्वास्थ्यं प्रापयन्ति, कम् ? आत्मानमिति सूत्रार्थः ॥ (उत्तरा० अ०६ गा०१०) **11/3**

यथा चैतन्न चारु तथा स्वत एवाह—

**न चित्ता तायए भासा, कओ विज्जाणुसासणं ? ।**
**विसण्णा पावकम्मेहिं, बाला पंडियमाणिणो ॥११॥**

व्याख्या—'न'-नैव 'चित्रा'-प्राकृतसंस्कृतादिरूपा आर्यविषयं ज्ञानमेव मुक्त्यङ्गमित्यादिका वा 'त्रायते'-रक्षति, पापेभ्य इति गम्यते, केत्याह-भाष्यत इति भाषा-वचनात्मिका, स्यादेतत्-अचिन्त्यो हि मणिमन्त्रमहौषधीनां प्रभाव इत्यघोरादिमन्त्रात्मिका वाक् त्राणाय भविष्यतीत्याह-कुतो ? विदन्त्यनया तत्त्वमिति विद्या-विचित्रमन्त्रात्मिका तस्या अनुशासनं-शिक्षणं विद्यानुशासनं त्रायते पापाद्भयाद्वा ? न कुतोऽपि, तन्मात्रादेव मुक्तौ शेषानुष्ठानवैयर्थ्यप्रसङ्गादिति भावः । अत एव ये तदपि त्राणायेति वदन्ति ते यादृशास्तदेवाह—विविधम्-अनेकप्रकारं सन्नामग्ना विषण्णाः, केषु ? 'पावकम्मेहिं'ति पापकर्म्मसु पापहेतुषु हिंसाद्यनुष्ठानेषु, सततं तत्कारितयेति भावः, यद्वा विषण्णा-विषादं गताः, पापकर्मभिः-पापानुष्ठानैः यथा कथमेवमनुष्ठायिनो वयं भविष्याम इति । पठन्ति च-विसन्ना पावकिच्चेहिं ति तथैव कुतस्त एवंविधा इत्याह-बाला-रागद्वेषाकुलिताः पण्डितमात्मानं मन्यन्ते इत्येवंशीलाः पण्डितमानिनः । ये हि बालाः पण्डितमानिनश्च न स्युस्ते स्वयं सम्यगजानानाः परं पृच्छेयुस्तदुपदेशतश्च तानि परिहरेयुः न तु विषण्णा एवासीरन् । ये तु बालाः पण्डितमानिनश्च ते स्वयमजानाना अपि जानानमन्यमात्मन्यभिमानतोऽनुपासमाना एवंविधा एव भवन्तीति सूत्रार्थः ॥ उत्तरा० अ०६ गा०११) **11/3**

**[40] से वंता कोहं च माणं च मायं च लोभं च एयं पासगस्स दंसणं उवरयसत्थस्स पलियंतकरस्स आयाणं सगडब्भि ॥ सू० १२१ ॥**

वृ० स-ज्ञानादिसहितो दुःखमात्रास्पृष्टोऽव्याकुलितमतिर्द्रव्यभूतो लोकालोकप्रपञ्चात् मुक्तदेश्यः स्वपरापकारिणं क्रोधं च वमिता 'टुवम् उद्गिरणे इत्यस्मात् ताच्छीलिकस्तृन् तद्योगे च षष्ठ्याः प्रतिषेधे क्रोधशब्दाद् द्वितीया लुडन्तं वैतत्, यो हि यथोक्तसंयमानुष्ठायी सोऽचिरात् क्रोधं वमिष्यति, एवमुत्तरत्रापि यथासम्भवमा-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

योज्यम् । तत्रात्मात्मीयोपघातकारिणि क्रोधकर्मविपाकोदयात् क्रोधः, जातिकुलरूप-बलादिसमुत्थो गर्वो मानः, परवञ्चनाध्यवसायो माया, तृष्णापरिग्रहपरिणामो लोभः, क्षपणोपशमक्रममाश्रित्य च क्रोधादिक्रमोपन्यासः, अनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानावरणसंज्वलनस्वगतभेदाविर्भावनाय व्यस्तनिर्देशः, च शब्दस्तु पर्वत-पृथ्वीरेणुजलराजिलक्षणलक्षकः क्रोधस्य, शैलस्तम्भास्थिकाष्ठतिनिशलतालक्षण-लक्षको मानस्य, वंशकुडङ्गीमेषशृङ्गगोमूत्रिकाऽवलेखकलक्षणलक्षको मायायाः, कृमिरागकर्द्दमखञ्जनहरिद्रालक्षणसूचको लोभस्य, तथा यावज्जीव-संवत्सर-चातुर्मास-पक्षस्थित्याविर्भावकश्चेति । तदेवं क्रोधमानमायालोभवमनादेव पारमार्थिकः श्रमणभावो न तत्सम्भवे सति यत उक्तम्-सामण्णमनुचरंतस्स, कसाया जस्स उक्कडा हुंति । मन्नंमि उच्छुपुप्फं व निप्फलं तस्स सामण्णं ॥ जं अज्जिअं चरित्तं देसूणाए वि पुव्वकोडीए । तं पि कसाइयमेत्तो हारेइ नरो मुहुत्तेणं ॥ स्वमनीषिकापरिहारार्थं गौतमस्वाम्याह-एयमित्यादि, एतद् यत्कषायवमनमनन्तरमुपादेशि तत् पश्यकस्य दर्शनं सर्वं निरावरणत्वात् पश्यति उपलभत इति पश्यः, स एव पश्यकः-तीर्थकृत् श्रीवर्धमानस्वामी तस्य दर्शनम् अभिप्रायो यदि वा दृश्यते यथावस्थितं वस्तुतत्त्वमनेनेति दर्शनम्-उपदेशो न स्वमनीषिका, किम्भूतस्य पश्यकस्य दर्शनमित्याह उवरय इत्यादि, उपरतं द्रव्यभावशस्त्रं यस्यासावुपरतशस्त्रः शस्त्राद्वोपरतः शस्त्रोपरतः भावे शस्त्रं त्वसंयमः कषाया वा तस्मादुपरतः, इदमुक्तं भवति-तीर्थकृतोऽपि कषायवमनमृते न निरावरणसकलपदार्थग्राहि परम-ज्ञानावाप्तिः, तदभावे च सिद्धिवधूसमागमसुखाभावः, एवमन्येनापि मुमुक्षुणा तदुपदेशवर्तिना तन्मार्गानुयायिना कषायवमनं विधेयमिति, शस्त्रोपरमकार्यं दर्शयन् पुनरपि तीर्थकर-विशेषणमाह-पलियंतकरस्स-पर्यन्तं कर्मणां संसारस्य वा करोति तच्छीलश्चेति पर्यन्तकरस्तस्यैतद् दर्शनमिति सण्टङ्कः । यथा च तीर्थकृत् संयमाप-कारिकषायशस्त्रोपरमात्कर्मपर्यन्तकृदेवमन्योऽपि तदुक्तानुसारीति दर्शयितुमाह आयाण-मित्यादि आदीयते-गृह्यते आत्मप्रदेशैः सह श्लिष्यतेऽष्टप्रकारं कर्म येन तदादानं हिंसाद्याश्रवद्वारमष्टादशपापस्थानरूपं वा तत्स्थितेर्निमित्तत्वात् कषाया वाऽऽदानं तद्वमिता स्वकृतभिद् भवति स्वकृतमनेकजन्मोपात्तं कर्म्म भिनत्तीति स्वकृतभिद् यो ह्यादानं कर्मणां कषायादि निरुणद्धि सोऽपूर्वकर्मप्रतिनिषिद्धप्रवेशः स्वकृतकर्मणां भेत्ता भवतीति भावः, तीर्थकरोपदेशेनाऽपि परकृतकर्मक्षपणोपायाभावात् स्वकृत-ग्रहणम्, तीर्थकरेणापि परकृतकर्मक्षपणोपाये न व्यज्ञायीति चेत्, तन्न तज्ज्ञानस्य सकलपदार्थसत्ताव्यापित्वेनावस्थानात् । [आचा०श्रुत०१ अध्य०३ उ०४ सू०१२१]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[41] जे ममाइयमइं जहाइ से चयइ ममाइयं, से हु दिट्ठपहे मुणी जस्स नत्थि ममाइयं, तं परिण्णाय मेहावी विइत्ता लोगं वंता लोगसन्नं से मइमं परिक्कमिज्जासि त्तिबेमि ॥ ९८ ॥**

ममायितं-मामकं तत्र मतिर्ममायितमतिस्तां यः परिग्रहविपाकज्ञो 'जहाति'-परित्यजति स ममायितं स्वीकृतं परिग्रहं 'जहाति' परित्यजति, इह द्विविधः परिग्रहो द्रव्यतो भावतश्च, तत्र परिग्रहमतिनिषेधादान्तरो भावपरिग्रहो निषिद्धः, परिग्रहबुद्धिविषयप्रतिषेधाच्च बाह्यो द्रव्यपरिग्रह इति । अथवा काक्वा नीयते, यो हि परिग्रहाध्यवसायकलुषितं ज्ञानं परित्यजति स एव परमार्थतः सबाह्याभ्यन्तरं परिग्रहं परित्यजति, ततश्चेदमुक्तं भवति-सत्यपि संबन्धमात्रे चित्तस्य परिग्रह-कालुष्याभावान्नगरादिसंबन्धः पृथ्वीसंबन्धेऽपि जिनकल्पिकस्येव निष्परिग्रहितैव, यदि नामैवं ततः किमित्याह-'से हु' इत्यादि यो हि मोक्षैकविघ्नहेतोः संसारभ्रमणकारणात् परिग्रहान्निवृत्ताध्यवसायः, हुः- अवधारणे, स एव मुनिः दृष्टो ज्ञानादिको मोक्षपथो येन स दृष्टपथः, यदिवा दृष्टभयः-अवगतसप्तप्रकारभयः शरीरादेः परिग्रहात्साक्षात्पारम्पर्येण वा पर्यालोच्यमानं सप्तप्रकारमपि भयमापनीपद्यत इत्यतः परिग्रहपरित्यागे ज्ञातभयत्वमवसीयत इति । एतदेव पूर्वोक्तं स्पष्टयितुमाह-'जस्स' इंत्यादि यस्य ममायितं स्वीकृतं परिग्रहो न विद्यते स दृष्टभयो मुनिरिति संबन्धः, किंच-तं इत्यादि, तं पूर्वव्यावर्णितस्वरूपं परिग्रहं द्विविधयाऽपि परिज्ञया परिज्ञाय मेधावी-ज्ञातज्ञेयो विदित्वा 'लोकं' परिग्रहाग्रहयोगविपाकिनमेकेन्द्रियादि प्राणिगणं वान्त्वा-उद्गीर्य, लोकस्य-प्राणिगणस्य संज्ञा-दशप्रकारा, अतस्तां स इति मुनिः किंभूतो ? मतिमान् सदसद्विवेकज्ञः 'पराक्रमेथाः-संयमानुष्ठाने समुद्यच्छेः, संयमानुष्ठानोद्योगं सम्यग् विदध्या इति यावद्, अथवाऽष्टप्रकारं कर्मारिषड्वर्गं वा विषयकषायान् वा पराक्रमस्वेति, इतिरधिकारसमाप्तौ, ब्रवीमीति पूर्ववत् । [आचा० श्रुत०-१ अध्य० २. उद्दे०-६. सू० ९८] **11/5**

**[42] से जं च आरभे जं च नारभे, अणारद्धं च न आरभे छणं छणं परिण्णाय...लोगसन्नं च सव्वसो । उद्देसो पासगस्स नत्थि बाले पुणे निहे काम-समणुन्ने असमियदुक्खे दुक्खी दुक्खाणमेव आवट्टं अणुपरियट्टइ त्ति बेमि ॥ सू० १०३-१०४॥**

स कुशलो यदारभते आरब्धवान् वा अशेषकर्मक्षपणोपायं संयमानुष्ठानं यच्च नारभते मिथ्यात्वाविरत्यादिकं संसारकारणम्, तदारब्धव्यमारम्भणीयमनारब्धमना-रम्भणीयं चेति संसारकारणस्य च मिथ्यात्वाविरत्यादेः प्राणातिपाताद्यष्टादशरूपस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैकान्तेन निराकार्यत्वात्, तन्निषेधे च विधेयस्य संयमानुष्ठानस्य सामर्थ्यायातत्वात्तन्निषेधमाह-अणारद्धं च इत्यादि, अनारब्धम्-अनाचीर्णं केवलिभिर्विशिष्टमुनिभिर्वा तन्मुमुक्षुर्नारभते-न कुर्यादित्युपदेशो, यच्च मोक्षाङ्गमाचीर्णं तत्कुर्यादित्युक्तं भवति । यत्तद्भगवदनाचीर्णं परिहार्यं तन्नामग्राहमाह-'छणं छणं' इत्यादि, "क्षणु हिंसायां" क्षणनं क्षणो-हिंसनं कारणे कार्योपचारात् येन येन प्रकारेण हिंसोत्पद्यते तत्तज्ज्ञपरिज्ञया परिज्ञाय प्रत्याख्यानपरिज्ञया परिहरेद्, यदि वा क्षणः-अवसरः कर्तव्यकालस्तं तं ज्ञपरिज्ञया ज्ञात्वाऽऽसेवनापरिज्ञया च आचरेदिति !

किञ्च 'लोयसन्नं' इत्यादि लोकस्य-गृहस्थलोकस्य संज्ञानं संज्ञा-विषयाभिष्वङ्गजनितसुखेच्छा परिग्रहसंज्ञा वा तां च ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च परिहरेत् । कथं ? **सर्वशः**-सर्वैः प्रकारैर्योगत्रिककरणत्रिकेणेत्यर्थः, तस्य एवंविधस्य यथोक्तगुणावस्थितस्य धर्मकथाविधिज्ञस्य बद्धप्रतिमोचकस्य कर्मोद्घातनखेदज्ञस्य बन्धमोक्षान्वेषिणः सत्पथव्यवस्थितस्य कुमार्गनिराचिकीर्षोर्हिंसाद्यष्टादशपापस्थानविरतस्यावगतलोकसंज्ञस्य यद्भवति तद् दर्शयति-उद्दिश्यते नारकादि व्यपदेशेनेत्युद्देशः स पश्यकस्य-परमार्थदृशो न विद्यते इत्यादीनि च सूत्राण्युद्देशकपरिसमाप्ति यावद् तृतीयोद्देशके व्याख्यातानि तत एवार्थोऽवगन्तव्यः आक्षेपपरिहारौ चेति । तानि चामूनि बालः पुनर्निहः कामसमनुज्ञः असमितदुःखः दुःखी दुःखानामेवावर्त्तनमनुपरिवर्तते । इतिः-परिसमाप्तौ, ब्रवीमीति पूर्ववत् । (आचा० श्रु०१ अ० २ उ०६ सू०१०३-१०४) **11/5**

**[43] न कम्मुणा कम्म खवेंति बाला, अकम्मुणा कम्म खवेंति धीरा ।**
**मेधाविणो लोभमयावतीता, संतोसिणो नो पकरेंति पावं ॥ १५ ॥**

किञ्चान्यत्– 'न कम्मुणा' इत्यादि, ते एवमसत्समवसरणाश्रिता मिथ्यात्वादिभिर्दोषैरभिभूताः सावद्येतरविशेषानभिज्ञाः सन्तः कर्मक्षपणार्थमभ्युद्यता निर्विवेकतया सावद्यमेव कर्म कुर्वते, न च '**कर्मणा**'-सावद्यारम्भेण, '**कर्म**'-पापम्, '**क्षपयन्ति**'-व्यपनयन्ति, अज्ञानत्वाद् बाला इव बालास्त इति, यथा च कर्म क्षिप्यते तथा दर्शयति-'**अकर्मणा तु**' आश्रवनिरोधेन तु अन्तशः शैलेश्यवस्थायां कर्म क्षपयन्ति '**वीराः**'-महासत्त्वाः, सद्वैद्या इव चिकित्सयाऽऽमयानिति । मेधा-प्रज्ञा सा विद्यते येषां ते **मेधाविनः**-हिताहितप्राप्तिपरिहाराभिज्ञाः, लोभमयं परिग्रहमेवातीताः-परिग्रहातिक्रमात् लोभातीताः-वीतरागा इत्यर्थः, **सन्तोषिणः**-येन केनचित्सन्तुष्टा अवीतरागा अपीति, यदिवा यत एवातीतलोभा अत एव सन्तोषिण इति, त एवंभूता भगवन्तः '**पापम्**' असदनुष्ठानापादितं कर्म, **न कुर्वन्ति**-नाददति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वचित् पाठः, **लोभभयादतीताः** लोभश्च भयं च समाहारद्वन्द्वः, लोभाद्वा भयं तस्मादतीताः सन्तोषिण इति, न पुनरुक्ता शङ्का विधेयेति, अतो (विधेयाऽत्र यतो) लोभातीतत्वेन प्रतिषेधांशो दर्शितः, सन्तोषिण इत्यनेन च विध्यंश इति, यदिवा लोभातीतग्रहणेन समस्तलोभाभावः सन्तोषिण इत्यनेन तु सत्यप्यवीतरागत्वे नोत्कटलोभा इति लोभाभावं दर्शयन्नपरकषायेभ्यो लोभस्य प्राधान्यमाह ये च लोभातीतास्तेऽवश्यं पापं न कुर्वन्ति इति स्थितम् ॥ (सूयग० अ०१२, गा० १५)
**11/5** श्रुत०१

**[44] जहा कुम्मे सअंगाइं, सए देहे समाहरे ।**
**एवं पावाइं मेधावी, अज्झप्पेण समाहरे ॥ १६ ॥**

जहा कुम्मे इत्यादि-'**यथे**'त्युदाहरणप्रदर्शनार्थः, यथा '**कूर्मः**'-कच्छपः, 'स्वान्य-ङ्गानि'-शिरोधरादीनि, **स्वके देहे समाहरेद्**-गोपयेद्-अव्यापाराणि कुर्याद्। **एवम्**-अनयैव प्रक्रियया **मेधावी**-मर्यादावान् सदसद्विवेकी वा, **पापानि**-पापरूपाण्य-नुष्ठानानि, **अध्यात्मना**-सम्यग्धर्मध्यानादिभावनया, **समाहरेत्**-उपसंहरेत्, मरणकाले चोपस्थिते सम्यक्संलेखनया संलिखितकायः पण्डितमरणे-नात्मानं समाहरेदिति ॥ १६ ॥ (सूयग० श्रुत०१ अ०८, गा०१६) **11/5**

**[45]** आह- ज्ञानक्रिययोः सहकारित्वे सति किं केन स्वभावेनोपकुरुते ? किमविशेषेण शिबिकोद्वाहकवद्, उत भिन्नस्वभावतया गमनक्रियायां नयनचरणादि-व्रातवद् इति, अत्रोच्यते, भिन्नस्वभावतया यत आह-

**णाणं पयासगं सोहओ, तवो संजमो य गुत्तिकरो ।**
**तिण्हं पि समाजोगे, मोक्खो जिणसासणे भणिओ ॥१०३॥**

व्याख्या-तत्र कचवरसमन्वितमहागृहशोधनप्रदीपपुरुषादिव्यापारवदिह जीव-गृहकर्मकचवरभृतशोधनालम्बनो ज्ञानादीनां स्वभावभेदेन व्यापारोऽवसेय इति समुदायार्थः । तत्र ज्ञायतेऽनेनेति ज्ञानम्, तच्च प्रकाशयतीति प्रकाशकम्, तच्च ज्ञानं प्रकाशकत्वेनैवोपकुरुते, तत्स्वभावत्वात्, गृहमलापनयने प्रदीपवत्, क्रिया तु तपःसंयमरूपत्वाद् इत्थमुपकुरुते शोधयतीति शोधकम्, किं तदिति, आह-तापयत्यनेकभवोपात्तमष्टविधं कर्मेति तपः, तच्च शोधकत्वेनैवोपकुरुते, तत्स्व-भावत्वाद्, गृहकचवरोज्झनक्रियया तच्छोधने कर्मकरपुरुषवत्, तथा संयमनं संयमः, भावे अप्प्रत्ययः, आश्रवद्वारविरमणमितियावत्, चशब्दः पृथग् ज्ञानादीनां प्रक्रान्तफलसिद्धौ भिन्नोपकारकर्तृत्वावधारणार्थः, गोपनं-गुप्तिः स्त्रियां क्तिम् (पा० ३-३-९४) आगन्तुककर्मकचवरनिरोध इति हृदयम्, गुप्तिकरणशीलो गुप्तिकरः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च संयमोऽपि अपूर्वकर्मकचवरागमनिरोधतयैवोपकुरुते, तत्स्वभावत्वात्, गृहशोधने पवनप्रेरितकचवरागमनिरोधेन वातायनादिस्थगनवत्, एवं त्रयाणामेव, अपिशब्दोऽवधारणार्थः, अथवा सम्भावने, किं सम्भावयति ? 'त्रयाणामपि' ज्ञानादीनाम्, किंविशिष्टानाम् ? निश्चयतः क्षायिकाणाम्, न तु क्षायिकोपशमिकानामिति समायोगे संयोगे मोक्षः-सर्वथाऽष्टविधकर्ममलवियोगलक्षणः, जिनानां शासनं जिनशासनम्, तस्मिन् 'भणितः''-उक्तः । आह-'**सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः** (त०१/१) इत्यागमो विरुध्यते, सम्यग्दर्शनमन्तरेण उक्तलक्षणज्ञानादित्रयादेव मोक्षप्रतिपादनादिति उच्यते सम्यग्दर्शनस्य ज्ञानविशेषात्वाद् रुचिरूपत्वात् ज्ञानान्तर्भावाद् अदोष इति गाथार्थः ॥१०३॥ (आव०नि०गा०१०३) **11/7**

**[45] णाणं पयासगं सोहओ, तवो संजमो य गुत्तिकरो ।**
**तिण्हंपि समाजोगे, मोक्खो जिणसासणे भणिओ ॥११७५ ॥**

अस्य व्याख्या—इह यथा कचवरसमन्वितमहागृहशोधने प्रतीपादानां पृथग्व्यापारस्तद्वज्जीवगृहकर्मकचवरशोधने ज्ञानादानाम् । तत्र ज्ञायतेऽर्थोऽनेनेति ज्ञानम्, तच्च प्रकाशकम्, प्रकाशकत्वेन ज्ञानमुपकुरुते गृहमलापनयने प्रदीपवदिति भावः । तथा शोधयतीति शोधकम्, किं तदित्याह-'तपः' तापयति अनेकभवोपात्तमष्टविधं कर्मेति तपः, तच्च शोधकत्वेनोपकुरुते, गृहशोधने कर्म्मकरपुरुषवत्, संयमनं संयम-आश्रवद्वारविरमणं चशब्दः पृथक् ज्ञानादीनां विवक्षितफलसिद्धौ भिन्नोपकारकारित्वावधारणार्थः, गोपनं गुप्तिः-कर्म्मकचवरागमनिरोधस्तत्करणशीलो गुप्तिकरः, संयमोऽपि कर्मकचवरागमनिरोधकरणेनोपकुरुते इति भावः, गृहशोधने पवनप्रेरितकचवरागम-निरोधकरणेन वातायनादिस्थगनवदितियावत् । उक्तं च-"ज्ञानं सुमार्गदीपं सम्यक्त्वम्, तदपराङ्मुखत्वाय । चारित्रमाश्रवघ्नं क्षपयति कर्माणि तु तपोऽग्निः ॥१॥" इति, एवं त्रयाणामेव अपिशब्दोऽवधारणे, अथवा संभावने, किं संभावयति? त्रयाणामपि ज्ञानादीनां क्षायिकाणाम् न तु क्षायोपशमिकादीनामिति समायोगे संयोगे मोक्षः-सकलकर्म्ममलविकलतालक्षणो जिनशासने भणितः-प्रतिपादितः । नन्वेवं तर्हि "**सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग्गः**" (**त०१/१**) इत्यागमो विरुध्यते, सम्यग्दर्शनमन्तरेणापि उक्तलक्षण ज्ञानादिद्वयादेव मोक्षप्रतिपादनात्, न विरुध्यते, सम्यग्दर्शनस्य ज्ञानान्तर्भावात्, तदन्तरेण ज्ञानस्य ज्ञानत्वस्यैवायोगादिति ॥११७५॥(धर्मसं०-गा० ११७५) **11/7**

**[46] एत्तो च्चिय अवणीया, किरियामेत्तेण जे किलेसा उ ।**
**मंडुक्कचुन्नकप्पा, अन्नेहि वि वन्निया णवरं ॥ १९१ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत एवाज्ञाबाह्यशमस्य दुःखपरिणामफलत्वाद् हेतोः, किमित्याह-'अपनीता' इवापनीताः समुद्भूतावस्थां त्याजिताः, 'क्रियामात्रेण'-क्रिययैव बालतपश्चरणाऽकामशीतोष्णाद्यधिसहनरूपया सम्यग् विवेकविकलत्वेन केवलया वक्ष्यमाणतुशब्दस्य पुनरर्थस्येहाभिसम्बन्धाद् 'ये' तु-ये पुनः 'क्लेशाः' कामक्रोधलोभाभिमानादयो दोषाः, ते मण्डूकस्य-भेकस्य मृतकस्य सतस्तथाविधप्रयोगाद् यश्चूर्णः-अतिसूक्ष्मखण्डसमूहलक्षणो मण्डूकचूर्णस्तस्मात् किञ्चिदूना मण्डूकचूर्णकल्पा वर्त्तन्ते। इत्यन्यैरपि तीर्थान्तरीयैः सौगतादिभिर्वर्णिताः स्वशास्त्रेषु निरूपिता 'नवरं'-केवलम् । तदुक्तं-'क्रियामात्रतः कर्म्मक्षयो मण्डूकचूर्णवत्, भावनातस्तु तद्भस्मवत् इत्यादि ॥१९१॥ (उपदेशपद प्रक० गा०-१९१) **11/7**

**[47]** एतदेवाह-

**जइ जिणमयं पवज्जह, ता मा ववहारणिच्छए मुअह ।**
**ववहारणउच्छेए, तित्थुच्छेओ जओवस्सं ॥ १७२ ॥**

वृत्तिः- यदि जिनमतं प्रपद्यध्वं यूयं ततो मा व्यवहार-निश्चयौ मुञ्चत-मा हासिष्ठाः, किमित्यत्र आह- व्यवहारनयोच्छेदे तीर्थोच्छेदो यतोऽवश्यम्, अतो व्यवहारतोऽपि प्रव्रजितः प्रव्रजित एव इति गाथार्थः (पञ्चव० गा०१७२) **11/7... 32/1**

**[48] अहो जिणेहिं असावज्जा, वित्ती साहूण देसिआ ।**
**मुक्खसाहणहेउस्स, साहुदेहस्स धारणा ॥ ९२ ॥**

अहो जिणेहिं सूत्रम्-अहो-विस्मये, जिनैः-तीर्थकरैः, असावद्या-अपापा, वृत्तिः-वर्तना, साधूनां दर्शिता देशिता वा, मोक्षसाधनहेतोः-सम्यग्दर्शनज्ञानचारित्र-साधनस्य साधुदेहस्य धारणाय संधारणार्थमिति सूत्रार्थः । (दशवै० अ० ५ उ० १ गा० ९२) **12/7**

**[49] जं सम्मं ति पासहा तं मोणंति पासहा, जं मोणंति पासहा तं सम्मं ति पासहा, ण इमं सक्कं सिढिलेहिं अदिज्जमाणेहिं गुणासाएहिं वंकसमायारेहिं पमत्तेहिं गारमावसंतेहिं मुणी मोणं समायाए धुणे कम्मसरीरगं पंतं लूहं सेवंति वीरा सम्मत्तदंसिणो... ॥ १५५ ॥**

यदेव च पापकर्म्मवर्जनं तदेव च सम्यक् प्रज्ञानमित्येतद्गतप्रत्यागतसूत्रेणैव दर्शयितुमाह सम्यगिति सम्यग्ज्ञानं सम्यक्त्वं वा तत्सहचरितम्, अनयोः सहभावादेकग्रहणे द्वितीयग्रहणं न्याय्यम्, यदिदं सम्यग्ज्ञानं सम्यक्त्वं वेत्येतत्पश्यत तन्मुनेः भावो मौनं-संयमानुष्ठानमित्येतत्पश्यत, यच्च मौनमित्येतत् पश्यत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्सम्यग्ज्ञानं नैश्चयिकसम्यक्त्वं वा पश्यत, ज्ञानस्य विरतिफलत्वात् सम्यक्त्वस्य चाभिव्यक्तिकारणत्वात् सम्यक्त्वज्ञानचरणानामेकताऽध्यवसेयेति भावार्थः । एतच्च न येन केनचिच्छक्यमनुष्ठातुमित्याह-नैतत् सम्यक्त्वादित्रयं सम्यगनुष्ठातुं शक्यम्, कैः ? **शिथिलैः**-अल्पपरिणामतया मन्दवीर्यैः संयमतपसोर्धृतिद्रढिमरहितैरिति, किञ्च-आर्द्रैः पुत्रकलत्राद्यनुषङ्गजनितस्नेहादार्द्रीक्रियमाणैरेतत्पूर्वोक्तमशक्यमिति सम्बन्धः, किञ्च गुणाः शब्दादयस्तेष्वास्वादो येषां ते गुणास्वादास्तैरिति, किञ्च वक्रः समाचारो येषां ते तथा तैः मायाविभिरित्यर्थः, तथा पमत्तेहिं त्ति विषयकषायादि-प्रमादैः प्रमत्तैरिति, किञ्च अगारं-गृहं तद् आद्यक्षरलोपाद् गारमित्युक्तं तदगारमाव-सद्भिः-सेवमानैः, पापकर्मवर्जनरूपं मौनमनुष्ठानमशक्यमिति सर्वत्र योजनीयम् । कथं तर्हि शक्यमित्याह-**मुनिः** जगत्त्रयस्य मन्ता मौनं-मुनित्वमशेषसावद्यानुष्ठान-वर्जनरूपं '**समादाय**'-गृहीत्वा धुनीयाच्छरीरकमौदारिकं कर्म्म शरीरं वेति । कथं च तद्धुननमित्याह-'प्रान्तं-पर्युषितं वल्ल-चनकाद्यल्पं वा तदपि रूक्षं विकृतेरभावात्, तत् 'सेवन्ते' तदभ्यवहरन्ति, के ते ? '**वीराः**' कर्मविदारणसहिष्णवः, किंभूताः? सम्यक्त्वदर्शिनः समत्वदर्शिनो वा । (आचा०श्रु०१ अ०५ उ०३ सू०१५५) **13/1**

अभेदमेव समर्थयितामाह-

**[50] आत्मानमात्मना वेत्ति, मोहत्यागाद्य आत्मनि ।**
**तदेव तस्य चारित्रम्, तज्ज्ञानं तच्च दर्शनम् ॥ २ ॥**

आत्मानं कर्मतापन्नमात्मन्याधारभूते आत्मना स्वयमेव यो वेत्ति जानीते । एतच्च ज्ञानं न मूढानां भवतीत्याह-मोहत्यागात् तदेवात्मज्ञानमेव तस्यात्मन-श्चारित्रम्, अनास्रवरूपत्वात् । तज्ज्ञानं-तदेव ज्ञानम्, बोधरूपत्वात् । तच्च दर्शनम्-तदेव दर्शनं श्रद्धारूपत्वात् ॥२॥ (यो०शा० प्र०४, श्लो०२) **13/2**

**[51]** सद्धर्मपरीक्षकस्य बालादिभेदत्रयव्यापारद्वारा(स्वरूपं) निरूपयन्नाह-

**बालः पश्यति लिङ्गम्, मध्यमबुद्धिर्विचारयति वृत्तम् ।**
**आगमतत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥१।२॥**

**बालः**-विवेकविकलो धर्मेच्छुरपि, **लिङ्गं**-बाह्यं वेषम्, **पश्यति** प्राधान्येन । **मध्यमबुद्धिः**-मध्यमविवेकसम्पन्नो **वृत्तम्**-आचारं **विचारयति**-'यदि अयमाचार-वान् स्यात् तदा वन्द्यः स्यादि'ति वितर्कारूढं करोति । **बुधः**-विशिष्टविवेक-सम्पन्नस्तु **सर्वयत्नेन**-सर्वादरेण, **आगमतत्त्वं**-सिद्धान्तपरमार्थं **परीक्षते**-पुरस्कृत्याऽऽद्रियते । बालादीनां बाह्यदृष्ट्यादौ च स्वरूपभेद एव हेतुः ॥१।२॥ (षोड०प्र०षो०१ श्लो०२) **13/2...19/7**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[52]** [एवंभूततत्त्वश्रद्धानरूपस्य सम्यग्दर्शनस्य सम्यग्ज्ञानरूपत्वमेव इति वर्णनं] एवंभूतं वस्तुतत्त्वं श्रद्धानः सम्यग्ज्ञानवानेव पुरुषः सम्यग्दृष्टिरित्याह-

**एवं जिणपण्णत्ते सद्दहमाणस्स भावओ भावे ।**
**पुरिसस्साभिणिबोहे, दंसणभद्दो हवइ जुत्तो ॥३२॥**

एवमनन्तरोक्तविधिना जिनप्रज्ञप्तान् भावान् श्रद्दधानस्य पुरुषस्य यदाभिनिबोधिकं ज्ञानं तदेव सम्यग्दर्शनम् विशिष्टावबोधरूपायाः रुचेः सम्यग्दर्शनशब्दवाच्यत्वादिति भावः ॥३२॥ सम्यग्ज्ञाने दर्शनत्वस्य नियततया दर्शने सम्यग्ज्ञानत्वस्य विकल्पनीयतया सम्यग्दर्शनम् विशिष्टज्ञानरूपमेव इति फलिताभिधानम् ॥ (सन्म० कां० २ गा० ३२) **13/3**

**[53] पुल्लेव मुट्ठी जह से असारे, अयंतिए कूडकहावणे वा ।**
**राढामणी वेरुलियप्पगासे, अमहग्घओ होइ हु जाणएसु ॥४२॥**

स चैवंविधः पोल्लेत्यन्तः शुषिरा, एव इत्यवधारणे, तेन पोल्लेव, न मनागपि निबिडा-मुष्टिः-अङ्गुलिसन्निवेशविशेषात्मिका यया इति सादृश्ये पठ्यते वा-पोल्लारमुट्ठीजहत्ति इहापि पोल्लरत्ति शुषिरा, असारत्वं-चोभयोरपि सदर्थशून्यतया, अयंतियत्ति-अयन्त्रितः अनियमितः कूटकार्षापणवत्, वाशब्दस्येहोपमार्थत्वात्, यथा ह्यसौ न केनचित् कूटतया नियन्त्र्यते, तथैषोऽपि गुरूणामप्यविनीततयोपेक्षणीयत्वात्, राढामणित्ति काचमणिर्वैडूर्यवत्प्रकाशते-प्रतिभासत इति वैडूर्यप्रकाशः-वैडूर्यमणिसदृशः अमहार्घकः इत्यमहामूल्यो भवति चः-समुच्चये । भिन्नक्रमस्ततोऽमहार्घकश्च जाणएसु त्ति ज्ञेषु मुग्धजनविप्रतारकत्वात्तस्य । (उत्तरा० अ० २० गा०४२) **13/4**

**[54]** कथं व्यवहारस्य प्रतिपादकत्वमिति चेत्-

**जो हि सुएणहिगच्छइ, अप्पाणमिणं तु केवलं सुद्धं ।**
**तं सुयकेवलिमिसिणो, भणंति लोयप्पईवयरा ॥९॥**

**जो सुयणाणं सव्वं, जाणइ सुयकेवलिं तमाहु जिणा ।**
**णाणं अप्पा सव्वं, जम्हा सुयकेवली तम्हा ॥१०॥** (जुम्मं)

**यो हि श्रुतेनाभिगच्छति, आत्मानमिमं तु केवलं शुद्धम् ।**
**तं श्रुतकेवलिनमृषयो, भणन्ति लोकप्रदीपकराः ॥९॥**

**यः श्रुतज्ञानं सर्वं जानाति, श्रुतकेवलिनं तमाहुर्जिनाः ।**
**ज्ञानमात्मा सर्वं यस्माच्छ्रुतकेवली तस्मात् ॥१०॥** (युग्मम्),

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः श्रुतेन केवलं शुद्धमात्मानं जानाति स श्रुतकेवलीति तावत्परमार्थो यः श्रुतज्ञानं सर्वं जानाति स श्रुतकेवलीति तु व्यवहारः । तदत्र सर्वमेव तावत् ज्ञानं निरूप्यमाणं किमात्मा किमनात्मा ? न तावदनात्मा समस्तस्याप्यनात्मनश्चेतनेतर-पदार्थपञ्चतयस्य ज्ञानतादात्म्यानुपपत्तेः । ततो गत्यन्तराभावात् ज्ञानमात्मेत्यायात्यतः श्रुतज्ञानमप्यात्मैव स्यात् । एवं सति य आत्मानं जानाति स श्रुतकेवलीत्यायाति स तु परमार्थ एव । एवं ज्ञानज्ञानिनौ भेदेन व्यपदिशता व्यवहारेणापि परमार्थमात्रमेव प्रतिपाद्यते न किञ्चिदप्यतिरिक्तम् । अथ च यः श्रुतेन केवलं शुद्धमात्मानं जानाति स श्रुतकेवलीति परमार्थस्य प्रतिपादयितुमशक्यत्वाद्यः श्रुतज्ञानं सर्वं जानाति स श्रुतकेवलीति व्यवहारः परमार्थप्रतिपादकत्वेनात्मानं प्रतिष्ठापयति ॥९-१०॥

अथ पूर्वगाथायां भणितं व्यवहारेण परमार्थो ज्ञायते ततस्तमेवार्थं कथयति-जो-यः कर्त्ता हि स्फुटं सुदेण-भावश्रुतेन स्वसंवेदनज्ञानेन निर्विकल्पसमाधिना करणभूतेन अभिगच्छदि अभि-समन्ताज्जानात्यनुभवति । कम् ? अप्पाणं-आत्मानम्, इणं इमं प्रत्यक्षीभूतं तु-पुनः । किंविशिष्टम् । केवलम्-असहायं-सुद्धम्- रागादिरहितं तं पुरुषं सुदकेवलिं-निश्चयश्रुतकेवलिनम् इसिणो-परमऋषयः भणंति-कथयन्ति लोगप्पदीवयरा-लोकप्रदीपकराः लोकप्रकाशका इति। अनया गाथया निश्चयश्रुतकेवलिलक्षणमुक्तम् । अथ 'सुदणाण'मित्यादि—जो-यः कर्त्ता सुदणाणं-द्वादशाङ्गं द्रव्यश्रुतं सव्वं-सर्वं परिपूर्णं जाणादि-जानाति, सुदकेवलिं-व्यवहारश्रुतकेवलिनं तमाहु जिणा-तं पुरुषम् आहुः-ब्रुवन्ति । के ते । जिनाः-सर्वज्ञाः । कस्मादिति चेत् । जम्हा यस्मात्कारणात् सुदणाणं-द्रव्यश्रुताधारेणोत्पन्नं भावश्रुतज्ञानम्, आदा-आत्मा भवति । कथंभूतं सव्वं-सर्व्वमात्मसंवित्तिविषयं परपरिच्छित्तिविषयं वा तम्हा-तस्मात् कारणात्, सुदकेवली-द्रव्यश्रुतकेवली स भवतीति । अयमत्रार्थः यो भावश्रुतरूपेण स्वसंवेदनज्ञानबलेन शुद्धात्मानं जानाति स निश्चयश्रुतकेवली भवति। यस्तु स्वशुद्धात्मानं न संवेदयति न भावयति बहिर्विषयं द्रव्यश्रुतार्थं जानाति स व्यवहारश्रुतकेवली भवतीति । । ननु तर्हि स्वसंवेदनज्ञानबलेनास्मिन्कालेऽपि श्रुतकेवली भवति ? तन्न यादृशं पूर्वपुरूषाणां शुक्लध्यानरूपं स्वसंवेदनज्ञानं तादृशमिदानीं नास्ति किन्तु धर्म्यध्यानयोग्यम-स्तीत्यर्थः । एवं निश्चयव्यवहारश्रुतकेवलिव्याख्यानरूपेण गाथाद्वयेन तृतीयं स्थलं गतम् ॥९-१०॥ (समयप्रा० गा० ९-१०) **13/2**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[55]** केन विधिनायमास्रवेभ्यो निवर्तत इति चेत्–

**अहमिक्को खलु सुद्धो, णिम्ममओ णाणदंसणसमग्गो ।**
**तम्हि ठिदो तच्चित्तो, सव्वे एदे खयं णेमि ॥७३॥**

**अहमेकः खलु शुद्धः, निर्ममतः ज्ञानदर्शनसमग्रः ।**
**तस्मिन् स्थितस्तच्चित्तः, सर्वानेतान् क्षयं नयामि ॥७३॥**

(आत्मख्यातिः वृत्तिः) अहमयमात्मा प्रत्यक्षमक्षुण्णमनन्तं चिन्मात्रं ज्योतिरनाद्यनन्तनित्योदितविज्ञानघनस्वभावभावत्वादेकः सकलकारकचक्रप्रक्रियोत्तीर्णनिर्मलानुभूतिमात्रत्वाच्छुद्धः । पुद्गलस्वामिकस्य क्रोधादिभाववैश्वरूपस्य स्वस्य स्वामित्वेन नित्यमेवापरिणमनान्निर्ममतः । चिन्मात्रस्य महसो वस्तुस्वभावत एव सामान्य-विशेषाभ्यां सकलत्वाद् ज्ञानदर्शनसमग्रः । गगनादिवत्पारमार्थिको वस्तुविशेषोऽस्मि तदहमधुनास्मिन्नेवात्मनि निखिलपरद्रव्यप्रवृत्तिनिवृत्त्या निश्चलमवतिष्ठमानः सकलपरद्रव्यनिमित्तकविशेषचेतनचञ्चलकल्लोलनिरोधेनेममेव चेतयमानः स्वाज्ञानेनात्मन्युत्प्लवमानानेतान् भावानखिलानेव क्षपयामीत्यात्मनि निश्चित्य चिरसंगृहीतमुक्तपोतपात्रः समुद्रावर्त्त इव झगित्येवोद्वान्तसमस्तविकल्पोऽकल्पितमचलितममलमात्मानमालम्बमानो विज्ञानघनभूतः खल्वयमात्मास्रवेभ्यो निवर्त्तते ॥ ७३ ॥

(तात्पर्यवृत्तिः) अथ केन भावनाप्रकारेणायमात्मा क्रोधाद्याश्रवेभ्यो निवर्तते इति चेत्-अहं निश्चयनयेन स्वसंवेदनज्ञानप्रत्यक्षं शुद्धचिन्मात्रज्योतिरहम् इक्को-अनाद्यनन्तटङ्कोत्कीर्णज्ञायकैकस्वभावत्वादेकः, खलु-स्फुटं शुद्धो यः-कर्तृ-कर्म-करण-सम्प्रदानापादानाधिकरणषट्कारकीयविकल्पचक्ररहितत्वाच्छुद्धश्च, णिम्ममो-निर्मोहशुद्धात्मतत्त्वविलक्षणमोहोदयजनितक्रोधादिकषायचक्रस्वामित्वाभावाद् ममत्वरहितः । णाणदंसणसमग्गो-प्रत्यक्षप्रतिभासमयविशुद्धज्ञानदर्शनाभ्यां समग्रः-परिपूर्णः । एवं गुणविशिष्टपदार्थविशेषोऽस्मि भवामि । तम्हि ठिदो-तस्मिन्नुक्तलक्षणे शुद्धात्मस्वरूपे स्थितः । तच्चित्तो-तच्चित्तः सहजानन्दैकलक्षण-सुखसमरसीभावेन तन्मयो भूत्वा, सव्वे एदे खयं णेमि-सर्वानेतान्निरास्रवपरमात्म-पदार्थपृथग्भूतांस्तान् कामक्रोधाद्यास्रवान् क्षयं विनाशं नयामि-प्रापयामीत्यर्थः ॥७३॥ (समयसारः गा०७३) **13/5**

**[56]** करणानि चामूनि जीववीर्यविशेषरूपाणीति प्रथमतो वीर्यं प्ररूपयति-

**विरियंतरायदेसक्खएण, सव्वक्खएण वा लद्धी ।**
**अभिसंधिजमियरं वा, तत्तो विरियं सलेसस्स ॥३॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरियमिति- वीर्यान्तरायस्य देशक्षयेण सर्वक्षयेण वा लब्धिर्वीर्यलब्धि-रसुमतामुपजायते । तत्र देशक्षयेण छद्मस्थानाम्, सर्वक्षयेण (च) केवलिनाम्, तस्याश्च वीर्यलब्धेः सकाशादुपजायमानं वीर्यं सलेश्यस्यापि भवति, अलेश्यस्यापि च । केवलमिह सलेश्यवीर्येणाधिकार इति तदेवोपदर्शयति- **'अभिसंधिजमियरं वा तत्तो विरियं सलेसस्स'** ततस्तस्याः क्षायिकक्षायोपशमिकरूपाया वीर्यलब्धेः सकाशात् सलेश्यस्य वीर्यमभिसन्धिजमितरद्वा भवति । तत्र यद् बुद्धिपूर्वकं धावनवल्गनादिक्रियासु नियुज्यते तदभिसन्धिजम्, इतरदनभिसन्धिजं यद् भुक्तस्याहारस्य धातुमलत्वरूपपरिणामापादनकारणमेकेन्द्रियाणां वा तत्तत्क्रिया-निबन्धनम् । एतच्चाभिसन्धिजमनभिसन्धिजं वा वीर्यमवश्यं यथासंभवं सूक्ष्म-बादरपरिस्पन्दरूपक्रियासहितम्, योगसंज्ञमप्येतदेव । एकार्थिकानि चास्यामूनि—
"जोगो विरियं थामो, उच्छाहपरक्कमो तहा चि(चे)ट्ठा ।
सत्ती सामत्थं चिय, जोगस्स हवंति पज्जाया ॥१॥" इति ॥३॥

संप्रत्यस्यैव योगस्य परिणामादिहेतुतां भेदं च, तथा जीवप्रदेशेष्वस्य वैषम्येणावस्थाने कारणं च प्रतिपिपादयिषुरिदमाह—

**परिणामालंबणगहणसाहणं तेण लद्धनामतिगं ।**
**कज्जब्भासन्नोन्नप्पवेसविसमीकयपएसं ॥४॥**

परिणामेति-परिणमनं परिणामः । अन्तर्भूतणिजन्तात् घञ्प्रत्ययः (श्रीम. कृ० ५-३) परिणामापादनमित्यर्थः । आलम्ब्यत इत्यालम्बनम्, भावेऽनट् (श्रीम. कृ. ६-२) । गृहीतिर्ग्रहणम्, तेषां साधनम्, साध्यतेऽनेनेति साधनं-योगसंज्ञं वीर्यम्, करणेऽनट् (श्रीम. कृ. ६-४) । तथाहि—तेन वीर्यविशेषेण योगसंज्ञकेनौदारिकादि-शरीरप्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा चौदारिकादिरूपतया परिणमयति। तथा प्राणापानभाषामनोयोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा च प्राणापानादि-रूपतया परिणमयति । परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तानेव पुद्गलानवलम्बते । यथा मन्दशक्तिः कश्चिन्नगरे परिभ्रमणाय यष्टिमवलम्बते (मवष्टम्भते) । ततस्तदवष्टम्भतो जातसामर्थ्यविशेषः सन् तान् प्राणापानादिपुद्गलान् विसृजतीति परिणामालम्बनग्रहणसाधनं वीर्यम् । तेन च वीर्येण योगसंज्ञकेन मनोवाक्कायावष्टम्भतो जायमानेन । 'लद्धनामतिगं ति' लब्धं नामत्रिकम् । तद्यथा—मनोयोगो वाग्योगः काययोग इति । तत्र मनसा करणभूतेन योगो मनोयोगः, वाचा योगो वाग्योगः, कायेन योगः काययोगः । स्यादेतत्, सर्वेषु जीवप्रदेशेषु तुल्यक्षायोपशमिक्यादिलब्धिभावेऽपि किमिति क्वचित्प्रभूतं क्वचित् स्तोकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वचित्स्तोकतरमित्येवं वैषम्येण वीर्यमुपलभ्यत इत्यत आह–कज्जेत्यादि, यदर्थं चेष्टते तत्कार्यम्, तस्याभ्याशः, अभ्यशनमभ्याशः-अशूङ् व्याप्तावित्यस्याभिपूर्वस्य घञन्तस्य प्रयोगः, कार्याभ्याशः-कार्यस्यासन्नता निकटीभवनमित्यर्थः । तथा जीवप्रदेशानामन्योऽन्यं परस्परं प्रवेशः शृङ्खलावयवानामिव परस्परं संबन्धविशेषः। ताभ्यां कृत्वा विषमीकृताः (स्व)प्रभूताल्पाल्पतरसद्भावतो विसंस्थुलीकृताः प्रदेशा जीवप्रदेशा येन जीववीर्येण तत्कार्याभ्याशान्योऽन्यप्रवेशविषमीकृतप्रदेशम् । तथाहि– येषामात्मप्रदेशानां हस्तादिगतानामुत्पाट्यमानघटादिलक्षणकार्यनैकट्यम्, तेषां प्रभूततरा चेष्टा । दूरस्थानामंसा(शा)दिगतानां स्वल्पा । दूरतरस्थानां तु पादादिगतानां स्वल्पतरा। अनुभवसिद्धं चैतत् । अपि च लोष्ठादिनाऽभिघाते सति यद्यपि सर्वप्रदेशेषु युगपद्वेदनोपजायते, तथापि येषामात्मप्रदेशानामभिघातकलोष्ठादि-द्रव्यनैकट्यं तेषां तीव्रतरा वेदना, शेषाणां तु मन्दा मन्दतरा । तथेहापि जीवप्रदेशेषु परिस्पन्दात्मकं वीर्यमुपजायमानं कार्यम्, द्रव्याभ्याशवशतः केषुचित्प्रभूतमन्येषु मन्दमपरेषु तु मन्दतमं भवति । एतच्चैवं जीवप्रदेशानां परस्परं संबन्धविशेषे सति भवति, नान्यथा, यथा शृङ्खलावयवानाम् । तथाहि–तेषां शृङ्खलावयवानां परस्परं संबन्धविशेषे सति एकस्मिन्नवयवे परिस्पन्दमानेऽपरेऽप्यवयवाः परिस्पन्दन्ते। केवलं केचित् स्तोकमपरे स्तोकतरमिति । संबन्धविशेषाभावे त्वेकस्मिन् चलति नापरस्यावश्यंभावि चलनम्, यथा गोपुरुषयोः, तस्मात्कार्यद्रव्याभ्याशवशतो जीवप्रदेशानां परस्परं संबन्धविशेषतश्च वीर्यं जीवप्रदेशेषु केषुचित्प्रभूतमन्येषु स्तोकमपरेषु तु स्तोकतरमित्येवं वैषम्येणोपजायमानं न विरुध्यत इति ॥४॥

तदेवं वीर्यं प्रतिपाद्य संप्रत्यस्यैव जघन्याजघन्योत्कृष्टानुत्कृष्टत्वपरिज्ञापनाय प्ररूपणां चिकीर्षुरिमानर्थाधिकारानाह–

**अविभागवग्गफड्डुगअंतरठाणं अणंतरोवणिहा ।**
**जोगे परंपरावुड्ढिसमयजीवप्पबहुगं च ॥५॥**

अविभागेति–योगे-योगविषये । प्रथमतोऽविभागप्ररूपणा कार्या १ । ततो वर्गणाप्ररूपणा २ । ततः स्पर्धकस्य प्ररूपणा ३ । तदनन्तरमन्तरप्ररूपणा ४ । ततः स्थानप्ररूपणा ५ । ततोऽनन्तरोपनिधा ६ । ततः परंपरोपनिधा ७ । तदनन्तरं वृद्धिप्ररूपणा ८ । ततः समयप्ररूपणा ९ । ततो जीवानामल्पबहुत्वप्ररूपणेति १० । तत्र यस्यांशस्य प्रज्ञाच्छेदनकेन विभागः कर्तुं न शक्यते सोऽंशोऽविभाग उच्यते । किमुक्तं भवति ? इह जीवस्य वीर्यं केवलिप्रज्ञाच्छेदनकेन छिद्यमानं छिद्यमानं यदा विभागं न प्रयच्छति, तदा सोऽन्तिमोंऽशोऽविभाग इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते (१) चाविभागा एकैकस्मिन् जीवप्रदेशे यावन्तो भवन्ति तावन्त(त) आह—

**पण्णाछेयणछिन्ना, लोगासंखेज्जगप्पएससमा ।**
**अविभागा एक्केक्के, होंति पएसे जहन्नेणं ॥६॥**

पण्णेत्ति—प्रज्ञाच्छेदनकेन छिन्नाः सन्तो ये वीर्यस्याविभागा जातास्ते एकैकस्मिन् जीवप्रदेशे चिन्त्यमाना जघन्येनाप्यसंख्येयलोकाकाशप्रदेशप्रमाणा भवन्ति। उत्कर्षतोऽप्यसंख्येयलोकाकाशप्रदेशप्रमाणा एव । किन्तु ते जघन्यपद-भाविवीर्याविभागापेक्षयाऽसंख्येयगुणा द्रष्टव्या इति ॥६॥

उक्ताऽविभागप्ररूपणा, संप्रति (२) वर्गणाप्ररूपणामाह—

**जेसिं पएसाण समा, अविभागा सव्वतो य थोवतमा ।**
**ते वग्गणा जहन्ना, अविभागहिया परंपरओ ॥ ७ ॥**

जेसिमिति—येषां जीवप्रदेशानां समास्तुल्यसंख्या वीर्याविभागा भवन्ति । सर्वतश्च सर्वेभ्योऽपि चान्येभ्योऽपि जीवप्रदेशगतवीर्याविभागेभ्यः स्तोकतमाः ते जीवप्रदेशा घनीकृतलोकासंख्येयभागवर्त्यसंख्येयप्रतरगतप्रदेशराशिप्रमाणाः समुदिता एका वर्गणा । सा च जघन्या, स्तोकाऽविभागयुक्तत्वात् । अविभागाधिका परंपरत इति, ततः परा वर्गणा एकैकेनाविभागेनाधिका वक्तव्या । तद्यथा—जघन्यवर्गणातः परे ये जीवप्रदेशा एकेन वीर्याविभागेनाभ्यधिका घनीकृतलोकासंख्येयभागवर्त्य-संख्येयप्रतरगतप्रदेशराशिप्रमाणा वर्तन्ते, तेषां समुदायो द्वितीया वर्गणा । ततः परं द्वाभ्यां वीर्याविभागाभ्यामधिकानामुक्तसंख्याकानामेव जीवप्रदेशानां समुदायस्तृतीया वर्गणा । ततोऽपि त्रिभिर्वीर्याविभागैरधिकानां तावत्संख्याकानामेव जीवप्रदेशानां समुदायश्चतुर्थी वर्गणा । एवमेकैकवीर्याविभागवृद्ध्या वर्धमानानां तावतां तावतां जीवप्रदेशानां समुदायरूपा वर्गणा असंख्येया वक्तव्या इति ॥७॥

ताश्च कियत्य इति तन्निरूपणार्थं (३) स्पर्धकप्ररूपणामाह—

**सेढिअसंखिअमित्ता, फड्डुगमेत्तो अणंतरा नत्थि ।**
**जाव असंखा लोगा, तो बीयाई य पुव्वसमा ॥८॥**

सेढीति—इह घनीकृतस्य लोकस्य या एकैकप्रदेशपङ्क्तिरूपा श्रेणिस्तस्याः श्रेणेरसंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावन्मात्रास्तावत्प्रमाणा यथोक्तस्वरूपा वर्गणाः समुदिता एकं स्पर्धकम्, स्पर्धन्त इवोत्तरोत्तरवृद्ध्या वर्गणा अत्रेति स्पर्धकम्। कृद्बहुलमिति (श्रीम. कृ. १-११) वचनादधिकरणे वुञ् । उक्ता स्पर्धकप्ररूपणा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांप्रतम् (४) अन्तरप्ररूपणामाह—'एत्तो अणंतरा नत्थि' इतः पूर्वोक्तस्पर्धकगतचरमवर्गणायाः परतो जीवप्रदेशा अनन्तरा न सन्ति । किमुक्तं भवति ? इत ऊर्ध्वमेकैकवीर्याविभागवृद्ध्या निरन्तरं वर्धमाना जीवप्रदेशा न लभ्यन्ते, किन्तु सान्तरा एव । तथाहि—पूर्वोक्तस्पर्धकगतचरमवर्गणायाः परतो जीवप्रदेशा नैकेन वीर्याविभागेनाधिकाः प्राप्यन्ते, नापि द्वाभ्याम्, नापि त्रिभिः, नापि चतुर्भिः, यावन्नापि संख्येयैः, किन्त्वसंख्येयैरेवासंख्येयलोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यन्ते । ततस्तेषां समुदायो द्वितीयस्य स्पर्धकस्य प्रथमा वर्गणा । 'तो बीयाई य पुव्वसम त्ति' ततो द्वितीयस्पर्धकप्रथमवर्गणातः परतो द्वितीयादयो वर्गणाः पूर्वसमाः पूर्वस्पर्धकस्येव वक्तव्या इत्यर्थः । तथाहि—प्रथमवर्गणाया परतो जीवप्रदेशानामेकेन वीर्याविभागेनाधिकानां समुदायो द्वितीया वर्गणा । द्वाभ्यां वीर्याविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । एवं तावद्वाच्यं यावत् श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा वर्गणा भवन्ति, तासां च समुदायो द्वितीयं स्पर्धकम् । ततः परं पुनरप्येकेन वीर्याविभागेनाधिका जीवप्रदेशा न लभ्यन्ते, नापि द्वाभ्याम्, नापि त्रिभिः, यावन्नापि संख्येयैः, किन्त्वसंख्येयैरेवा-संख्येयलोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यन्ते, ततस्तेषां समुदायस्तृतीयस्य स्पर्धकस्य प्रथमा वर्गणा । तत एकैकवीर्याविभागवृद्ध्या द्वितीयादयो वर्गणास्तावद्वाच्या यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा भवन्ति, तासां च समुदाय-स्तृतीयं स्पर्धकम् । एवमसंख्येयानि स्पर्धकानि वाच्यानीति ॥८॥

तदेवं कृताऽन्तरप्ररूपणा, संप्रति (५) स्थानप्ररूपणां करोति—

**सेढिअसंखिअमेत्ताइं, फड्डगाइं जहन्नयं ठाणं ।**
**फड्डगपरिवुड्डिअओ, अंगुलभागो असंखतमो ॥९॥**

सेढीति—इह पूर्वोक्तानि स्पर्धकानि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि जघन्यं योगस्थानं भवन्ति । एतच्च सूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य भवप्रथमसमये वर्त्तमानस्य प्राप्यते । ततोऽन्यस्य जीवस्याधिकतरवीर्यस्य येऽल्पतरवीर्या जीवप्रदेशास्तेषां समुदायः प्रथमा वर्गणा । तत एकेन वीर्याविभागेन वृद्धानां समुदायो द्वितीया वर्गणा । द्वाभ्यां वीर्याविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । त्रिभिवीर्याविभागैरधिकानां समुदायश्चतुर्थी वर्गणा । एवं तावद्वाच्यं यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा भवन्ति । तासां समुदायः प्रथमं स्पर्धकम् । ततः प्राक्तनयोगस्थानप्रदर्शितप्रकारेण द्वितीयादीन्यपि स्पर्धकानि वाच्यानि । तानि च तावद्वाच्यानि यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति, ततस्तेषां समुदायो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयं योगस्थानम् । ततोऽन्यस्य जीवस्याधिकतमवीर्यस्योपदर्शितप्रकारेण तृतीयं योगस्थानं वाच्यम् । एवमन्यान्यजीवापेक्षया तावद्योगस्थानानि वाच्यानि यावत्सर्वोत्कृष्टं योगस्थानं भवति । इह द्वितीये योगस्थाने प्रथमे स्पर्धके प्रथमवर्गणायां जीवप्रदेशाः प्रथमयोगस्थानचरमस्पर्धकचरमवर्गणागतवीर्याविभागापेक्षया असंख्येयैर्वीर्याविभागैरधिकाः प्राप्यन्ते । तृतीयेऽपि योगस्थाने प्रथमस्पर्धके प्रथमवर्गणायां जीवप्रदेशा द्वितीययोगस्थानचरमस्पर्धकचरमवर्गणागतवीर्याविभागापेक्षयाऽसंख्येयैर्वीर्याविभागैरधिकाः प्राप्यन्ते । एवं सर्वेष्वपि द्रष्टव्यम् । तानि च योगस्थानानि सर्वाण्यपि कियन्ति भवन्तीति चेदुच्यते—श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि । ननु जीवानामनन्तत्वात्प्रतिजीवं च योगस्थानस्य प्राप्यमाणत्वादनन्तानि योगस्थानानि प्राप्नुवन्ति, कथमुच्यते श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानीति ? नैष दोषः, यत एकैकस्मिन् योगस्थाने सदृशे सदृशे वर्तमानाः स्थावरजीवा अनन्ताः प्राप्यन्ते । ततः सर्वजीवापेक्षयापि सर्वाणि योगस्थानानि केवलिप्रज्ञया परिभाव्यमानानि यथोक्तप्रमाणान्येव प्राप्यन्ते, नोना(ततो ना)धिकानीति। कृता स्थानप्ररूपणा ।

सांप्रत(६)मनन्तरोपनिधावसरः । तत्रोपनिधानमुपनिधा ।' धातूनामनेकार्थत्वान्मार्गणमित्यर्थः । अनन्तरेणोपनिधा अनन्तरोपनिधा अनन्तरं योगस्थानमधिकृत्योत्तरस्य योगस्थानस्य स्पद्र्धकविषये मार्गणमित्यर्थः । तदेवाह—फड्डुगेत्यादि । अतः प्रथमाद्योगस्थानात् द्वितीयादिषु योगस्थानेषु प्रत्येकं स्पर्धकानां परिवृद्धिरङ्गुलभागोऽसंख्येयतमः, अङ्गुलमात्रक्षेत्रसत्केऽसंख्येयतमे भागे यावान् प्रदेशराशिस्तावत्प्रमाणानि पूर्वपूर्वयोगस्थानगतस्पर्धकापेक्षयोत्तरस्मिन्नुत्तरस्मिन् योगस्थाने स्पर्धकान्यधिकानि भवन्तीत्यर्थः ।' कथमेवं ज्ञा(जा)यत इति चेदुच्यते—इह प्रथमयोगस्थानगतवर्गणापेक्षया द्वितीययोगस्थानगतवर्गणा मूलत एव सर्वा अपि हीनहीनतरजीवप्रदेशा भवन्ति, प्रभूतप्रभूततरवीर्याणां जीवप्रदेशानां स्तोकस्तोकतरतया प्राप्यमाणत्वात् । ततोऽत्र विचित्रवर्गणाबाहुल्यसंभवतो यथोक्तं स्पर्धकबाहुल्यमुपपद्यत एव । एवमुत्तरोत्तरेष्वपि योगस्थानेषु पूर्वपूर्वयोगस्थानगतस्पर्धकापेक्षया स्पर्धकबाहुल्यं परिभावनीयमिति ॥९॥ (कर्मप्रकृतिः बन्धनक० गा० ३-९)

**13/7**

**[57]** सर्वप्रकृतीनामुत्कृष्टा स्थितिरुत्कृष्टसंक्लेशेन कषायरूपेण बध्यत इत्युक्तम्, न च केवलकषायेण स्थितिर्बध्यते किं तर्हि ? योगसहचरितेन, अतस्तं योगं सर्वजीवेष्वल्पबहुत्वद्वारेण चिन्तयन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सुहुमनिगोयाइखणऽप्पजोग बायरयविगलअमणमणा ।**
**अपज्जलहु पढमदुगुरु, पज्जहस्सियरो असंखगुणो ।।५३।।**

इह योगो वीर्यं स्थाम इत्यादि पर्यायाः । तथा चाह–

जोगो विरियं थामो, उच्छाह परक्कमो तहा चिट्ठा ।
सत्ती सामत्थं चिय, जोगस्स हवन्ति पज्जाया ।। (पञ्चसं० गा० ३९६)

स च योगस्त्रिधा–मनोयोगो वाग्योगः काययोगश्चेति । उक्तं च कर्मप्रकृतौ–

परिणामाऽऽलम्बण–गहणसाहणं तेण लद्धनामतिगं ।
कज्जब्भासाऽन्नुन्नप्पवेसविसमीकयपएसं ।। (गा० ४)

अस्य अक्षरगमनिका–परिणमनं परिणामः, अन्तर्भूतणिगर्थाद् घञ्प्रत्ययः, परिणामापादनमित्यर्थः, आलम्ब्यत इत्यालम्बनं भावेऽनट्प्रत्ययः, गृहीतिर्ग्रहणम्, तेषां साधनं–साध्यतेऽनेनेति साधनं–योगसंज्ञं वीर्यं "करणाधारे" (सिद्ध० ५–३–१२९) इत्यनट्प्रत्ययः । तथाहि–'तेन' वीर्यविशेषेण योगसंज्ञितेनौदारिकादिशरीर–प्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा च प्राणाऽपानादिरूपतया परिणम–यति, परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तानेव पुद्गलानवलम्बते, यथा मन्दशक्तिः कश्चिन्नगरे परिभ्रमणाय यष्टिमवलम्बते, ततस्तदवष्टम्भतो जातसामर्थ्य–विशेषः सन् तान् प्राणाऽपानादिपुद्गलान् विसृजतीति परिणामाऽऽलम्बन–ग्रहणसाधनं वीर्यम् । तेन च वीर्येण योगसंज्ञकेन मनोवाक्कायावष्टम्भतो जायमानेन "लद्धनामतिगं"ति लब्धं नामत्रिकं मनोयोगो वाग्योगः काययोग इति । तत्र मनसा करणभूतेन योगो मनोयोगः, वाचा योगो वाग्योगः, कायेन योगः काययोगः । स्यादेतत्–सर्वेषु जीवप्रदेशेषु तुल्यक्षायोपशमिक्यादिलब्धिभावेऽपि किमिति क्वचित् स्तोकं क्वचित् प्रभूतं क्वचित् स्तोकतरमित्येवंवैषम्येण वीर्यमुपलभ्यते ? इत्यत आह–"कज्ज" इत्यादि । यदर्थं चेष्टते तत् कार्यं तस्याभ्याशः–अभ्यशनमभ्याशः "अशूट् व्याप्तौ" इत्यस्याभिपूर्वस्य घञन्तस्य प्रयोगः, कार्याभ्याशः–कार्यस्या–सन्नता निकटीभवनमित्यर्थः, तथा जीवप्रदेशानामन्योऽन्यं–परस्परं प्रवेशः–शृङ्खलावयवानामिव परस्परं सम्बन्धविशेषः, ताभ्यां कृत्वा विषमीकृताः–सुप्रभूताऽल्पाऽल्पतरसद्भावतो विसंस्थूलीकृताः प्रदेशा येन वीर्येण तत् कार्याभ्या–शाऽन्योन्यप्रवेशविषमीकृतप्रदेशम् । तथाहि–येषामात्मप्रदेशानां हस्तादिगताना–मुत्पाट्यमानघटादिलक्षणकार्यनैकट्यं तेषां प्रभूततरा चेष्टा, दूरस्थानानामंसादिगतानां स्वल्पा, दूरतरस्थानां तु पादादिगतानां स्वल्पतरा, अनुभवसिद्धं चैतत्, अपि च



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोष्ठादिना निर्घाते सति यद्यपि सर्वप्रदेशेषु युगपद् वेदनोपजायते तथापि येषामात्मप्रदेशानामभिघातकलोष्ठादिद्रव्यनैकट्यं तेषां तीव्रतरा वेदना, शेषाणां तु मन्दा मदन्तरा, तथेहापि जीवप्रदेशेषु परिस्पन्दात्मकं वीर्यमुपजायमानं कार्य-द्रव्याभ्याशवशतः केषुचित् प्रभूतमन्येषु मन्दमपरेषु मन्दतमं भवति । एतच्चैवं जीवप्रदेशानां परस्परं सम्बन्धविशेषे भवति नान्यथा, यथा शृङ्खलावयवानाम् । तथाहि-तेषां शृङ्खलावयवानां परस्परं सम्बन्धविशेषे सति एकस्मिन्नवयवे परिस्पन्दमानेऽपरेऽप्यवयवाः परिस्पन्दन्ते, केवलं केचित् स्तोकमपरे तु स्तोकतर-मिति, सम्बन्धविशेषाभावे त्वेकस्मिंश्चलति नापरस्यावश्यम्भावि चलनम्, यथा गो-पुरुषयोः । तस्मात् कार्यद्रव्याभ्याशवशतो जीवप्रदेशानां परस्परं सम्बन्धविशेषतश्च वीर्यं जीवप्रदेशेषु केषुचित् प्रभूतमन्येषु स्तोकमपरेषु तु स्तोकतरमित्येवं वैषम्येणोप-जायमानं न विरुध्यत इत्यलं विस्तरेण ॥

प्रकृतं प्रस्तुमः-तत्र सूक्ष्मनिगोदस्य-सूक्ष्मसाधारणस्य लब्ध्यपर्याप्तकस्य सर्वजघन्यवीर्यस्येति च सामर्थ्याद् दृश्यम्, तस्यैव सर्वजघन्ययोगस्य प्राप्यमाणत्वाद्, आदिक्षणः-प्रथमोत्पत्तिसमयः सूक्ष्मनिगोदादिक्षणस्तत्र, सप्तम्येकवचनलोपश्च प्राकृतत्वात् । किम् ? इत्याह-"अप्पजोग" त्ति अल्पः-सर्वस्तोको योगः-वीर्य व्यापार इति यावत् । ततो बादरस्य "विगल" त्ति विकलत्रिकस्य, "अमण" त्ति असंज्ञिनः, "मण" त्ति संज्ञिनः, "अपज्ज" त्ति प्रत्येकं सम्बन्धात् सूक्ष्मादीनां सप्तानामप्यपर्याप्तानाम्, "लहु" त्ति जघन्यो योगोऽसङ्ख्येगुणो वाच्यः, आदिक्षण इत्यपि सर्वत्र वाच्यम्, ततः प्रथमद्विकस्य-अपर्याप्तसूक्ष्मनिगोद-बादरलक्षणस्य 'गुरुः' उत्कृष्टो योगोऽसङ्ख्येयगुणो वाच्यः । ततः प्रथमद्विकस्य 'पज्ज हस्सियरो असङ्खगुणो" त्ति पर्याप्तस्य ह्रस्वः-जघन्य इतरः-उत्कृष्टयोगो यथाक्रममसङ्ख्येय-गुणो वाच्य इति गाथाक्षरार्थः । भावार्थस्त्वयम्-सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगः सर्वस्तोकः १ ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः २ ततो द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः ३ ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगो-ऽसङ्ख्येयगुणः ४ ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः ५ ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथम-समये वर्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः ६ ततः संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः ७ ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः ८ ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः ९ ततः सूक्ष्मनिगोदस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः १० ततो बादरैकेन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः ११ ततः सूक्ष्मनिगोदस्य पर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १२ ततो बादरैकेन्द्रियस्य पर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १३ ॥५३॥

**असमत्ततसुक्कोसो, पज्ज जहन्नियरु एव ठिइठाणा ।**
**अपज्जेयर संखगुणा, परमपज्जबिए असंखगुणा ॥५४॥**

असमाप्ताः-अपर्याप्तास्ते च ते त्रसाश्च-द्वीन्द्रियादयोऽसमाप्तत्रसाः-अपर्याप्त-द्वि-त्रि-चतुरिन्द्रियाऽसंज्ञि-संज्ञिपञ्चेन्द्रियास्तेषामुत्कृष्टोऽसमाप्तत्रसोत्कृष्टोऽसङ्-ख्येयगुणो वाच्यः । अयमर्थः-पर्याप्तबादरैकेन्द्रियोत्कृष्टयोगाद् द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १४ ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १५ ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १६ ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । १७ ततः संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १८ । "पज्जजहन्नियरु" त्ति ततस्त्रसानां पर्याप्तानां जघन्यो योगोऽसङ्ख्येयगुणो वाच्यः, ततोऽपि "इयरु" त्ति त्रसानां पर्याप्तानामुत्कृष्टो योगोऽसङ्ख्येयगुणो वाच्य इत्यक्षरार्थः । भावार्थस्त्वयम्-ततः संज्ञिपञ्चेन्द्रिय-लब्ध्यपर्याप्तकोत्कृष्टयोगात् पर्याप्तद्वीन्द्रियस्य जघन्यो योगोऽसङ्ख्येयगुणः १९ ततस्त्रीन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः २० ततश्चतुरिन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः २१ ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः २२ ततः संज्ञिपञ्चेन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसङ्ख्येयगुणः २३ ततः पर्याप्तद्वीन्द्रियस्योत्कृष्टो योगोऽसङ्ख्येयगुणः २४ ततः पर्याप्तत्रीन्द्रियस्योत्कृष्टो योगोऽसङ्ख्येयगुणः २५ ततः पर्याप्तचतुरिन्द्रियस्योत्कृष्टो योगोऽसङ्ख्येयगुणः २६ ततः पर्याप्तासंज्ञिपञ्चेन्द्रियस्योत्कृष्टो योगोऽसङ्ख्येयगुणः २७ ततः पर्याप्तसंज्ञिपञ्चेन्द्रियस्योत्कृष्टो योगोऽसङ्ख्येयगुणः २८ ततः पर्याप्तसंज्ञ्युत्कृष्टयोगाद् अनुत्तरोपपातिनामुत्कृष्टो योगोऽसङ्ख्येयगुणः २९ ततो ग्रैवेयकदेवानामुत्कृष्टो योगोऽसङ्ख्येयगुणः ३० ततो भोगभूमिजानां तिर्यङ्-मनुष्याणामुत्कृष्टो योगोऽसङ्ख्येयगुणः ३१ ततोऽप्याहारकशरीरिणामुत्कृष्टो योगोऽसङ्ख्येयगुणः३२ ततः शेषदेव-नारक-तिर्यङ्-मनुष्याणां यथोत्तरमुत्कृष्टयोगोऽ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्येयगुणः ३३ । अथ सुखावबोधाय अल्पबहुत्वपदानां यन्त्रकमुपदर्श्यते, तच्चेदम्—

| | | | |
|---|---|---|---|
| सूक्ष्मनि० लब्ध्य-प० ज० योग० सर्वस्तोकः १ | बाद० एकें० लब्ध्यप० ज० योगोऽसंख्येयगुणः २ | द्वीन्द्रि० लब्ध्यप० ज० योगोऽसंख्येयगुणः ३ | त्रीन्द्रि० लब्ध्यप० ज० योगोऽसंख्येयगुणः ४ |
| चतुरिन्द्रि० लब्ध्यप० ज० योगोऽसंख्येयगुणः ५ | असंज्ञिपञ्चे० लब्ध्यप० ज० योगोऽसंख्येयगुणः ६ | संज्ञिपञ्चे० लब्ध्यप० ज० योगोऽसंख्येयगुणः ७ | सूक्ष्मनि० लब्ध्यप० उ० योगोऽसंख्येयगुणः ८ |
| बाद० एकें० लब्ध्यप० उ० योगोऽसंख्येयगुणः ९ | सूक्ष्मनि० पर्या० ज० योगोऽसंख्येयगुणः १० | बाद० एकें० पर्या० ज० योगोऽसंख्येयगुणः ११ | सूक्ष्मनि० पर्या० उत्कृ० योगोऽसंख्येयगुणः १२ |
| बाद० एकें० पर्या० उत्कृ० योगोऽसंख्येयगुणः १३ | द्वीन्द्रि० लब्ध्यप० उत्कृ० योगोऽसंख्येयगुणः १४ | त्रीन्द्रि० लब्ध्यप० उत्कृ० योगोऽसंख्येयगुणः १५ | चतुरि० लब्ध्यप० उत्कृ० योगोऽसंख्येयगुणः १६ |
| असंज्ञिपञ्चे० लब्ध्यप० उ० योगोऽसंख्येयगुणः १७ | संज्ञिपञ्चे० लब्ध्यप० उ० योगोऽसंख्येयगुणः १८ | पर्या० द्वीन्द्रि० ज० योगोऽसंख्येयगुणः १९ | त्रीन्द्रि० पर्या० ज० योगोऽसंख्येयगुणः २० |
| चतुरि० पर्या० ज० योगोऽसंख्येयगुणः २१ | असंज्ञिपञ्चे० पर्या० ज० योगोऽसंख्येयगुणः २२ | संज्ञिपञ्चे० पर्या० ज० योगोऽसंख्येयगुणः २३ | पर्या० द्वीन्द्रि० उत्कृ० योगोऽसंख्येयगुणः २४ |
| पर्या० त्रीन्द्रि० उत्कृ० योगोऽसंख्येयगुणः २५ | पर्या० चतुरि० उत्कृ० योगोऽसंख्येयगुणः २६ | पर्याप्ताऽसंज्ञि पञ्चे० उत्कृ० योगोऽसंख्येयगुणः २७ | पर्याप्तसंज्ञि पञ्चे० उत्कृ० योगोऽसंख्येयगुणः २८ |
| अनुत्तरोप० उत्कृ० योगोऽसंख्येयगुणः २९ | ग्रैवेयक उत्कृ० योगोऽसंख्येयगुणः ३० | भोगभू० ति०म०उत्कृ० योगोऽसंख्येयगुणः ३१ | आहा० शरी० उत्कृ० योगोऽसंख्येयगुणः ३२ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणकारश्चात्रापि सूक्ष्मक्षेत्रपल्योपमासङ्ख्येयभागरूपः प्रत्येकं ग्राह्यः । तदत्र जघन्ययोगी जघन्यकर्मप्रदेशग्रहणं जघन्यस्थितिं च विदधाति योगवृद्धौ च तद्वृद्धिरपीति स्थितमिति ।

"एव ठिइठाणा" इत्यादि । 'एवं' मकारस्य लोपः प्राकृतत्वात् पूर्वोक्त-योगप्ररूपणान्यायेन सूक्ष्मैकेन्द्रियादिजीवक्रमेणैव स्थितीनां स्थानानि स्थितिस्थानानि वाच्यानीति शेषः । तत्र जघन्यस्थितेरारभ्य एकैकसमयवृद्ध्या सर्वोत्कृष्टनिजस्थिति-पर्यवसाना ये स्थितिभेदास्ते स्थितिस्थानान्युच्यन्ते । कथं पुनरेतानि वाच्यानि ? इत्याह-"अपजेयर संखगुण" त्ति प्रथममपर्याप्तकान् सूक्ष्मबादरैकेन्द्रियादीनुद्दिश्य वाच्यानि, ततः "इयर" त्ति पर्याप्तकान् सूक्ष्मबादरैकेन्द्रियादीनुद्दिश्य वाच्यानीति । कियद्गुणानि पुनरेतानि ? इत्याह-सङ्ख्यगुणानि, तत्र सङ्ख्यानं सङ्ख्या, तामर्ह-(ती)ति सङ्ख्यः, "दण्डादिभ्यो यः" इति यप्रत्ययः, ततः सङ्ख्यः-सङ्ख्येयः सङ्ख्यात इत्यर्थः गुणः-गुणकारो येषां तानि सङ्ख्यगुणानि, सङ्ख्यातगुणितानीत्यर्थः । किं सर्वपदेषु सङ्ख्यातगुणान्येव ? आहोश्विदस्ति कस्मिंश्चित् पदे विशेषः ? इत्याह-"परमपजबिए असङ्खगुण" त्ति 'परं' केवलम् 'अपर्याप्तद्वीन्द्रिये' अपर्याप्तद्वीन्द्रियपदे तानि स्थितिस्थानानि 'असङ्ख्यगुणानि' असङ्ख्यातगुणितानि वाच्यानि । एतदुक्तं भवति-सूक्ष्मैकेन्द्रियस्यापर्याप्तकस्य स्थितिस्थानानि स्तोकानि १ ततो बादरैकेन्द्रियस्यापर्याप्तकस्य स्थितिस्थानानि सङ्ख्यातगुणानि २ ततः सूक्ष्मैकेन्द्रियस्य पर्याप्तकस्य स्थितिस्थानानि सङ्ख्यात-गुणानि ३ ततो बादरैकेन्द्रियस्य पर्याप्तकस्य स्थितिस्थानानि सङ्ख्यातगुणानि, एतानि च पल्योपमासङ्ख्येयभागसमयतुल्यानि स्थितिस्थानानि भवन्ति, यत एकेन्द्रियाणां जघन्योत्कृष्टस्थित्योरन्तरालमेतावन्मात्रमेवेति ४ ततोऽपर्याप्तस्य द्वीन्द्रियस्य स्थितिस्थानान्यसङ्ख्यातगुणितानि पल्योपमसङ्ख्येयभागमात्राणीति कृत्वा ५ ततस्तस्यैव द्वीन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि ६ ततस्त्रीन्द्रियस्यापर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि ७ ततस्त्रीन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि ८ ततश्चतुरिन्द्रियस्यापर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि ९ ततः पर्याप्तचतुरिन्द्रियस्य स्थितिस्थानानि सङ्ख्यातगुणितानि १० ततोऽसंज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य स्थितिस्थानानि सङ्ख्या-तगुणितानि ११ ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणानि १२ ततः संज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि १३ ततः संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि सङ्ख्यातगुणितानि भवन्ति ॥१४॥

॥५४॥स्थापना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| सूक्ष्मैके० अप० स्थितिस्थानानि स्तोकानि १ | बादरैके० पर्या० स्थि० स्था० संख्यातगुणानि २ | सूक्ष्मैके० पर्या० स्थि० स्था० संख्यातगुणानि ३ | बादरैके० पर्या० स्थि० स्था० संख्यातगुणानि ४ |
| अप० द्वीन्द्रि० स्थि० स्था० असंख्यातगुणानि ५ | द्वीन्द्रि० पर्या० स्थि० स्था० संख्यातगुणानि ६ | त्रीन्द्रि० अप० स्थिति० स्था० संख्यातगुणानि ७ | त्रीन्द्रि० पर्या० स्थिति० स्था० संख्यातगुणानि ८ |
| चतुरि० अप० स्थि० स्था० संख्यातगुणानि ९ | पर्या० चतुरि० स्थि० स्था० संख्यातगुणानि १० | असंज्ञिपञ्चे० अप० स्थि० स्था० संख्यातगुणानि ११ | असंज्ञिपञ्चे० पर्या० स्थि० स्था० संख्यातगुणानि १२ |
| | संज्ञिपञ्चे० अप० स्थि० स्था० संख्यातगुणानि १३ | संज्ञिपञ्चे० पर्या० स्थि० स्था० संख्यातगुणानि १४ | |

(पंचमकर्म० गा०५३-५४) **13/7**

**[58]** अथाऽपवर्गमूलत्वेन भेदज्ञानमभिष्टौति-

**ये यावन्तो ध्वस्तबन्धा अभूवन्, भेदज्ञानाभ्यास एवात्र बीजम् ।**
**नूनं येऽप्यध्वस्तबन्धा भ्रमन्ति, तत्राभेदज्ञानमेवेति विद्मः ॥९॥**

व्याख्या—**ये यावन्तः** केचन प्राक्काले **ध्वस्तबन्धाः** ज्ञान-क्रियासमुच्चय-समनुष्ठानेन निर्लूनकर्माणः **अभूवन् अत्र** बन्धध्वंसे **भेदज्ञानाभ्यास एव बीजम् । अयमर्थः** प्रकृतिपुरुषयोर्विवेकख्यातौ जातायामेव क्रियमाणस्य कर्मणः सम्यग्ज्ञान-मूलकत्वेन बन्धापनयनं प्रति सामर्थ्यम् । तदविवेकख्यातौ तु मोच्य-मोचक-योर्याथात्म्यानवगमात् कस्य मोक्षाय प्रयतताम् ? परद्रव्यविभागेन परद्रव्योपरज्य-मानस्वधर्मविभागेन च आत्मन एकाग्रचिन्तने ह्यासंसाराबद्धदृढतरमोहग्रन्थेरुद्ग्रन्थनं स्यात्, ततस्तन्मूलरागद्वेषक्षपणम्, ततस्तद्धेतुकोत्तरकर्माभावः, केवलयोगोपादीय-मानस्य च बन्धस्य शैलेशीकरणे योगनिरोधादेव निरोधे आत्मनः स्वरूपावस्थान-लक्षणो मोक्षः सिद्ध्यतीति सिद्धं भेदज्ञानभ्यासस्य मोक्षं प्रति बीजत्वम् । **नूनं**-निश्चितम् । **येऽपि** प्राणिनो **अध्वस्तबन्धा** मोक्षोपायालाभाद् अनपनीतकर्मरजः-संश्लेषा **भ्रमन्ति** अविद्याकन्दलीकन्दायमानमोहानुवृत्तितन्त्रतया गृहीतनानानारक-तिर्यगादिपर्यायाः संसरन्ति, **तत्र** भ्रमणे **अभेदज्ञानमेव** बीजमिति विद्मः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयमर्थः-परात्मनोर्विवेकाभावे परम् आत्मत्वेनाध्यास्य रज्यन्तो द्विषन्तो मुह्यन्तश्चात्यन्तप्रत्यस्तमितविविक्तात्मख्यातित्वाद् आत्मानं कर्तारं मन्यमाना नानारम्भान् समनुष्ठाय तद्विपाकवेदनाविधुरीकृता अनन्तकालं संसृतिनिवासं नोज्झन्तीति सोऽयमभेदज्ञानानुभावः ॥९॥ (अ०बिं०द्वा०१श्लो०९) **14/1**

**[59] सुक्कं पिऊणो माऊए, सोणियं तदुभयंपि संसट्ठं ।**
**तप्पढमयाए जीवो, आहारइ तत्थ उप्पन्नो ॥२५४॥**

**[ शुक्रं पितुः मातुः शोणितं तदुभयमपि संसृष्टम् ।**
**तत्प्रथमतया जीव, आहारयति तत्रोत्पन्नः ॥२५४॥ ]**

गर्भोत्पन्नः किमाहारयतीत्याह-सुक्केत्यादि तच्च तदुभयं च....तदुभयं-शुक्रशोणितलक्षणं संसृष्टं-मिलितं तत्र गर्भे उत्पन्नजन्तुरभ्यवहरति । कयेत्याह तच्च तत् प्रथमं च तत्प्रथमं तद्भावस्तत्ता तया-तत्प्रथमतया प्रथममुत्पन्न इत्यर्थः । (भवभावना गा० २५४) **14/4**

**को कायसुणयभक्खे, किमिकुलवासे य वाहिखित्ते य ।**
**देहम्मि मच्चुविहुरे, सुसाणठाणे य पडिबंधो ॥ ४२१ ॥**

**[ कः काकश्वभक्ष्ये, कृमिकुलावासे च व्याधिक्षेत्रे च ।**
**देहे मृत्युविधुरे, श्मशानस्थाने च प्रतिबन्धः ॥ ४२१ ॥ ]**

ततो जिनवचनवासितान्तःकरणानां देहे कः प्रतिबन्धः स्यात् ? न कश्चिदित्यर्थः । कथंभूते देहे ? इत्याह-काककुक्कुरादिभक्ष्ये केवलकृमिकुलावासे समस्तव्याधिक्षेत्रे मृत्युविधुरे-मरणावस्थायां निःशेषकार्यकरणाक्षमे पर्यन्ते श्मशाने स्थानं यस्य तत्तथा तस्मिंश्चैवंभूत इति । एवं च नाम देहस्याशुचित्वं येन तत्सम्बन्धेऽन्यच्छुभमपि वस्तु अशुचित्वं प्रतिपद्यत इति दर्शयति । [भ०भा० गा० ४२१] **14/4**

**[60]** एतदेवाह—

**अण्णोण्णाणुगयाणं, इमं व तं च त्ति विभयणमजुत्तं ।**
**जह दुद्ध-पाणियाणं, जावंत विसेस पज्जाया ॥४७॥**

अन्योन्यानुगतयोः-परस्परानुप्रविष्टयोः आत्मकर्मणोः इदं वा तद् वा इति इदं कर्म अयमात्मा इति यद्विभजनं-पृथक्करणं तद् अयुक्तम्-अघटमानकम् प्रमाणाभावेन कर्तुमशक्यत्वात् । यथा दुग्धपानीययोःपरस्परप्रदेशानुप्रविष्टयोः । किंपरिमाणोऽयमविभागो जीवकर्मप्रदेशयोः ? इत्याह—यावन्तो विशेषपर्यायास्तावान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतः परमवस्तुत्वप्रसक्तेः अन्त्यविशेषपर्यन्तत्वात् सर्वविशेषाणाम् अन्त्य इति विशेषणान्यथानुपपत्तेः ॥४७॥ (सन्म० कां० १ गा० ४७) **14/7**

**[61]** पञ्चमे श्रमणोपासकाधिकार उक्तः, षष्ठेऽप्यसावेवोच्यते, इत्येवं सम्बन्धस्यास्येदं सूत्रम्—

**समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा फासुए-सणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जति ? गोयमा! एगंतसो निज्जरा कज्जइ नत्थि य से पावे कम्मे कज्जति । समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासएणं अणेसणिज्जेणं असणपाणजावपडिलाभेमाणस्स किं कज्जइ ? गोयमा ! बहुतरिया से निज्जरा कज्जइ अप्पतराए से पावे कम्मे कज्जइ । समणोवासगस्स णं भंते ! तहारूवं अस्संजय-अविरय-पडिहय-पच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसणिज्जेण वा अणेसणिज्जेण वा असणपाण-जाव किं कज्जइ ? गोयमा ! एगंतसो से पावे कम्मे कज्जइ नत्थि से काइ निज्जरा कज्जइ ॥ (सूत्र ३३२) ॥**

'समणे'त्यादि,'किं कज्जइ'त्ति किं फलं भवतीत्यर्थः, 'एगंतसो'त्ति एकान्तेन तस्य श्रमणोपासकस्य, 'नत्थि य से'त्ति नास्ति चैतद् यद् 'से'तस्य पापं कर्म 'क्रियते' भवति अप्रासुकदाने इवेति, 'बहुतरिय'त्ति पापकर्म्मापेक्षया 'अप्पतराए'त्ति अल्पतरं निर्जरापेक्षया, अयमर्थः-गुणवते पात्रायाप्रासुकादिद्रव्यदाने चारित्रकायो-पष्टम्भो जीवघातो व्यवहारतस्तच्चारित्रबाधा च भवति, ततश्च-चारित्रकायो-पष्टम्भान्निर्जरा जीवघातादेश्च पापं कर्म्म, तत्र च स्वहेतुसामर्थ्यात्पापापेक्षया बहुतरा निर्जरा निर्जरापेक्षया चाल्पतरं पापं भवति, इह च विवेचका मन्यन्ते-असंस्त-रणादिकारणत एवाप्रासुकादिदाने बहुतरा निर्जरा भवति नाकारणे, यत उक्तम्— "संथरणंमि असुद्धं दोण्हवि गेण्हंतदिंतयाणऽहियं । आउरदिट्ठंतेणं तं चेव हियं असंथरणे ॥१॥" इति, [निर्वाहेऽशुद्धं गृह्णद्ददतोर्द्वयोरप्यहितम् । आतुरदृष्टान्तेन तदेवासंस्तरणे हितं ॥१॥] अन्ये त्वाहुः-अकारणेऽपि गुणवत्पात्रायाप्रासुकादिदाने परिणामवशाद्बहुतरा निर्जरा भवत्यल्पतरं च पापं कर्म्मेति, निर्विशेषणत्वात् सूत्रस्य परिणामस्य च प्रमाणत्वात्, आह च—"परमरहस्समिसीणं समत्तगणिपिडग-झरियसाराणं । परिणामियं पमाणं निच्छयमवलंबमाणाणं ॥१॥" [समस्तगणि-पिटकस्मारितसाराणामृषीणां परमरहस्यं निश्चयमवलम्बयतां पारिणामिकं प्रमाणम् (विवादास्पदे दाने) ॥१॥] यच्चोच्यते 'संथरणंमि असुद्ध'मित्यादिनाऽशुद्धं द्वयोरपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दातृगृहीत्रोरहितायेति तद्ग्राहकस्य व्यवहारतः संयमविराधनात् दायकस्य च लुब्धकदृष्टान्तभावितत्वेनाव्युत्पन्नत्वेन वा ददतः शुभाल्पायुष्कतानिमित्तत्वात्, शुभमपि चायुरल्पमहितं विवक्षया, शुभाल्पायुष्कतानिमितत्त्वं चाप्रासुकादिदानस्याल्पायुष्कताफलप्रतिपादकसूत्रे प्राक् चर्चितम्, यत्पुनरिह तत्त्वं तत्केवलिगम्यमिति । तृतीयसूत्रे 'अस्संजयअविरये'त्यादिनाऽगुणवान् पात्रविशेष उक्तः, 'फासुएण वा अफासुएण वा'इत्यादिना तु प्रासुकाप्रासुकादेर्दानस्य पापकर्मफलता निर्जराया अभावश्चोक्तः, असंयमोपष्टम्भस्योभयत्रापि तुल्यत्वात्, यश्च प्रासुकादौ जीवघाताभावेन अप्रासुकादौ च जीवघातसद्भावेन विशेषः सोऽत्र न विवक्षितः, पापकर्म्मणो निर्जराया अभावस्यैव च विवक्षितत्वादिति, सूत्रत्रयेणापि चानेन मोक्षार्थमेव यद्दानं तच्चिन्तितम्, यत्पुनरनुकम्पादानमौचित्यदानं वा तन्न चिन्तितम्, निर्जरायास्तत्रानपेक्षणीयत्वाद्, अनुकम्पौचित्ययोरेव चापेक्षणीयत्वादिति, उक्तञ्च–"मोक्खत्थं जं दाणं तं पइ एसो विही समक्खाओ । अणुकंपादाणं पुण जिणेहिं न कयाइ पडिसिद्धं ॥१॥" इति [मोक्षार्थं यद्दानं तत्प्रति विधिरेष भणितः । अनुकम्पादानं पुनर्न कदाचित्प्रतिषिद्धम् ॥१॥] (भगवती श० ८ उ० ६ सू० ३३२) **14/7**

**[62]** अपि च इदमपि ते श्राद्धा ज्ञापनीयाः

**संथरणम्मि असुद्धं, दोण्ह वि गिण्हंत-दिंतयाणऽहिअं ।**
**आउरदिट्ठंतेणं, तं चेव हिअं असंथरणे ॥ १६०८ ॥**

संथरेति-संस्तरणं नाम प्रासुकमेषणीयं चाशनादि पर्याप्तं प्राप्यते न च किमपि ग्लानत्वं विद्यते, तत्राऽशुद्धम्- अप्रासुकम् अनेषणीयं च गृह्णतो ददतश्च द्वयोरपि अहितम्-अपथ्यम्, गृह्णतस्संयमबाधाविधायित्वाद्ददतश्च भवान्तरे स्वल्पायुर्निबन्धनकर्मोपार्जनात् । तदेवाशुद्धम् असंस्तरणे अनिर्वाहे दीयमानं गृह्यमाणं च हितं पथ्यं भवति-आह कथं तदेव कल्प्यं तदेव चाऽकल्प्यं भवितुमर्हति ? इत्युच्यते आतुरो रोगी, तस्य दृष्टान्तेनेदं मन्तव्यम् । यथा हि रोगिणः कामप्यवस्थामाश्रित्यौषधादिकम् अपथ्यं भवति काञ्चित् पुनः समाश्रित्य तदेव पथ्यमेवमिहापि भावनीयम् ॥ १६०८ ॥ (बृहत्कल्पभा० गा० १६०८) 14/7

**[63] परमरहस्समिसीणं, समत्तगणिपिडगझरियसाराणं ।**
**परिणामियं पमाणं, निच्छयमवलंबमाणाणं ॥७६१॥**

किञ्च-परमं प्रधानमिदं रहस्यं-तत्त्वं केषाम्-ऋषीणां-सुविहितानाम्, किंविशिष्टानां ? समग्रं च तद् गणिपिटकं च समग्रगणिपिटकं तस्य क्षरितः-पतितः सारं-प्राधान्यं यैस्ते समग्रगणिपिटकक्षरितसारास्तेषामिदं रहस्यम्, यदुत पारिणामिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणम्, परिणामे भवं पारिणामिकम्, शुद्धोऽशुद्धश्च चित्तपरिणाम इत्यर्थः। किंविशिष्टानां सतां पारिणामिकं प्रमाणं ? निश्चयनयमवलम्बमानानाम्, यतः शब्दादिनिश्चयनयानामिदमेव दर्शनम्, यदुत-पारिणामिकमिच्छन्तीति। आह-यद्ययं निश्चयस्ततोऽयमेवावलम्ब्यताम्। (ओघनिर्युक्तिः गा० ७६१) 14/7...32/3

**[64]** तस्मात् शास्त्रमधीत्य तदर्थावधारणं विधेयम्, अवधृतश्च तदर्थो नय-प्रमाणाभिप्रायतो यथावत् परिभावनीयः, अन्यथा तत्फलपरिज्ञानविकलताप्रसक्ति-रित्याह—

**चरण-करणप्पहाणा, ससमय-परसमयमुक्कवावारा।**
**चरणकरणस्स सारं, णिच्छयसुद्धं ण याणंति ॥ ६७ ॥**

चरणम्-श्रमणधर्मः वयसमणधम्मसंजमवेयावच्चं च बंभगुत्तीओ। णाणा-इतियं तव कोहणिग्गहाइ चरणमेयं ॥ (ओ० नि० गा० २.) इतिवचनात्। व्रतानि-हिंसाविरमणादीनि पञ्च। श्रमणधर्मः क्षान्त्यादिर्दशधा, संयमः-पञ्चा-श्रवविरमणादिः सप्तदशभेदः, वैयावृत्त्यं दशधा आचार्याराधनादि, ब्रह्मगुप्तयो- नव वसत्यादयः, ज्ञानादित्रितयं ज्ञान-दर्शन-चारित्राणि, तपो द्वादशधा अनशनादि, क्रोधादिकषायषोडशकस्य निग्रहश्चेत्यष्टधा चरणम् ॥ करणम् पिण्डविशुद्ध्यादिः पिण्डविसोही समिई भावणपडिमाइ इंदियनिरोहो। पडिलेहण-गुत्तीओ अभिग्गहा चेव करणं तु ॥ (ओ० नि० गा०३.) इति वचनात् तत्र पिण्डविशुद्धिः त्रिकोटिपरिशुद्धिराहारस्य संसट्ठमसंसट्ठा उद्धड तह अप्पलेविया चेव। उग्गहिया-पग्गहिया उज्झियधम्मा य सत्तमिया। इति सप्तधा वा। समितिः-ईर्यासमित्यादिः पञ्चधा। भावना-अनित्यत्वादिका द्वादश। प्रतिमा-मासादिका द्वादश भिक्षूणाम्, दर्शनादिकैकादशोपासकानाम्। इन्द्रियनिरोधः-चक्षुरादिकरणपञ्चकसंयमः। प्रति-लेखनं-मुखवस्त्रिकाद्युपकरणप्रत्युपेक्षणमनेकविधम्। गुप्तिः-मनोवाक्कायसंवरण-लक्षणा त्रिधा। अभिग्रहावसतिप्रमार्जनादयोऽनेकविधाः, एतयोश्चरणकरणयोः प्रधानास्तदनुष्ठानतत्पराः, स्वसमय-परसमयमुक्तव्यापाराः, अयं स्वसमयः-अनेकान्तात्मकवस्तुप्ररूपणात्, अयं च परसमयः केवलनयाभिप्रायप्रतिपादनात् इत्येतस्मिन् परिज्ञानेऽनादृता अनेकान्तात्मकवस्तुतत्त्वं यथावदनवबुध्यमाना तदितरव्यवच्छेदेनेति यावत्, चरणकरणयोः सारं-फलं निश्चयशुद्धम्-निश्चयश्च तत् शुद्धं च ज्ञानदर्शनोपयोगात्मकं निष्कलङ्कं न जानन्ति-न अनुभवन्ति, ज्ञानदर्शन-चारित्रात्मककारणप्रभवत्वात् तस्य कारणाभावे च कार्यस्याऽसम्भवात् अन्यथा तस्य निर्हेतुकत्वापत्तेः चरणकरणयोश्च चारित्रात्मकत्वाद् द्रव्यपर्यायात्मकजीवादि-तत्त्वावगमस्वभावरुच्यभावेऽभावात्। अथवा चरणकरणयोः सारं-निश्चयेन शुद्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यग्दर्शनं ते न जानन्ति । न हि यथावस्थितवस्तुतत्त्वावबोधमन्तरेण तद्रुचिः, न च स्वसमयपरसमयतात्पर्यार्थानवगमे तदवबोधः बोटिकादेरिव सम्भवी । अथ जीवादिद्रव्यपर्यायार्थाऽपरिज्ञानेऽपि 'यदर्हद्भिरुक्तं तदैवेकं सत्यम्' इत्येतावतैव सम्यग्दर्शनसद्भावः । मण्णइ तमेव सच्चं णिस्संकं जं जिणेहिं पण्णत्तं (द्रष्टव्यम् आचाराङ्गे-५-५-१६२) इत्याद्यागमप्रामाण्यात् । न स्वसमय-परसमयपरमार्थानभिज्ञैर्निरावरणज्ञानदर्शनात्मकजिनस्वरूपाज्ञानवद्भिः तदभिहितभावानां सामान्यरूपतयाप्यन्यव्यवच्छेदेन सत्यस्वरूपत्वेन ज्ञातुमशक्यत्वात् । नन्वेवमागमविरोधः सामायिकमात्रपदविदो माषतुषादेर्यथोक्तचारित्रिणस्तत्र मुक्तिप्रतिपादनात्, सकलशास्त्रार्थज्ञताविकलव्रतस्य व्रताद्याचरणनैरर्थक्यापत्तिश्च तत्साध्यफलानवाप्तेः । न च यथोपवर्णितचरणकरणे सम्यग्दर्शनवैकल्ये भवतः, ज्ञानादित्रितस्यापि तत्र पाठात् । न ये यथोदितचरणकरणप्ररूपणासेवनद्वारेण प्रधानादाचार्यात् स्वसमय-परसमयमुक्तव्यापारा न भवन्ति इति नञोऽत्र सम्बन्धात्, ते चरणकरणस्य सारं निश्चयशुद्धं जानन्त्येव, गुर्वाज्ञया प्रवृत्तेः चरणगुणस्थितस्य साधोः सर्वविशुद्धतयाभ्युपगमात् । तं सव्वणयविशुद्धं जं चरणगुणट्ठिओ साहू (आ०नि०गा० १०५५) इत्याद्यागमप्रामाण्यात् । अगीतार्थस्य तु स्वतन्त्रचरणकरणप्रवृत्तेः व्रताद्यनुष्ठानस्य वैफल्यमभ्युपगम्यत एव-गीयत्थो य विहारो बीओ गीयत्थमीसओ भणिओ (ओ० नि० १२१) इत्याद्यागमप्रामाण्यात् ॥६७॥ (सन्म०-कां० ३. गा० ६७) **14/7**

**[65]** पुनरपि चारित्रमधिकृत्याहारविषयानाचाराचारौ प्रतिपादयितुकाम आह-

**अहाकम्माणि भुंजंति, अण्णमण्णे सकम्मुणा ।**
**उवलित्तेति जाणिज्जा, अणुवलित्तेति वा पुणो ॥८॥**

साधुं प्रधानकारणमाधाय-आश्रित्य कर्माण्याधाकर्माणि, तानि च वस्त्रभोजनवसत्यादीन्युच्यन्ते, एतान्याधाकर्माणि ये भुञ्जन्ते-एतैरुपभोगं ये कुर्वन्ति, 'अन्योऽन्यं' परस्परं तान् स्वकीयेन कर्मणोपलिप्तान् विजानीयादित्येवं नो वदेत्, तथाऽनुपलिप्तानिति वा नो वदेत्, एतदुक्तं भवति-आधाकर्मापि श्रुतोपदेशेन शुद्धमितिकृत्वा भुञ्जानः कर्मणा नोपलिप्यते, तदाधाकर्मोपभोगेनावश्यतया कर्मबन्धो भवतीत्येवं नो वदेत्, तथा श्रुतोपदेशमन्तरेणाहारगृद्ध्याधाकर्म भुञ्जानस्य तन्निमित्तकर्मबन्धसद्भावात् अतोऽनुलिप्तानपि नो वदेत्, यथावस्थितमौनीन्द्रागमज्ञस्य त्वेवं युज्यते वक्तुम् आधाकर्मोपभोगेन स्यात्कर्मबन्धः स्यान्नेति यत उक्तम्-किञ्चिच्छुद्धं कल्प्यमकल्प्यं वा स्यादकल्प्यमपि कल्प्यम् । पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥ तथान्यैरप्यभिहितम्-उत्पद्येत हि साऽवस्था, देशकालामयान् प्रति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्यामकार्यं कार्यं स्यात् कर्म कार्यं च वर्जयेद् ॥१॥ इत्यादि ।८॥

**एएहिं दोहिं ठाणेहिं, ववहारो ण विज्जइ ।**
**एएहिं दोहिं ठाणेहिं, अणायारं तु जाणए ॥९॥**

किमित्येवं स्याद्वाद: प्रतिपाद्यत इत्याह-आभ्यां द्वाभ्यां स्थानाभ्यामाश्रिताभ्यामनयोर्वा स्थानयोराधाकर्मोपभोगेन कर्मबन्धभावाभावभूतयोर्व्यवहारो न विद्यते, तथाहि-यद्यवश्यमाधाकर्मोपभोगेनैकान्तेन कर्मबन्धोऽभ्युपगम्येत एवं चाहाराभावेनाऽपि क्वचित् सुतरामनर्थोदय: स्यात्, तथाहि-क्षुत्प्रपीडितो न सम्यगीर्यापथं शोधयेत् ततश्च व्रजन् प्राण्युपमर्दमपि कुर्यात् मूर्च्छादिसद्भावतया च देहपाते सत्यवश्यंभावी त्रसादिव्याघातोऽकालमरणे चाविरतिरङ्गीकृता भवत्यार्तध्यानापत्तौ च तिर्यग्गतिरिति, आगमश्च-'सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खेज्जा' इत्यादिनाऽपि तदुपभोगे कर्मबन्धाभाव इति, तथाहि- आधाकर्मण्यपि निष्पाद्यमाने षड्जीवनिकायवधस्तद्वधे च प्रतीत: कर्मबन्ध इत्यतोऽनयो: स्थानयोरेकान्तेनाऽऽश्रीयमाणयोर्व्यवहरणं व्यवहारो न युज्यते, तथाऽऽभ्यामेव स्थानाभ्यां समाश्रिताभ्यां सर्वमनाचारं विजानीयादिति स्थितम् । (सूत्रकृ०श्रु०२ अ०५ गा०८-९)**14/7**

**[66]** तथैतदसुलभत्वेन विभाव्यते—

**सुदपरिचिदाणुभूया, सव्वस्स वि कामभोगबंधकहा ।**
**एयत्तस्सुवलम्भो, णवरि ण सुलहो विहत्तस्स ॥४॥**

**[ श्रुतपरिचितानुभूता, सर्वस्यापि कामभोगबन्धकथा ।**
**एकत्वस्योपलम्भ:, केवलं न सुलभो विभक्तस्य ॥४॥ ]**

(आत्मख्यातिवृति:) इह सकलस्यापि जीवलोकस्य संसारचक्रक्रोडाधिरोपितस्याश्रान्तमनन्तद्रव्यक्षेत्रकालभवभावपरावर्त्तै: समुपक्रान्तभ्रान्तेरेकच्छत्रीकृतविश्वतया महता मोहग्रहेण गोरिव वाह्यमानस्य प्रसभोज्जृम्भिततृष्णान्तकत्वेन व्यक्तान्तर्माथस्योत्तम्योत्तम्य मृग-तृष्णायमानं विषयग्राममुपरुन्धानस्य परस्परमाचार्यत्वमाचरतोऽनन्तश: श्रुतपूर्वानन्तश: परिचितपूर्वानन्तशोऽनुभूतपूर्वा चैकत्वविरुद्धत्वेनात्यन्तविसंवादिन्यपि कामभोगानुबद्धा कथा । इदं तु नित्यव्यक्ततयान्त: प्रकाशमानमपि कषायचक्रेण सहैकीक्रियमाणत्वादत्यन्ततिरोभूतं सत्स्वस्यानात्मज्ञतया परेषामात्मज्ञानामनुपासनाच्च न कदाचिदपि श्रुतपूर्वम्, न कदाचिदपि परिचितपूर्वम्, न कदाचिदप्यनुभूतपूर्वं च निर्मलविवेकालोकविविक्तं केवलमेकत्वम् । अत एकत्वस्य न सुलभत्वम् ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(तात्पर्यवृत्तिः) अथैकत्वपरिणतं शुद्धात्मस्वरूपसुलभं न भवतीत्याख्याति— "सुदपरिचिदाणुभूदा" इत्यादि । **सुदा**-श्रुता अनन्तशो भवति । **परिचिदा**-परिचिता सा पूर्वमनन्तशो भवति । **अणुभूदा**-अनुभूतानन्तशो भवति । कस्य ? **सव्वस्सवि**- सर्वस्यापि जीवलोकस्य । कासौ ? **कामभोगबंधकहा** कामरूपभोगाः कामभोगाः अथवा कामशब्देन स्पर्शनरसनेन्द्रियद्वयं भोगशब्देन घ्राणचक्षुःश्रोत्रत्रयं तेषां कामभोगानां बन्धः सम्बन्धस्तस्य कथा । अथवा बन्धशब्देन प्रकृतिस्थित्यनुभागप्रदेशबन्धास्तत्फलं च नरनारकादिरूपं भण्यते । कामभोगबन्धानां कथा कामभोगबन्धकथा, यतः पूर्वोक्तप्रकारेण श्रुतपरिचितानुभूता भवति ततो न दुर्लभा किन्तु सुलभैव । **एयत्तस्स**-एकत्वस्य सम्यग्दर्शनज्ञान-चरित्रैक्यपरिणतिरूपनिर्विकल्पसमाधिबलेन स्वसंवेद्यशुद्धात्मस्वरूपस्य तस्यैकत्व-स्य **उवलम्भो**-उपलम्भः प्राप्तिर्लाभः **णवरि**-केवलं अथवा नवरि-किन्तु **ण सुलभो** ? नैव सुलभः । कथम्भूतस्यैकत्वस्य **विभत्तस्स** विभक्तस्य रागादिरहित-स्य । कथं न सुलभ इति चेत्, श्रुतपरिचितानुभूतत्वाभावादिति ॥४॥ (स०प्रा० गा० ४) **15/2**

**[67]** सम्प्रति भागलब्धदलिकं प्रभूततरं गुणश्रेणिरचनयैव जन्तुः क्षपयति अतो गुणश्रेणिस्वरूपप्रतिपादनार्थमाह—

**सम्मदरसव्वविरई उ अणविसंजोयदंसखवगे य ।**
**मोहसमसंतखवगे, खीणसजोगियर गुणसेढी ॥ ८२ ॥**

गुणश्रेणय एकादश भवन्तीति सम्बन्धः । कुत्र कुत्र ? इत्याह—'सम्मदर-सव्वविरई उ'' इत्यादि । तत्र "सम्म"त्ति सम्यक्त्वं-सम्यग्दर्शनं तल्लाभे एका गुणश्रेणिः । तथा विरतिशब्दस्य प्रत्येकं सम्बन्धाद् दरविरतिः-देशविरतिस्तल्लाभे द्वितीया गुणश्रेणिः । सर्वविरतिः-सम्पूर्णविरतिस्तल्लाभे तृतीया गुणश्रेणिः । 'अणविसंजोय'' त्ति अनन्तानुबन्धिविसंयोजनायां चतुर्थी गुणश्रेणिः । "दंसखवगे" त्ति पदैकदेशे पदप्रयोगदर्शनाद् दर्शनस्य दर्शनमोहनीयस्य क्षपको दर्शनक्षपकस्तत्र तद्विषया पञ्चमी गुणश्रेणिः । चशब्दः समुच्चये । "मोहसम"त्ति मोहस्य-मोह-नीयस्य शमः-शमक उपशमकः स चोपशमश्रेण्यारूढोऽनिवृत्तिबादरः सूक्ष्म-सम्परायश्चाभिधीयते, तत्र मोहशमे षष्ठी गुणश्रेणिः । "संत" त्ति शान्तः-उपशान्तमोहगुणस्थानकवर्ती तत्र सप्तमी गुणश्रेणिः । "खवगि" त्ति क्षपकः-क्षपकश्रेण्यारूढोऽनिवृत्तिबादरः सूक्ष्मसम्परायश्च निगद्यते, तत्र क्षपकेऽष्टमी गुणश्रेणिः । "खीण" त्ति क्षीणः-क्षीणमोह[स्त]स्य नवमी गुणश्रेणिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सजोगि"त्ति सयोगिकेवलिनो दशमी गुणश्रेणिः । "इयर"त्ति अयोगिकेवलिन एकादशी गुणश्रेणिरिति गाथाक्षरार्थः ।

भावार्थः पुनरयं-सम्यक्त्वलाभकाले मन्दविशुद्धिकत्वाद् जीवो दीर्घान्तर्मुहूर्तवेद्यामल्पतरप्रदेशाग्रां च गुणश्रेणिमारचयति । ततो देशविरतिलाभे सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां करोति । ततः सर्वविरतिलाभे सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां करोति । ततोऽप्यनन्तानुबन्धिविसंयोजनायां सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां विदधाति । ततो दर्शनमोहनीयक्षपकः सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां निर्मापयति । ततोऽपि मोहशमकः सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां विरचयति । ततोऽप्युपशान्तमोहगुणस्थानकवर्ती सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां विरचयति। ततोऽपि क्षपकः सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां विरचयति । ततोऽपि क्षीणमोहः सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां कुरुते । ततोऽपि सयोगिकेवली भगवान् सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां विधत्ते । ततोप्ययोगिकेवली परमविशुद्धिपरिकलितः सङ्ख्येयगुणहीनान्तर्मुहूर्तवेद्यामसङ्ख्येयगुणप्रदेशाग्रां च तां परिकल्पयति तदेवं यथा यथातिविशुद्धिस्तथा तथा ह्रस्वकालबहुप्रदेशाग्रत्वं च गुणश्रेणेर्भवतीति॥ (पञ्चमकर्म० गा०८२) । **15/6**

**[68] सातर्द्धिरसेष्वगुरुः, सम्प्राप्य विभूतिमसुलभामन्यैः ।**
**सक्तः प्रशमरतिसुखे, न भजति तस्यां मुनिः सङ्गम् ॥२५६॥**

साते ऋद्धौ रसे च अगुरुरकृतादरः । सम्प्राप्य विभूतिमाकाशगमनादिकाम् । अन्यैरसुलभाम्-अप्राप्ताम् । तादृक्चारित्रे सक्तोऽभिरतः प्रशमरतिसुखे । न भजति-न करोति । तस्यां विभूतौ मुनिः सङ्गं-स्नेहम्, नोपजीवति लब्धीरित्यर्थः ।

सर्वर्द्ध्यतिशायिनां यतीनामृद्धिर्भवति परमातिशयप्राप्तत्वादिति दर्शयति-

**या सर्वसुरवरर्द्धिर्विस्मयनीयापि सानगारर्द्धेः ।**
**नार्घति सहस्रभागम्, कोटिशतसहस्रगुणितापि ॥२५७॥**

सर्वसुराणां ये वराः प्रधानभूताः कल्पाधिपतय इन्द्राः शक्रादयः कल्पातीताश्च। तेषामृद्धिर्विभूतिर्या सा विस्मयकारिणी भवति प्राणिनाम् । अतो विस्मयनीयापि सती सा विभूतिरनगारर्द्धेः साधुजनसमृद्धेर्नार्घति सहस्रभागम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोटिशतसहस्रगुणिताऽपि सा सुरवर्द्धिः कोटिलक्षगुणिताऽपि नार्घति । सहस्रांशेनाप्यनगारर्द्धेर्न तुल्यतामेतीत्यर्थः ।।२५७।।

अव० सुखविभूतिरसामृतकल्पाहरिषु अगुरुः-गौरवरहितः अकृतादर इत्यर्थः । लब्धिमाकाशगमनादिकां दुष्प्रापां कापुरुषैः, तस्यामामर्शौषध्यादिविभूतौ प्राप्तायामपि। सर्वसुखर्द्धिधश्चतुविधेन्द्रविभूतिः ।। (प्रशमरतिः गा०२५६-५७) । **15/6**

**[69] कारण महवा छद्धा, तत्थ संततोत्ति कारणं कत्ता ।**
**कज्जप्पसाहगतमं करणं मिउपिंडदंडाइं ।।२११२।।**

**कम्मं किरियाकारणमिह निच्चिट्ठो जओ न साहेइ ।**
**अहवा कम्मं कुम्भो, स कारणं बुद्धिहेउ त्ति ।।२११३।।**

**भव्वो त्ति व जोग्गो त्ति व, सक्को त्ति व सो सरूवलाभस्स ।**
**कारणसंनिज्झंम्मि वि जं नागासत्थमारंभो ।।२११४।।**

**बज्झनिमित्तावेक्खं, कज्जं वि य कज्जमाणकालम्मि ।**
**होइ सकारणमिहरा, विवज्जयाऽभावया होज्जा ।।२११५।।**
**देओ स जस्स तं संपयाणमिह तं पि कारणं तस्स ।**
**होइ तदत्थित्ताओ, न कीरए तं विणा जं सो ।।२११६।।**

**भूपिंडावायाओ पिंडो वा सक्करादवायाओ ।**
**चक्कमहावाओ वाऽपादाणं कारणं तं पि ।।२११७।।**

**वसुहाऽऽगासं चक्कं सरूवमिच्चाइ संनिहाणं जं ।**
**कुम्भस्स तं पि कारणमभावओ तस्स जदसिद्धी ।।२११८।।**

सप्तापि प्रायो व्याख्यातार्थाः, नवरं क्रियते कर्त्रा निर्वर्त्यत इति व्युत्पत्तेः कर्म भण्यते । कासौ क्रिया कुम्भं प्रति ? कर्तृव्यापाररूपा । सा च कुम्भलक्षणकार्यस्य कारणमिति प्रतीतमेव । आह-ननु कुलाल एव कुम्भं कुर्वन्नुपलभ्यते, क्रिया तु न काचित् कुम्भकरणे व्याप्रियमाणा दृश्यत इत्याह-इह निश्चेष्टः कुलालोऽपि यस्माद् न घटं साधयति निष्पादयति, या च तस्य चेष्टा सा क्रिया, इति कथं न तस्याः कुम्भकारणत्वम् ? इति । अथवा, कर्तुरीप्सिततमत्वात् क्रियमाणः कुम्भ एव कर्म । तर्हि कार्यमेवेदम्, अतः कथमस्य कारणत्वम् ? । न हि सुतीक्ष्णमपि सूच्यग्रमात्मानमेव विध्यति । ततः कार्यं निर्वर्त्यस्यात्मन एव कारणमित्यनुपपन्नमेव, इत्याह-'स कारणं बुद्धिहेउ त्ति' स कुम्भः कारणं हेतुः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुम्भस्य । कुतः ? प्रस्तावात् कुम्भबुद्धिहेतुत्वात् । इदमुक्तं भवति-सर्वोऽपि बुद्धौ सङ्कल्प्य कुम्भादिकार्यं करोतीति व्यवहारः, ततो बुद्धयाऽध्यवसितस्य कुम्भस्य चिकीर्षितो मृन्मयकुम्भस्तद्बुद्ध्यालम्बनतया कारणं भवत्येव । न च वक्तव्यम्-अनिष्पन्नत्वादसन्नसौ तद्बुद्धेरपि कथमालम्बनं स्यात् ? द्रव्यरूपतया तस्य सर्वदा सत्त्वादिति । ननु य एवेह मृन्मयकार्यरूपो घटस्तस्यैव कारणं चिन्त्यत इति प्रस्तुतम्, बुद्ध्याऽध्यवसितस्तु तस्मादन्य एव, इति तत्कारणाभिधानमप्रस्तुतमेव । सत्यम्, भाविनि भूतवदुपचारन्यायेन तयोरेकत्वाध्यवसानाददोषः । स्थास-कोशादिकरणकालेऽपि हि 'किं करोषि' इति पृष्टः कुम्भकारः 'कुम्भं करोमि' इत्येतदेव वदति, बुद्ध्यध्यवसितेन निष्पत्स्यमानस्यैकत्वाध्यवसायादिति । अथवा, भव्यो योग्यः स्वरूपलाभस्येति शक्य उत्पादयितुम्, अतः सुकरत्वात् कार्यमप्या-त्मनः कारणमिष्यते । अवश्यं च कर्मणः कारणत्वमेष्टव्यम्, यद्-यस्मात् समस्तकारणसामग्रीसंनिधानेऽपि नैवमेवाकाशार्थं प्रारम्भः, किन्तु विवक्षितकार्यार्थम्, अतस्तदविनाभावित्वात् तत्क्रियायाः कार्यमप्यात्मनः कारणमिति । एतदेव भाव-यति-बाह्यानि कुलाल-चक्र-चीवरादीनि यानि निमित्तानि तदपेक्षं क्रियमाण-कालेऽन्तरङ्गबुद्ध्यालोचितं कार्यं भवति स्वस्यात्मनः कारणं स्वकारणम्, अन्यथा यदि बुद्ध्या पूर्वमपर्यालोचितमेव कुर्यात् तदाऽप्रेक्षापूर्वे शून्यमनस्कारम्भविपर्ययो भवेत्, घटकारणसंनिधानेऽप्यन्यत् किमपि शरावादिकार्यं भवेद्, अभावो वा भवेत्-न किञ्चित् कार्यं भवेदित्यर्थः । तस्माद् बुद्ध्यध्यवसितं कार्यमप्यात्मनः कारणमेष्टव्यम् । किं बहुना ?, यथा यथा युक्तितो घटते तथा तथा सुधिया कर्मणः कारणत्वं वाच्यम्, अन्यथा कर्मणोऽकारकत्वे करोतीति कारकम् इति षण्णां कारकत्वानुपपत्तिरेव स्यादिति ।

'भूपिण्डेत्यादि' भूरपादानम्, पिण्डापायेऽपि ध्रुवत्वात्, अथवा, विवक्षया पिण्डोऽपादानम्....तद्गतशर्करादीनामपायेऽपि विवेकेऽपि ध्रुवत्वात् अथवा, घटापायाच्चक्रमापाको वाऽपादानमिति । 'वसुहेत्यादि' घटस्य चक्रं संनिधान-माधारः, तस्यापि वसुधा, तस्या अप्याकाशम्, अस्य पुनः स्वप्रतिष्ठत्वात् स्वरूपमाधारः, इत्येवमादि यत् किमप्यानन्तर्येण परम्परया वा सन्निधानमाधारो घटस्य विवक्ष्यते तत् सर्वमपि तस्य कारणम्, तदभावे तस्य घटस्य यद् यस्मादसिद्धिः ॥ इत्येकोनविंशतिगाथार्थः ॥ तदेवमुक्तं द्रव्यकारणम् ॥२११२॥ ॥२११३॥ २११४॥ २११५॥ २११६॥ २११७॥ २११८॥ (विशेषा० गा०२११२-१८) । **15/7**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[70] तत्र मैत्रीस्वरूपमाह-

**मा कार्षीत्कोऽपि पापानि, मा च भूत् कोऽपि दुःखितः ।**

**मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥११८॥**

कोऽपि जन्तुरुपकार्यनुपकारी वा पापानि-दुःखनिबन्धनानि मा कार्षीत्-पापकरणनिषेधात् मा च भूत् कोऽपि-दुःखितः । जगदिति तांस्तान् देव-मानुष-तिर्यग्-नारकपर्यायानत्यर्थं गच्छतीति जगत् प्राणिजातम् । अपिशब्दान्नैकः कश्चित्, किन्तु सकलं जगत् मुच्यतां-मोक्षमाप्नुयादित्यर्थः । एषा-उक्तस्वरूपा मतिर्मैत्रीशब्देनोच्यते । न हि कस्यचिदेकस्य मित्रं मित्रं भवति, व्याघ्रादेरपि स्वापत्यादौ मैत्रीदर्शनात्, तस्मादशेषसत्त्वविषया मैत्री मैत्री । एवं 'कृतापकाराणामपि सर्वसत्त्वानां मित्रतां व्यवस्थाप्य क्षमेऽहं सम्यग्मनोवाक्कायैर्येषां च मयाऽपकारः कृतस्तानपि सर्वान् क्षमयेऽहम्' इति मैत्रीभावना ॥१८॥

अथ प्रमोदस्वरूपमाह –

**अपास्ताशेषदोषाणाम्, वस्तुतत्त्वावलोकिनाम् ।**

**गुणेषु पक्षपातो यः, स प्रमोदः प्रकीर्त्तितः ॥११९॥**

अपास्ता अशेषा दोषाः-प्राणिवधादयो यैस्तेषाम् । तथा वस्तुतत्त्व-मवलोकन्त इत्येवंशीलास्तेषाम् । अनेन ज्ञान-क्रियाद्वयं मोक्षहेतुमाह, यदाह भाष्यकारः –

"नाणकिरियाहि मोक्खो" [विशेषावश्यकभाष्ये गा० ३] इति ।

एवंविधानां मुनीनां गुणेषु-क्षायोपशमिकादिभावावर्जितेषु शम-दमौचित्य-गाम्भीर्य-धैर्यादिषु यः पक्षपातो विनय-प्रयोग-वन्दन-स्तुति-वर्णवाद-वैयापृत्यकरणा-दिभिः परात्मोभयकृतपूजाजनितश्च सर्वेन्द्रियाभिव्यक्तो मनःप्रहर्षः स प्रमोदः प्रकीर्तितः ॥११९॥

अथ कारुण्यस्वरूपमाह –

**दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवितम् ।**

**प्रतीकारपराबुद्धिः, कारुण्यमभिधीयते ॥१२०॥**

दीनेषु-मतिश्रुताज्ञानविभङ्गबलेन प्रवर्तितकुशास्त्रेषु स्वयं नष्टेषु परानपि नाशयत्सु अत एव दयास्पदत्वाद्दीनेषु । तथाऽऽर्त्तेषु-नवनवविषयार्जन-पूर्वार्जितपरिभोगजनिततृष्णाग्निना दन्दह्यमानेषु, हिताहितप्राप्तिपरिहारविपरीत-वृत्तिषु अर्थार्जन-रक्षण-व्यय-नाशपीडावत्सु च । तथा भीतेषु-विविधदुःख-पीडिततया अनाथ-कृपण-बाल-वृद्ध-प्रेष्यादिषु सर्वतो बिभ्यत्सु । तथा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैरिभिराक्रान्तेषु रोगपीडितेषु मृत्युमुखमधिशयितेष्विव याचमानेषु-प्रार्थयमानेषु जीवितं-प्राणत्राणम् । एषु दीनादिषु 'अहो कुशास्त्रप्रणेतारः तपस्विनो यदि कुमार्गप्रणयनान्मोच्येरन्, भगवानपि हि भुवनगुरुः उन्मार्गदेशनात् सागरोपम-कोटीकोटीं यावद्भवे भ्रान्तः, तत् काऽन्येषां स्वपापप्रतीकारं कर्तुमशक्नुवतां गतिः ?', तथा 'धिगमी विषयार्जनभोगतरलहृदया अनन्तभवानुभूतेष्वपि विषयेष्वसंतृप्तमनसः कथं नाम प्रशमामृततृप्ततया वीतरागदशां नेतुं शक्याः ?' इति, तथा 'बाल-वृद्धादयोऽपि विविधभयहेतुभ्यो भीतमनसः कथं नामै-कान्तिकात्यन्तिकभयवियोगभाजनीकरिष्यन्ते ?' इति, तथा 'मृत्युमुखम-धिशयिताः स्वधन-दार-पुत्रादिवियोगमुत्प्रेक्षमाणा मारणान्तिकीं पीडामनुभवन्तः सकलभयरहितेन पारमेश्वरवचनामृतेन सिक्ताः कथमजरामरीकरिष्यन्ते ?' इत्येवं प्रतीकारपरा या बुद्धिः, न तु साक्षात्प्रतीकार एव, तस्य सर्वेष्वशक्यक्रियत्वात्, सा कारुण्यमभिधीयते । या तु अशक्यप्रतीकारेषु 'सर्वान् जन्तून् मोचयित्वा मोक्षं यास्यामि' इति सौगतानां करुणा न सा करुणा, वाङ्मात्रत्वात्, न ह्येवं शक्यं भवितुं 'सर्वसंसारिषु मुक्तेषु मया मोक्तव्यम्' इति, संसारोच्छेदप्रसङ्गेन सर्वसंसारिणां मुक्त्यभावात्, तस्माद्वाङ्मात्रमेतत् मुग्धजनप्रतारकं सौगतानां कारुण्यम् । एतच्च कुर्वन् हितोपदेश-कालापेक्षान्न-पाना-ऽऽश्रय-वस्त्र-भेषजैरपिताननुगृह्णातीति ॥१२०॥

अथ माध्यस्थ्यस्वरूपमाह –

**क्रूरकर्मसु निःशङ्कम्, देवतागुरुनिन्दिषु ।**
**आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥१२१॥**

क्रूराणि-अभक्ष्यभक्षणा-ऽपेयपाना-ऽगम्यागमन-ऋषिबालस्त्रीभ्रूणघाता-दीनि कर्माणि येषां तेषु, तेऽपि कदाचिदवाप्तसंवेगा नोपेक्षणीयाः स्युरत आह-देवतागुरुनिन्दिषु, देवताश्चतुस्त्रिंशदतिशयादियुक्ता वीतरागाः, गुरवः तदुक्तानुष्ठानस्य पालका उपदेष्टारश्च, तान् रक्त-द्विष्ट-मूढ-पूर्वव्युद्ग्राहिततया निन्दन्तीत्येवंशीलाः तेषु, तथाविधा अपि कथञ्चन वैराग्यदशापन्ना आत्मदोषदर्शिनो नोपेक्षणीयाः स्युरित्याह-आत्मशंसिषु-आत्मानं सदोषमपि शंसन्ति प्रशंसन्तीत्येवंशीला आत्मबहुमानिन इत्यर्थः, तेषु मुद्गशैलेष्विव पुष्करावर्त्तवारिभिर्मृदूकर्तुमशक्येषु देशनाभिः योपेक्षा तन्माध्यस्थ्यमुदीरितम् ॥१२१॥ (यो०शा० प्र० ४. गा० ११८-१२१) । **16/1**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[71][सर्वेषामपि नयानामन्योन्याऽनिश्रितत्वे मिथ्यात्वम् अन्योन्यनिश्रितत्वे पुनः सम्यक्त्वमिति प्रतिपादनम्]

तदेवमेकान्ताभ्युपगमे बन्धहेत्वाद्यनुपपत्तेरैहिकाऽऽमुष्मिकसर्वव्यवहारविलोप इत्येकान्तव्यवस्थापकाः सर्वेऽपि मिथ्यादृष्टयो नयाः अन्योन्यविषयाऽपरित्यागवृत्तयस्तु त एव सम्यक्त्वं प्रतिपद्यन्त इत्युपसंहरन्नाह -

**तम्हा सव्वे वि णया, मिच्छद्दिट्ठी सपक्खपडिबद्धा ।**
**अण्णोण्णणिस्सिआ उण, हवंति सम्मत्तसब्भावा ॥२१॥**

यस्माद् एकान्तनित्याऽनित्यवस्त्वभ्युपगमो बन्धादिकारणयोगकषायाभ्युपगमबाधितः तदभ्युपगमोऽपि नित्याद्येकान्ताभ्युपगमप्रतिहतः इत्येवंभूतपूर्वोत्तराभ्युपगमस्वरूपाः तस्माद् मिथ्यादृष्टयः सर्वेऽपि नयाः स्वपक्षप्रतिबद्धाः स्व आत्मीयः पक्षः अभ्युपगमस्तेन प्रतिबद्धाः प्रतिहता यतस्तत इति । नयज्ञानानां च मिथ्यात्वे तद्विषयस्य तदभिधानस्य च मिथ्यात्वमेव । तेनैवं प्रयोगः-मिथ्या सर्वनयवादाः, स्वपक्षेणैव प्रतिहतत्वात् चौरवाक्यवत् । अथ तेषां प्रत्येकं मिथ्यात्वे बन्धाद्यनुपपत्तौ सम्यक्त्वानुपपत्तिः सर्वत्रेत्याह-अन्योन्यनिश्रिताः परस्परापरित्यागेन व्यवस्थिताः पुनर् इति त एव सम्यक्त्वस्य यथावस्थितवस्तुप्रत्ययस्य सद्भावा भवन्तीति न बन्धाद्यनुपपत्तिः ।

ननु यदि नयाः प्रत्येकं सन्ति कथं प्रत्येकावस्थायां तेषां सम्यक्त्वाभावः स्वरूपव्यतिरेकेण अपरसम्यक्त्वाभावात् तस्य च तेष्वभ्युपगमात् ? अथ न सन्ति, कथं तेषां समुदायः सम्यक्त्वनिबन्धनो भवेत् असतां समुदायानुपपत्तेः ? न च असतोऽपि सम्यक्त्वम् नयवादेष्वपि सम्यक्त्वप्रसक्तेः । न च प्रत्येकं तेषां सतामसम्यक्त्वेऽपि तत्समुदाये सम्यक्त्वं भविष्यति 'दव्वट्ठिओ त्ति तम्हा नत्थि णओ इत्याद्युपसंहारसूत्रविरोधात् । न च प्रत्येकमेकैकांशग्राहिणः सम्पूर्णवस्तुग्राहकाः समुदिता इति सम्यग्व्यपदेशमासादयन्ति, तत्तत्स्वगोचरापरित्यागेन तत्रापि विषयान्तरे तेषामप्रवृत्तेः । न च प्रत्येकमसम्यक्त्वे समुदायेऽपि सम्यक्त्वं युक्तम् सिकतासु तैलवत्, असतः सदुत्पत्तेः सतो वा असदुत्पत्तेर्विरोधाच्च ।

अत्राभिधीयते-प्रत्येकमप्यपेक्षितेतरांशस्वविषयग्राहकतयैव सन्तो नयाः तद्व्यतिरिक्तरूपतया त्वसन्त इति सतां तत्समुदाये सम्यक्त्वे न कश्चिद् दोषः, नन्वितरेतरविषयाऽपरित्यागवृत्तीनां ज्ञानानां कथं समुदायः सम्भवी येन तत्र सम्यक्त्वमभ्युपगम्येत ? अनुक्तोपालम्भ एषः, न ह्येकदाऽनेकज्ञानोत्पादस्तेषां समुदायो विवक्षितः अपि त्वपरित्यक्तेतररूपविषयाध्यवसाय एव समुदायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्योन्यनिश्रिताः इत्यनेनाप्ययमेवार्थः प्रतिपादितः । नहि द्रव्यार्थिकपर्यायार्थिकाभ्यामत्यन्तपृथग्भूताभ्यामङ्गुलिद्वयसंयोगवदुभयवादोऽपरः प्रारब्धः, ननु यदि प्रमाणं नयाः "प्रमाण-नयैरधिगमः" [तत्त्वार्थ० अ० १ सू० ६] इति प्रमाणनयभेदकल्पनावैयर्थ्यप्रसक्तिः, अथ अप्रमाणम् तथाप्यधिगमानुपपत्तिः तत्पृथग्भूतस्यापरस्यासंवेदनात् प्रमाणाभावप्रसक्तिश्च, असदेतत्, यतः अप्रमाणं नयाः नयन्ति इतररूपसापेक्षं स्वविषयं परिच्छिन्दन्तीति नया इति व्युत्पत्तेः । न चापरिच्छेदकाः नयतेर्गत्यर्थत्वेन ज्ञानार्थत्वात् ज्ञानार्थस्य परिच्छेदात्मकत्वात् । न च परिच्छेदकत्वेऽपि प्रमाणता, समस्तनयविषयीकृतानेकान्तवस्तुग्राहकत्वेन प्रकृष्टं मानं प्रमाणम् इतरांशसव्यपेक्षस्वांशग्राही नयः' इति तत्स्वतत्त्वव्यवस्थितेः । न चानेकान्तात्मकवस्तुग्राहिणो नया न भवन्ति, प्रत्येकं स्वविषयनियतत्वात् तेषाम् तद्व्यतिरिक्तस्य चान्यस्य तद्विषयस्याननुभवात् । प्रमाणाभावोऽपि न, आत्मनः कथञ्चित् तद्व्यतिरिक्तस्य प्रमाणत्वेनानुभवसिद्धत्वात् तत्तन्नयविषयीकृतशेषवस्त्वंशात्मकैकद्रव्यग्राहकत्वस्य तत्र प्रतीतेः । न च संशयादिज्ञानैरात्मनः प्रमाणत्वेऽतिप्रसङ्गः, प्रमीयतेऽनेन प्रमिणोतीति वा प्रमाणमिति 'प्र'शब्देन तस्य निरस्तत्वात् । न चात्मनः कर्तृत्वात् करणरूपप्रमाणतानुपपत्तिः, उत्पाद-व्यय-ध्रौव्यात्मकस्य तस्यानेकरूपत्वेन कर्तृ-करणभावाविरोधात् एतेन 'प्रत्येकं मिथ्यादृष्टयो नयाः समुदिताः सम्यक्त्वं प्रतिपद्यन्त इत्यत्र न नयसमुदायोऽर्थद्रष्टा प्रत्येकमद्रष्टृत्वात् जात्यन्धसमूहवत्' इत्येतन्निरस्तम् अद्रष्टृतत्समूहस्य सम्यक्त्वानभ्युपगमात् स्वविषयपरिच्छेदकत्वाच्च नयानाम् 'अद्रष्टृत्वात्' इति हेतुरसिद्धः 'परिपूर्णवस्त्वनधिगन्तृत्वात्' इति हेतौ प्रतिज्ञार्थैकदेशासिद्धिः सिद्धसाध्यता च समुदायिनो द्रष्टृत्वनिषेधे साध्ये । अथ तत्समुदायस्य द्रष्टृत्वनिषेधः साध्यस्तदा अध्यक्षविरोधः समुदायिव्यतिरिक्तस्यैकान्तेन समुदायस्याभावात् धर्मणोऽप्रसिद्धिः सिद्धसाध्यता च ॥२१॥ (सन्म० कां० १ गा० २१) । **16/3...32/2**

**[72]** 'प्रमाणनयैरधिगमः' (अ०१ सू०६) इति च यदुक्तम्, तत्र प्रमाणमेतदेव पञ्चविधं सम्यग्दृष्टिपरिगृहीतं ज्ञानम्, तदाह- प्रमाणे च प्रत्यक्ष-परोक्षे उक्ते, नयास्तु पूर्वं नोक्ताः इत्यतो नयान् वक्ष्यामः । ते च यथा स्वरूपतो व्यवस्थितास्तथा निर्दिश्यन्ते-

**सूत्रम्-नैगमसंग्रहव्यवहारर्जुसूत्रशब्दानयाः ॥१-३४॥**

**भा० - नैगमः संग्रहः, व्यवहारः, ऋजुसूत्रः, शब्द इत्येते पञ्च नया भवन्ति ॥ ३४ ॥**

**टी०** नैगमेत्यादि । कृतद्वन्द्वसमासानां पञ्चानामपि प्रथमाबहुवचनान्तता । नया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति च अनेकधर्मकदम्बकोपेतस्य वस्तुन एकेन धर्मेणोन्नयनमवधारणात्मकं नित्य एवानित्य एवेत्येवंविधं नयव्यपदेशमास्कन्दति, स चाध्यवसायविशेष इति । निगम्यन्ते-परिच्छिद्यन्ते इति निगमाः-लौकिका अर्थाः, तेषु निगमेषु भवो योऽध्यवसायो ज्ञानाख्यः स नैगमः । स च सामान्येनापि व्यवहरति सामान्य-बुद्धिहेतुना सामान्यवचनहेतुना च, अत्यन्तं भेदेभ्योऽन्यत्वरूपेण सत्तामात्रेण, तथा विशेषेणापि विशेषबुद्धिहेतुना विशेषवचनहेतुना च अत्यन्तं सामान्यादन्यत्वरूपेण व्यवहरति परमाणुनिष्ठितेन, तथा सामान्यविशेषेणापि गवादिना सर्वगोपिण्डेष्वनु-वृत्यात्मकेन अश्वादिव्यावृत्त्यात्मकेन च व्यवहरति, यथा लोको व्यवहरति तथाऽनेन व्यवहर्तव्यमिति, लोकश्चोपदिष्टैः प्रकारैः समस्तैर्व्यवहरति । प्रवचने च वसति-प्रस्थकनिदर्शनद्वयेन विभावितः, काणभुजराद्धान्तहेतुरवगन्तव्यः । अभेदेन संग्रहात् सर्वस्य संगृह्णाति इति संग्रहः । यदि भवनाभिसम्बद्धस्यैव भावस्य भावत्वमभ्युप-गम्यते ततः परिसमापितात्मस्वरूपित्वाद् भावस्य भ्रान्तिसमुपनिबन्धनघटादि-विकल्पप्रकल्पनानर्थक्यम्, यदि घटादि वस्त्वपि भवनप्रवृत्तितन्त्रमेवेत्येवं सति भाव एव, तदनर्थान्तरत्वात् तत् स्वात्मवत्, भवनार्थान्तरत्वे वा व्योमोत्पलादिवदसत्त्वं विकल्पानां रासभविषाणादिसत्त्वं वा घटादिवद् भवनानर्थान्तरत्वात्, एतद्दर्शनपुरस्सरा एव च सर्वनित्यत्वैकत्वकारणमात्रत्वादिवादाः कालपुरुषस्वभावदैवादयश्चेति भावः। निश्चयासद्गृहीतानां विधिपूर्वकमवहरणं व्यवहारः । यदि घटादिभेदश्रुत्या स्वसामान्यानुबद्धस्य निरस्तसामान्यान्तरसम्बन्धस्य श्रूयमाणत्वानुगुणमेव ग्रहणं न स्यात्, किन्तु सर्वव्यपदेशविशेषाभिव्यङ्ग्य भाव एव तेन तेन रूपेणाभिव्यज्यते, ततो घटाद्यन्यतरभेदश्रुतौ सर्वरूपभेदभावप्रतीतिप्रसङ्गस्ततश्च घटपटोदकादिरूपव्यति-करभावान्निश्चयाभावप्रसङ्गः, उपदेशक्रियोपभोगापवर्गव्यवस्थादीनां चाभावात् सर्वसंव्यवहारोच्छेदः, सर्वविशेषव्याकरणे च निर्निबन्धनभवनाभावाद् भावाभाव एव, अविशेषत्वाभेदत्वानिरूप्यत्वादितश्च नैवासौ भावः खरविषाणादिवत्, तस्माद् व्यवहारोपनिपतितसामान्योपनिबन्धनं तु यदेव यद् यदा द्रव्यं पृथिवी घटादि व्यपदिश्यते तदेव तत् तदा त्रैलोक्याविभिन्नरूपं सततमवस्थितापरित्यक्तात्मसामान्यं महासामान्यप्रतिक्षेपेण संव्यवहारमार्गमास्कन्दतीति । एवंविधवस्तूपनिबन्धनैव च वर्णाश्रमप्रतिनियतरूपा यमनियमगम्यागम्यभक्ष्याभक्ष्यादिव्यवस्था, कुम्भकारादेश्च मृदानयनावमर्दनशिवकस्थासकादिकरणप्रवृतौ वेतनकादिदानस्य साफल्यम्, अव्यवहार्यत्वाच्च शेषमवस्तु, व्योमेन्दीवरादिवदिति । ऋजुसममकुटिलं सूत्रयति ऋजु वा श्रुतम् आगमोऽस्येति सूत्रपातनवद् वा ऋजुसूत्रः, यस्मादतीता-नागतवक्रपरित्यागेन वर्तमानपदवीमनुधावति, अतः साम्प्रतकालावरुद्धपदार्थत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋजुसूत्रः, एष च भावविषयप्रकारातीतानागतविषयवचनपरिच्छेदे प्रवृत्तः सर्वविकल्पातीतातिसम्प्रमुग्धसंग्रहाविशिष्टत्वाद् व्यवहारस्यायथार्थतां मन्यमानः अचरणपुरुषगरुडवेगव्यपदेशवद् वर्तमानक्षणसमवस्थितिपरमार्थवस्तु व्यवस्थापयति, अतीतानागताभ्युपगमस्तु खरविषाणास्तित्वाभ्युपगमान्न भिद्यते, दग्धमृतापध्वस्तविषयश्चानाश्वासो न कस्यचिदपि स्यात्, अघटादिलक्षणमृदाद्यनर्थान्तरत्वाच्च घटादिकालेऽपि घटादिनैव स्यात् न च तदेव तदेकं मृद् द्रव्यमन्यथा वर्तते, किं तर्हि ? अन्यदेव, अन्यप्रत्ययवशाद् वाऽन्यथोत्पद्यत इति न पिण्डादिक्रियाकाले कुम्भकारव्यपदेशः, यदि चान्यदपि कुर्वन्नन्यस्य कर्तेत्युच्यते पटादिकरणप्रवृत्तोऽपि प्रत्याख्यातविज्ञानान्तरसम्बन्धः स्यादेव कुम्भकारः, ततश्चाशेषलोकव्यवहारोपरोध इत्यतः पूर्वापरभागवियुतः सर्ववस्तुगतो वर्तमानक्षण एव सत्यः, नातीतमनागतं चास्तीति, एतद्दर्शननिबन्धनं चैतदुपदिश्यते, "पिब च खाद च" इत्यादि "एतावानेष पुरुषः" इत्यादि वेति । शब्दनयः-शब्द एव सोऽर्थकृत-वस्तुविशेषप्रत्याख्यानेन शब्दकृतमेवार्थविशेषं मन्यते, यद्यर्थाधीनो विशेषः स्यात् न शब्दकृतः, तेन घटवर्तमानकाले घट एव निर्विशेषः स्यात् कर्मकरण-सम्प्रदानापादनस्वाम्यादिविशेषान् नाप्नुयात्, ततश्च घटं पश्यत्येवमादिकारककृतो व्यवहारः छिद्येत, समानलिङ्गादिशब्दसमुद्भावितमेव वस्त्वभ्युपैति नेतरत्, नहि पुरुषः स्त्री, यदीष्येत वचनार्थहानिः स्यात्, भेदार्थं हि वचनम्, अतः स्वातिः तारा नक्षत्रमिति लिङ्गतः, निम्बाम्रकदम्बा वनमिति वचनतः, स पचति त्वं पचसि अहं पचामि पचावः पचामः इति पुरुषतः, एवमादि सर्वं परस्परविशेषव्याघातादवस्तु, परस्परव्याघाताच्चैवमाद्यवस्तु प्रतिपत्तव्यम्, यथा शिशिरो ज्वलनः, तथा विरुद्धविशेषत्वात् तटस्तटी तटमित्यवस्तु, रक्तनीलमिति यथा, यद् वस्तु तदविरुद्धविशेषमभ्युपयन्ति सन्तः यथा घटः कुटः कुम्भ इति तथा चोच्यते-यत्र ह्यर्थो वाचं न व्यभिचरत्यभिधानं तत्, एवमयं समानलिङ्गसङ्ख्यापुरुषवचनः शब्दः, एतद्दर्शनानुगृहीतं चोच्यते-"अर्थप्रवृत्तितत्त्वानां शब्द एव निबन्धनम्" इति, एवमेते मूलनयाः पञ्च नैगमादयः । अत्र चाद्याश्चत्वारोऽर्थप्रधानत्वादर्थतन्त्रत्वात्, शब्दनयः पुनरर्थोपसर्जनः शब्दप्रधानः शब्दतन्त्र इति ॥२४॥

अधुनैषां यथासम्भवं भेदप्रतिपिपादयिषयाऽऽह-

**सूत्रम्-आद्यशब्दौ द्वित्रिभेदौ ॥१-३५॥**

टी०-तत्र आद्यशब्दावित्यादि । तत्र नैगमादिषु पञ्चसु यौ आद्यशब्दौ तौ यथासङ्ख्यं द्वित्रिभेदौ भवतः, आद्यौ च तौ शब्दौ चेति समानाधिकरणसमासाशङ्कायामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०-**आद्य इति सूत्रक्रमप्रामाण्यान्नैगममाह । स द्विभेदो-देशपरिक्षेपी सर्वपरिक्षेपी चेति। शब्दस्त्रिभेदः-साम्प्रतः, समभिरूढः, एवम्भूत इति ॥**

टी०-आद्य इति सूत्रक्रमेत्यादि । आदौ भव आद्यः इत्यनेन सूत्रकारः कमाह? उच्यते-नैगमम्, कुत इति चेत्? सूत्रक्रमप्रामाण्यात् अर्थसूचनात् सूत्रं नैगमादि क्रमः-परिपाटी तस्य प्रामाण्यमेवमाश्रयणं तस्मान्नैगमनयं ब्रवीति, स आद्यो नैगमो द्विभेदो द्वौ भेदावस्येति द्विभेदः, तौ च भेदावाचष्टे-देशपरिक्षेपी सर्वपरिक्षेपी च । देशोविशेषः परमाण्वादिगतस्तं परिक्षेप्तुं शीलमस्येति देशपरिक्षेपी, विशेषग्राहीत्यर्थः । सर्वपरिक्षेपी सर्वं सामान्यम् एकं नित्यं निरवयवादिरूपं तत् परिक्षेप्तुं शीलमस्य स सर्वपरिक्षेपी, सामान्यग्राहीतियावत् । सामान्यविशेषरूपस्तु नोक्तः, अनुवृत्तिलक्षणश्चेत् सामान्यम्, व्यावृत्तिलक्षणश्चेत् विशेषः, ततोऽन्यस्याभावात् । अथवा आद्यन्तयोर्ग्रहणात् तन्मध्यगतस्यापि ग्रहणम् । शब्दस्त्रिभेद इति शब्दनयस्त्रिभेदः त्र्यंश इति, तानाह-साम्प्रत इत्यादिना, साम्प्रतं-वर्तमानं भावाख्यमेव वस्त्वाश्रयति यतोऽतः साम्प्रतः, सम्प्रतिकाले यद् वस्तु भवत् तत् साम्प्रतं तद्वस्त्वाश्रयन् साम्प्रतोऽभिधीयते ॥ ननु च 'कालाट्ठु(ठ्?)ञ्' (पा० ४।३।११) इति साम्प्रतिक इति भवितव्यम्, नैष दोषः, वर्तमानक्षणवर्तिवस्तु-विषयोऽध्यवसायस्तद्भवः शब्दः साम्प्रतः, स्वार्थिको वा प्रज्ञादित्वात् । एष च मौलशब्दनयाभिप्रायाविशिष्ट इति न पृथगुदाहरणैर्विभावितः । यां यां संज्ञामभिधत्ते तां तां समभिरोहतीति समभिरूढः, सोऽभिदधाति-यदि लिङ्गमात्रभिन्नमवस्तु, विसंवादित्वात् रक्तनीलतादिवत्, एवं सति मूलत एव भिन्नशब्दं कथं वस्तु स्यात्? शब्देन ह्यर्थो निरुक्तीक्रियते एतस्मान्निरुक्तादेष इति, यत्र तद्भेदस्तद्भिन्नमेव, यथा तु पूर्वनयेनैकं कृत्वोच्यते इन्द्रशक्रादि तथा यदवस्तु, घटज्वलनादिवद् भिन्ननिमित्तत्वात्, अनयोरेकत्वेनावस्तुता । एवं घटकुटयोरपि चेष्टाकौटिल्यनिमित्तभेदात् पृथक्ता, तथा प्रकृतिप्रत्ययोपात्तनिमित्तभेदात् भिन्नौ शक्रेन्द्रशब्दावेकार्थौ न भवतः, विविक्तनिमित्ता-वबद्धत्वात् गवाश्वशब्दवत् । अथापि प्रतीतत्वादसंप्रमोहाल्लोके चैवं निरूढत्वात् इन्द्रशब्दस्य पुरन्दरादयः पर्याया इत्येतदनुपपन्नम्, एवं हि सामान्यविशेषयोरपि पर्यायशब्दत्वं स्यादेव, यतः प्लक्ष इत्युक्ते द्राक् वृक्षेऽस्ति सम्प्रत्ययः, अस्तित्वासम्प्रमोहे च संज्ञान्तरकल्पनायामिहापि तर्ह्युक्तादनुक्ताप्रतिपत्तौ सत्यां पर्यायत्वप्रसङ्गः प्रविश, पिण्डीं भक्षयेत्यस्य गमात्, तथाऽस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते, वृक्षः प्लक्षोऽस्तीति गम्यते, न्यायादस्ति पर्यायः प्राप्तः, तस्माद् भेदः साधीयान् दन्तिहस्तिनोश्चैकत्वाद् दन्तहस्तैकत्वप्रसङ्ग इति । एवं संज्ञान्तरोक्तेः संज्ञान्तराभिधान-मवस्त्विति प्रतिपादिते एवम्भूतनय आह-निमित्तं क्रियां कृत्वा शब्दाः प्रवर्तन्ते, नहि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदृच्छाशब्दोऽस्ति, अतो घटमान एव घटः, कुटंश्च कुटो भवति, पूर्दारणप्रवृत्त एव पुरन्दरः, यथा दण्डसम्बन्धानुभवनप्रवृत्तदासस्यैव दण्डित्वम्, अन्यथा व्यवहारलोप-प्रसङ्ग । न चासौ तदर्थः, अनिमित्तत्वाद् यथा बहुत्वैकवचनम्, इति समुच्चये परिसमाप्तौ च ॥

**भा०-अत्राह-किमेषां लक्षणमिति ? अत्रोच्यते** -

टी०-अत्राहेत्यादि । अस्मिन्नवसरे नैगमादीनामध्यवसायविशेषाणां लक्षणजिज्ञासया विविक्तचिह्नपरिज्ञानाभिप्रायेणाह-किं लक्षणमेषामिति । अत्रोच्यते-लक्षणम्-

**भा०-निगमेषु येऽभिहिताः शब्दास्तेषामर्थः शब्दार्थपरिज्ञानं च देशसमग्रग्राही नैगमः ॥**

टी०-निगमेष्वित्यादि । न चैतानि सूत्राण्यवृत्तित्वात्, कैश्चित् पुनर्भ्रान्त्या सूत्राणीति प्रतिपन्नम्, तत्र नैगम इत्यस्यावयवप्रविभागेन व्याख्यानं-निश्चयेन गम्यन्ते-उच्चार्यन्ते-प्रयुज्यन्ते येषु शब्दास्ते निगमा-जनपदाः तेषु निगमेषु-जनपदेषु ये इत्यक्षरात्मकानां ध्वनीनां सामान्यनिर्देशः अभिहिता-उच्चारिताः शब्दा-घटादयस्तेषामर्थो-जलधारणाहरणादिसमर्थः, शब्दार्थपरिज्ञानं चेति शब्दस्य घटादिरर्थोऽभिधेयस्तत्परिज्ञानम्-अवबोधः, घट इत्यनेनायमर्थ उच्यते अस्य चार्थस्य अयं वाचक इति, यदेवंविधमध्यवसायान्तरं स नैगमः, स सामान्यविशेषावलम्बीत्येतद् दर्शयति-देशसमग्रग्राहीति । यदा हि स्वरूपतो घटमयं निरूपयति तदा सामान्यघटं सर्वसमानव्यक्त्याश्रितं घट इत्यभिधानप्रत्ययहेतुमाश्रयत्यतः समग्रग्राहीति । तथा विशेषमपि सौवर्णो मृण्मयो राजतः श्वेत इत्यादिकं विशेषं निरूपयत्यतो देशग्राहीति भण्यते नैगमनयः ॥

सम्प्रति संग्रहस्य लक्षणमाह-

भा०-**अर्थानां सर्वैकदेशग्रहणं संग्रहः**-

टी०-अर्थानामित्यादि । अर्थानां-घटादीनां सर्वैकदेशग्रहणमिति सर्वं-सामान्यं एकदेशो-विशेषः तयो सर्वैकदेशयोः-सामान्यविशेषात्मकयोरेकीभावेन ग्रहणम्-आश्रयणमेवंविधोऽध्यवसायः सङ्ग्रहो भण्यते । एकीभावेन ग्रहणमेवं द्रष्टव्यम् यौ हि सामान्यविशेषौ नैगमाभिमतौ तौ सम्पिण्ड्य संग्रहनयः सामान्यमेव केवलं स्थापयति सत्तास्वभावम्, यतः सत्तातो न व्यतिरिच्यते विशेषः ॥

व्यवहारलक्षणाभिधित्सयाऽऽह-

**भा०-लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहारः ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०-लौकिकेत्यादि । लोके-मनुष्यादिस्वभावे विदिताः लौकिकाः-पुरुषास्तै समः-तुल्यः, यथा लौकिका विशेषैरेव घटादिभर्व्यवहरन्ति तथाऽयमपीत्यतस्तत्समः, उपचारप्राय इति । उपचारो नामान्यत्र सिद्धस्यार्थस्यान्यत्राध्यारोपो यः, यथा कुण्डिका स्रवति, पन्था गच्छति, उदके कुण्डिकास्थे स्रवति कुण्डिका स्रवतीत्युच्यते, पुरुषे च गच्छति पन्था गच्छतीति । एवमुपचारप्राय उपचारबहुल इत्यर्थः । विस्तृतो-विस्तीर्णोऽनेकोऽर्थो ज्ञेयो यस्य स विस्तृतार्थः अध्यवसायविशेषो व्यवहार इति निगद्यते ॥

ऋजुसूत्रलक्षणव्याचिख्यासया आह-

**भा०-सतां साम्प्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः ॥**

टी०-सतामित्यादि । सतां-विद्यमानानाम्, न खपुष्पादीनामसताम्, तेषामपि साम्प्रतानां-वर्तमानानामितियावत् अर्थानां-घटादीनाम् अभिधानं-शब्दः परिज्ञानम्-अवबोधो विज्ञानमितियावत्, अभिधानं च परिज्ञानं चाभिधानपरिज्ञानं यत् स भवति ऋजुसूत्रः । एतदुक्तं भवति-तानेव व्यवहारनयाभिमतान् विशेषानाश्रयन् विद्यमानान् वर्तमानक्षणवर्तिनोऽभ्युपगच्छन्नभिधानमपि वर्तमानमेवाभ्युपैति नातीतानागते, तेनानभिधीय-मानत्वात् कस्यचिदर्थस्य, तथा परिज्ञानमपि वर्तमानमेवाश्रयति, नातीतमागामि वा, तत्स्वभावानवधारणात्, अतो वस्त्वभिधानं विज्ञानं चात्मीयं वर्तमानमेवान्विच्छन्नध्यवसायः स ऋजुसूत्र इति ॥

शब्दनयस्य त्रिभेदस्य लक्षणप्रचिकाशयिषया आह-

**भा०-यथार्थाभिधानं शब्दः ॥**

टी०-यथेति । येन कारणेन भावरूपेण-नामस्थापनाद्रव्यवियुतेनार्थो घटादिर्यथार्थः तस्याभिधानं शब्दः यथार्थाभिधानम्, तदाश्रयी योऽध्यवसायः स शब्दनयतयाऽभिधीयते। वर्तमानमात्मीयं विद्यमानं भावघटमेवाश्रयति नेतरानिति ॥

इदानीमस्य शब्दनयस्य यत् पुरस्तात् त्रैविध्यं दर्शितम्, 'शब्दस्त्रिभेदः साम्प्रतः, समभिरूढ एवम्भूत' इति, अस्याद्यभेदलक्षणोद्बिभावयिषया आह-

**भा०-नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रत्ययः साम्प्रतः ॥**

टी०-नामेत्यादि । नामस्थापनाद्रव्यभावेषु नम्यमाने वस्तुनि घटादौ स्थाप्यमाने वाऽऽकारात्मना द्रव्ये च गुणसंद्रावात्मके भावे च प्रतिविशिष्टपर्यायरूपे प्रसिद्धपूर्वात् प्रसिद्धो-निर्ज्ञातः पूर्वमिति-संज्ञासंज्ञिसम्बन्धकाले प्रसिद्धोऽसौ घटादिशब्दोऽभिधानतया तेषां नामादीनामस्य घटादेरर्थस्यायं वाचक इत्येवं प्रसिद्धपूर्वाद् वाच्यवाचकलक्षण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बन्धसङ्केतनाद् योग्यतालक्षणसम्बन्धावगतेर्वा, शब्दादिति, अभिधानात् नाम्न इतियावत्, अर्थे-अभिधेये यः प्रत्ययो-विज्ञानं स साम्प्रतो नयः । एतदुक्तं भवति-नामादिषु प्रतिविशिष्टवर्तमानपर्यायापन्नेष्वेव प्रसिद्धो वाचकतया यः शब्दस्तस्माच्छब्दात् भावाभिधायिनः तद्वाच्येऽर्थे भावरूपे प्रवृत्तोऽध्यवसायः साम्प्रताख्यामासादयति । यतो भाव एव शब्दाभिधेयो भवति, तेनाशेषाभिलषितकार्यकरणादिति ॥

अधुना समभिरूढलक्षणं दर्शयन्नाह-

**भा०-सत्स्वर्थेष्वसंक्रमः समभिरूढः ॥**

टी०-सत्स्वर्थेषु इत्यादि । सत्सु-विद्यमानेषु वर्तमानपर्यायापन्नेष्वित्यर्थः, अर्थेषु घटादिषु असङ्क्रम इत्यन्यत्रागमनं शब्दस्य यत् सोऽसंक्रमः । यथा घट इत्यस्य शब्दस्य विद्यमानं घटं चेष्टात्मकं विरहय्य नान्यत्र कुटाद्यर्थे घटाभिधानसामर्थ्यमस्ति, अनभिधेयत्वात्, यदि चास्य घटशब्दस्य कुटादिरर्थोऽभिधेयो भवेदेवं सति यथोक्ताः सर्वसङ्करत्वादयो दोषा उपजायेरन् नित्यतो न शब्दान्तराभिधेयोऽर्थोऽन्यस्य शब्दस्याभिधेयो भवति, एवमसंक्रमगवेषणपरोऽध्यवसायः समभिरूढः ॥

एवम्भूतनयलक्षणोन्निनीषया आह-

**भा०-व्यञ्जनार्थयोरेवम्भूत इति ॥**

टी०-व्यञ्जनेत्यादि । व्यञ्जनं-शब्दस्तस्यार्थः-अभिधेयो वाच्यम् तयोर्व्यञ्जनार्थयोरेवं संघटनं करोति घट इति यदिदमभिधानं तच्चेष्टाप्रवृत्तस्यैव जलधारणाहरणसमर्थस्य वाचकम्, चेष्टां च जलाद्यानयनरूपां कुर्वाणो घटो मतः, न पुनः क्रियातो निवृत्तः, इत्थं यथार्थतां प्रतिपद्यमानोऽध्यवसाय एवम्भूतोऽभिधीयते इति ॥

**भा०-अत्राह-उद्दिष्टा भवता नैगमादयो नयाः । तत्र नया इति कः पदार्थ इति ? अत्रोच्यते-नयाः प्रापकाः कारकाः साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम् ॥**

टी०-अत्रावकाशे चोदकः प्रश्नयति-उद्दिष्टाः-अभिहिताः लक्षणतस्त्वया-नैगमादयः पञ्च । तत्र नैगमादिसूत्रे, नया इति यदभिधानं तस्यानेककारकसन्निधाने सति कः प्रत्ययार्थो ग्राह्य इति संशयानः पृच्छति-तत्रया इति कः पदार्थः ? तदित्यनेन बहुवचनान्तमभिधानं नया इत्येतन्निर्दिशति, नया इति तु इतिशब्दः नया इत्यस्य पदार्थविपर्यासकृत्, नया इत्यस्य शब्दस्य कः पदार्थः । ननु च कोऽर्थ इयता सिद्धः ? तत्र पदार्थ इति पदग्रहणमतिरिच्यते ? उच्यते-शब्दस्य हि सिद्धोऽर्थो वाच्यो गम्यश्च,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा गुड इत्युक्ते द्रव्यं वाच्यम्, माधुर्यादयस्तु गम्याः, एवमिहापि वाच्योऽर्थो यः कश्चित् कर्त्रादिरूपः शेषस्तु गम्य इति, तत्रेह वाच्यमर्थं पदग्रहणेन प्रश्नयति, पदस्यार्थो वाच्यः क इति, न तु गम्यमानम्, सूरिराह-अत्रोच्यते-नयाः प्रापका इत्यादिना, कर्त्रर्थः प्रदर्श्यते-नयन्त इति नयाः, सामान्यादिरूपेणार्थं प्रकाशयन्तीत्यर्थः । प्रापका इत्यनेन नयतेरन्तर्णीतण्यर्थता ख्यायते, प्रापयन्ति आत्मनि तं तमर्थं स्वाभिमताभिरुपपत्तिभिरिति । कुर्वन्तीत्यादिभिस्तु नयतेरर्थान्तरतापि शक्या कल्पयितुमित्येतद् दर्शयति-कुर्वन्ति तद् तद् विज्ञानमात्मन इति कारकाः, अपूर्वं प्रादुर्भावयन्ति विज्ञानमितियावत् । तथा सिद्धिवचनोपायं साधयन्ति शोभनामन्योन्यव्यावृत्त्यात्मिकां विज्ञप्तिं जनयन्त्यतः साधकाः । तथा वर्तमानार्थोऽपि निर्वर्तका इति निश्चितेन स्वेनाभिप्रायेणोत्पन्नाः तेऽध्यवसायविशेषा-नाशमनासादयन्तो निर्वर्तका इति । तथा दीप्त्यर्थोऽप्ययम् । निर्भासकाः वस्त्वंश-ज्ञापनपरत्वात् । तथोपलब्ध्यर्थताऽप्यस्य उपलम्भका इति दर्शयत्यनेन, प्रतिविशिष्ट-क्षयोपशमापेक्षत्वात् तांस्तानर्थविशेषानत्यन्तसूक्ष्मानवगाहमानाः उपलम्भका इति । व्यञ्जनार्थोप्ययं व्यञ्जका इत्यनेन कथयति, व्यञ्जयन्ति स्पष्टयन्ति-स्फुटीकुर्वन्ति स्वाभिप्रायेण वस्तु, यथाऽऽत्मस्वभावे ख्यापयन्तीत्यर्थः । एवमेते किञ्चिद् भेदं प्रतिपन्ना अपि शब्दा भाष्यकारेणानर्थान्तरमिति व्यपदिष्टा इत्यनर्थान्तरमिति ।

सकर्मकाणां प्राप्येण कर्मणा भवितव्यमिति दर्शयति-

**भा०-जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नयाः ॥**

टी०-जीवादीन् पदार्थान् नयन्तीत्यादि । अत्र च णीञः प्रयोगो नयतेरर्थ इति जीवादीन् शास्त्रप्रतिपाद्यान् सप्त पदार्थानित्यनेन वाच्यान् व्यपदिशति, न गम्यान्, तान् नयन्ति इति नयाः । नयन्तीत्यादिना च यः कर्ता दर्शितस्तमेवानन्यं क्रियातो दर्शयति, यतो नयाः नयन्त इत्यनेन कर्तुः प्राधान्यं क्रियायां गुणभाव इति कैश्चित् प्रतिपन्नं क्रियायाः प्राधान्यं कर्तुर्गुणभाव इति, इह तथा नात्यन्तिकः कर्तृक्रिययोर्भेदोऽस्तीति, यतः स एव पदार्थः कर्तेत्येव व्यपदिश्यते स्वतन्त्रत्वात्, तथा स एव च साध्यात्मना वर्तमानः क्रियेत्याख्यायते, अतः कर्तृक्रिययोरनेनात्यन्तिकं भेदं निरस्यति-नयन्ति इत्यादिना ॥

नयशब्दार्थे निरूपिते चोदकोऽचूचुदत्-

**भा०-अत्राह-किमेते तन्त्रान्तरीया वादिन आहोस्विद् स्वतन्त्रा एव चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता इति ? अत्रोच्यते नैते तन्त्रान्तरीयाः, नापि स्वतन्त्राः मतिभेदेन विप्रधाविताः । ज्ञेयस्य त्वर्थस्याध्यवसायान्तराण्येतानि ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०-य एते नैगमादयो वत्स्वंशपरिच्छेदव्यापृता नयाः । किमेते **तन्त्रान्तरीया** इत्यादि, तन्यन्ते-विस्तार्यन्तेऽस्मिन्ननेन वा जीवादयः पदार्थाः तन्त्रं-जैनप्रवचनम्, तस्मादन्यत् काणभुजादिशास्त्रं तन्त्रान्तरं तस्मिन् भवाः कुशला वा **तन्त्रान्तरीयाः**। गहादित्वाच्छः । स्वशास्त्रसिद्धानर्थानवश्यं वदन्तीति वादिनः, तत् किं वैशेषिकादयो वादिनो नया भण्यन्ते ? **आहोस्वित्** अथवेत्यस्य पक्षान्तरसूचकस्य निपातस्यार्थे प्रयुक्तः । **स्वतन्त्रा एवेति** । स्वम्-आत्मीयं तन्त्रं-शास्त्रं येषां ते स्वतन्त्राः, स्वप्रधानाः जिनवचनमेव स्वबुद्ध्या विभजन्त एवमाहुः । **चोदकपक्षग्राहिण इति** । चोदको दुरुक्तानुक्तादिसूचकस्तस्य पक्षो-विषयः तं चोदकपक्षं ग्रहीतुं शीलमेषामिति चोदकपक्षग्राहिणः **मतिभेदो** बुद्धिभेदस्तेन **विप्रधाविताः**, अयथार्थनिरूपका इतियावत्। एवं चोदयतोऽयमभिप्रायः यद्ययं तन्त्रान्तरीयत्वमेषां दर्शयिष्यति नास्य वक्ष्यमाणो विप्रतिपत्तिदोष आपत्स्यते, अथ स्वतन्त्रा एवेति निश्चेष्यति तथा सति नैव स्वेच्छास्वतन्त्राणामभ्यनुज्ञातो वत्स्वंशोऽभ्युपेयो वस्तुभागश्च प्रोज्झ्यः, यस्मादेकस्यापि पदस्यारोचनान्मिथ्यादर्शनमिति । एवंविधदोषोपचिक्षिप्सया चोदयति ॥ अथ पक्षान्तरमाश्रयिष्यति तत्राप्यस्य सुखेन विप्रतिपत्तिदोषं चोदयिष्यामीति मत्वा प्रश्नयति, सूरिस्तूभयमप्येतत् परित्यजन् पक्षान्तरमाश्रयते अत्रोच्यते इति ॥ **नैते तन्त्रान्तरीयाः**, **नापि स्वतन्त्राः**, किं तर्हि ? तदाह-**ज्ञेयस्ये**त्यादि । विज्ञानगम्यस्य जीवादेः स्वसंवेद्यस्य वाच्य**स्यार्थस्य**-घटपटादेः अध्यवसायान्तराणि विज्ञानभेदाः, आधिक्येनावसीयन्ते-परिच्छिद्यन्ते ततो येन सोऽध्यवसायः प्रत्ययो विज्ञानम् अन्तराणीति भेदाख्यानम्, एतानीति नैगमादीनि पञ्च, एतत् कथितं भवति-वस्त्वेवानेकधर्मात्मकमनेकाकृतिना ज्ञानेन निरूप्यत इत्यतः स्वशास्त्रनिरूपणमेवेदम्, एतच्च दर्शयति-

**भा०-तद्यथा-घट इत्युक्ते योऽसौ चेष्टाभिनिर्वृत्त ऊर्ध्वकुण्डलौष्ठायतवृत्तग्रीवोऽधस्तात् परिमण्डलो जलादीनामाहरणधारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो द्रव्यविशेषस्तस्मिन्नेकस्मिन् विशेषवति तज्जातीयेषु वा सर्वेष्वविशेषात् परिज्ञानं नैगमनयः ॥**

टी०-**तद्यथेत्यादिना** । यथा ह्येते एकवस्तुविषया विज्ञानविशेषास्तथोदाहरणेन भावयति-**घट** इत्युक्ते नैगमाध्यवसाय एवं मन्यते-**योऽसाविति** लोकसिद्धः, **चेष्टाभिनिर्वृत्त** इति धात्वर्थानुगतिमाविष्करोति, कुम्भकारचेष्टाभिनिर्वृत्तोऽर्थो निष्पन्नः। किमाकार इति चेद् ? अत आह-**ऊर्ध्वमि**त्यादि । ऊर्ध्वमुपरि **कुण्डलौ** वृत्तावो**ष्ठौ** यस्य **आयता**-दीर्घा **वृत्ता**-समपरिधिः **ग्रीवा** यस्य ऊर्ध्वकुण्डलौष्ठश्चासावायतवृत्तग्रीवश्चेति समानाधिकरणः, उपरि तावदेवमाकारः । अथ **अधस्तात्** किमाकार इत्यत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह-अधोभागे **परिमण्डलः**, समन्ताद् वृत्त इत्यर्थः । कस्य पुनः कार्यस्यासौ क्षम इत्याह-**जलादीनामित्यादि** । जलघृतक्षीरादीना**माहरणे** देशाद् देशान्तरसञ्चारणे **समर्थः**-शक्तः आनीतानां च धारणे प्रत्यलः । **उत्तरे**त्यादि । पाकजरक्तादिगुणपरिसमाप्त्या निष्पन्नद्रव्यविशेष इति । न द्रव्यं सामान्यमात्रम्, किं तर्हि ? **द्रव्यविशेषः**, परमार्थे सति, वाचा न संवृत्तिसतीति, **तस्मिन्** एवमात्मके **एकस्मिन् विशेषाः** शुक्लपीतादयः कनकरजतादयः खण्डहुण्डादयो वा तद्वति **तज्जातीयाः**- तत्प्रकाराः व्यावर्णितघटप्रकाराः तेषु च **सर्वेषु**-लोकप्रसिद्धेषु **अविशेषात्** अभेदेन **परिज्ञानं**-निश्चितावबोधः **नैगमः** देशसमग्रग्राही नैगम इति, पूर्वाभिहितलक्षणप्रपञ्चोऽयं सामान्यविशेषवैचित्र्यप्रदर्शनार्थः॥

अथ संग्रहः कथं घटमिच्छतीत्याह-

**भा०-एकस्मिन् वा बहुषु वा नामादिविशेषितेषु साम्प्रतातीतानागतेषु घटेषु सम्प्रत्ययः संग्रहः ॥**

टी०-एकस्मिन्नित्यादि । एकस्मिन् घटे बहुषु घटेषु वा नामादिविशेषितेष्विति नामस्थापनाद्रव्यभावघटेष्वित्यर्थः । साम्प्रतेषु-वर्तमानेष्वतीतेषु-अतिक्रान्तेष्वनागतेषु-आगामिषु घटेषु यः सम्प्रत्ययः-सामान्यं घटो घट इति परिज्ञानं स संग्रहः, यस्मात् सामान्यमेव घटादिरूपेण निर्भासते, न सामान्यादन्ये विशेषाः सन्ति ॥

व्यवहाराभिप्रायप्रकटनायाह-

**भा०-तेष्वेव लौकिकपरीक्षकग्राह्येषूपचारगम्येषु यथास्थूलार्थेषु सम्प्रत्ययो व्यवहारः ॥**

टी०-तेष्वित्यादि । एकद्विबहुत्वनामादिरूपेषु लोके विदिता लौकिकाः परीक्षकत्वेन ज्ञाताः लौकिकपरीक्षकाः-पर्यालोचकाः तेषां ग्राह्याः-आदेयाः जलाद्याहरणार्थं ये घटास्तेषु, उपचारगम्येष्विति लोकक्रियाधारेषु, यथास्थूलार्थेष्विति सूक्ष्मसामान्योपसर्जनेषु, यतोऽस्य विशेषैरेव व्यवहारो भूयसा, न सामान्येनेति ॥

ऋजुसूत्रनयमतं विवृणोति-

**भा०-तेष्वेव सत्सु साम्प्रतेषु सम्प्रत्ययः ऋजुसूत्रः ॥**

टी०-तेष्वेवेत्यादि । घटेषु सत्सु-विद्यमानेषु वर्तमानसमयावधिकेषु सम्प्रत्ययः ऋजुसूत्र इति ॥

अधुना सांप्रताभिप्रायं निरूपयति -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भा०-तेष्वेव साम्प्रतेषु नामादीनामन्यतमग्राहिषु प्रसिद्धपूर्वकेषु घटेषु सम्प्रत्ययः साम्प्रतः शब्दः ॥**

टी०-तेष्वेवेत्यादि । ऋजुसूत्राभिप्रेतेषु वर्तमानकालावधिकेषु नामस्थापना-द्रव्यभावघटानां ये वाचकाः शब्दास्ते चान्यतमग्राहिणः, यस्माद् यस्य शब्दस्य नम्यमानः पदार्थो वाच्यो न तस्य स्थापना यस्य वा स्थापना न तस्य द्रव्यम्, यस्य द्रव्यं न तस्य भावः इत्यतो नामादीनां घटानां ये शब्दाः अन्यतमं-नामस्थापनादिकं गृह्णन्ति तेऽन्यतमग्राहिणस्तेषु शब्देषु उच्चारितेष्वन्यतमग्राहिषु यद् विज्ञानं स साम्प्रतः, ते शब्दा यदि प्रसिद्धाः पूर्वं भवन्ति निर्ज्ञाताभिधेयसम्बन्धाः अस्येदं वाच्यमित्यनेन रूपेण, तथा गमका इत्येतदाह-प्रसिद्धपूर्वकेषु, प्रसिद्धः पूर्वो येषां प्रथमं सङ्केतस्ते प्रसिद्धपूर्वकास्तेषु नामादीनामन्यतमवाचकेषु सम्प्रत्यय इति ॥

समभिरूढमतोद्विभावयिषया आह-

**भा०-तेषामेव साम्प्रतानामध्यवसायासङ्क्रमो वितर्कध्यानवत् समभिरूढः ॥**

टी०-तेषामेव घटानां सतां-विद्यमानानां वर्तमानकालावधिकानां सम्बन्धी योऽध्यवसायासङ्क्रमः स समभिरूढः, अध्यवसायो-विज्ञानं तस्य विज्ञानस्योत्पादकत्वा-भिधानमप्यध्यवसायस्तस्यासङ्क्रमः-अन्यत्र वाच्येष्वप्रवृत्तिः, नहि घट इत्यस्याभिधानस्य कुटो वाच्यः, कुट इत्यस्य वा घट इति । अध्यवसायासङ्क्रमं च दृष्टान्तेन भावयति-वितर्कध्यानवदिति । अन्यतमैकयोगानामेकत्वं वितर्कमिति वक्ष्यति नवमेऽध्याये (सू० ४१), वितर्कः श्रुतम्, वितर्कप्रधानं ध्यानं वितर्कध्यानं तद्वत् ॥ नन्वाद्येऽपि शुक्लभेदे वितर्कप्रधानता समस्ति ? नैवम्, तत्र सङ्क्रमाभ्युपगमात् 'अविचारं द्वितीयम्' (अ० ९, सू० ४४) इति वचनात् एकत्ववितर्कपरिग्रह इति ॥

एवम्भूताभिप्रायमाविष्करोति-

**भा०-तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमेवम्भूत इति ॥**

टी०-तेषामेवेत्यादि । तेषामेवानन्तरनयपरिगृहीतघटानां यौ व्यञ्जनार्थौ तयोरन्योन्या-पेक्षार्थग्राही योऽध्यवसायः स एवम्भूतः परमार्थः व्यञ्जनं वाचकः शब्दः, अर्थोऽभिधेयो वाच्यः । अथ का पुनरन्योन्यापेक्षा ?, यदि यथा व्यञ्जनं तथार्थो यथा चार्थस्तथा व्यञ्जनम्, एवं हि सति वाच्यवाचकसम्बन्धो घटते अन्यथा न, योग्यक्रियाविशिष्टमेव वस्तुस्वरूपं प्रतिपद्यत इति ॥

एवं भाविते नयानामभिप्राये चोदकः स्वाभिप्रायमभिव्यनक्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भा०-अत्राह-एवमिदानीमेकस्मिन्नर्थेऽध्यवसायनानात्वात् ननु विप्रतिपत्ति-प्रसङ्ग इति । अत्रोच्यते -**

टी०-एवमिदानीमेकस्मिन्नित्यादिना भाष्येण । एवमिति यथा प्रतिपादितैरेकवस्तुनि परस्परविलक्षणैर्भेदैः, इदानीमित्येतत् पूर्वाभिहितनयवादकालापेक्षया प्रयुज्यते, एवमवस्थिते नयप्रस्थानेऽधुना इदमापनीपद्यते-एकस्मिन्नर्थे घटवस्तुनि, बहुष्वर्थेषु न दोषाशङ्काऽस्ति, प्रतिवस्तु नयप्रवृत्तेः, एकस्मिन् पुनरध्यवसायनानात्वाद् विज्ञानभेदात्, ननुशब्दो मीमांसायाम्, मीमांसनीयमेतदेवम्, विप्रतिपत्तिप्रसङ्ग इति, विरुद्धत्वप्रतीतिर्विप्रतिपत्तिस्तस्याः प्रसङ्गोऽनिष्टमितियावत्, न ह्येकमेव वस्तु सामान्यं सत् पुनर्विशेषो भवति, त्रिकालिकः वर्तमानक्षणावधिको वा, नामादित्रयनिरासाद् वा भावमात्रं पर्यायशब्दानभिधेयो वा विशिष्टक्रियाविष्टो वा वस्तुविशेष इति, विरुद्धाः प्रतीतयः सकलाः प्रतीयन्त इति, न च विरुद्धप्रतीतिकः पदार्थो निश्चेतुं शक्यते, न चानिश्चयात्मकं तत्त्व-ज्ञानमित्या-कुमारसिद्धिः। शास्त्रकारस्तु येनाभिप्रायेण ज्ञेयस्यार्थस्याध्यवसायान्तराण्येतानीत्युक्तवान् तं प्रचिकटयिषुराह- अत्रोच्यते विप्रतिपत्तिपरिहारः-

**भा०-यथा सर्वमेकं सदविशेषात् । सर्वं द्वित्वं जीवाजीवात्मकत्वात्। सर्वं त्रित्वं द्रव्यगुणपर्यायावरोधात् । सर्वं चतुष्टयं चतुर्दर्शनविषयावरोधात्। सर्वं पञ्चत्वं पञ्चास्तिकायात्मकत्वात् । सर्वं षट्कं षड्द्रव्यावरोधादिति। यथैता न विप्रतिपत्तयोऽथ चाध्यवसायस्थानान्तराण्येतानि, तद्वन्नयवादा इति ॥**

टी०-यथेत्यादि । सकलं जगदनेकावयवात्मकमपि सत्तामात्रव्याप्तेर-विशेषादेकमुच्यते । एकं च सद् द्विधा, जीवाजीवमात्रविवक्षावशात्, । कथं पुनरेक-सङ्ख्याव्यवच्छिन्नं सद् द्वित्वसङ्ख्याया गोचरीभवति ?, न च काल्पनिकमेतत्, अंशसद्भावात्, तस्मान्नास्ति विरोधः, एवं नयेष्वप्यविरोधप्रतिपत्तिः साधीयसीति । तथा तदेवैकं त्रिधा, द्रव्यगुणपर्यायेषु सर्वस्यावरुद्धत्वाद्, गुणपर्यायाणामन्वयि द्रव्यम्, गुणा-रूपादयः, पर्यायाः-कपालादयः, सहभूत्वं क्रमभूत्वं चादाय भेदेनोपादानमिति । तथा तदैवैकं चतुर्धा, चक्षुर्दर्शनादिभिश्चतुर्भिः सर्वस्य विषयीकृतत्वात् तन्मात्रता । तथा तदेव पञ्चस्वभावं निरूप्यते, पञ्चास्तिकायात्मकत्वात्, एतदाह-सर्वं पञ्चत्वमस्तिकायावरोधात्, पञ्चस्वभावं सर्वमिदं जगत्, पञ्चभिरस्तिकायैरवरुद्धत्वात्, धर्माधर्माकाशजीवपुद्गलास्तिका-यात्मकं यतः । तथा तदेव पञ्चस्वभावं षट्स्वभावम्, षट्द्रव्यसमन्वितत्वात्, तदाह-सर्वं षट्कं षड्द्रव्यावरोधात्, सर्वं षट्स्वभावम् जगत्, कुतः ? षड्द्रव्यावरोधादिति । षड् द्रव्याणि कथम् ? उच्यते-पञ्च धर्मादीनि कालश्चेत्येक इति । यथा-येन प्रकारेण एताः एकद्वित्रिचतुःपञ्चषडात्मिका अवस्थाः एकत्र जगत्युपादीयमाना न विरुद्धाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्तयो भवन्ति, अथ च ज्ञेयस्य जगतः अध्यवसायान्तराणि परिच्छेदकारिविज्ञानान्येकादिरूपेण, तद्वत् तेन प्रकारेण नयानां वादा-जल्पा अध्यवसायकृता न विरुध्यन्ते । एतत् कथयति-यो हि नाम यत्र वस्तुनि धर्मो न विद्यते स तत्र स्वेच्छयोपादीयमानस्तत्स्थेनापरेण धर्मेण विरोधं प्रतिपद्यते, यथाऽऽत्मनि अज्ञानिता उपादीयमाना ज्ञानरूपेणात्मस्थेन धर्मेण विरुद्धा सती त्यज्यते, नैवं नयेषु, यथा वा व्योम्नि मूर्तता तत्स्थेनापरेणामूर्तेन धर्मेण विरुद्धा सती विप्रतिपत्तिरुच्यते, नैवं नयेषु, यतो वस्तु सामान्यविशेषधर्मसमन्वितं कश्चित् केनचिदाकारेण परिच्छिनत्ति । यदि ह्यसन्नेवासौ धर्मस्तेन नयेन तत्र वस्तुन्यध्यारोप्येत स्याद् विप्रतिपत्तिप्रसङ्ग इति, न तु तथा ।

**भा०-किंचान्यत् । यथा मतिज्ञानादिभिः पञ्चभिर्ज्ञानैर्धर्मादीनामस्तिकायानामन्यतमोऽर्थः पृथक् पृथगुपलभ्यते, पर्यायविशुद्धिविशेषादुत्कर्षेण, न च तानि विप्रतिपत्तयो भवन्ति, तद्वन्नयवादाः ॥**

टी०-किञ्चान्यदित्यनेनोपपत्त्यन्तरमप्यस्ति विप्रतिपत्तिदोषस्य परिहारार्थमिति दर्शयति-यथा मतिश्रुतावधिमनःपर्यायकेवलज्ञानैः पञ्चभिर्धर्माधर्माकाश-जीवपुद्गलानामस्तिकायानामिति, अस्तीति-त्रैकालिकसत्तासंसूचको निपातः, अभूवन् भवन्ति भविष्यन्ति च यतोऽतः सूच्यन्तेऽस्तीत्यनेन, काय इत्यनेन प्रदेशावयवबहुत्वमाचष्टे, वक्ष्यति पञ्चमे असङ्ख्येयाः प्रदेशाः (अ० ५, सू०७) इत्यादि, अतोऽस्ति च ते कायाश्चेति, तेषामन्यतमः अर्थ इति धर्मादिः, पृथक् पृथगुपलभ्यत इति, अन्यथा चान्यथा च परिच्छिद्यत इत्यर्थः ॥ ननु चैकस्वभावस्य धर्मादेरस्तिकायस्य मत्यादिज्ञानैरयुक्तोऽन्यथात्वेन परिच्छेद इत्येवं चोदिते आह-पर्यायविशुद्धीत्यादि । पर्याया-भेदाः-विज्ञानस्वभावा मत्यादिरूपाः तेषां विशुद्धिः-स्वच्छता स्वावरणापगमजनिता तस्याः पर्यायविशुद्धेर्विशेषो- भेदस्तस्मात् पर्यायविशुद्धिविशेषाद् उत्कर्षेण-प्रकर्षेण तैर्मत्यादिभिस्तेषामस्तिकायानां पृथक् पृथगुपलब्धिर्भवति, तद्यथा मतिज्ञानी मनुष्यपर्यायं वर्तमानं चक्षुरादिनेन्द्रियेण साक्षात् परिच्छिनत्ति, तमेव च श्रुतज्ञानी आगमानुमानस्वभावेन, तमेवावधिज्ञानी अतीन्द्रियेण ज्ञानेन, तमेव मनःपर्यायज्ञानी तस्य मनुष्यपर्यायस्य यः प्रश्ने प्रवर्तते तद्गतानि मनोद्रव्याणि दृष्ट्वा अनुमानेनैव तं मनुष्यपर्यायमवच्छिनत्ति, केवलज्ञानी पुनरत्यन्तविशुद्धेन केवलेनावबुध्यते । न चैता मत्यादिका विप्रतिपत्तयःविरुद्धाः प्रतिपत्तयः, स्वसामर्थ्येन विषयपरिच्छेदात्, तद्वन्नयवादा इति किं नाश्रीयते? अथवा पर्यायविशुद्धिविशेषादुत्कर्षेणेत्यन्यथा वर्ण्यते, पर्यायाणां-क्रमभुवां मनुष्यादीनां जीवास्तिकायादिसम्बन्धिनां मत्यादिभिर्ज्ञानैः पृथक् पृथगुपलब्धिर्भवति, कथं ? प्रकर्षेण, कस्मादिति चेत् ? उच्यते-विशुद्धिविशेषात् ज्ञानादीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्यादीनाम्, यतो मतिज्ञानी मनुष्यादेर्जीवस्य काँश्चिदेव पर्यायान् परिच्छिनत्ति ततो बहुतरांश्च श्रुतज्ञानी जानीते, यतोऽभिहितं-"संखातीतेऽवि भवे" (आव० नि०) इत्यादि। श्रुतज्ञानिनोऽपि सकाशाद् बहुतरानवधिज्ञानी पर्यवस्यति, विशुद्धिप्रकर्षात्, ततो मनःपर्यायज्ञानी, ततश्च सर्वात्मना केवलीति। न चैवमनेकधा परिच्छेदप्रवृत्ता मत्यादिका ज्ञानशक्तयो विप्रतिपत्तिव्यपदेशमश्नुवते, तद्वन्नयवादा इति किं नाभ्युपेयते ? ॥

उपपत्त्यन्तरमाह-

**भा०-यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः प्रमाणैरेकोऽर्थः प्रमीयते, स्वविषयनियमात्, न च ता विप्रतिपत्तयो भवन्ति, तद्वन्नयवादा इति ॥**

टी०-यथा वेत्यादिना। यथा वा गिरिगुहावस्थितोऽग्निरेकोऽनेकेन प्रत्यक्षादिना परिच्छिद्यते प्रमाणेन, सन्निकृष्टवर्तिना प्रत्यक्षेण, विप्रकृष्टवर्तिना लिङ्गज्ञानेन, अपरेणोपमया कनकपुञ्जपिञ्जरप्रकाशोऽग्निरिति, अन्यः आप्तोपदेशादध्यवस्यत्यत्र वनगहनेऽग्निरिति, अत एवं प्रत्यक्षादिभिः प्रमाणैरेकोऽर्थः प्रमीयते, कुतः ? स्वविषयनियमात्, स्वः-आत्मीयो विषयो-ज्ञेयः स्वश्चासौ विषयश्च स्वविषयः तस्मिन्नियमात्-नियतत्वात्, यतः प्रत्यक्षादीनि स्वविषयमेव परिच्छिन्दन्ति, न च ताः-प्रत्यक्षादिका ज्ञानशक्तयः विरुद्धाः-अयथात्मिकाः प्रतिपत्तय इति च युज्यतेऽभिधातुम्, तद्वन्नयैरपि स्वविषयनियमान्नास्ति विप्रतिपत्तिप्रसङ्ग इति ॥

सम्प्रति प्रक्रान्तनयलक्षणमुदाहरणं चादर्शितं संक्षिप्तरुचीनामनुग्रहार्थमार्याभिर्वक्तुकाम एवं प्रक्रमते-

**भा०-आह च-**

**नैगमशब्दार्थानामेकानेकार्थनयगमापेक्षः ।**
**देशसमग्रग्राही, व्यवहारी नैगमो ज्ञेयः ॥१॥** - **आर्या**

टी०-आह चेत्यादि। आह चेत्यात्मानमेव पर्यायान्तरवर्तिनम्, निर्दिशति, निगमो जनपदस्तत्र भवाः नैगमाः-शब्दास्तेषाम् अर्थाः-अभिधेयाः अतस्तेषां नैगमशब्दार्थानामेको विशेषः अनेकं-सामान्यम् अनेकव्यक्त्याश्रितत्वात् तावेव चार्थौ एकानेकार्थौ तयोरेकानेकार्थयोर्नयः-प्रकटनं प्रकाशनम् एकानेकार्थनयः स एव गमः-प्रकारः एकानेकार्थनयगमस्तमपेक्षते-अभ्युपैति यः स एकानेकार्थनयगमापेक्षः, पूर्ववाचोयुक्त्या पुनरमुमेवार्थमनुस्मरयन्नाह-देशेत्यादि। देशो-विशेषः समग्रं-सामान्यं तयोर्ग्राही-आश्रयिता, व्यवहारोऽस्य सामान्यविशेषाभ्यां परस्परविमुखाभ्याम् अस्तीति व्यवहारी, नैगमो ज्ञातव्यः ॥१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ग्रहस्य स्मरणकारिकामाह-

**भा०-यत् सङ्गृहीतवचनम्, सामान्ये देशतोऽथ च विशेषे ।**

**तत् सङ्ग्रहनयनियतम्, ज्ञानं विद्यान्नयविधिज्ञः ॥२॥**

टी०-यत् सङ्गृहीतेत्यादि । यदिति ज्ञानं सम्बध्यते, कीदृशं तदिति ? तत् सङ्गृहीतवचनं सङ्गृहीतं-सामान्यं वचनम् उच्यते तदिति वचनम्, ज्ञेयमित्यर्थः । सङ्गृहीतं वचनं यस्मिन् ज्ञाने, सामान्यं ज्ञेयं यस्य ज्ञानस्येत्यर्थः, तज्ज्ञानं सङ्गृहीत-वचनम्, तत् पुनरेवं ज्ञानं प्रवर्तते-सामान्ये-सत्तायां देश इति सामान्यविशेषे गोत्वादिके, अथ चेति अथवा विशेषे खण्डमुण्डादिके । एतेषु सर्वेषु सम्पिण्डनारूपेण प्रवर्तते यतः सामान्यं विशेषो वा, न सत्तामन्तरेण कश्चिदस्तीत्येवं सम्पिण्ड्य यत् सत्तायां प्रक्षिपत् प्रवर्तते ज्ञानं तत् सङ्ग्रहनयनियतं तज्ज्ञानं सङ्ग्रहस्य नयस्य निश्चितमेवंस्वरूपं विद्यात्-जानीयात् नयविधिज्ञ इति नयभेदज्ञः ॥२॥

व्यवहाराभिप्रायानुस्मरणायाह-

**भा०-समुदायव्यक्त्याकृति-सत्तासंज्ञादिनिश्चयापेक्षम् ।**

**लोकोपचारनियतम्, व्यवहारं विस्तृतं विद्यात् ॥३॥**

टी०-समुदायेत्यादि । समुदायः-सङ्घातः व्यक्तिः-मनुष्य इति आकृतिः-संस्थानमवयवानां सत्ता-महासामान्यं संज्ञादयो-नामस्थापनाद्रव्यभावाः एषां समुदायादीनां निश्चयो विशेषस्तमपेक्षते-अभ्युपैति यः स-समुदायव्यक्त्याकृतिसत्तासंज्ञादिनिश्चयापेक्षः । कथं निश्चयमेवापेक्षते न समुदायादीनीति ? उच्यते-नहि समुदायस्त्रैलोक्यादिरूपः समुदायिनोऽन्तरेण कश्चिदप्यस्ति, न च व्यक्तिः सामान्यविशेषरूपा मनुष्य इत्यादिका मनुष्यानन्तरेणास्ति, न चाकार आकारवन्तमन्तरेणास्ति, न वा सत्ता सत्तावन्तमन्तरेणास्ति, न वा नामादयो नम्यमानादीनन्तरेण केचन सम्भवन्ति, अनुपलभ्यमानत्वाद् व्यवहारा-करणादित्यर्थः विशेषस्तु स्वप्रत्यक्ष इति, तस्मात् स एव सत्य इत्येवं समुदायादिनिश्चया-पेक्षस्तं विद्यादिति सम्बन्धः । लोकोपचारनियतमिति । लोके उपचारः गिरिर्दह्यत इत्यादिकः, तस्मिन् लोकोपचारे नियतं-निष्पन्नं व्यवहारनयं विस्तृतमिति उपचरितानु-पचरितार्थाश्रयणाद् विस्तीर्णमित्यर्थः, विद्याद्-अवबुध्येत ॥३॥

ऋजुसूत्रस्वभावमाह-

**भा०-साम्प्रतविषयग्राहकमृजुसूत्रनयं समासतो विद्याद् ।**

**विद्याद् यथार्थशब्दम्, विशेषितपदं तु शब्दनयम् ॥४॥ इति ॥**

टी०-साम्प्रतेत्यादि, साम्प्रतो-वर्तमानः विषयो-ज्ञेयस्तस्य ग्राहकम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्तमानार्थाश्रयमित्यर्थः । समासत इति संक्षेपतः, यतो वर्तमानमात्मीयं नामादिक-मित्यादिविशेषणोपेतम्, सङ्ग्च्छत्ययम् । उत्तरार्धेन शब्दस्वरूपमाह-विद्याद् यथार्थशब्द-मिति । अनेन तु एवम्भूत इव प्रकाशितो लक्ष्यते, सर्वविशुद्धत्वात् तस्येति, यतः स एवमभ्युपैति यदाऽर्थश्चेष्टाप्रवृत्तस्तदा तत्र घट इत्यभिधानं प्रवर्त्यम्, नान्यदिति । साम्प्रतसमभिरूढौ कस्मान्नाम्रेडिताविति चेत्? उच्यते-तावपि स्मारितावेव, यत आह-विशेषितपदं तु शब्दनयमिति, विशेषितपदमिति विशेषितज्ञानम्, यतः साम्प्रतसमभिरूढयोरन्यादृशं ज्ञानम्, नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रतीतिः साम्प्रतः शब्दान्तरवाच्यश्चार्थः शब्दान्तरस्य नाभिधेयीभवतीत्येवं समभिरूढविज्ञानमिति, इतिः-नयानुस्मरणपरिनिष्ठासूचकः ॥

**भा०-अत्राह-अथ जीवो नोजीवः अजीवः नोअजीवः इत्याकारिते केन नयेन कोऽर्थः प्रतीयते ? इति ।**

टी०-अत्राह परः-घटाद्यजीवपदार्थोद्देशेन नैगमादयो नया विभाविताः, सम्प्रति जीवपदार्थे विभावयन्नाह-अथ जीवो नोजीव इत्यादि । अथवा घटोदाहरणे विधिरेव केवलः प्रदर्शितः, अधुना विधिप्रतिषेधौ जीवे निरूपयति-अथेति प्रस्तुतानन्तर्यं द्योतयति, शुद्धपदे केवले आकारिते-उद्दिष्टे उच्चरिते वा जीव इति, नोजीवः अजीव इति देशसर्वप्रतिषेधयुक्तयोर्वा जीवशब्दयोरुच्चरितयोः, नोअजीव इति प्रतिषेधद्वय-समन्विते-जीवशब्दे उच्चरिते, केन नैगमादिना कोऽर्थः प्रतीयते ? सूरिराह-

**भा०-अत्रोच्यते-जीव इत्याकारिते नैगमदेशसङ्ग्रहव्यवहारर्जुसूत्र-साम्प्रतसमभिरूढैः पञ्चस्वपि गतिष्वन्यतमो जीव इति प्रतीयते । कस्मात् ? एते हि नया जीवं प्रत्यौपशमिकादियुक्तभावग्राहिणः । नोजीव इत्यजीवद्रव्यम्, जीवस्य वा देशप्रदेशौ । अजीव इत्यजीवद्रव्यमेव । नोअजीव इति जीव एव, तस्य वा देशप्रदेशाविति ॥**

टी०-शुद्धपदे जीव इत्याकारिते नैगमं समग्रग्राहिणं विहाय एवम्भूतं च शेषैर्देशनैगमादिभिः सर्वासु गतिषु वर्तमानोऽभ्युपगम्यते, तदाह-नैगमदेशेत्यादि । नैगमेन देशग्राहिणा, तथा व्यवहारेण-विशेषग्राहिणा, ऋजुसूत्रेण-वर्तमानवस्तुग्राहिणा, साम्प्रतेन-वर्तमानभावग्राहिणा, समभिरूढेन च-प्रतिशब्दं भिन्नार्थग्राहिणा, पञ्चस्वपीति नरकतिर्यङ्-मनुष्यदेवसिद्धिगतिषु, अन्यतम इति नरकादिगतिवर्ती जीवः प्राणी प्रतीयते, नाभावो नापि च भावान्तरम् । कस्मादिति चोदयति परः-किमत्रोपपत्तिरस्त्युत स्वेच्छया नैगमादयोऽभ्युपगच्छन्त्येवमिति ? सूरिराह-अस्त्युपपत्तिः, तां च कथयति-एते हि नया इत्यादिना । एते नैगमादयो नया यस्मात् जीवं प्रति-जीवमङ्गीकृत्य, कीदृशं जीवमिच्छन्ति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औपशमिकादिभिर्यो युक्तः स जीवः, औपशमिकक्षायिकक्षायोपशमिकौदयिक-पारिणामिकैर्युक्तः औपशमिकादियुक्तः, भाव इत्यर्थः औपशमिकादियुक्तो योऽर्थः तं ग्रहीतुं शीलं येषां ते तद्ग्राहिणः । सर्वासु च नारकादिगतिषु अवश्यमौपशमिकादीनां भावानां यः कश्चित् सम्भवति भावः, सिद्धिगतौ च यद्यप्यौपशमिकक्षायोपशमिकौदयिकाः न सन्ति, तथापि क्षायिकपारिणामिकौ सम्भवतः इत्यसावपि जीवः । नोजीव इत्युच्चरिते किं प्रतीयते तैर्नयैः ? उच्यते-यदा नोशब्दः सर्वप्रतिषेधे वर्तते तदा 'नञ्युक्तमवियुक्तं च' इत्यनया कल्पनया वस्त्वन्तरमेव प्रतीयते, नाभावः, तच्चाजीवद्रव्यं पुद्गलादिकमित्यर्थः । यदा तु नोशब्दो देशप्रतिषेधकस्तदा देशस्यानिषिद्धत्वाज्जीवस्य देशश्चतुर्भागादिकः प्रदेशो वाऽत्यन्ताविभजनीय उच्यते नोजीव इत्यनेन, एतदाह-जीवस्य वा देशप्रदेशाविति । अजीव इति तूच्चरिते सर्वप्रतिषेधकत्वादकारस्य पर्युदासस्य वाऽऽश्रितत्वाज्जीवादन्यः अजीव इति अजीवद्रव्यमेव प्रतीयते पुद्गलादिकम्। नोअजीव इति पुनरभिहिते द्वयोरपि नोकाराकारयोः सर्वप्रतिषेधे यदा वृत्तिः आश्रिता तदा 'द्वौ प्रतिषेधौ प्रकृतं गमयतः' इति जीव इति प्रतीयते, यदा पुनरकारः सर्वनिषेधको नोशब्दश्च देशनिषेधको नोअजीव इत्याश्रीयते तदा नोनञोरपि कृतार्थतैवं स्याद् यदि तस्य जीवस्य देशप्रदेशौ गम्येते इत्यतो जीवस्य देशप्रदेशावत्र गम्येते, तदाह-तस्य वा देशप्रदेशाविति । एवं तावन्नैगमादयश्चतुर्षु जीव इत्यादिषु विकल्पेषु प्रवृत्ताः, एवम्भूतस्तु नैवं प्रतिपद्यते, कथं तर्हीति चेदुच्यते-

**भा०-एवम्भूतनयेन तु जीव इत्याकारिते भवस्थो जीवः प्रतीयते। कस्मात्? एष हि नयो जीवं प्रत्यौदयिकभावग्राहक एव । जीवतीति जीवः, प्राणिति प्राणान् धारयतीत्यर्थः । तच्च जीवनं सिद्धे न विद्यते, तस्माद् भवस्थ एव जीव इति । नोजीव इत्यजीवद्रव्यं सिद्धो वा । अजीव इत्यजीवद्रव्यमेव । नोअजीव इति भवस्थ एव जीव इति ।**

टी०-एवम्भूतेत्यादि । एवम्भूतनयेन जीव इत्युच्चरिते भवस्थो जीवः प्रतीयते, भवः-संसारश्चतुर्विधस्तस्मिन् स्थितो भवस्थः-संसारिजीवः प्रतीयते । कस्मात् सिद्धिस्थं त्यजतीति चेत् ? उच्यते-एष हीत्यादि, एष यस्मादेवम्भूतनयो जीवं प्रत्येवं प्रवर्तते य एव औदयिकेन गतिकषायादिस्वभावेनावस्थाविशेषेण युक्तस्तस्यैव ग्राहकः-तमेवौदयिकभावयुक्तं जीवमिच्छति, यतः शब्दार्थ एवमवस्थितो 'जीव प्राणधारणे' जीवतीति जीवः । किमुक्तं भवति ? प्राणितीति, 'अन प्राणने' इति वाऽस्यार्थे, जीव इत्यस्य च धातोः सकर्तृकत्वं कथयति प्राणान् धारयतीति । प्राणाः-इन्द्रियाणि, मनोवाक्कायास्त्रयः, प्राणापानौ एकः आयुश्च तान् धारयति न मुञ्चति यावत् तावदसौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीव इति मन्तव्यः, एतत् स्याद् इन्द्रियादयः प्राणाः सिद्धेऽपि सन्ति, तन्न, सिद्धे हि सर्वकर्मापगमान्न सन्तीन्द्रियादयः प्राणा इत्येतदाह-तच्च जीवनमित्यादि । तदिति शब्दार्थतया जीव इत्यस्य जीवनं-प्राणधारणं सिद्धे-मोक्षप्राप्ते नास्ति, तस्माद् भवस्थ एव संसार्येव जीवः, न सिद्ध इति । तथा नोजीव इत्युच्चरिते नोशब्दः सर्वप्रतिषेधक एव, देशस्याभावात्, देश्येव देशो न वस्त्वन्तरम्, न च देशिनो देशो भिन्न इत्यभिधातुं युक्तम्, यदि हि भिन्नः स्यात् नासौ तस्य, भिन्नत्वाद् वस्त्वन्तरवत्, अथाभिन्नः देश्येव तर्ह्यस्ति न कश्चिद् देशो नामेत्यतः सर्वप्रतिषेधको नोशब्दोऽतः नोजीव इत्युक्ते जीवादन्यद् वस्तु सम्पूर्णं परमाणुप्रभृति प्रतीयते, तदाह-नोजीव इति अजीवद्रव्यमेव सिद्धो वा, प्राणधारणस्याभावात्, सोऽपि निर्जीव एवेति, अतः सिद्धो वा गम्यते । अजीव इति तूच्चरिते अजीवद्रव्यमेव परमाण्वादिकम्, सर्वप्रतिषेधकत्वादकारस्य प्रतीयते । नोअजीव इत्युक्ते 'प्रतिषेधौ द्वौ प्रकृतं गमयतः' इति भवस्थः-संसार्येव जीवो गम्यते ॥ अथ कस्मान्नोजीव इत्यस्मिन् विकल्पे नोअजीव इत्यस्मिन् वा देशप्रदेशौ न गम्येते ? उच्यते-देशप्रदेशयोरनभ्युपगमादनेन नयेनेति, एतदाह-

**भा०-समग्रार्थग्राहित्वाच्चास्य नयस्य नानेन देशप्रदेशौ गृह्येते । एवं जीवौ जीवा इति द्वित्वबहुत्वाकारितेष्वपि, सर्वसङ्ग्रहणे तु जीवो, नोजीवः । अजीवो नोअजीवो जीवौ नोजीवा अजीवौ नोअजीवौ इत्येकत्व-द्वित्वाकारितेषु शून्यम् । कस्मात् ? ॥**

टी०-समग्रार्थेत्यादि । समग्रः-सम्पूर्णः अर्थो-वस्तु सम्पूर्णं वस्तु समग्रार्थः तं ग्रहीतुं शीलमस्य समग्रार्थग्राही, सम्पूर्णमेव हि वस्तु गृह्णातीत्ययं नयः, न देशं प्रदेशं वा, समग्रार्थग्राहिणो भावस्तथावर्तिता समग्रार्थग्राहित्वम्, अतो नानेनैवम्भूतनयेन देशप्रदेशौ स्थूलसूक्ष्मावयवात्मकौ गृह्येते । एवं तावच्चत्वारो विकल्पा एकवचनेन दर्शिताः, यथा चैकवचनेन दर्शिताः एवं द्विवचनेन चत्वारो विकल्पा नेयाः, जीवौ १ नोजीवौ २ अजीवौ ३ नोअजीवौ ४, तथा च बहुवचनेनापि चत्वार एव, जीवाः १ नोजीवाः २ अजीवाः ३ नोअजीवा ४ नेयाः, एकवचनप्रतिपत्त्यैव, केवलं तु द्विवचनं बहुवचनं वा विशेष इत्येतदाह-एवं जीवा जीवा इति । इतिशब्द आद्यार्थः, द्वित्वबहुत्वाकारितेषु द्विवचन-बहुवचनाभ्यामुच्चारितेषु एवमेवाभ्युपगमो नैगमादीनाम् ॥ अथैतांश्चतुरो विकल्पान् सङ्ग्रहनयः कथमभ्युपैतीति ? उच्यते सर्वसङ्ग्रहेणेत्यादि । सर्वसङ्ग्रहेण सामान्यवस्तुग्राहिणा एकवचनद्विवचनान्ता विकल्पा नाभ्युपगम्यन्ते, तांश्च विकल्पान् दर्शयति-जीवो नोजीव इत्यादिना । एकद्विवचनान्तेषूच्चरितेषु शून्यं भवतीति, नास्त्यैवं काचित् प्रतिपत्तिरस्तीत्यर्थः । कस्मान्नास्तीति चेत् ? उच्यते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भा०-एष हि नयः संख्यानन्त्याज्जीवानां बहुत्वमेवेच्छति यथार्थग्राही। शेषास्तु नयाः जात्यपेक्षमेकस्मिन् बहुवचनत्वम्, बहुषु च बहुवचनं सर्वाकारित-ग्राहिण इति । एवं सर्वभावेषु नयवादानुगमः कार्यः ॥**

टी०-एष हीत्यादि । एषः-संग्रहो यस्मात् संख्याया जीवगताया आनन्त्यं प्रतिपद्यते, जीवानां पञ्चगतिवर्तिनां बहुत्वमेवेतिकृत्वा बहुवचनान्तानेव विकल्पान् समाश्रयते । अयं विशेषोऽनेन प्रतिपन्नो देशसंग्रहव्यवहारादिभ्यः, भावना तु तद्वदेव, जीवा इत्युक्ते पञ्चस्वपि गतिषु वर्तमानानाश्रयति, नोजीवा इत्यजीवास्तेषां च देशप्रदेशानिति, अजीवा इति तु अजीवद्रव्याणि पुद्गला इति, नोअजीवा इति जीवानेव तेषां च देशप्रदेशानिति । अस्यैव बहुवचनान्ता प्रतिपत्तिः, शेषास्तु नैगमादयो नया एकद्विबहुवचनान्तानप्याश्रयन्ति एतान् विकल्पान्, यदा च जीवशब्दस्य एकोऽर्थो वाच्यो भवति तदैकत्वादेकवचनम्, यदापि च सामान्यं वाच्यं तदापि चैकत्वात् एकवचनप्राप्तौ सत्यां बहुवचनमन्विच्छन्ति नैगमादयः । कथमिति चेत् ? उच्यते-जात्यपेक्षं जातिः-सामान्यरूपा तामपेक्षते यत् तज्जात्यपेक्षं बहुवचनम्, एकस्मिन्नपि पदार्थेऽभिधेये "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (पा०अ०१, पा० २, सू० ५८) इत्यनेन लक्षणेन । यदा पुनर्बहव एव अभिधेया जीवशब्दस्य प्राणिनस्तदा नैव बहुवचनं "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" उत्पादयन्ति, किन्तु लक्षणान्तरेण, तल्लक्षणां दर्शयति-"बहुषु चैव बहुवचनं भवति" इत्यनेन, अतः संग्रहो बहुवचनान्तानेव विकल्पानाश्रयति, शेषास्तु नया एकवचनबहुवचनान्तानप्याश्रयन्तीत्येतदाह-सर्वाकारितग्राहिण इति । सर्ववचनैरेकवचनादिभिराकारितानेतान् विकल्पान् गृह्णन्ति तच्छीलाश्च सर्वाकारितग्राहिण इति । सम्प्रति ग्रन्थगौरवं मन्यमान एकत्र च विकल्पानां दर्शितत्वादन्यत्र सुखेन ज्ञास्यतीत्येतदतिदिशति-एवं सर्वभावेष्वि-त्यादिना । सर्वभावेषु-सर्वार्थेषु धर्मास्तिकायादिषु नयवादानुगम इति नयवादेनानुगमं-अनुसरणं-निभालनं कार्यं तत्त्वान्वेषिणा पुंसा ॥ एवं तावत् प्रमेयेण नयानां विचारः कृतः । सम्प्रति प्रमेयपरिच्छेदकेषु प्रमाणेषु को नयः कथं प्रवर्तते इत्यस्मिन्नवसरे पर आह-

**भा०-अत्राह-अथ पञ्चानां सविपर्ययाणां कानि को नयः समाश्रयत इति ? अत्रोच्यते-**

टी०-अथ पञ्चेत्यादि । अथेत्येतस्माद् विचारादनन्तरं पञ्चानां मत्यादीनां ज्ञानानां ज्ञेयस्वतत्त्वतया ग्राहकाणां सविपर्ययाणामिति सह विपर्ययेण अज्ञानस्वभावेन यानि वर्तन्ते तेषां सविपर्ययाणां कानि मत्यादीनि को नयो नैगमादिः श्रयते-अभ्युपगच्छति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते–

**भा०–नैगमादयस्त्रयः सर्वाण्यष्टौ श्रयन्ते, ऋजुसूत्रनयो मतिज्ञानमत्यज्ञानवर्जानि षट् ॥**

टी०–नैगमादिनयास्त्रयः–नैगमसंग्रहव्यवहाराः सर्वाणि निरवशेषाणि, कियन्तीति चेदुच्यते–अष्टौ, मतिज्ञानम्, मत्यज्ञानम्, श्रुतज्ञानम्, श्रुताज्ञानम्, अवधिज्ञानम्, विभङ्गज्ञानम्, मनःपर्यायज्ञानम्, केवलज्ञानमष्टमम् । एतान्यष्टावपि यतोऽर्थं परिच्छिन्दन्ति, अतोऽभ्युपगच्छन्त्यष्टावपि । ऋजुसूत्रः पुनः षडेषां मध्ये श्रयते, मतिज्ञानमत्यज्ञानवर्जानि षट्, मतिं मत्यज्ञानं च नाभ्युपैति ॥

**भा०–अत्राह–( अथ ) कस्मात् मतिं सविपर्ययां न श्रयत इति ? अत्रोच्यते–श्रुतस्य सविपर्ययस्योपग्रहत्वात्, शब्दनयस्तु द्वे एव श्रुतज्ञानकेवलज्ञाने श्रयते ॥**

टी०–अत्राह–अथ कस्मात् मतिं सविपर्ययामिति मत्यज्ञानसहितामित्यर्थः न श्रयते नेच्छतीति ? । अत्रोच्यते–यस्मान्मतिमत्यज्ञाने श्रुतज्ञानस्य सविपर्ययस्येति श्रुताज्ञानसहितस्य उपग्रहं कुरुतः । कथमिति चेदुच्यते–यदेतदिन्द्रियजं चक्षुरादिभ्य उपजातं तद् हि अवग्रहणमात्रेण प्रवर्तमानं न वस्तुनो निश्चयं कर्तुमलम्, यदा श्रुतज्ञानेनासावालोचितोऽर्थो भवति तदा यथावन्निश्चीयते इति, तस्मात् तदेवाभ्युपगन्तव्यं श्रुतज्ञानम्, किं मतिज्ञानेन ? इत्येवं श्रुतस्योपग्रहकरत्वात् न मतिज्ञानं सविपर्ययमाश्रीयते । शब्दनयस्तु भावार्थावलम्बी द्वे एव नान्यत् ताभ्यामित्युक्तम्, के ते ? उच्यते–श्रुतज्ञानकेवलज्ञाने । अत्र शब्दमते परोऽसूयया ब्रूते–

**भा०–अत्राह–अथ कस्मान्नेतराणि श्रयत इति ? अत्रोच्यते–मत्यवधिमनःपर्यायाणां श्रुतस्यैवोपग्राहकत्वात्, चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां नास्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते । तस्मादपि विपर्ययान् न श्रयत इति । अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति ॥**

टी०–अथ कस्मान्नेतराणि मत्यादीनि श्रयते ? अत्रोच्यते–मत्यवधिमनःपर्यायाणां श्रुतस्यैवागमानुरक्तस्य उपग्राहकत्वाद्–उपकारकत्वात्, यतो मत्याद्यालोचितोऽर्थः न मत्यादिभिः शक्यः प्रतिपादयितुं मूकत्वात् मत्यादिज्ञानानाम्, अतस्तैरालोचितोऽप्यर्थः पुनरपि श्रुतज्ञानेनैवान्यस्मै स्वपरप्रत्यायकेन प्रतिपाद्यते, तस्मात् तदेवालम्बितुं युक्तम्, नेतराणि । केवलज्ञानं तु यद्यपि मूकं तथाप्यशेषार्थपरिच्छेदात् प्रधानमितिकृत्वाऽवलम्ब्यत एव, तथा विपर्ययं नाभ्युपैत्यस्मात् चेतनाज्ञस्वाभाव्याच्चेत्यादि, चेतना–जीवत्वं परिच्छेदकत्वसामान्यं गृह्यते, ज्ञ इत्यनेन तु विशेषपरिच्छेदिता ग्राह्या,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयोश्चेतनाज्ञयोः स्वाभाव्यं-तथाभवनं तस्माच्चेतनाज्ञस्वाभाव्यात् सर्वजीवानां पृथिवीकायिकादीनां न विद्यते तेषां कश्चित् प्राणी मिथ्यादृष्टिः-अयथार्थपरिच्छेदी, सर्वे प्राणिनः स्वस्मिन् स्वस्मिन् विषये परिच्छेदकत्वेन प्रवर्तमानाः स्पर्शं स्पर्श इत्येवं परिच्छिन्दन्ति रसं च रस इत्यादि, अज्ञो वा अज्ञानी वा, न कस्यचित् प्राणिनो ज्ञानम-विद्यमानम् अस्य नयस्य मतेन। यथाऽभिहितम्-'सव्वजीवाणं पि य णं अक्खरस्स अणंतो भागो निच्चुग्घाडितओ' (नन्दी० सू० ४२), अतः सर्वे सम्यग्दृष्टयः सर्वे च ज्ञानिनः, अतो विपर्ययो नास्ति मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानरूप इति, अतः-अभावादेव विपर्ययान् मत्यज्ञानादीन् नाश्रयते यतश्च छद्मस्थज्ञानानि सर्वाण्येव श्रुतेऽन्तर्भवन्ति, अतो यत् 'प्रत्यक्षमन्यत्' (अ० १ सू० १२) इत्यस्मिन् सूत्रे प्रतिज्ञातं नयवादान्तरेण तु यथा मतिश्रुतविकल्पजानि भवन्ति तथा पुरस्ताद् वक्ष्याम इति तदुपपन्नम्, अस्मिंश्चोपपन्ने सर्वप्राणिनां सम्यग्दृष्टित्वात् ज्ञानित्वाच्च सर्वज्ञानानां प्रामाण्यम्, तदाह-अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्युपगतं भवति। उक्तं चैषां प्राक् स्वरूपं प्रत्यक्षादीनाम्, प्रमाणनयविचारमनन्तरं सकलं चाध्यायार्थमुपसंहरन् कारिकाः पपाठ-

**भा०-आह च-**

**विज्ञायैकार्थपदान्यर्थपदानि च विधानमिष्टं च।**
**विन्यस्य परिक्षेपात्, नयैः परीक्ष्याणि तत्त्वानि ॥१॥-आर्या**

**ज्ञानं सविपर्यासम्, त्रयः श्रयन्त्यादितो नयाः सर्वम्।**
**सम्यग्दृष्टेर्ज्ञानम्, मिथ्यादृष्टेर्विपर्यासः ॥२॥-आर्या**

**ऋजुसूत्रः षट् श्रयते, मतेः श्रुतोपग्रहादनन्यत्वात्।**
**श्रुतकेवले तु शब्दः, श्रयते नान्यच्छ्रुताङ्गत्वात् ॥३॥-आर्या**

**मिथ्यादृष्ट्यज्ञाने, न श्रयते नास्य कश्चिदज्ञोऽस्ति।**
**ज्ञस्वाभाव्याज्जीवो, मिथ्यादृष्टिर्न चाप्यस्ति ॥४॥-आर्या**

**इति नयवादाश्चित्राः, क्वचिद् विरुद्धा इवाथ च विशुद्धाः।**
**लौकिकविषयातीताः, तत्त्वज्ञानार्थमधिगम्याः ॥५॥-आर्या**

टी०-आह चेत्यादि। विज्ञाय-ज्ञात्वा एकार्थानि पदानि जीवः प्राणी जन्तुरित्यादि, अर्थपदानि च निरुक्तपदानि परैरुक्षासम्बन्धनमुपक्रियेति परोक्षमित्यादीनि, विधानं नामस्थापनादिकम्, इष्टं चेति निर्देशस्वामित्वादि सत्सङ्ख्यादीनि च, एतज्ज्ञात्वा ततो विन्यस्य नामादिभिः परिक्षेपात्-समन्तात् नयैः परीक्ष्याणि मीमांस्यानि तत्त्वानि जीवादीनि सप्त ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानं-मत्यादि सविपर्यासं-मत्यज्ञानादित्रयानुगतं नैगमादयस्त्रयः श्रयन्ति-अभ्युपगच्छन्ति आदित-आदेरारभ्य नयाः-वस्त्वंशग्राहिणः सर्वम्-अष्टविधम् । कस्य पुनर्ज्ञानं कस्य च विपर्यासो भवतीत्येतदाह-सम्यग्दृष्टेः-अर्हदभिहिततत्त्वश्रद्धायिनः यदिन्द्रियजमनिन्द्रियजं च तत् सर्वं ज्ञानम्, मिथ्यादृष्टेः सर्वमेव विपर्यासः ॥२॥

ऋजुसूत्र उक्तस्वरूपः षट्-मतिमत्यज्ञानरहितानि श्रुतादीनि श्रयते, मतिं तु सविपर्यासां न श्रयते, अ(य)तः श्रुतस्य ग्रन्थारूषितस्य उपग्रहत्वात्-उपकारकत्वाद् उक्तेन विधिना, ततश्च श्रुतादनन्या मतिरतोऽनन्यत्वान्नाश्रयते । शब्दस्तु श्रुतज्ञान-केवलज्ञाने श्रयते, नान्यत्, किं कारणम् ? श्रुताङ्गत्वात् श्रुतस्य प्रतिविशिष्टबला-धानहेतुत्वादुक्तेन विधिना, शब्द एव नयः ॥३॥

मिथ्यादृष्ट्यज्ञाने, मिथ्यादृष्टम् अज्ञानं च अपरिच्छेदात्मकं न श्रयते, किं कारणम् ? यतो नास्य कश्चिदज्ञोऽस्ति नास्त्यस्य कश्चिदज्ञः शब्दस्य मतेन कश्चित् प्राणी । किं कारणमिति चेत् ? उच्यते-ज्ञस्वाभाव्यात् सर्वप्राणिनां ज्ञातृस्वरूपत्वाज्जीवो मिथ्यादृष्टिर्नास्ति न चाप्यज्ञोऽस्ति ॥४॥

इति-एवमनेनोक्तेन स्वरूपेण नयवादाः नैगमादिविचाराः चित्राः बहुरूपाः, विचित्रैः प्रकारैर्वस्तुनः परिच्छेदित्वात्, ते चित्राः क्वचिद् विरुद्धाः क्वचिद् वस्त्वंशे रुचिगृहीते विरुद्धा इव लक्ष्यन्ते, यतः सामान्ये आश्रिते यस्तत्रैव विशेषं कल्पयति तदा पूर्वापरेण विरुध्यते, विशेषे वा त्रैकालिकेऽभ्युपेते वर्तमानावधिके विशेष आश्रिते पूर्वः परेण विरुद्ध इति लक्ष्यते, एवं सर्वेष्वायोजनीयम् । एवं क्वचिद् विरुद्धा इव । अथवा सम्यगालोच्यमानाः विशुद्धाः, सामान्यादीनां धर्माणां सर्वेषां तत्र वस्तुनि भावात् । अथैवमेव लौकिकानामपि वैशेषिकादीनां वस्तुविचारणायां सम्पतन्त्युत नेति ? उच्यते-न सम्पतन्ति, यदि सम्पतेयुर्जैनशासनवत् तान्यपि निरवद्यानि मतानि स्युः, नैव तत् तथा, एतदाह-लौकिकविषयातीताः लौकिकानां-वैशेषिकादीनां विषयाः-शास्त्राणि तान्यतीताः-अतिक्रान्ताः, न सन्ति तेष्वित्यर्थः ॥ अथ यथा ते वैशेषिकादयो नालोचयन्त्येभिर्वस्तु तथाऽत्रापि किमाश्रयते उत नेति ? उच्यते-न तथा नालोचनीयं वस्तु, किन्त्वालोचनीयमेवेति, एतदाह-तत्त्वज्ञानार्थमधिगम्याः तत्त्वं-सद्रूपं सर्वदोषरहितं यज्ज्ञानं तत् तत्त्वज्ञानं तत्त्वज्ञानाय-तत्त्वज्ञानार्थं-तत्त्वज्ञानप्रयोजनार्थम् अधिगम्याः ज्ञेयाः एतत् कथयति-समस्तनयसामग्र्या आलोच्यमानं वस्तु सुधियां प्रीतिमाधि-नोति, अन्यथा यथावस्तु संवादो दुःखेनापाद्येत, यत एकनयमतावलम्बिनां वस्तुस्वरूपसम्पादने सामर्थ्याभावात् समग्रया नयविचारणया वस्तुस्वरूपप्रतिपादनं सुकरमवगतस्याद्वादसद्भावैरिति ॥५॥३५॥ (तत्त्वा० स्वो० भा० टी० अ०५, सू०३५)

16/3

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[73] पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।**
**युक्तिमद् वचनं यस्य, तस्य कार्यः परिग्रहः ॥ ३ ॥**

पक्षपात इति । न मे-मम, वीरे-श्रीवर्धमानस्वामिनि, पक्षपातः-गुणाऽनालोचनपूर्व एव रागः । कपिलादिषु च न मे द्वेषः । किन्तु यस्य वचनं युक्तिमत्, तस्य परिग्रहः-स्वीकारः कार्यः । इत्थं चाऽत्राऽविसंवादिवचनत्वेनैव भगवतो महत्त्वमाचार्यैरभिप्रेतम् । (द्वा०द्वा०४।३) **16/7**

**[74]** यद्येवं किमात्मशक्त्यननुरूपेणानेनैवोपक्रमेणेत्याह-

**तथापि श्रद्धामुग्धोऽहम्, नोपालभ्यः स्खलन्नपि ।**
**विशृङ्खलापि वाग्वृत्तिः, श्रद्दधानस्य शोभते ॥८॥**

ततोऽप्येवं सत्यप्यहमस्मिन् वीतरागस्तवाध्वन्यध्वनीनतामाकलयन्नविकलसामर्थ्यशून्यः स्थाने स्थाने स्खलन्नपि विमलमतिभिर्नोपालभ्यः । यतः परमात्मप्रतिबद्धस्तुतिश्रद्धया मुग्धः शक्याशक्यार्थविचारचातुर्यवर्जितः, एवंविधस्य च श्रद्दधानस्य निरुपाधिश्रद्धाबन्धबन्धुरान्तःकरणस्य वाग्वृत्तिर्वचनपद्धतिर्विश्रृङ्खलापि-पूर्वापरविसंवादविसंस्थुलापि भक्तिव्यक्तेरेकात्मतया शोभते बालालापचापलमिव कौतुकं च जनयतीति समञ्जसम् ॥८॥

अवचूर्णिः-पुनः कारणान्तरं विमृश्य स्तवोद्योगं दर्शयन्ति-तथा० तथापि निर्विचारत्वे सत्यपि श्रद्धामुग्धो वासनाप्रेरितस्वान्तोऽहं स्तवने स्खलन्नपि स्वल्पमतितया गुणानन्त्यं प्रकटयितुमशक्नुवन्नपि नोपालभ्यः, मूर्ख ! मा वदेति न निराकार्यः । यतः कारणात् श्रद्धानस्य श्रद्धावतो विशृङ्खलाऽसम्बद्धापि वाग्वृत्तिर्वचनरचना शोभते ॥८॥

**[75] अहवावि भावभेया ओघेण अपुणबंधगाईणं ।**
**सव्वावि तिहा णेया सेसाणमिमी ण जं समए ॥३॥**
**पावं ण तिव्वभावा कुणइ ण बहु मण्णई भवं घोरं ।**
**उचियट्ठिइं च सेवइ सव्वत्थवि अपुणबंधोत्ति ॥४॥**

'अहे'त्यादि, अथवाऽपीति निपातः पूर्वोक्तप्रकारापेक्षया प्रकारान्तरत्वद्योतनार्थः, भावभेदात्-परिणामविशेषाद् गुणस्थानकविशेषसंभवात्प्रमोदमात्ररूपाद्वा वन्दनाधिकारिजीवगतात् त्रिधा विज्ञेयेति सम्बन्धः, ओघेन-सामान्येन विवक्षितपाठक्रियाल्पत्वादितयेत्यर्थः, केषामित्याह-अपुनर्बन्धकादीनाम्-अपुनर्बन्धकप्रभृतिकानां वन्दनाधिकारिणाम्, तत्रापुनर्बन्धको व्याख्यातपूर्वः, आदिशब्दादविरतसम्यग्दृष्टिदेशसर्वविरतग्रहः, सर्वाऽपिनमस्कारादि भेदेन जघन्यादिप्रकारा अपि, आस्तामेका काचिदिति, तत्रापुनर्बन्धकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्या, तत्परिणामस्य विशुद्ध्यपेक्षया जघन्यत्वात्, अविरतसम्यग्दृष्टेर्मध्यमा, तत्परिणामस्य विशुद्धिमङ्गीकृत्य मध्यमत्वात्, सामान्यविरतस्य तूत्कृष्टा, तत्परिणामस्य तथाविधत्वादेवेति, अथवाऽपुनर्बन्धकस्यापि त्रिधा प्रमोदरूपभावत्रैविध्यादेवमितरयोरपीति, अथापुनर्बन्धकादीनामिति कस्मादुक्तं ? मार्गाभिमुखादेरपि भावभेदसद्भावादित्यत्राह-शेषाणाम्-अपुनर्बन्धकादिव्यतिरिक्तानां सकृद्बन्धक-मार्गाभिमुख-मार्गपतित-तदितरमिथ्यादृशाम्, 'इमीति' इयमधिकृता भावभेदेन भेदवती वन्दना, पाठादिभेदवती तु स्यादपि, न-नैव, यद्-यस्मात्, समये-सिद्धान्ते, भणितेति शेषः, तेषां तद्योग्यताविकलत्वादिति गाथार्थः ॥३॥ 'अपुनर्बन्धकादीनामियं भवती'त्युक्तमतस्ताँल्लक्षणतो निरूपयन्नपुनर्बन्धकं तावदाह-'पावे'त्यादि, पापम्-अशुद्धं कर्म, तत्कारणत्वाद्धिंसाद्यपि पापं तत्, न-नैव, तीव्रभावाद्-गाढसंक्लिष्टपरिणामात्, करोति-विद्यते, अत्यन्तोत्कटमिथ्यात्वादिक्षयोपशमेन लब्धात्मनैर्मल्यविशेषत्वात्, तीव्रेतिविशेषणादापन्नमतीव्रभावात्करोत्यपि तथाविधकर्मदोषात्, तथा न बहु मन्यत-न बहुमानविषयीकरोति, भवं-संसारम्, घोरं-रौद्रम्, तस्य घोरत्वावगमात्, तथा उचितस्थितिम्-अनुरूपप्रतिपत्तिम्, चशब्दः समुच्चये, सेवते-भजते कर्मलाघवात्, सर्वत्रापि, आस्तामेकत्र देशकालावस्थापेक्षया समस्तेष्वपि देवातिथिमातापितृप्रभृतिषु मार्गानुसारिताभिमुखत्वेन, मयूरशिशुदृष्टान्ताद्, अपुनर्बन्धकः-उक्तनिर्वचनो जीवः, इत्येवंविध-क्रियालिङ्गो भवति, इति गाथार्थः ॥४॥ (पञ्चा०प्र०पं०३श्लो०-४) **16/8**

**[76]** इदानीमभेदनयाश्रयेणात्मनो रत्नत्रयेणैकत्वमाह-

**आत्मैव दर्शन-ज्ञान-चारित्राण्यथवा यतेः ।**
**यत्तदात्मक एवैष, शरीरमधितिष्ठति ॥१॥**

अथवेति भेदनयापेक्षया प्रकारान्तरस्याभेदनयस्य प्रकाशनार्थम् । आत्मैव, न ततो भिन्नानि दर्शन-ज्ञान-चारित्राणि । यतेरिति संबन्धिपदम् । अत्रोपपत्तिमाह-यद्-यस्मात् तदात्मक एव-दर्शन-ज्ञान-चारित्रात्मक एव तदभेदमापन्न एवैष आत्मा शरीरमधितिष्ठति । आत्मभिन्नानां हि दर्शनादीनां नात्मनि मुक्तिहेतुत्वं स्यात्, देवदत्तसम्बन्धिनामिव यज्ञदत्ते ॥१॥

**आत्मानमात्मना वेत्ति, मोहत्यागाद्य आत्मनि ।**
**तदेव तस्य चारित्रम्, तज्ज्ञानं तच्च दर्शनम् ॥२॥**

आत्मानं कर्मतापन्नमात्मन्याधारभूते आत्मना स्वयमेव यो वेत्ति-जानीते । एतच्च ज्ञानं न मूढानां भवतीत्याह-मोहत्यागात् । तदेवात्मज्ञानमेव तस्यात्मनश्चारित्रम्, अनास्रवरूपत्वात् । तज्ज्ञानं-तदेव ज्ञानम्, बोधरूपत्वात् । तच्च दर्शनम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेव दर्शनं श्रद्धानरूपत्वात् ॥२॥

आत्मज्ञानमेव स्तौति-

**आत्माज्ञानभवं दुःख-मात्मज्ञानेन हन्यते ।**
**तपसाप्यात्मविज्ञान-हीनैश्छेत्तुं न शक्यते ॥३॥**

इह सर्वं दुःखमनात्मविदां भवति । तदात्माज्ञानभवं प्रतिपक्षभूतेनात्मज्ञानेन शाम्यति क्षयमुपयाति तम इव प्रकाशेन । ननु कर्मक्षयहेतुः प्रधानं तप उक्तम्, यदाहुः- **पावाणं च खलु भो कडाणं कम्माणं पुव्विं दुच्चिन्नाणं दुप्पडिक्कंत्ताणं वेइत्ता मुक्खो नत्थि अवेयइत्ता तवसा वा ॥ ( दशवै० चू० )**

(पुव्विं दुच्चिन्नाणं कडाणं कम्माणं वेअइत्ता मोक्खो, नत्थि अवेयइत्ता, तवसा वा झोसइत्ता ।) इत्याह-तपसाऽपि, आस्तामन्येनानुष्ठानेन, तदात्माज्ञानभवं दुःखमात्मविज्ञानहीनैर्न च्छेत्तुं शक्यते, ज्ञानमन्तरेण तपसोऽल्पफल- त्वात्, यदाह-

जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तण्णाणी तिहिं गुत्तो खवेइ ऊसासमेत्तेण ॥१॥

[बृहत्कल्पभाष्ये गा. ११७०]

तत्स्थितमेतद् बाह्यविषयव्यामोहमपहाय रत्नत्रयसर्वस्वभूते आत्मज्ञाने प्रयतितव्यम्, यदाहुर्बाह्या अपि- "आत्मा रे ! श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदारण्यकोपनिषदि ४/५/६] इति ।

आत्मज्ञानं च नात्मनः कर्मभूतस्य पृथक् किञ्चित्, अपि त्वात्मनश्चिद्रूपस्य स्वसंवेदनमेव, नातोऽन्यदात्मज्ञानं नाम । एवं दर्शन-चारित्रे अपि नात्मनो भिन्ने । एवं च चिद्रूपोऽयं ज्ञानाद्याख्याभिरभिधीयते । ननु विषयान्तरव्युदासेन किमित्यात्मज्ञानमेव मृग्यते ? विषयान्तरज्ञानमेव ह्यज्ञानरूपं दुःखं छिन्द्यात् । नैवम्, सर्वविषयेभ्य आत्मन एव प्रधानत्वात्, तस्यैव कर्मनिबन्धनशरीरपरिग्रहे दुःखितत्वात् कर्मक्षये च सिद्धरूपत्वात् ॥३॥ [योगशा० प्र. ८ श्लो. १-२-३] **16/8**

**[77] एगप्पो अजिए सत्तू, कसाया इंदियाणि य ।**
**ते जिणित्तु जहानायं, विहरामि अहं मुणी ॥३८॥**

एक आत्मेति-जीवश्चित्तं वाऽतति-गच्छति तांस्तान् भावान् अर्थानिति व्युत्पत्तेः, अजितः-अवशीकृतः अनेकानर्थावाप्तिहेतुत्वाच्छत्रुरिव शत्रुस्तथोक्तहेतोरेव कषायाः-क्रोधादयः इन्द्रियाणि-स्पर्शनादीनि, चशब्दान्नोकषायादयः कषाया-द्युत्तरोत्तरभेदाश्च, अजिताः शत्रवः इति वचनविपरिणामेन योज्यते । इह च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कषायाणां प्रथमत उपादानमिन्द्रियाणामपि कषायवशत एवानर्थहेतुत्वख्यापनार्थम्, सम्प्रति उपसंहरव्याजेन तज्जये फलमाह तान् उक्तस्वरूपान् शत्रून् जित्वा-अभिभूय यथान्यायं-यथोक्तनीत्यनतिक्रमेण ततो विहरामि तन्मध्येऽपि तिष्ठन्नप्रतिबद्ध-विहारितयेति गम्यते । तेषामेव प्रतिबन्धहेतुत्वेन तद्विबन्धकाभावादिति भावः, अहमित्यात्मनिर्देशः मुने ! इति केश्यामन्त्रणमिति सूत्रचतुष्टयार्थः ॥ (उत्तरा० अ० २३, गा० ३८) । **17/8**

**[78] रागदोसादओ तिव्वा, नेह पासा भयङ्करा ।**
**ते छिंदित्तु जहानायं, विहरामि जहक्कमं ॥४३॥**

रागद्वेषादयः, आदिशब्दान्मोहपरिग्रहः तीव्राः इति गाढाः, तथा णेहत्ति स्नेहाः-पुत्रकलत्रादिसम्बन्धास्ते पाशा इव पारवश्यहेतुतया पाशा इत्युक्ता इति क्रमः, अतिगाढत्वाच्च रागान्तर्गतत्वेऽप्यमीषां पुनरुपादानम्, भयङ्कराः अनर्थहेतुतया त्रासोत्पादका यथाक्रमम् इति क्रमः-यतिविहितआचारस्तदनतिक्रमेणेति सूत्र-चतुष्टयार्थ ॥४३॥ (उत्तरा० अ०२३, गा०४३) । **17/8**

एवमपि कथं सुखेन वसनं जीवनं वेत्याह-

**[79] बहु खु मुणिणो भद्दं, अणगारस्स भिक्खुणो ।**
**सव्वतो विप्पमुक्कस्स, एगंतमणुपस्सओ ॥१६॥**

बहु-विपुलम्, खुः-अवधारणे, बह्वेव, मुनेः-तपस्विनः, भद्रं-कल्याणं सुखं वा अनगारस्य-भिक्षोः इति च प्राग्वत्, सर्वतः-बाह्यादभ्यन्तराच्च, यद्वा स्वजनात् परिजनाच्च, विप्रमुक्तस्य इति पूर्ववत्, एकान्तम्-एकोऽहमित्याद्युक्तरूपैकत्व-भावनात्मकम् अनुपश्यतः-पर्यालोचयत इति सूत्रद्वयार्थः । (उत्त० अ०९ गा० १६)। **17/8**

**[80] तए णं से कालासवेसियपुत्ते अणगारे थेरे भगवंते एवं वयासी जति भे अज्जो ! आयासामाइए आयासामाइयस्स अट्ठे एवं जाव आया विउस्सगस्स अट्ठे अवहट्टु कोहमाणमायालोभे किमट्ठं अज्जो ! गरहह ? कालास० संजमट्ठयाए ॥ ७६ ॥**

अज्जो ! त्ति हे आर्य ! ओकारान्तता सम्बोधने प्राकृतत्वात्, किं भे त्ति किं भवतामित्यर्थः, आया णे त्ति आत्मा । नः -अस्माकं मते सामायिकमिति, यदाह-जीवो गुणपडिवण्णो, नयस्स दव्वट्ठियस्स सामाइयं त्ति, सामायिकार्थो पि जीव एव, कर्मानुपादानादीनां जीवगुणत्वात् जीवाव्यतिरिक्तत्वाच्च तद्गुणानामिति । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्याख्यानाद्यप्यवगन्तव्यम् । जइ भे अज्जो त्ति यदि भवतां हे आर्याः ! स्थविराः! सामायिकमात्मा तदा अवहट्टु त्ति अपहृत्य-त्यक्त्वा क्रोधादीन् किमर्थं गर्हध्वे ? निंदामि गरिहामि अप्पाणं वोसिरामि इति वचनात् क्रोधादीनेव अथवा अवज्जमिति गम्यते, अयमभिप्रायः-यः सामायिकवान् त्यक्तक्रोधादिश्च स कथं किमपि निन्दति ? निन्दा हि किल द्वेषसम्भवेति, अत्रोत्तरं संयमार्थमिति । (भग० श०१, उ०९, सू०७६) । **18/1, 19/7**

**[81] संतेऽवि कोऽवि उज्झइ, कोवि असंतेऽवि अहिलसइ भोए ।**
**चयइ परपच्चवएणऽवि, पभवो दट्ठूण जह जंबुं ॥३७॥**

सतोऽपि विद्यमानानपि कश्चिद् विवेकी जम्बूवदुज्झति त्यजति भोगानिति सम्बन्धः, भुज्यन्त इति भोगाः शब्दादयस्तानिति कश्चिदविवेकी प्रभववदसतोऽपि अभिलषति वाञ्छति भोगान् । तथा कश्चिदिति वर्तते, त्यजति परप्रत्ययेनापि, किंवदित्याह-प्रभवो दृष्ट्वा यथा जम्बूमिति समासार्थः । (उपदे० मा० गा०३७) । **18/4**

**[82] धणेण किं धम्मधुराहिगारे ? सयणेण वा कामगुणेहिं चेव ।**
**समणा भविस्सामु गणोहधारी, बहिंविहारा अभिगम्म भिक्खं ॥१७॥**

धनेन-द्रव्येण किं, न किञ्चिदित्यर्थः, धर्म एवातिसात्त्विकैरुह्यमानतया धूरिव धूर्धर्मधुरा, तदधिकारे-तत्प्रस्तावे, स्वजनेन वा कामगुणैश्चैव, तथा च वेदेऽप्युक्तं- "न प्रजया न धनेन त्यागेनैकेनामृतत्वमानशुरित्यादि, ततः श्रमणौ-तपस्विनौ भविष्यावः, गुणौघं-सम्यग्दर्शनादिगुणसमूहं धारयत इत्येवंशीलौ गुणौघधारिणौ, बहिः-ग्रामनगरादिभ्यो बहिर्वर्त्तित्वाद् द्रव्यतो भावतश्च क्वचिदप्रतिबद्धत्वाद् विहारः-विहरणं ययोस्तौ बहिर्विहारौ, अप्रतिबद्धविहाराविति यावत्, अभिगम्य-आश्रित्य, भिक्षां-शुद्धोञ्छां तामेवाहारयन्ताविति भाव इति सूत्रार्थः । (उत्त० अ० १४. गा० १७) । **18/5**

**[83] न तस्स दुक्खं विभयंति नायओ, न मित्तवग्गा न सुआ न बंधवा ।**
**इक्को सयं पच्चणुहोइ दुक्खं, कत्तारमेवं अणुजाइ कम्मं ॥२३॥**

इदमेवाभिव्यनक्ति, आद्यव्याख्याने तु स्यादेतद्-जीवितारक्षणेऽपि दुःखांश-हारिणो भविष्यन्त्यत आह-न तस्य-मृत्युना नीयमानस्य तत्कालभाविना दुःखेनात्यन्तपीडितस्य दुःखं-शारीरं मानसं वा 'विभजन्ति'-विभागीकुर्वन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ज्ञातयः'-दूरवर्त्तिनः स्वजना न 'मित्रवर्गा'-सुहृत्समूहा न सुताः'-पुत्रा न 'बान्धवाः'-निकटवर्त्तिनः स्वजनाः, किन्तु एकः-अद्वितीयः 'स्वयम्'-आत्मना 'प्रत्यनुभवति'-वेदयते 'दुःखं'-क्लेशम्, किमिति ? यतः 'कर्तारमेव'-उपार्जयितारमेव 'अनुयाति'-अनुगच्छति, किं तत् ? कर्म, येन तत्कृतं तस्यैव-फलमुपनयतीति भाव इति सूत्रद्वयार्थः । (उत्त० अ० १३. गा० २३) । **18/5**

**[84]** कथं विचार्यते ? इत्याह—

**जीवो गुणपडिवन्नो, नयस्स दव्वट्ठियस्स सामइयं ।**
**सो चेव पज्जवट्ठियनयस्स जीवस्स एस गुणो ॥२६४३॥**

जीव-आत्मा, गुणैः प्रतिपन्न-आश्रितः, द्रव्यमेवार्थो यस्य न तु पर्यायाः स द्रव्यार्थिकस्तस्य द्रव्यार्थिकस्य नयस्य मतेन सामायिकम् । इदमुक्तं भवति-गुणाः खल्वौपचारिकत्वादसन्त एव, द्रव्यव्यतिरेकेण तेषामनुपलम्भात् । ततश्च न्यग्भूतगुण-ग्रामो जीव एव मुख्यवृत्त्या सामायिकं न तु पर्याया इति द्रव्यार्थिकनयो मन्यते । आह—ननु रूपादयो गुणा यदि न सन्ति, तर्हि कथं लोकस्य द्रव्ये तत्प्रतिपत्तिः ? उच्यते-भ्रान्तैवेयम्, चित्रे निम्नोन्नतप्रतिपत्तिवत् । इत्यस्य नयस्याभिप्रायः । स एव सामायिकादिगुणः पर्यायार्थिकनयस्य परमार्थतोऽस्ति, न तु जीवद्रव्यम्, यस्मा-ज्जीवस्यैष गुणः, जीवगुण इति तत्पुरुषोऽयम्, स चोत्तरपदप्रधानः, यथा तैलस्य धारा तैलधारेति, न चात्र धारातिरिक्तं किमपि तैलमस्ति । एवं ज्ञानादिगुणातिरिक्तं जीवद्रव्यमपि नास्तीति पर्यायार्थिकनयाभिप्रायः ॥ इति निर्युक्तिगाथार्थः ॥२६४३॥ (विशेषा० गा० २६४३) । **18/6**

**[85]** [सू० २] **एगे आया ।**

[टी०] यदाख्यातं भगवता तदधुनोच्यते । तत्र सकलपदार्थानां सम्यग्मिथ्या-ज्ञानश्रद्धानाऽनुष्ठानैर्विषयीकरणेनोपयोगनयनादात्मनः सर्वपदार्थप्राधान्यमतस्तद्विचारं तावदादावाह **एगे आया एको** न द्व्यादिरूपः, **आत्मा** जीवः, कथञ्चिदिति गम्यते, तत्र अतति सततमवगच्छति अत सातत्यगमने [पा० धा० ३८] इति वचनाद् 'अत'-धातोर्गत्यर्थत्वाद् गत्यर्थानां च ज्ञानार्थत्वादनवरतं जानातीति निपातनादात्मा जीवः, उपयोगलक्षणत्वादस्य सिद्ध-संसार्यवस्थाद्वयेऽप्युपयोगभावेन सततावबोधभावात्, सततावबोधाभावे चाजीवत्वप्रसङ्गात्, अजीवस्य च सतः पुनर्जीवत्वाभावात्, भावे चाकाशादीनामपि तथात्वप्रसङ्गात्, एवं च जीवानादि-त्वाभ्युपगमाभावप्रसङ्गश्च इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा अतति सततं गच्छति स्वकीयान् ज्ञानादिपर्यायानित्यात्मा । नन्वेवमाकाशादीनामप्यात्मशब्दव्यपदेशप्रसङ्गः, तेषामपि स्वपर्यायेषु सततगमनाद्, अन्यथा अपरिणामित्वेनावस्तुत्वप्रसङ्गादिति, नैवम्, व्युत्पत्तिमात्रनिमित्तत्वादस्य, उपयोगस्यैव च प्रवृत्तिनिमित्तत्वाद् जीव एव आत्मा, नाकाशादिरिति । यद्वा संसार्यपेक्षया नानागतिषु सततगमनात् मुक्तापेक्षया च भूततद्भावत्वादात्मेति । तस्य चैकत्वं कथञ्चिदेव, तथाहि-द्रव्यार्थतयैकत्वमेकद्रव्यत्वादात्मनः, प्रदेशार्थतया त्वनेकत्वमसङ्ख्येयप्रदेशात्मकत्वात् तस्येति । तत्र द्रव्यं च तदर्थश्चेति द्रव्यार्थः, तस्य भावो द्रव्यार्थता प्रदेश-गुण-पर्यायाधारता, अवयविद्रव्यतेति यावत् । तथा प्रकृष्टो देशः प्रदेशो निरवयवोऽशः स चासावर्थश्चेति प्रदेशार्थः, तस्य भावः प्रदेशार्थता, गुणपर्यायाधारावयवलक्षणार्थतेति यावत् । नन्ववयवि द्रव्यमेव नास्ति, विकल्पद्वयेन तस्यायुज्यमानत्वात्, खरविषाणवत्, तथाहि-अवयवि द्रव्यमवयवेभ्यो भिन्नमभिन्नं वा स्याद् ? न तावदभिन्नम्, अभेदे हि अवयविद्रव्यवदवयवानामेकत्वं स्याद्, अवयववद्वाऽवयविद्रव्यस्याप्यनेकत्वं स्यात्, अन्यथा भेद एव स्यात्, विरुद्धधर्माध्यासस्य भेदनिबन्धनत्वादिति । भिन्नं चेत् तत् तेभ्यः, तदा किमवयविद्रव्यं प्रत्येकमवयवेषु सर्वात्मना समवैति देशतो वेति ?, यदि सर्वात्मना तदाऽवयवसङ्ख्यमवयविद्रव्यं स्यात्, कथमेकत्वं तस्य ? अथ देशैः समवैति ततो यैर्देशैरवयवेषु तद्वर्त्तते तेष्वपि देशेषु तत् कथं वर्त्तते देशतः सर्वतो वेति ? सर्वतश्चेत्तदेव दूषणम्, देशतश्चेत् तेष्वपि देशेषु कथमित्यादिरनवस्था स्यादिति, अत्रोच्यते, यदुक्तम्-'विकल्पद्वयेन तस्यायुज्यमानत्वा'दिति तदयुक्तम्, एकान्तेन भेदाभेदयोरनभ्युपगमात्, अवयवा एव हि तथाविधैकपरिणामतया अवयविद्रव्यतया व्यपदिश्यन्ते, त एव च तथाविधविचित्रपरिणामापेक्षया अवयवा इति, अवयविद्रव्याभावे तु एते घटावयवा एते च पटावयवा इत्येवमसङ्कीर्णावयवव्यवस्था न स्यात्, तथा च प्रतिनियतकार्यार्थिनां प्रतिनियतवस्तूपादानं न स्यात्, तथा च सर्वमसमञ्जसमापनीपद्येत । सन्निवेशविशेषाद् घटाद्यवयवानां प्रतिनियतता भविष्यतीति चेत्, सत्यम्, केवलं स एव सन्निवेशविशेषोऽवयविद्रव्यमिति । यच्चोच्यते विरुद्धधर्माध्यासो भेदनिबन्धनमिति, तदपि न सूक्तम्, प्रत्यक्षसंवेदनस्य परमार्थापेक्षया भ्रान्तत्वेन संव्यवहारापेक्षया त्वभ्रान्तत्वेनाभ्युपगमादिति, यदि नाम भ्रान्तमभ्रान्तं कथमित्येवमत्रापि वक्तुं शक्यत्वादिति । किञ्च, विद्यते अवयविद्रव्यम्, अव्यभिचारितया तथैव प्रतिभासमानत्वाद्, अवयववन्नीलवद्वा । न चायमसिद्धो हेतुः, तथाप्रतिभासस्यानुभूयमानत्वात्, नाप्यनैकान्तिकत्वविरुद्धत्वे, सर्ववस्तुव्यवस्थायाः प्रतिभासाधीनत्वाद्, अन्यथा न किञ्चनापि वस्तु सिध्येदिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतु नामावयवि द्रव्यम्, केवलमात्मा न विद्यते, तस्य प्रत्यक्षादिभिरनुपलभ्यमानत्वादिति, तथाहि—न प्रत्यक्षग्राह्योऽसावतीन्द्रियत्वात्, नाप्यनुमानग्राह्यः, अनुमानस्य लिङ्ग-लिङ्गिनोः साक्षात्सम्बन्धदर्शनेन प्रवृत्तेरिति, आगमगम्योऽपि नासौ, आगमानामन्योन्यं विसंवादादिति । अत्रोच्यते, केयमनुलपभ्यमानता ?, किमेकपुरुषाश्रिता सकलपुरुषाश्रिता वा ? यद्येकपुरुषाश्रिता, न तयाऽऽत्माभावः सिध्यति, सत्यपि वस्तुनि तस्याः सम्भवात्, न हि कस्यचित् पुरुषविशेषस्य घटाद्यर्थग्राहकं प्रमाणं न प्रवृत्तमिति सर्वत्र सर्वदा तदभावो निर्णेतुं शक्य इति, न हि प्रमाणनिवृत्तौ प्रमेयं विनिवर्त्तते, प्रमेयकार्यत्वात् प्रमाणस्य, न च कार्याभावे कारणाभावो दुष्ट इत्यनैकान्तिकताऽनुपलम्भहेतोः । सकलपुरुषाश्रितानुपलम्भस्त्वसिद्ध इत्यसिद्धो हेतुः, न ह्यसर्वज्ञेन सर्वे पुरुषाः सर्वदा सर्वत्रात्मानं न पश्यन्तीति वक्तुं शक्यमिति । किञ्च, विद्यते आत्मा, प्रत्यक्षादिभिरुपलभ्यमानत्वात्, घटवदिति, न चायमसिद्धो हेतुः, यतोऽस्मदादिप्रत्यक्षेणाप्यात्मा तावद् गम्यत एव, आत्मा हि ज्ञानादनन्यः, आत्मधर्म्मत्वात् ज्ञानस्य, तस्य च स्वसंविदितरूपत्वात्, स्वसंविदितत्वं च ज्ञानस्य नीलज्ञानमुत्पन्नमासीदित्यादिस्मृतिदर्शनात्, न ह्यस्वसंविदिते ज्ञाने स्मृतिप्रभवो युज्यते, प्रमात्रन्तरज्ञानस्यापि स्मृतिगोचरत्वप्रसङ्गादिति, तदेवं तदव्यतिरिक्तज्ञानगुणप्रत्यक्षत्वे आत्मा गुणी प्रत्यक्ष एव, रूपगुणप्रत्यक्षत्वे घटगुणिप्रत्यक्षत्ववदिति, उक्तं च-

**गुणपच्चक्खत्तणओ गुणी वि जीवो घडो व्व पच्चक्खो ।**
**घडओ वि घेप्पइ गुणी गुणमेत्तग्गहणओ जम्हा ॥** [विशेषाव० १५५८]

तथा-

**अन्नोऽणन्नो व्व गुणी होज्ज गुणेहिं जइ णाम सोऽणन्नो ।**
**ननु गुणमेत्तग्गहणे घेप्पइ जीवो गुणी सक्खं ॥**

**अह अन्नो तो एवं गुणिनो न घडादयो वि पच्चक्खा ।**
**गुणमेत्तग्गहणाओ जीवम्मि कुतो वियारोऽयं ? ॥**

[विशेषाव० १५५९-१५६०] ति ।

ये तु सकलपदार्थसार्थस्वरूपाविर्भावनसमर्थज्ञानवन्तस्तेषां सर्वात्मनैव प्रत्यक्ष इति । तथाऽनुमानगम्योऽप्यात्मा, तथाहि—विद्यमानकर्तृकमिदं शरीरम्, भोग्यत्वात्, ओदनादिवत्, व्योमकुसुमं विपक्ष, स च कर्त्ता जीव इति । नन्वोदनकर्तृवन्मूर्त्त आत्मा सिध्यतीति साध्यविरुद्धो हेतुरिति, नैवम्, संसारिणो मूर्त्तत्वेनाप्यभ्युपगमाद्, आह च—



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जो कत्ताइ स जीवो सज्झविरुद्धो त्ति ते मई हुज्जा ।**
**मुत्ताइपसंगाओ तं नो संसारिणो दोसो** ॥ [विशेषाव० १५७०] त्ति ।

न चायमेकान्तो यदुत लिङ्‌ग्यविनाभूतलिङ्गोपलम्भव्यतिरेकेणानुमानस्यैव एकान्ततोऽप्रवृत्तिरिति, हसितादिलिङ्गविशेषस्य ग्रहाख्यलिङ्‌ग्यविनाभावग्रहणमन्तरेणापि ग्रहगमकत्वदर्शनात्, न च देह एव ग्रहो येनान्यदेहे दर्शनमविनाभावग्रहणनियामकं भवतीति, उक्तं च–

**सोऽणेगंतो जम्हा लिंगेहिं समं न दिट्ठपुव्वो वि ।**
**गहलिंगदरिसणाओ गहोऽणुमेओ सरीरम्मि** ॥ [विशेषाव० १५६६] इति ।

आगमगम्यत्वं त्वात्मनः '**एगे आया**' इति वचनात् । न चास्यागमान्तरैर्विसंवादः संभावनीयः, सुनिश्चिताप्तप्रणीतत्वादस्येति, बहु वक्तव्यमत्र, तच्च स्थानान्तरादवसेयमिति । किञ्च, आत्माभावे जातिस्मरणादयस्तथा प्रेतीभूतपितृपितामहादिकृतानुग्रहोपघातौ च न प्राप्नुयुरिति ।

आत्मनस्तु सप्रदेशत्वमवश्यमभ्युपगन्तव्यम्, निरवयवत्वे तु हस्ताद्यवयवानामेकत्वप्रसङ्गः प्रत्यवयवं स्पर्शाद्यनुपलब्धिप्रसङ्गश्चेति सप्रदेश आत्मा, प्रत्यवयवंचैतन्यलक्षणतद्गुणोपलम्भात्, प्रतिग्रीवाद्यवयवमुपलभ्यमानरूपगुणघटवदिति स्थापितमेतत् 'द्रव्यार्थतया एक आत्मा' इति ।

अथवा एक आत्मा कथञ्चिदिति, प्रतिक्षणं सम्भवदपरापरकालकृतकुमारतरुण-नर-नारकत्वादिपर्यायैरुत्पाद-विनाशयोगेऽपि द्रव्यार्थतयैकत्वादस्य, यद्यपि हि कालकृतपर्यायैरुत्पद्यते नश्यति च वस्तु तथापि स्व-परपर्यायरूपानन्तधर्मात्मकत्वात् तस्य न सर्वथा नाशो युक्त इति, आह च–

**न हि सव्वहा विणासो अद्धापज्जायमेत्तनासम्मि ।**
**स-परपज्जायाणंतधम्मणो वत्थुणो जुत्तो** ॥ [विशेषाव० २३९३] त्ति ।

किञ्च, **प्रतिक्षणं क्षयिणो भावाः** [ ] इत्येतस्माद् वचनात् प्रतिपाद्यस्य यत् क्षणभङ्गविज्ञानमुपजायते तदसङ्‌ख्यातसमयैरेव वाक्यार्थग्रहणपरिणामाज्जायते, न तु प्रतिपत्तुः प्रतिसमयं विनाशे सति, यत एकैकमप्यक्षरं पदसत्कं सङ्‌ख्यातीतसमयसम्भूतम्, सङ्‌ख्यातानि चाक्षराणि पदम्, सङ्‌ख्यातपदं च वाक्यम्, तदर्थग्रहणपरिणामाच्च 'सर्वं क्षणभङ्गुरम्' इति विज्ञानं भवेत्, तच्चायुक्तं समयनष्टस्येति, आह च–

**कह वा सव्वं खणियं विन्नायं ? जइ मई सुयाउ त्ति ।**
**तदसंखसमयसुत्तत्थगहणपरिणामओ जुत्तं** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न उ पइसमयविणासे जेणिक्किक्कक्खरं चि य पयस्स ।**
**संखाइयसामाइयं संखेज्जाइं पयं ताइं ॥**

**संखेज्जपयं वक्कं तदत्थगहणपरिणामओ होज्जा ।**
**सव्वखणभंगनाणं तदजुत्तं समयनट्ठस्स ॥**

[विशेषाव० २४०१-२४०३] इति ।

तथा सर्वथोच्छेदे तृप्त्यादयो न घटन्ते, पूर्वसंस्कारानुवृत्तावेव तेषां युज्यमानत्वाद्, आह च–

**तित्ती समो किलामो सारिक्ख-विवक्ख-पच्चयाईणि ।**
**अज्झयणं झाणं भावणा य का सव्वनासम्मि ? ॥**

[विशेषाव० २४०४] त्ति ।

अत्र **तृप्तिः**-ध्राणिः, **श्रमः**-अध्वादिखेदः, **क्लमो**-ग्लानिः, **सादृश्यं** साधर्म्यम्, **विपक्षो**-वैधर्म्यम्, **प्रत्ययः**-अवबोधः, शेषपदानि प्रतीतानि, इत्यादि बहु वक्तव्यं तत्तु स्थानान्तरादवसेयमिति । तदेवमात्मा स्थिति-भवन-भङ्गरूपः स्थिररूपापेक्षया नित्यो नित्यत्वाच्चैकः, भवन-भङ्गरूपापेक्षया त्वनित्यः अनित्यत्वाच्चानेक इति, आह च–

**जमणंतपज्जयमयं वत्थुं भुवणं व चित्तपरिणामं ।**
**ठिइ-विभव-भंगरूवं णिच्चाणिच्चाइ तोऽभिमयं ॥**

[विशेषाव० २४१६] त्ति ।

एवं च–

**सुह-दुक्ख-बंध-मोक्खा उभयनयमयाणुवत्तिणो जुत्ता ।**
**एगयरपरिच्चाए सव्वव्ववहारवुच्छित्ति ॥** [विशेषाव० २४१७] त्ति ।

अथवा एक आत्मा कथञ्चिदेवेति, यतो जैनानां न हि सर्वथा किञ्चिद्वस्तु एकमनेकं वाऽस्ति, सामान्य-विशेषरूपत्वाद्वस्तुनः । अथ ब्रूयात्-विशेषरूपमेव वस्तु, सामान्यस्य विशेषेभ्यो भेदाभेदाभ्यां चिन्त्यमानस्यायोगात्, तथाहि–सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा स्यात् ? न भिन्नमुपलम्भाभावाद्, न चानुपलभ्यमानमपि सत्तया व्यवहर्तुं शक्यम्, खरविषाणस्यापि तथाप्रसङ्गात् । अथाभिन्नमिति पक्षः, तथा च सामान्यमात्रं वा स्याद्विशेषमात्रं वेति, न ह्येकस्मिन् सामान्यमेकं विशेषास्त्वनेकरूपा इत्यसङ्कीर्णवस्तुव्यवस्था स्यादिति, अत्रोच्यते, न ह्यस्माभिः सामान्य-विशेषयोरेकान्तेन भेदोऽभेदो वाऽभ्युपगम्यते, अपि तु विशेषा एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रधानीकृतातुल्यरूपा उपसर्जनीकृततुल्यरूपा विषमतया प्रज्ञायमाना विशेषा व्यपदिश्यन्ते, त एव च विशेषा उपसर्जनीकृतातुल्यरूपाः प्रधानीकृततुल्यरूपाः समतया प्रज्ञायमानाः सामान्यमिति व्यपदिश्यन्त इति, आह च-

**निर्विशेषं गृहीताश्च, भेदाः सामान्यमुच्यते ।**
**ततो विशेषात् सामान्यविशिष्टत्वं न युज्यते ॥**
**वैषम्यसमभावेन, ज्ञायमाना इमे किल ।**
**प्रकल्पयन्ति सामान्यविशेषस्थितिमात्मनि** ॥ [ ] इति ।

तदेवं सामान्यरूपेणात्मा एको विशेषरूपेण त्वनेकः, न चात्मनां तुल्यं रूपं नास्ति, एकात्मव्यतिरेकेण शेषात्मनामनात्मत्वप्रसङ्गादिति, तुल्यं च रूपमुपयोगः, **उपयोगलक्षणो जीवः** [ ] इति वचनात्, तदेवमुपयोगरूपैकलक्षणत्वात् सर्वे एवात्मान एकरूपाः, एवं चैकलक्षणत्वादेक आत्मेति । अथवा जन्म-मरण-सुख-दुःखादिसंवेदनेष्वसहायत्वादेक आत्मेति भावनीयमिति । इह च सर्वसूत्रेषु कथञ्चिदित्यनुस्मरणीयम्, कथञ्चिद्वादस्याविरोधेन सर्ववस्तुव्यवस्थानिबन्धनत्वात्, उक्तं च—

**स्याद्वादाय नमस्तस्मै, यं विना सकलाः क्रियाः ।**
**लोकद्वितयभाविन्यो, नैव साङ्गत्यमिय्रति** ॥ [ ]

तथा-

**नयास्तव स्यात्पदसत्त्वलाञ्छिता, रसोपविद्धा इव लोहधातवः ।**
**भवन्त्यभिप्रेतफला यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः ॥**
(बृहत्स्वयम्भूस्तोत्रे) इति । (स्था० सू० सू०२) । **18/4**

**[86]** अथाशुचित्वभावनामाह-

**रसा-ऽसृग्-मांस-मेदो-ऽस्थि-मज्जा-शुक्रा-ऽन्त्र-वर्चसाम् ।**
**अशुचीनां पदं कायः, शुचित्वं तस्य तत् कुतः ? ॥७२॥**

रसो-भुक्तपीतान्न-पानपरिणामजो निःस्यन्दः, असृग्-रक्तं रससम्भवो धातुः, मांसंपिशितमसृग्भवम्, मेदो-वपा मांससम्भवम्, अस्थि-कीकसं मेदःसम्भवम्, मज्जासारोऽस्थिसम्भवः, शुक्रं-रेतो मज्जसम्भवम्, अन्त्रं-पुरीतत्, वर्चो-विष्टा, एतेषामशुचिद्रव्याणां पदं-स्थानं कायः । तत्-तस्मात् तस्य कायस्य कथं शुचित्वम्? न कथञ्चिदित्यर्थः ॥७२॥ (योगशा० प्र०४, श्लो० ७२) **19/4**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[87] हृदयसन्निधापनमपि स्त्रीणां बहुदोषत्वाद् गुणहानिहेतुः, किं पुना रमणमित्येतदेवाह-

**वञ्चकत्वं नृशंसत्वम्, चञ्चलत्वं कुशीलता ।**

**इति नैसर्गिका दोषा, यासां तासु रमेत कः ॥८४॥**

वञ्चकत्वं-मायाशीलता, नृशंसत्वं-क्रूरकर्मकारिता, चञ्चलत्वं-कुत्राप्यवस्थित-चित्तत्वाभावः, कुशीलता-दुःस्वभावता उपस्थसंयमाभावो वा, इत्येते नैसर्गिकाः-स्वाभाविका दोषा न त्वौपाधिकाः, तासु को रमेत ॥८४॥

अत एव –

**भवस्य बीजं नरकद्वारमार्गस्य दीपिका ।**

**शुचां कन्दः कलेर्मूलम्, दुःखानां खानिरङ्गना ॥८७॥**

भवस्य-संसारस्याङ्कुरस्येव बीजं तत्कारणत्वात् संसारस्य, नरकद्वारं-नरकप्रवेशः, तत्र यो मार्गः-पन्थास्तत्र दीपिकेव दीपिका तत्प्रकाशकत्वात्, शुचां-शोकानां वल्लीनामिव कन्दस्तत्प्ररोहहेतुत्वात्, कलेः-कलहस्य तरोरिव मूलं पादो वृद्धिहेतु-त्वात्, दुःखानां- शारीर-मानसानां लवणादीनामिव खानिराकरस्तत्समुत्थत्वात् दुःखानाम्, काऽसौ ? अङ्गना । एवं तावद्यतिधर्मानुरक्तं गृहस्थं प्रति सामान्येन मैथुनदोषाः स्त्रीदोषाश्चोक्ताः ॥८७॥ (योगशा० प्र०२, श्लो० ८४-८७) **19/4**

[88] ये त्वत्रापि शुचित्वमानिनस्तानुपालभते –

**नवस्त्रोतःस्त्रवद्विस्त्ररसनिःस्यन्दपिच्छिले ।**

**देहेऽपि शौचसङ्कल्पो महन्मोहविजृम्भितम् ॥७३॥**

नवभ्यो नेत्र २-श्रोत्र २-नासा २-मुख-पायूपस्थेभ्यः स्त्रोतोभ्यो-निर्गमद्वारेभ्यः स्त्रवन्- क्षरन् विस्त्र-आमगन्धिर्योऽसौ रसस्तस्य निःस्यन्दो-निर्यासस्तेन पिच्छिलो विजिविलो यः कायस्तस्मिन्नपि शौचसङ्कल्पः शुचित्वाभिमानो यः स महद् गुरुतरं मोहस्य विजृम्भितम् ।

अत्रान्तरश्लोकाः –

शुक्रशोणितसम्भूतो मलनिःस्यन्दवर्धितः ।

गर्भे जरायुसंछन्नः शुचिः कायः कथं भवेत् ? ॥१॥

मातृजग्धान्नपानोत्थरसं नाडीक्रमागतम् ।

पायं पायं विवृद्धः सन्, शौचं मन्येत कस्तनोः ? ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषधातुर्मलाकीर्णम्, कृमिगण्डूपदास्पदम् ।
रोगभोगिगणैर्जग्धम्, शरीरं को वदेत् शुचि ॥३॥
सुस्वादून्यन्नपानानि, क्षीरेक्षुविकृती अपि ।
भुक्तानि यत्र विष्टायै, तच्छरीरं कथं शुचि ? ॥४॥
विलेपनार्थमासक्तः, सुगन्धिर्यक्षकर्दमः ।
मलीभवति यत्राशु, क्व शौचं तत्र वर्ष्मणि ? ॥५॥
जग्ध्वा सुगन्धि ताम्बूलम्, सुप्तो निश्युत्थितः प्रगे ।
जुगुप्सते वक्त्रगन्धम्, यत्र तत् किं वपुः शुचि ? ॥६॥
स्वतः सुगन्धयो गन्ध-धूप-पुष्पस्रगादयः ।
यत्सङ्गाद् यान्ति दौर्गन्ध्यम्, सोऽपि कायः शुचीयते ॥७॥
अभ्यक्तोऽपि विलिप्तोऽपि, धौतोऽपि घटकोटिभिः ।
न याति शुचितां कायः शुण्डाघट इवाशुचिः ॥८॥
मृज्जलानलवातांशुस्नानैः शौचं वदन्ति ये ।
गतानुगतिकैस्तैस्तु विहितं तुषकण्डनम् ॥९॥
शरीरकस्यैवमशौचभावनां, मदाभिमानस्मरसाददायिनीम् ।
विभावयन् निर्ममतामहाभरं, वोढुं दृढः स्याद् बहुनोदितेन किम् ? ॥१०॥
अशौचभावना ॥६॥७३॥ (योगशा० प्र०४, श्लो० ७३) **19/5**

**[89] नवि मुंडिएण समणो, न ॐकारेण बंभणो ।**
**न मुणी रण्णवासेणं, कुसचीरेण न तावसो ॥ २९ ॥**

**समयाए समणो होइ, बंभचेरेण बंभणो ।**
**नाणेन य मुणी होइ, तवेणं होइ तावसो ॥३०॥**

अन्यच्च-नेति-निषेधे, 'अपिः'-पूरणे, 'मुण्डितेन'-केशापनयनात्मकेन समं मनोऽस्येति निरुक्तविधिना श्रमणः-निर्ग्रन्थः, 'न'-नैव ॐकारो(रेणो)पलक्षणत्वाद् 'ॐभूर्भुवःस्वः'इत्याद्युच्चारणरूपेण ब्राह्मणः, तथा न मुनिररण्यवासेन, कुशो-दर्भविशेषस्तन्मयं चीवरं कुशचीवरम्, वल्कलोपलक्षणमेतत्, तेन तापसः, अनूदितं चैतद्वाचकैः-"मुण्डनात् श्रमणो नैव, संस्काराद् ब्राह्मणो न वा । मुनिर्नारण्य-वासित्वात् वल्कलान्न च तापसो ॥१॥ भवतीति सर्वत्र शेषः । कथममी तर्हि संभवन्तीत्याह-'समतया'-रागद्वेषाभावरूपया श्रमणो भवति, ब्रह्मणश्चरणं ब्रह्मचर्यम्, ब्रह्म च द्विधा, यत उक्तम्-"द्वे ब्रह्मणी वेदितव्ये, शब्दब्रह्मपरं च यत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दब्रह्मणि निष्णातः, परं ब्रह्माधिगच्छति ॥१॥ एतानि च पराणि ब्रह्माणि वरिष्ठानि यानि प्रागहिंसादीन्युक्तानीति, एतद्रूपमेवेह ब्रह्मोच्यते, तेन ब्राह्मणो भवति, 'ज्ञानेन'-हिताहितावगमरूपेण मुनिर्भवति 'तपसा'-बाह्याभ्यन्तरभेदभिन्नेन भवति तापसः, सर्वत्राभिधानान्यथाऽनुपपत्तिरिह हेतुः । (उत्तरा० अध्य० २५. गा० २९-३०) । **19/7**

**[90]** सांप्रतमुक्तगुणानुवादतः फलोपदर्शनतश्च तस्यैव माहात्म्यमाह-

**समुद्दगंभीरसमा दुरासया, अचक्किया केणइ दुप्पहंसया ।**
**सुयस्स पुण्णा विउलस्स ताइणो, खवेत्तु कम्मं गइमुत्तमं गया ॥३१॥**

व्या० समुद्दगम्भीरसमत्ति आर्षत्वाद् गाम्भीर्येण अलब्धमध्यात्मकत्वेन गुणेन समा गाम्भीर्यसमाः समुद्रस्य गाम्भीर्यसमाः समुद्रगाम्भीर्यसमाः, दुरासयत्ति दुःखेनाश्रीयन्ते-अभिभवबुद्ध्याऽऽसाद्यन्ते वा—जेतुं संभाव्यन्ते केनापीति दुराश्रया दुरासदा वा, अत एव अचक्कियत्ति—अचकिताः-अत्रासिताः, केनचिदिति-परीषहादिना परप्रवादिना वा, तथा दुःखेन प्रधर्ष्यन्ते-पराभूयन्ते केनापीति दुष्प्रधर्षास्त एव दुष्प्रधर्षकाः, क एवंविधाः ? इत्याह-सुयस्स पुण्णा विउलस्स' त्ति-सुब्व्यत्ययाच्छ्रुतेन-आगमेन पूर्णाः-परिपूर्णा विपुलेन-अङ्गानङ्गादिभेदतो विस्तीर्णेन तायिनः त्रायिणो वा एवंविधाश्च बहुश्रुता एव, तानेव फलतो विशेषयितुमाह-क्षपयित्वा'-विनाश्य कर्म्म-ज्ञानावरणादि, गम्यत इति गतिस्ताम् 'उत्तमां-प्रधानाम्, मुक्तिमिति यावत्, गताः-प्राप्ताः, उपलक्षणत्वाद् गच्छन्ति-गमिष्यन्ति च । इहैकवचनप्रक्रमेऽपि बहुवचननिर्देशः, पूज्यताख्यापनार्थं व्याप्ति-प्रदर्शनार्थं चेति सूत्रार्थः । (उत्त० अ० ११ गा० ३१) **19/8**

**[91]** 'जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम्' (त० सू० १।४) इत्युभयवादागमप्रतिपाद्यान् भावांस्तथैवाऽसंकीर्णरूपान् प्रतिपादयन् सैद्धान्तिकः पुरुषः, इतरस्तु तद्विराधक इत्याह—

**जो हेउवायपक्खम्मि, हेउओ आगमे य आगमिओ ।**
**सो ससमयपण्णवओ, सिद्धन्तविराहओ अन्नो ॥४५॥**

यो हेतुवादागमविषयमर्थं हेतुवादागमेन, तद्विपरीतागमविषयं चार्थमागममात्रेण प्रदर्शयति वक्ता स स्वसिद्धान्तस्य=द्वादशाङ्गस्य प्रतिपादनकुशलः, अन्यथा प्रति-पादयंश्च-तदर्थस्य प्रतिपादयितुमशक्यत्वात् तत्प्रतिपादके वचस्यनास्थादिदोषमुत्पादयन् सिद्धान्तविराधको भवति, सर्वज्ञप्रणीतागमस्य निस्सारताप्रदर्शनात् तत्प्रत्यनीको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतीति यावत् ।

तथाहि—पृथिव्यादेर्मनुष्यपर्यन्तस्य षड्विधजीवनिकायस्य जीवत्वमागमेन अनुमानादिना च प्रमाणेन सिद्धं तथैव प्रतिपादयन् स्वसमयप्रज्ञापकः, अन्यथा तद्विराधकः । यतः प्रव्यक्तचेतने त्रसनिकाये चैतन्यलक्षणं जीवत्वं स्वसंवेदनाध्यक्षतः स्वात्मनि प्रतीयते, परत्र त्वपरेणानुमानतः । वनस्पतिपर्यन्तेषु पृथिव्यादिषु स्थावरेषु अनुमानतश्चैतन्यप्रतिपत्तिः । तथाहि, "वनस्पतयश्चेतनाः वृक्षायुर्वेदाभिहित-प्रतिनियतकालायुष्क-विशिष्टौषधप्रयोगसम्पादितवृद्धि-हानि-क्षत-भग्नसंरोहण-प्रतिनियतवृद्धि-षड्भावविकारोत्पादनाशावस्थानियतविशिष्टशरीरस्निग्धत्व-रुक्षत्व-विशिष्टदौहृद-बालकुमार-वृद्धावस्था-प्रतिनियत-विशिष्टरस-वीर्यविपाकप्रतिनियत-प्रदेशाहारग्रहणादिमत्त्वान्यथानुपपत्तेः, विशिष्टस्त्रीशरीरवत्"—इत्याद्यनुमानं भाष्यकृत्प्रभृतिभिर्विस्तरतः प्रतिपादितं तच्चैतन्यप्रसाधकमित्यनुमानतः तेषां चैतन्यमात्रं सिद्ध्यति । साधारण-प्रत्येकशरीरत्वादिकस्तु भेदः—

'गूढसिर-संधि-पव्वं, समभंग-महीरुगं च छिन्नरुहं । साहारणं सरीरं तव्विवरीयं च पत्तेयं ।' (जीवविचार प्र० गाथा-१२) इत्याद्यागमप्रतिपाद्य एव ।

जीवलक्षणंव्यतिरिक्तलक्षणास्त्वजीवा धर्माऽधर्माकाश-काल-पुद्गलभेदेन पञ्चविधाः । तत्र पुद्गलास्तिकायव्यतिरिक्तानां स्वतो मूर्त्तिमद् द्रव्यसम्बन्धमन्तरेण आत्मद्रव्यवदमूर्त्तत्वाद् अनुमानप्रत्ययावसेयता । तथाहि, गति-स्थित्यवगाहलक्षणं पुद्गलास्तिकायादिकार्यं विशिष्टकारणप्रभवं विशिष्टकार्यत्वात्, शाल्यङ्कुरादिकार्यवत्, यश्चासौ कारणविशेषः स धर्माऽधर्माऽऽकाशलक्षणो यथासंख्यमवसेयः । कालस्तु विशिष्टपरापरप्रत्ययादिलिङ्गानुमेयः । पुद्गलास्तिकायस्तु प्रत्यक्षाऽनुमानलक्षणप्रमाण-द्वयगम्यः । यस्तेषां धर्मादीनामसंख्येयप्रदेशात्मकत्वादिको विशेषः तत्प्रदेशानां च सूक्ष्म-सूक्ष्मतरत्वादिको विभागः स 'कालो य होइ सुहुमो' ( ) इत्याद्यागम-प्रतिपाद्य एव नागमनिरपेक्षयुक्त्यवसेयः । एवमाश्रवादिष्वपि तत्त्वेषु युक्त्यागमगम्येषु युक्तिगम्यमंशं युक्तित एव, आगमनम्यं तु केवलागमत एव प्रतिपादयन् स्वसमयप्रज्ञापकः, इतरस्तु तद्विराधक इति प्रज्ञापकलक्षणमवगन्तव्यम् ॥४५॥ (सन्म० कां०-३, गा० ४५) **19/8**

**[92] आमोसहि विप्पोसहि खेलोसहि जल्लमोसही चेव ।**
**संभिन्नसोउज्जुमइ सव्वोसहि चेव बोद्धव्वो ॥६९॥**

**चारण आसीविस केवली य मणनाणिणो य पुव्वधरा ।**
**अरहंत चक्कवट्टी बलदेवा वासुदेवा य ॥७०॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमर्शनमामर्शः संस्पर्शनमित्यर्थः । स एव औषधिर्यस्यासावामर्शौषधिः साधुरेव संस्पर्शनमात्रादेव व्याध्यपनयनसमर्थ इत्यर्थः । लब्धि-लब्धिमतोरभेदात् स एवामर्शलब्धिरिति, एवं विट्खेलजल्लेष्वपि योजना कर्तव्येति ।

तत्र 'विड्'-उच्चारः 'खेलः'-श्लेष्मा 'जल्लो'-मल इति, भावार्थः पूर्ववत्, सुगन्धाश्चैते भवन्ति । तथा यः सर्वतः शृणोति स संभिन्नश्रोता, अथवा श्रोतांसि इन्द्रियाणि संभिन्नान्येकैकशः सर्वविषयैरस्य परस्परतो वेति संभिन्नश्रोताः संभिन्नान् वा परस्परतो लक्षणतोऽभिधानतश्च सुबहूनपि शब्दान् शृणोति संभिन्नश्रोता, एवं संभिन्नाश्रोतृत्वमपि लब्धिरेव । तथा ऋज्वी मतिः-ऋजुमतिः सामान्यग्राहिकेत्यर्थः, मनःपर्यायज्ञानविशेषः अयमपि च लब्धिविशेष एव, लब्धिलब्धिमतोश्चाभेदात् ऋजुमतिः साधुरेव । तथा सर्व एव विण्मूत्रकेशनखादयो विशेषाः खल्वौषधयो यस्य व्याध्युपशमहेतव इत्यर्थः, असौ सर्वौषधिश्च, एवमेते ऋद्धिविशेषा बौद्धव्या इति गाथार्थः ॥६९॥ द्वितीयगाथाव्याख्या—अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः, ते च द्विभेदाः—विद्याचारणा जङ्घाचारणाश्च, तत्र जङ्घाचारणः शक्तितः किल रुचकवरद्वीपगमनशक्तिमान् भवति, स च किलैकोत्पातेनैव रुचकवरद्वीपं गच्छति, आगच्छंश्चोत्पातद्वयेनागच्छति, प्रथमेन नन्दीश्वरम्, द्वितीयेन यतो गतः एवमूर्ध्वमपि एकोत्पातेनैवाचलेन्द्रमूर्ध्नि स्थितं पाण्डुकवनं गच्छति, आगच्छंश्चोत्पातद्वयेनागच्छति प्रथमेन नन्दनवनं द्वितीयेन यतो गतः । विद्याचारणस्तु नन्दीश्वरद्वीपगमनशक्तिमान् भवति, स त्वेकोत्पातेन मानुषोत्तरं गच्छति, द्वितीयेन नन्दीश्वरम्, तृतीयेन त्वेकेनैवाऽऽगच्छति यतो गतः, एवमूर्ध्वमपि व्यत्ययो वक्तव्य इति । अन्ये तु शक्तित एव रुचकवरादिद्वीपमनयोर्गोचरतया व्याचक्षत इति। तथा आस्यो-दंष्ट्राः तासु विषमेषामस्तीति आसीविषाः, ते च द्विप्रकारा भवन्ति-जातितः कर्मतश्च, जातितो वृश्चिकमण्डूकोरगमनुष्यजातयः, कर्मतस्तु तिर्यग्योनयः मनुष्या देवाश्चा सहस्रारादिति, एते हि तपश्चरणानुष्ठानतोऽन्यतो वा गुणतः खल्वासीविषा भवन्ति, देवा अपि तच्छक्तियुक्ता भवन्ति, शापप्रदानेनैव व्यापादयन्तीत्यर्थः । तथा केवलिनश्च प्रसिद्धा एव । तथा मनोज्ञानिनो विपुलमनःपर्यायज्ञानिनः परिगृह्यन्ते । पूर्वाणि धारयन्तीति पूर्वधराः, दशचतुर्दशपूर्वविदः । अशोकाद्यष्टमहाप्रतिहार्यादिरूपां पूजामर्हन्तीत्यर्हन्तः तीर्थंकरा इत्यर्थः । 'चक्रवर्त्तिनः'-चतुर्दशरत्नाधिपाः षट्खण्डभरतेश्वराः । 'बलदेवाः'-प्रसिद्धा एव । 'वासुदेवाः'-सप्तरत्नाधिपा अर्धभरतप्रभव इत्यर्थः । एते हि सर्व एव चारणादयो लब्धिविशेषा वर्त्तन्ते इति गाथार्थः ॥७०॥ (आव० नि० गा०६९-७०) **20/1**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[93]** अनुमानान्तरमपि तत्सिद्धये प्राह–

**किरियाफलभावाओ दाणाईणं फलं किसीए व्व ।**
**तं चिय दाणाइफलं मणप्पसायाई जइ बुद्धी ॥१६१५॥**

**किरियासामण्णाओ जं फलमस्सावि तं मयं कम्मं ।**
**तस्स परिणामरूवं सुह-दुक्खफलं जओ भुञ्जो ॥१६१६॥**

'दाणाईणं फलं ति' इह दानादिक्रियाणां फलमस्ति 'किरियाफलभावाओ त्ति' सचेतनारब्धक्रियाणां फलभावात् फलभावदर्शनादित्यर्थः, यथा कृषि-क्रियायाः । इह या चेतनारब्धक्रिया तस्याः फलं दृष्टम् यथा कृष्यादिक्रियायाः, चेतनारब्धाश्च दानादिक्रियाः, तस्मात् फलवत्यः, यच्च तासां फलं तत् कर्म । या तु निष्फला क्रिया सा सचेतनारब्धापि न भवति, यथा परमाण्वादिक्रिया, सचेतनारब्धाश्च दानादिक्रियाः, तस्मात् फलवत्यः । स्यादेतत्, अनैकान्तिकोऽयं हेतुः, चेतनारब्धानामपि कासांचित् कृष्यादिक्रियाणां निष्फलत्वदर्शनात् । तदयुक्तम्, फलवत्त्वाभिप्रायेणैव तदारम्भात् । यच्च क्वचिद् निष्फलत्वमपि दृश्यते तत्सम्यग्-ज्ञानाद्यभावेन सामग्रीवैकल्याद् द्रष्टव्यम्, मनःशुद्ध्यादिसामग्रीविकलतया दानादि-क्रिया अपि निष्फला इष्यन्त एवेत्यदोषः ।

यदि चात्र परस्यैवंभूता बुद्धिः स्यात् । कथम्भूता ? इत्याह–'तं चियेत्यादि' तदेव दानादिक्रियाणां फलं यदस्मादृशामपि प्रत्यक्षं मनःप्रसादादि । इदमुक्तं भवति–कृष्यादिक्रिया दृष्टधान्याद्यवाप्तिफला दृष्टाः, अतो दानादिक्रियाणामपि दृष्टमेव मनःप्रसादादिकं फलं भविष्यति, किमदृष्टकर्मलक्षणफलसाधनेन ? । तत इष्टविरुद्धसाधनाद् विरुद्धोऽयं हेतुः । तर्ह्यत्र वयं ब्रूमः किरिया सामण्णाओ इत्यादि अस्यापि मनःप्रसादस्य यत् फलं तद् मम कर्म संमतम् । ननु मनःप्रसादस्यापि कथं फलमभिधीयते ? इत्याह किरियासामण्णाओ त्ति इदमुक्तं भवति–मनः-प्रसादोऽपि क्रियारूप एव, ततश्च यथा दानकृष्यादिकाः क्रियाः फलवत्यः, तथा क्रियासाम्याद् मनःप्रसादस्यापि फलेन भवितव्यमेव, यच्च तस्य फलं तत् कर्मैव, इति न कश्चिद् व्यभिचारः ।

यतः कर्मणः सकाशात्, किम् ? इत्याह–'सुह-दुक्खफलं जओ त्ति सुख-दुःखरूपं फलं सुख-दुःखफलं यतो यस्मात् कर्मणः सकाशाज्जायते । कथम् ? भूयः पुनः पुनरपि । कथम्भूतं यत् सुख-दुःखफलम् ? इत्याह–तस्यैव कर्मण-स्तज्जनकत्वेन यत् परिणमनं परिणामस्तद्रूपमिति । एतदुक्तं भवति– यतः कर्मणः सकाशात् प्रतिक्षणं तत्परिणतिरूपं सुख-दुःखफलं प्राणिनां समुपजायते, तत् कर्म

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनःप्रसादक्रियाया अपि फलमभिमतम् । आह-नन्वनन्तरगाथायां दानादिक्रियाफलं कर्म इति वदता दानादिक्रियैव कर्मणः कारणमुक्ता, अत्र तु मनःप्रसादादिक्रिया तत्कारणमुच्यते, इति कथं न पूर्वापरविरोधः ? इति । सत्यम्, किन्तु मनःप्रसादादिक्रियैवानन्तर्येण कर्मणः कारणम्, केवलं तस्या अपि मनःप्रसादादिक्रियाया दानादिक्रियैव कारणम्, अतः कारणकारणे कारणोपचाराददोष इति ॥१६१५॥ ॥१६१६॥ (विशेषा० गा० १६१५-१६) **21/1**

**[94]** एवमुक्तेन न्यायेन हीनादिजन्मप्रतिपत्तिः कर्मोदयजनितेति महद्वैराग्यकारणम्, तथेदमपरं वैराग्यस्य निमित्तमाख्याति –

**देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।**
**दृष्ट्वा कथमिह विदुषाम्, भवसंसारे रतिर्भवति ॥१०२॥**

**टीका**—देशो—मगधाङ्गकलिङ्गादिरार्यः, शकयवनकिरातादिरनार्यः, कुलमिक्ष्वाकुहरिवंशादिकम्, अपरं म्लेच्छदासचाण्डालादिकुलम् । सल्लक्षणावयवसन्निवेशविशेषो देहः, अपरः कुब्जहुण्डसन्निवेशादिः । विज्ञानं-विशिष्टो बोधो जीवादिपदार्थविषयः अपरः प्रकृष्टाज्ञानपरिगतः किञ्चिज्ज्ञः । (आयुः) दीर्घेणायुषा यथा-कालविभागवर्तिना युक्तः, अपरस्तु गर्भकौमारयौवनावस्थादिषु अनियतायुः । बलं-शारीरादि, तेन सम्पन्नो वीर्यवान्, अपरो दुर्बलः स्वशरीरमपि कथञ्चिद् धारयति । भोगवाननेकेष्टशब्दादिसम्पदुपभोगसमर्थः, अपरो भोगरहितस्सतोऽपि च भोगानसमर्थो भोक्तुम् । हिरण्यसुवर्णधनधान्यादिविभूत्या युक्त एकः, अपरो दारिद्र्याभिभूतो जरदङ्गी खण्डनिवसनः, एषां देशादीनां समृद्धिपर्यन्तानां वैषम्यं-विषमतां विलोक्य कर्मोदयजनिताम्, कथं-केन प्रकारेण, विदुषां-बुद्धिमतां नारकादिभवसंसारे रतिः-प्रीतिर्भवति ? । इति कर्मोदयनिमित्तं शुभाशुभलक्षणं देशादि विज्ञाय उद्वेगः संसारात्कार्यः । तस्माद् धर्मानुष्ठानादर एव श्रेयान् इति ॥१०२॥ (प्रशम० गा० १०२) **21/4**

**[95] अप्पा कत्ता विकत्ता य, सुहाण य दुहाण य ।**
**अप्पा मित्तममित्तं च, दुप्पट्ठियसुपट्ठिओ ॥३७॥**

यथा चैतदेवं तथाऽऽह—आत्मैव 'कर्त्ता'विधायको दुःखानां सुखानां चेति योगः । प्रक्रमाच्चात्मन एव विकरिता च विक्षेपकश्चात्मैव तेषामेव अतश्चात्मैव मित्रम्-उपकारितया सुहृत्, अमित्तं ति—अमित्रं च—अपकारितयाऽसुहृत् । कीदृक् सन् ? दुप्पट्ठियसुप्पट्ठिओ'त्ति, दुष्टं प्रस्थितः प्रवृत्तो दुष्प्रस्थितः दुराचारविधातेतियावत्, सुष्ठु प्रस्थितः-सुप्रस्थितः सदनुष्ठानकर्त्तेतियावत्, योऽर्थः एतयोर्विशेषण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समासः, दुष्प्रस्थितो ह्यात्मा समस्तदुःखहेतुरिति वैतरण्यादिरूपः, सुप्रस्थितश्च सकलसुखहेतुरिति कामधेन्वादिकल्पः । तथा च प्रव्रज्यावस्थायामेव सुप्रस्थितत्वेनात्मनोऽन्येषां च योगकरणसमर्थत्वान्नाथत्वमिति सूत्रद्वयगर्भार्थः । (उत्तरा० अ०२०, गा०३७) **21/5**

**[96] उवसामं उवणीआ, गुणमहया जिणचरित्तसरिसंपि ।**
**पडिवायंति कसाया, किं पुण सेसे सरागत्थे ॥११८॥**

**जइ उवसंतकसाओ, लहइ अणंतं पुणो वि पडिवायं ।**
**ण हु भे वीससियव्वं, थेवे य कसायसेसंमि ॥११९॥**

**अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च ।**
**ण हु भे वीससियव्वं, थोवंपि हु तं बहुं होइ ॥१२०॥**

**व्याख्या**—उपशमः-शान्तावस्था तमुपशमम्, अपि शब्दात् क्षयोपशममपि, उपनीताः गुणैर्महान्-गुणमहान्, तेन गुणमहता-उपशमकेन, किम् ? प्रतिपातयन्ति कषायाः संयमाद् भवे वा, कम् ? जिनचारित्रतुल्यमपि उपशमकम्, पुनः शेषान् सरागस्थानिति । यथेह भस्मच्छन्नानलः पवनाद्यासादितसहकारिकारणान्तरः पुनः स्वरूपमुपदर्शयति, एवमसावप्युदितकषायानलो जघन्यतस्तद्भव एव मुक्तिं लभते, उत्कृष्टतस्तु देशोनमर्धपुद्गलपरावर्तमपि संसारमनुबध्नातीति ॥११८॥ यतश्चैवं तीर्थकरोपदेशः अतः औपदेशिकं गाथाद्वयमाह निर्युक्तिकारः-प्रथमगाथा प्रकटार्थत्वान्न वितन्यते । द्वितीयगाथाव्याख्या-ऋणस्य स्तोकं ऋणस्तोकं, तथा च स्वल्पादपि ऋणात् दासत्वं प्राप्ता वणिग्दुहितेति, उक्तं च भाष्यकारेण-दासत्तं देइ अणं अचिरा मरणं वणो विसप्पंतो । सव्वस्स दाहमग्गी दिंति कसाया भवमणंतं ॥१॥ अपिचशब्दनिपातसाफल्यं पूर्वोक्तानुसारेण स्वबुद्ध्या वक्तव्यमिति गाथार्थः ॥१२०॥ (आव०नि० गा० ११८-१२०) **21/5**

**[97]** द्वितीयनिर्युक्तिगाथाभावार्थमाह—

**दासत्तं देइ रिणं( अणं ) अइरा मरणं वणो विसप्पंतो ।**
**सव्वस्स दाहमग्गी दिंति कसाया भवमणंतं ॥१३११॥**

स्तोकमपि ऋणं क्रमेण वर्धमानं दासत्वं ददाति, यथा-काचिद् वणिग्दुहिता गृहीतव्रतस्य निजभ्रातुरागतस्य प्रतिदिनं कर्षवृद्ध्या हट्टात् तैलस्य कर्षमानीय दत्तवती । साधुसेवाव्याक्षेपाच्च तया वणिजोऽसौ न दत्तः । वर्धमानश्च क्रमेण घटादिसंख्यां प्राप्तः । तया च कर्पासकर्तनमात्रेणैव जीवनादसौ दातुं न शकितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तस्यैव वणिजः सा ऋणदासी संजाता । अन्यदा चागतेन तेनैव बन्धुसाधुना विज्ञातस्तद्व्यतिकरः । कृता च तस्य वणिजो देशना । मोचयित्वा चेयं ग्राहिता दीक्षाम् । इत्येवं दासत्वदायकं स्तोकमपि ऋणम् । स्तोकोऽपि च व्रणशेषोऽपथ्यादिकमासाद्य विसर्पन्नन्तर्बहिश्च प्रसरन्नचिराद् मरणं प्रयच्छति । अग्नेश्च लवोऽपि मार्गादौ पतितस्तृणादिके लग्नः परंपरया क्रमेण प्रसरन् समस्तमपि ग्राम-नगरादिकं निर्दहति । एवं स्तोकशेषा अपि कषायाः कुतश्चिद् निमित्ताद् वृद्धिमुपगच्छन्तोऽनन्तं भवमुपकल्पयन्तीति ॥१३११॥ (विशेषा० भा० गा० १३११) **21/5**

**[98]** तत्र लोकनिरूपणायाऽऽह–

**णामं १ ठवणा २ दविए ३ खित्ते ४ काले ५ भवे अ ६ भावे अ ७।**
**पज्जवलोगे अ ८ तहा अट्ठविहो लोगणिक्खेवो ॥१०५७॥**

व्याख्या–नामलोकः स्थापनालोकः द्रव्यलोकः क्षेत्रलोकः काललोकः भवलोको भावलोकश्च पर्यायलोकश्च तथा, एवमष्टविधो लोकनिक्षेप इति गाथासमासार्थः ।. व्यासार्थं तु भाष्यकार एव वक्ष्यति, तत्र नामस्थापने अनादृत्य द्रव्यलोकमभिधित्सुराह–

**जीवमजीवे रूवमरूवी सपएसमप्पएसे अ ।**
**जाणाहि दव्वलोगं, णिच्चमणिच्चं च जं दव्वं ॥१९५॥** (भा०)

व्याख्या–जीवाजीवावित्यत्रानुस्वारोऽलाक्षणिकः, तत्र सुखदुःखज्ञानोपयोगलक्षणो जीवः, विपरीतस्त्वजीवः, एतौ च द्विभेदौ–रूप्यरूपिभेदाद्, आह च–'रूप्यरूपिणावि'ति, तत्रानादिकर्मसन्तानपरिगता रूपिणः-संसारिणः, अरूपिणस्तु कर्मरहिताः सिद्धा इति, अजीवास्त्वरूपिणो धर्माधर्माकाशास्तिकायाः रूपिणस्तु परमाण्वादय इति, एतौ च जीवाजीवावोघतः सप्रदेशाप्रदेशाववगन्तव्यौ, तथा चाह–'सप्रदेशाप्रदेशावि'ति, तत्र सामान्यविशेषरूपत्वात्परमाणुव्यतिरेकेण सप्रदेशाप्रदेशत्वं सकलास्तिकायानामेव भावनीयम्, परमाणवस्त्वप्रदेशा एव, अन्ये तु व्याचक्षते-जीवः किल कालादेशेन नियमात् सप्रदेशः, लब्ध्यादेशेन तु सप्रदेशो वाऽप्रदेशो वेति, एवं धर्मास्तिकायादिष्वपि त्रिष्वस्तिकायेषु परापरनिमित्तं पक्षद्वयं वाच्यम्, पुद्गलास्तिकायस्तु द्रव्याद्यपेक्षया चिन्त्यः, यथा–द्रव्यतः परमाणुरप्रदेशो द्व्यणुकादयः सप्रदेशाः, क्षेत्रत एकप्रदेशावगाढोऽप्रदेशो द्व्यादिप्रदेशावगाढाः सप्रदेशाः, एवं कालतोऽप्येकानेकसमयस्थितिर्भावतोऽप्येकानेकगुणकृष्णादिरिति कृतं विस्तरेण, प्रकृतमुच्यते–इदमेवम्भूतं जीवाजीवव्रातं जानीहि द्रव्यलोकं द्रव्यमेव लोको द्रव्यलोक इतिकृत्वा, अस्यैव शेषधर्मोपदर्शनायाऽऽह-नित्यानित्यं च यद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यम्, चशब्दादभिलाप्यानभिलाप्यादिसमुच्चय इति गाथार्थः ॥१९५॥ साम्प्रतं जीवाजीवयोर्नित्यानित्यतामेवोपदर्शयन्नाह–

**गइ १ सिद्धा २ भविआया ३ अभविअ ४-१ पुग्गल १ अणागयद्धा य २ ।**
**तीअद्ध ३ तिन्नि काया ४-२ जीवा १ जीव २ ट्ठिई चउहा ॥१९६॥** (भाष्यम्)

व्याख्या–अस्याः सामायिकवद् व्याख्या कार्येति, भङ्गकास्तु सादिसपर्यवसानाः साद्यपर्यवसानाः अनादिसपर्यवसाना अनाद्यपर्यवसानाः, एवमजीवेषु जीवाजीवयोरष्टौ भङ्गाः द्वारम् ॥ अधुना क्षेत्रलोकः प्रतिपाद्यते, तत्र–

**आगासस्स पएसा, उड्ढं च अहे अ तिरियलोए अ ।**
**जाणाहि खित्तलोगं, अणंत जिणदेसिअं सम्मं ॥ १९७॥** (भा०)

व्याख्या–आकाशस्य प्रदेशाः-प्रकृष्टा देशाः प्रदेशास्तान् 'ऊर्ध्वं च' इत्यूर्ध्वलोके च 'अधश्च' इत्यधोलोके च तिर्यग्लोके च, किं ? जानीहि क्षेत्रलोकं, क्षेत्रमेव लोकः क्षेत्रलोक इतिकृत्वा, लोक्यत इति च लोक इति, ऊर्ध्वादिलोकविभागस्तु सुज्ञेयः, 'अनन्त' मित्यलोकाकाशप्रदेशापेक्षया चानन्तम्, अनुस्वारलोपोऽत्र द्रष्टव्यः, 'जिनदेशितम्' इति जिनकथितं 'सम्यक्' शोभनेन विधिनेति गाथार्थः ॥१९७॥ साम्प्रतं काललोकप्रतिपादनायाह–

**समयावलिअमुहुत्ता दिवसमहोरत्तपक्खमासा य ।**
**संवच्छरजुगपलिआ सागर ओसप्पिपरिअट्टा ॥१९८॥** (भा०)

व्याख्या–इह परमनिकृष्टः कालः समयोऽभिधीयते, असङ्ख्येयसमयमाना त्वावलिका, द्विघटिको मुहूर्तः, षोडश मुहूर्ता दिवसः, द्वात्रिंशदहोरात्रं, पञ्चदशाहोरात्राणि पक्षः, द्वौ पक्षौ मासः, द्वादश मासाः संवत्सरमिति, पञ्चसंवत्सरं युगं, पल्योपममुद्धारादिभेदं यथाऽनुयोगद्वारेषु तथाऽवसेयम्, सागरोपमं तद्वदेव, दशसागरोपमकोटाकोटिपरिमाणोत्सर्पिणी, एवमवसर्पिण्यपि द्रष्टव्या, 'परावर्तः' पुद्गलपरावर्तः, स चानन्तोत्सर्पिण्यवसर्पिणीप्रमाणो द्रव्यादिभेदः, तेऽनन्ता अतीतकाल अनन्त एवैष्यन्निति गाथार्थः ॥१९८॥ उक्तः काललोकः, लोकयोजना पूर्ववद् । अधुना भवलोकमभिधित्सुराह–

**णेरइअदेवमणुआ तिरिक्खजोणीगया य जे सत्ता ।**
**तंमि भवे वट्टंता भवलोगं तं विआणाहि ॥१९९॥** (भा०)

व्याख्या–नारकदेवमनुष्यास्तथा तिर्यग्योनिगताश्च ये 'सत्त्वाः'- प्राणिनः 'तंमि'त्ति तस्मिन् भवे वर्तमाना यदनुभावमनुभवन्ति भवलोकं तं विजानीहि, लोकयोजना पूर्ववदिति गाथार्थः ॥१९९॥ साम्प्रतं भावलोकमुपदर्शयति–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ओदइए १ ओवसमिए २ खइए अ ३ तह्म खओवसमिए अ ४ ।**
**परिणामि ५ सन्निवाए अ ६ छव्विहो भावलोगो उ ॥२००॥** (भा०)

व्याख्या—उदयेन निर्वृत्त औदयिकः, कर्मण इति गम्यते, तथोपशमेन निर्वृत्त औपशमिकः, क्षयेण निर्वृत्तः क्षायिक एवं शेषेष्वपि वाच्यम्, ततश्च क्षायिकश्च तथा क्षायोपशमिकश्च पारिणामिकश्च सान्निपातिकश्च, एवं षड्विधो भावलोकस्तु तत्र सान्निपातिक ओघतोऽनेकभेदोऽवसेयः, अविरुद्धस्तु पञ्चदशभेद इति, उक्तं च— "ओदइअखओवसमे परिणामेक्केक्को गइचउक्केऽवि । खयजोगेणवि चउरो तदभावे उवसमेणंपि ॥१॥ उवसमसेढी एक्को केवलिणोऽवि य तहेव सिद्धस्स । अविरुद्ध-संन्निवाइयभेया एमेव पण्णरस ॥२॥"त्ति गाथार्थः ॥२००॥

**तिव्वो रागो अदोसो अ, उइन्ना जस्स जंतुणो ।**
**जाणाहि भावलोअं, अणंतजिणदेसिअं सम्मं ॥२०१॥** (भा०)

व्याख्या—'तीव्र' उत्कटः रागश्च द्वेषश्च, तत्राभिष्वङ्गलक्षणो रागः, अप्रीति-लक्षणो द्वेष इति, एतावुदीर्णौ 'यस्य जन्तोः' यस्य प्राणिन इत्यर्थः, तं प्राणिनं तेन भावेन लोक्यत्वाज्जानीहि भावलोकमनन्तजिनदेशितम्-एकवाक्यतयानन्तजिनकथितं 'सम्यग्' इति क्रियाविशेषणम्, अयं गाथार्थः ॥२०१॥ द्वारम्, साम्प्रतं पर्यायलोक उच्यते, तत्रौघतः पर्याया धर्मा उच्यन्ते, इह तु किल नैगमनयदर्शनं मूढनयदर्शनं वाऽधिकृत्य चतुर्विधं पर्यायलोकमाह—

**दव्वगुण १ खित्तपज्जव २ भवाणुभावे अ ३ भावपरिणामे ४ ।**
**जाण चउव्विहमेअं, पज्जवलोगं समासेणं ॥२०२॥** (भा०)

व्याख्या—द्रव्यस्य गुणाः-रूपादयः, तथा क्षेत्रस्य पर्यायाः-अगुरुलघवः भरतादिभेदा एव चान्ये, भवस्य च नारकादेरनुभावः-तीव्रतमदुःखादिः, यथोक्तम्— "अच्छिणिमिलीयमेत्तं णत्थि सुहं दुक्खमेव अणुबंधं । णरए णेरइआणं अहोणिसिं पच्चमाणाणं ॥१॥ असुभा उव्वियणिज्जा सद्दरसा रूवगंधफासा य । णरए णेरइआणं दुक्कयकम्मोवलित्ताणं ॥२॥" इत्यादि, एवं शेषानुभावोऽपि वाच्यः, तथा भावस्य जीवाजीवसम्बन्धिनः परिणामस्तेन तेन अज्ञानाद् ज्ञानं नीलाल्लोहित-मित्यादिप्रकारेण भवनमित्यर्थः, 'जानीहि' अवबुध्यस्व चतुर्विधमेनमोघतः पर्याय-लोकं 'समासेन' संक्षेपेणेति गाथार्थः ॥२०२॥ तत्र यदुक्तं द्रव्यस्य गुणा इत्यादि तदुपदर्शनेन निगमयन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वन्नरसगंधसंठाणफासट्ठाणगइवन्नभेए अ ।**
**परिणामे अ बहुविहे पज्जवलोगं विआणाहि ॥२०३॥**

व्याख्या—वर्णरसगन्धसंस्थानस्पर्शस्थानगतिवर्णभेदाश्च, चशब्दाद् रसादिभेद-परिग्रहः, अयमत्र भावार्थः-वर्णादयः सभेदा गृह्यन्ते, तत्र वर्णः कृष्णादिभेदात् पञ्चधा, रसोऽपि तिक्तादिभेदात्पञ्चधा, गन्धः-सुरभिरित्यादिभेदाद् द्विधा संस्थानं-परिमण्डलादिभेदात्पञ्चधैव, स्पर्शः कर्कशादिभेदादष्टधा, स्थानमवगाहनालक्षणं तदाश्रयभेदादनेकधा, गतिः स्पर्शवद्गतिरित्यादिभेदा द्विधा, चशब्द उक्तार्थ एव अथवा कृष्णादिवर्णादीनां स्वभेदापेक्षया एकगुणकृष्णाद्यनेकभेदोपसंग्रहार्थ इति, अनेन किल द्रव्यगुणा इत्येतद्व्याख्यातम् । परिणामांश्च बहुविधानित्यनेन तु चरमद्वारम्, शेषं द्वारद्वयं स्वयमेव भावनीयम्, तच्च भावितमेवेत्यक्षरगमनिका । भावार्थ-स्त्वयम्—परिणामांश्च बहुविधान् जीवाजीवभावगोचरान्, किं ? पर्यायलोकं विजानीहि इति गाथार्थः ॥२०३॥ अक्षरयोजना पूर्ववदिति द्वारम्, साम्प्रतं लोक-पर्यायशब्दान्निरूपयन्नाह—

**आलुक्कइ अ पलुक्कइ लुक्कइ संलुक्कई अ एगट्ठा ।**
**लोगो अट्ठविहो खलु तेणेसो वुच्चई लोगो ॥१०५८॥**

व्याख्या—आलोक्यत इत्यालोकः, प्रलोक्यत इति प्रलोकः, लोक्यत इति लोकः, संलोक्यत इति च संलोकः एते एकार्थिकाः शब्दाः, लोकः अष्टविधः खल्वित्यत्र आलोक्यत इत्यादि योजनीयम्, अत एवाऽऽह-तेनैष उच्यते लोको येनाऽऽलोक्यत इत्यादि भावनीयम्, गाथार्थः ॥१०५८॥ व्याख्यातो लोकः । (आव०नि० १०५७-५८) **23/1**

**[99] अणुसोअपट्ठिअबहुजणंमि, पडिसोअलद्धलक्खेणं ।**
**पडिसोअमेव अप्पा, दायव्वो होउकामेणं ॥२॥**

एतद्धि प्रतिज्ञासूत्रम्, इह चाध्ययने चर्यागुणा अभिधेयाः, तत्प्रवृत्तौ मूलपाद-भूतमिदमाह-अनुस्रोतःप्रस्थिते नदीपूरप्रवाहपतितकाष्ठवद् विषयकुमार्गद्रव्यक्रिया-नुकूल्येन प्रवृत्ते बहुजने तथाविधाभ्यासात् प्रभूतलोके तथा प्रस्थानेनोदधिगामिनि, किमित्याह प्रतिस्रोतोलब्धलक्ष्येण द्रव्यतस्तस्यामेव नद्यां कथञ्चिद्देवतानियोगात् प्रतीपस्रोतःप्राप्तलक्ष्येण, भावतस्तु विषयादिवैपरीत्यात् कथंचिदवाप्तसंयमलक्ष्येण प्रतिस्रोत एव दुरपाकरणीयमप्यपाकृत्य विषयादि संयमलक्ष्याभिमुखमेव आत्मा-जीवो दातव्यः प्रवर्त्तयितव्यो भवितुकामेन संसारसमुद्रपरिहारेण मुक्ततया भवितु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कामेन साधुना, न क्षुद्रजनाचरितान्युदाहरणीकृत्यासन्मार्गप्रवणं चेतोऽपि कर्त्तव्यम्, अपि त्वागमैकप्रवणेनैव भवितव्यमिति, उक्तं च-निमित्तमासाद्य यदेव किञ्चन, स्वधर्ममार्गं विसृजन्ति बालिशाः तपःश्रुतज्ञानधनास्तु साधवो, न यान्ति कृच्छ्रे परमेऽपि विक्रियाम् ॥१॥ तथा-

कपालमादाय विपन्नवाससा, वरं द्विषद्वेश्मसमृद्धिरीक्षिता ।
विहायलज्जां न तु धर्मवैशसे, सुरेन्द्रता(सा)र्थेऽपि समाहितं मनः ॥२॥

तथा-पापं समाचरति वीतघृणो जघन्यः, प्राप्यापदं सघृण एव विमध्यबुद्धिः प्राणात्ययेऽपि न तु साधुजनः स्ववृत्तं, वेलां समुद्र इव लङ्घयितुं समर्थः ॥३॥ इत्यलं प्रसङ्गेनेति सूत्रार्थः ॥२॥

**अणुसोअसुहो लोओ, पडिसोओ आसवो सुविहिआणं ।**
**अणुसोओ संसारो, पडिसोओ तस्स उत्तारो ॥३॥**

अधिकृतमेव स्पष्टयन्नाह-अनुस्रोतःसुखो लोकः-उदकनिम्नाभिसर्पणवत् प्रवृत्त्याऽनुकूलविषयादिसुखो लोकः कर्मगुरुत्वात्, प्रतिस्रोत एव तस्माद्विपरीतः आश्रवः इन्द्रियजयादिरूपः परमार्थपेशलः, कायवाङ्मनोव्यापारः आश्रमो वा व्रत-ग्रहणादिरूपः, सुविहितानां-साधूनाम्, उभयफलमाह-अनुस्रोतः संसारः शब्दादि-विषयानुकूल्यं संसार एव, कारणे कार्योपचारात् यथा विषं मृत्युः दधि-त्रपुषी प्रत्यक्षोज्वरः, प्रतिस्रोतः उक्तलक्षणः, तस्येति पञ्चम्यर्थे षष्ठी सुपां सुपो भवन्तीति वचनाद्, तस्मात् संसाराद् उत्तारः-उत्तरणमुत्तारः, हेतौ फलोपचारात् यथाऽऽयुर्घृतम्, तन्दुलान् वर्षति पर्जन्य इति सूत्रार्थः ॥३॥ (दशवै०चू०-२, गा० २-३) **23/3**

**[100] इच्चेअं दुवालसंगं गणिपिडगं चोद्दसपुव्विस्स सम्मसुतं, अभिण्ण दसपुव्विस्स सम्मसुतं, तेण परं भिण्णेसु भयणा । से तं सम्मसुतं ५।**

**से किं तं मिच्छसुतं ? मिच्छसुतं जं इमं अण्णाणिएहिं मिच्छदिट्ठीहिं सच्छंदबुद्धि-मतिवियप्पियं, तं जहा भारहं रामायणं हंभीमासुरक्खं कोडपिल्लयं सगभद्दियाओ खोडमुहं, कप्पासियं नामसुहुमं कणगसत्तरी वइसेसियं बुद्धवयणं वेसितं कविलं लोगायतं सट्ठितंतं माढरं पुराणं वागरणं णाडगादी, अहवा बावत्तरिकलाओ चत्तारि य वेदा संगोवंगा ॥ [ २ ] एयाइं मिच्छ-दिट्ठिस्स मिच्छत्तपरिग्गहियाइं मिच्छसुतं, एयाणि चेव सम्मदिट्ठिस्स सम्मत्त-परिग्गहियाइं सम्मसुयं ।** ( सू. ७२ ) इच्चेदमित्यादि । इत्येतद् द्वादशाङ्गं गणिपिटकं चतुर्दशपूर्विणः सम्यक्छ्रुतमेव,, तथा अभिन्नदशपूर्विणोऽपि सम्यक्छ्रुत-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेव । तेण परं भिण्णेसुं भयणत्ति-पश्चानुपूर्व्या ततः परं भिन्नेसु दशसु भजना कदाचित् सम्यक्छ्रुतं कदाचिन्मिथ्याश्रुतम्, परिणामविशेषात् । एतदुक्तं भवति—आसन्नभव्योऽपि मिथ्यादृष्टिः सम्पूर्णदशपूर्वरत्ननिधानं न प्राप्नोति, मिथ्यात्व-परिणामकलङ्कित्वाद् दारिद्र्यनिबन्धनपापकलङ्काङ्कितपुरुषवच्चिन्तामणिमिति । "से त" मित्यादि तदेतत् सम्यक्छ्रुतम् ॥

से किं तमित्यादि । अथ किं तन्मिथ्याश्रुतम् ? मिथ्याश्रुतं यदिदमज्ञानिकैः। तत्राल्पज्ञानभावादधनवदशीलवद्वा सम्यग्दृष्टयोऽप्यज्ञानिकाः प्रोच्यन्ते, अत आह-मिथ्यादृष्टिभिः । किम् 'स्वच्छन्दबुद्धि-मतिविकल्पितम्' ईहावग्रहे बुद्धिः अपायधारणे मतिः स्वच्छन्देन-स्वाभिप्रायेण स्वतः सर्वज्ञप्रणीतार्थानुसारमन्तरेण बुद्धिमतिभ्यां विकल्पितं स्वच्छन्दबुद्धिमतिविकल्पितम्, स्वबुद्धिकल्पनाशिल्प-निर्मितमित्यर्थः । तद्यथा—भारतमित्यादि सूत्रसिद्धं यावत् चत्वारश्च वेदास्साङ्गोपाङ्गाः। एतानि स्वरूपतोऽन्यथावस्त्वभिधानाद् मिथ्याश्रुतमेव । स्वामिसम्बन्धचिन्तायां तु भाज्यानि । तथा चाह—[२] मिथ्यादृष्टेर्मिथ्यात्वपरिगृहीतानि विपरीताभिनिवेश-हेतुत्वान्मिथ्याश्रुतम् । एतान्येव सम्यग्दृष्टेः सम्यक्त्वपरिगृहीतानि असारतादर्शनेन स्थिरतरसम्यक्त्वपरिणामहेतुत्वात् सम्यक्छ्रुतम् । (श्रीनन्दिसू० सू०७१-७३) **24/1**

**[101]** ननु यथा मति-श्रुताभ्यां सम्यग्दृष्टिर्घटादिकं जानीते, व्यवहरति च, तथा मिथ्यादृष्टिरपि, तत् किमिति तस्य सत्कं सर्वमप्यज्ञानमुच्यते ? इत्या-शङ्क्याह-

**सदसदविसेसणाओ, भवहेउ जदिच्छिओवलम्भाओ ।**
**नाणफलाभावाओ, मिच्छद्दिट्ठिस्स अण्णाणं ॥११५॥**

सच्चाऽसच्च सदसती तयोरविशेषणमविशेषस्तस्माद् हेतोः, मिथ्यादृष्टेः सम्बन्धि व्यवहारमात्रेण ज्ञानमपि निश्चयतोऽज्ञानमुच्यते, सतो ह्यसत्त्वेनाऽसद् विशिष्यते असतोऽपि च सत्त्वेन सद् भिद्यते । मिथ्यादृष्टिश्च घटे सत्त्व-प्रमेयत्व-मूर्तत्वादीन्, स्तम्भ-रम्भा-ऽम्भोरूहादिव्यावृत्त्यादींश्च पटादिधर्मान् सतोऽप्यसत्त्वेन प्रतिपद्यते, 'सर्वप्रकारैर्घट एवायम्' इत्यवधारणात् अनेन ह्यवधारणेन सन्तोऽपि सत्त्व-प्रमेयत्वादयः पटादिधर्मा न सन्तीति प्रतिपद्यते, अन्यथा सत्त्व-प्रमेयत्वादि-सामान्यधर्मद्वारेण घटे पटादीनामपि सद्भावात् 'सर्वथा घट एवायम्' इत्यव-धारणानुपपत्तेः, 'कथञ्चिद् घट एवाऽयम्' इत्यवधारणे त्वनेकान्तवादाभ्युपगमेन सम्यग्दृष्टित्वप्रसङ्गात्, तथा पट-पुट-नट-शकटादिरूपं घटेऽसदपि सत्त्वेना-ऽयमभ्युपगच्छति 'सर्वैः प्रकारैर्घटोऽस्त्येव' इत्यवधारणात्, 'स्यादस्त्येव घटः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यवधारणे तु स्याद्वादाश्रयणात् सम्यग्दृष्टित्वप्राप्तेः । तस्मात् सदसतोर्विशेषाभावादुन्मत्तकस्येव मिथ्यादृष्टेर्बोधोऽज्ञानम् । तथा विपर्यस्तत्वादेव भवहेतुत्वात् तद्बोधोऽज्ञानम् । तथा पशुवधतिलादिदहनजलाद्यवगाहनादिषु संसारहेतुषु मोक्षहेतुत्वबुद्धेः, दया-प्रशम-ब्रह्मचर्याऽऽकिञ्चन्यादिषु तु मोक्षकारणेषु भवहेतुत्वाध्यवसायतो यदृच्छोपलम्भात् तस्याऽज्ञानम् । तथा विरत्यभावेन ज्ञानफलाभावाद् मिथ्यादृष्टेरज्ञानम् ॥ इति गाथार्थः ॥११५॥ (विशेषा०भा० गा० ११५) **24/1**

एवं चोदित आचार्यः सर्वमेतदेमित्यनुज्ञापवादमाह –

**[102] एकमपि तु जिनवचनाद्यस्मान्निर्वाहकं पदं भवति ।**
**श्रूयन्ते चानन्ताः, सामायिकमात्रपदसिद्धाः ॥२७॥**

(व्या०) एकमपीत्यादि । एकमपि पदं किं पुनरियान् सप्तपदार्थसंग्रह इति तुशब्दो विशेषयति । जिनवचनादित्यवच्छेदे पञ्चमी, यथा समूहाच्छुक्लं प्रकाशते । यस्मादिति कारणे पञ्चमी । यस्मात् कारणान्निर्वाहकं सुगृहीतमप्यभ्यस्यमानमुत्तरोत्तरज्ञानकारणत्वाद् भवोत्तारकमित्यर्थः । न चेयं स्वमनीषिका इत्याह, श्रूयन्ते इत्यादि, श्रूयन्ते चानन्ता इति च शब्दः समुच्चये, बीजलाभात् तदविनाशादुत्तरोत्तरवृद्धिसम्भवोऽवसीयते । श्रूयन्ते चेत्यभिप्रायमात्राऽवधारणे, एवं श्रूयन्ते प्रवचने- 'करेमि भदन्त ! सामायिकमित्येतावतैव पदेन भावतः सुगृहीतेनानन्तकालेन अनन्ताः सिद्धा' इत्युक्तं प्रवचने, उदाहरणमत्र तुषमाषैः स्वाध्याय इति ॥२७॥

यस्माच्चैवमागमो निर्वाहकमिति चावसीयते –

**तस्मात् तत्प्रामाण्यात्, समासतो व्यासतश्च जिनवचनम् ।**
**श्रेय इति निर्विचारं, ग्राह्यं धार्यं च वाच्यं च ॥२८॥** [आर्या]

(व्या०) **तस्मादित्यादि**–तस्मादागमप्रामाण्यात् समासतः संक्षेपेण, व्यासतो विस्तरेण, यथाशक्त्याऽध्येयं जिनवचनं, न पुनरवमन्तव्यमिति दर्शयति, श्रेय इति, इदमेव हि श्रेयो नान्यदिति, निर्गतविचारं निःशङ्कमित्यर्थः । ग्राह्यमध्ययनश्रवणाभ्यां, धार्यमनुप्रेक्षणादिभिः, वाच्यमर्थविचारणादिभिः । ग्रहणधारणे तावदात्मोपकारिणी ॥२८॥

किं पुनर्वाचनयेति चोदितेऽध्यापनस्यैव गौरवख्यापनार्थं आत्मप्रयत्नदृढीकरणार्थं चाह –

**न भवति धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् ।**
**ब्रुवतोऽनुग्रहबुद्ध्या, वक्तुस्त्वेकान्ततो भवति ॥२९॥** [आर्या]

(व्या०) **न भवतीत्यादि ।** श्रोता हि कदाचिदन्यमनस्को दुष्टान्तरात्मा वा शृणुयाद् एवंविधस्य श्रोतुर्न हितश्रवणमात्रादेवैकान्तेन धर्मोऽस्तीति दर्शयति । हितग्रहणमाम्रेडनार्थं, हितमपि तावत् शृण्वतां न सर्वेषां धर्मः किं पुनरहितमिति । ब्रुवत इत्यादि, वक्ता हि यदा स्तुतिमानलाभादिनिरीहः कथममी श्रोतारोऽनुगृहीताः प्रतिबुध्येरन्नित्यवाप्तबुद्धिर्हितमुपदिशति तदाऽस्यैकान्ततो भवति धर्मः एवं च कृत्वा स्वपरिणामो नः प्रवचनेषु शुभाशुभोपचयं प्रति परं प्रमाणमिति दर्शितम् । न चात्रात्मनेपदाशङ्का, निराकृतं हि स्तुत्यादिक्रियाफलं, निरनुबन्धाभिप्रायात्, न च धर्मोऽप्यभिप्रेतः, अवश्यंभावी त्वसावित्युक्तः ॥२९॥

एवं निश्चित्याह-

**श्रममविचिन्त्यात्मगतम्, तस्माच्छ्रेयः सदोपदेष्टव्यम् ।**
**आत्मानं च परं च हि, हितोपदेष्टाऽनुगृह्णाति ॥३०॥** [आर्या]

(व्या०) **श्रममित्यादि ।** यो हृदयशोषादिरात्मगतः श्रमस्तमविगणय्य-नैतन्मम दुःखमिहैव चैतत्सूपयुक्त शरीरमिति परिचिन्त्योपदेष्टव्यम्, तस्मादिति प्रक्रान्त-प्रयोजनमुपसंहृत्य निश्चिनोति, अयं विनिश्चयो यदुत श्रेयो मोक्षमार्गः सर्वकालमुप-देष्टव्यः, न पुनरश्रेयः सावद्यमिथ्याश्रुतमात्मपरोपघातीति । इदं च पुनः श्रेयस उपदेशप्रयोजनं निर्धार्य आह, आत्मानमित्यादि, उदयं श्रुत्वा पापेभ्यो निवृत्त्य हितेषु प्रवर्तमानः कल्याणभागी भवति स तत्रोपदेष्टा हेतुरित्युभावपि हितोपदेशेनानुगृह्येते इति ॥३०॥

**[103] शासनसामर्थ्येन तु, संत्राणबलेन चानवद्येन ।**
**युक्तं यत्तच्छास्त्रम्, तच्चैतत्सर्वविद्वचनम् ॥ १८८ ॥**

शासनसामर्थ्येनानुशासनसमर्थमिदं-द्वादशाङ्गं प्रवचनमतस्तेन शासनसामर्थ्येन संसारस्वभावमनुवदता तद्विपरीतं च मोक्षमार्गं दर्शयता निराबाधं परिरक्षता च शरणागतान् प्राणिनोऽनवद्येनोपायेन कश्चित् परिरक्षत्यन्यानुपघ्नन्न तथेदं शासनं कस्यचिदुपघातकं युक्तमिदं प्रतिबद्धम् । यतः शास्त्रमुक्तेनार्थद्वयेन तच्चैतच्छास्त्रं सर्वविदः-सर्वज्ञस्य वचनमन्वर्थद्वारेण क्षीणाशेषरागद्वेषमोहस्य नान्यस्येति ॥ १८८ ॥

अव० शासनस्य शिक्षणस्य सामर्थ्यं बलिष्ठतानेन संत्राणस्य पालनस्य बलेन च उभयेन सहितं यत्तच्छास्त्रमुच्यते सिद्धान्तः संसारभावमनुवदतां मोक्षं दर्शयतां सर्वविदामेतद् वचनम् ॥ १८८ ॥ (प्रशम० गा०१८८) **24/3**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[104] केवलमधिगम्य विभुः स्वयमेव ज्ञानदर्शनमनन्तम् ।**
**लोकहिताय कृतार्थोऽपि देशयामास तीर्थमिदम् ॥१८॥**

केवलमित्यादि । केवलममिश्रमसाधारणमधिगम्य-प्राप्य विभवतीति विभुः-सर्वगतज्ञानात्मेत्यर्थः । स्वयमेव स्वशक्त्यैव, न राजेव सामन्तादिमिश्रः । किं तत्, केवलं ज्ञानं दर्शनं च वक्ष्यमाणम्, अनन्तं न कवचित् प्रतिहतं सर्वत्र गमत एव विभुरित्युक्तम् ॥१८॥ (त०का०गा०१८) **24/3**

**[105]** वचनस्यैव माहात्म्यमभिष्टौति च-

**अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।**
**हृदयस्थिते च तस्मिन्नियमात्सर्वार्थसंसिद्धिः ॥२।१४॥**

अस्मिन्नित्यादि अस्मिनन्वचने हृदयस्थे सति हृदयस्थः स्मृतिद्वारा तत्त्वतो मुनीन्द्रः, स्वतन्त्रवक्तृत्वरूपतत्सम्बन्धशालित्वात्, इतिः पादसमाप्तौ । हृदयस्थिते च तस्मिन्-मुनीन्द्रे नियमात्-निश्चयेन सर्वार्थसंपत्तिः भवति ॥२।१४॥ (षोड०२, श्लो०१४) **24/4**

**[106]** अथागमस्यैव प्राधान्यं प्रकटयन्नाह–

**आगमं आयरंतेणं, अत्तणो हियकंखिणा ।**
**तित्थनाहो गुरू धम्मो, सव्वे ते बहुमन्निया ॥३५॥**

व्याख्या–'आत्मनः'–स्वस्य 'हितकाङ्क्षिणा'–हितकामिना । 'आगमं'–अर्हत्प्रणीतसिद्धान्तोक्तमाचारम् 'आचरता'–अभ्युपगच्छता जनेन 'तीर्थनाथः'–अर्हन् 'गुरुः'–धर्माचार्यः धर्मश्च, ते सर्वे 'बहुमानिताः' गौरविताः । अयं भावः–आत्महितैषिणा येन श्रीसिद्धान्तो बहुमानितस्तदुक्तं सर्वमप्यङ्गीकृतमित्यर्थः, न तु जमाल्यादिवत्सिद्धान्तैकदेशोऽप्यप्रमाणितोऽस्तीति तेनार्हद्गुरुधर्मा बहुमानिता एव । यश्चागमपदमेकमपि नाङ्गीकरोति स निह्नवपङ्क्तौ सम्यक्त्वविकलो गण्यते–"पयमवि असद्दहंतो सुत्तुत्तं मिच्छदिट्ठीओ" इतिवचनात् ॥२७॥ (सं०स० गा०३५) **24/4**

**[107] जति वि ण विणस्सति च्चिय देहो झाणं तु नियमतो चलति ।**
**सीतादिपरिगयस्सिह तम्हा लयणं व तं गज्झं ॥१०२८॥**

यद्यपि न विनश्यति देहस्तथापि ध्यानं शीतादिपरिगतस्येह नियमतश्चलत्येव, चियशब्द एवकारार्थो भिन्नक्रमश्च, स च यथास्थानं योजितस्तस्माल्लयनमिव तत्–वस्त्रमुपकारित्वादवश्यं ग्राह्यमिति ॥१०२८॥ स्यादेतत्, यदि शीतादिवेदनाभि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्यन्तमभिभूतस्य तस्य मरणमुपढौकते तर्हि तदपि सफलमेव, मरणपर्यवसानं हि जीवितम्, ततोऽवश्यमेव कदाचिन्मर्त्तव्यं तद्यद्यधुना धर्ममाचरतो मरणं भविष्यति किमयुक्तं स्यादित्यत आह–

**सुहझाणस्स उ नासे मरणंपि न सोहणं जिणा बेंति ।**
**अन्नाणिची ( वी )रचरियं बालाणं विम्हयं कुणति ॥१०२९॥**

शीतादिवेदनापरिगतस्य हि नियमतः शुभध्यानविघातसंभव इत्युक्तम्, ततः शुभध्यानस्य विनाशे सति मरणमपि न शोभनं जिना ब्रुवते, आर्त्तध्यानादिसंभवेन तिर्यग्योन्यादिषूपपातसंभवात् । यत्पुनरुक्तं–मरणपर्यवसानं हि जीवितमित्यादि तदयुक्तमेव, अज्ञानिची(वी)रचरितं हि बालानामेव–अज्ञानामेव विस्मयं करोति न तु गुरुपारंपर्यागतागमोपनिषद्वेदिनाम्, इह परलोके वा तस्य भावतो दुःखनिबन्धनत्वादिति ॥१०२९॥ (धर्मसं० गा०१०२८–२९) **25/7**

**[108]** तदित्थमुपसंपन्नस्य परस्य वचनमाशङ्क्योपसंहारपूर्वकं ग्रन्थाऽग्रन्थविभागमुपदिदर्शयिषुराह–

**तम्हा किमत्थि वत्थुं, गंथोऽगंथो व सव्वहा लोए ।**
**गंथोऽगंथो व मओ, मुच्छममुच्छाहिं निच्छयओ ॥२५७३॥**

**वत्थाइं तेण जं जं, संजमसाहणमरागदोसस्स ।**
**तं तमपरिग्गहोच्चिय, परिग्गहो जं तदुवघाइ ॥२५७४॥**

व्याख्या–तस्मात् किं नाम तद् वस्त्वस्ति लोके यदात्मस्वरूपेण सर्वथा ग्रन्थोऽग्रन्थो वा ? नास्त्येवैतदित्यर्थः । ततश्च 'मुच्छा परिग्गहो वुत्तो इइ वुत्तं महेसिणा' इत्यादिवचनात् यत्र वस्त्र–देहाहार–कनकादौ मूर्च्छा संपद्यते तद् निश्चयतः परमार्थतो ग्रन्थः । यत्र तु सा नोपजायते तदग्रन्थ इति । एतदेव व्यक्तीकरोति–'वत्थाइं तेणेत्यादि' तेन–तस्मात् । शेषं सुगममिति ॥२५७३, २५७४॥ (विशेषा० भा० गा० २५७३–७४) **25/8**

**[109]** स्पर्शस्य लक्षणं फलातिशयञ्चाह –

**स्पर्शस्तत्तत्त्वाप्तिः संवेदनमात्रमविदितं त्वन्यत् ।**
**वन्ध्यमपि स्यादेतत्स्पर्शस्त्वक्षेपतत्फलदः ॥ १५ ॥**

स्पर्श इत्यादि । तस्य–विवक्षितस्य वस्तुनः तत्त्वम्–अनारोपितं रूपं तस्य आप्तिः–उपलम्भः स्पर्शः स्पृश्यतेऽनेन वस्तुतत्त्वमिति निरुक्तेः । अन्यत्तु अविदितं–कथञ्चिद्वस्तुग्राहित्वेऽपि प्रमाणपरिच्छेद्यसम्पूर्णार्थाऽग्राहित्वेनाऽनिश्चितं संवेदनमात्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वपरामर्शशून्यमस्पर्शाख्यं ज्ञानमित्यर्थः । वन्ध्यमपि-विफलमपि स्यात् एतत्-संवेदनमात्रम्, स्पर्शस्तु-स्पर्शः पुनः अक्षेपेण-अविलम्बेन तत् स्वकार्यं फलं ददाति यः स तथा । अयमनयोः स्पर्शान्यज्ञानयोर्विशेषः ॥ १२।१५॥ (षोड०प्र०षो०१२, श्लो०१५) **26/1**

**[110] जे एगं जाणइ से सव्वं जाणइ । जे सव्वं जाणइ से एगं जाणइ ॥ १२२ ॥**

'यः' कश्चिदविशेषितः 'एकं'-परमाण्वादि द्रव्यं पश्चात्पुरस्कृतपर्यायं स्वपरपर्यायं वा 'जानाति'-परिच्छिनत्ति स सर्वं-स्वपरपर्यायं जानाति अतीतानागत-पर्यायिद्रव्यपरिज्ञानस्य समस्तवस्तुपरिच्छेदाविनाभावित्वाद्, इदमेव हेतुहेतुमद्भावेन लगयितुमाह—'जे सव्व' मित्यादि, यः सर्वं-संसारोदरविवरवर्त्ति वस्तु जानाति स एकं घटादि वस्तु जानाति, तस्यैवातीतानागतपर्यायभेदैस्तत्तत्स्वभावापत्त्याऽनाद्यनन्त कालतया समस्तवस्तुस्वभावावगमत्वादिति, तदुक्तम्—"एगदवियस्स जे अत्थ-पज्जवा वयणपज्जवा वावि । तीयाणागयभूया तावइयं तं हवइ दव्वं ॥१॥ (आचा०सू० अध्य० ३, उ०४, सू० १२२) **26/4**

**[111]** स्थानादिगतो धर्मव्यापारो विशेषेण योग इत्युक्तम् । तत्र के ते स्थानादयः ? कतिभेदं च तत्र योगत्वम् ? इत्याह—

**ठाणुन्नत्थालंबणरहिओ तंतम्मि पंचहा एसो ।**
**दुगमित्थ कम्मजोगो, तहा तियं नाणजोगो उ ॥२॥**

'ठाणुन्नत्थे'त्यादि । स्थीयतेऽनेनेति स्थानम्-आसनविशेषरूपं कायोत्सर्ग-पर्यङ्क-बन्धपद्मासनादि सकलशास्त्रप्रसिद्धम्, ऊर्णः-शब्दः स च क्रियादावुच्चार्य-माणसूत्रवर्णलक्षणः, अर्थः-शब्दाभिधेयव्यवसायः, आलम्बनं-बाह्यप्रतिमादि-विषयध्यानम्, एते चत्वारो भेदाः, 'रहितः'-रूपिद्रव्यालम्बनरहितो निर्विकल्प-चिन्मात्रसमाधिरूप इत्येवं 'एषः'-योगः पञ्चविधः 'तन्त्रे'-योगप्रधानशास्त्रे, प्रतिपादित इति शेषः, उक्तं च—"स्थानोर्णार्थालम्बनतदन्ययोगपरिभावनं सम्यक् । परतत्त्वयोजन-मलम्, योगाभ्यास इति समयविदः ॥" (षोड० १३-४) इति । स्थानादिषु योगत्वं च "मोक्षकारणीभूतात्मव्यापारत्वं योगत्वम्" इति योगलक्षणयोगादनुपचरितमेव ।

यत्तु "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्य" (पातं० यो० सू० २-२९) इति योगाङ्गत्वेन योगरूपता स्थानादिषु हेतुफलभावेनोपचारादभिधीयत इति **षोडशकवृत्तावुक्तं** तत् "चित्तवृत्तिनिरोधो योगः (पा० यो० सू० १-२) इति योगलक्षणाभिप्रायेणेति ध्येयम् । अत्र स्थानादिषु 'द्वयं' स्थानोर्णलक्षणं **कर्मयोग** एव, स्थानस्य साक्षादूर्णस्याप्युच्चार्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणस्यैव ग्रहणादुच्चारणांशे क्रियारूपत्वात् । तथा 'त्रयम्-' अर्थालम्बननिरालम्बनलक्षणं **ज्ञानयोगः**, 'तुः'-एवकारार्थ इति ज्ञानयोग एव, अर्थादीनां साक्षाद् ज्ञानरूपत्वात् ॥२॥ (यो०विं०गा० २) **27/2**

**[112]** एष कर्मयोगो ज्ञानयोगो वा कस्य भवतीति स्वामिचिन्तायामाह–

**देसे सव्वे य तहा, नियमेणेसो चरित्तिणो होइ ।**
**इयरस्स बीयमित्तं, इत्तु च्चिय केइ इच्छंति ॥३॥**

'देसे सव्वे य'त्ति । सप्तम्याः पञ्चम्यर्थत्वाद्देशतस्तथा सर्वतश्च चारित्रिण एव 'एषः'-प्रागुक्तः स्थानादिरूपो योगः । 'नियमेन'-इतरव्यवच्छेदलक्षणेन निश्चयेन भवति, क्रियारूपस्य वाऽस्य चारित्रमोहनीयक्षयोपशमनान्तरीयकत्वात् अत एवाध्यात्मादियोगप्रवृत्तिरपि चारित्रप्राप्तिमारभ्यैव ग्रन्थकृता **योगबिन्दौ** प्ररूपिता, तथाहि- "देशादिभेदतश्चित्रमिदं चोक्तं महात्मभिः । अत्र पूर्वोदितो योगोऽध्यात्मादिः संप्रवर्तते ॥३५७॥ इति । 'देशादिभेदतः' देशसर्वविशेषाद् 'इदं' चारित्रं 'अध्यात्मादिः' अध्यात्मं १ भावना २ आध्यानं ३ समता ४ वृत्तिसंक्षयश्च ५ । **तत्राध्यात्मम्**- उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् १, **भावना**-अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः २ **आध्यानं**-प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादिविषयसूक्ष्मोपयोगयुतं चित्तम् ३ **समता** अविद्याकल्पितेष्टानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां विषयाणां तुल्यताभावनम् ४, **वृत्तिसंक्षयश्च**-मनोद्वारा विकल्परूपाणां शरीरद्वारा परिस्पन्दरूपाणामन्यसंयोगात्मकवृत्तीनामपुनर्भावेन निरोधः ५। **अथै**तेषामध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः इति **चेद्** ? उच्यते–अध्यात्मस्य चित्रभेदस्य देवसेवाजपतत्त्वचिन्तनादिरूपस्य यथाक्रमं स्थाने ऊर्णेऽर्थे च । भावनाया अपि भाव्यसमानविषयत्वात्तत्रैव । ध्यानस्यालम्बने । समतावृत्तिसंक्षययोश्च तदन्ययोग इति भावनीयम् । ततो देशतः सर्वतश्च चारित्रिण एव स्थानादियोगप्रवृत्तिः संभवतीति सिद्धम् ।

**ननु** यदि देशतः सर्वतश्च चारित्रिण एव स्थानादिर्योगः तदा देशविरत्यादिगुणस्थानहीनस्य व्यवहारेण श्रद्धाधर्मादौ प्रवर्तमानस्य स्थानादिक्रियायाः सर्वथा नैष्फल्यं स्यादित्याशङ्क्याह-'इतरस्य'-देशसर्वचारित्रिव्यतिरिक्तस्य स्थानादिकं 'इत एव' देशसर्वचारित्रं विना योगसंभवाभावादेव 'बीजमात्रं'-योगबीजमात्रं 'केचिद्'-व्यवहारनयप्रधाना इच्छन्ति । "मोक्षकारणीभूतचारित्रतत्त्वसंवेदनान्तर्भूतत्वेन स्थानादिकं चारित्रिण एव योगः, अपुनर्बन्धकसम्यग्दृशोस्तु तद्योगबीजम्" इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निश्चयनयाभिमतः पन्थाः । व्यवहारनयस्तु योगबीजमप्युपचारेण योगमेवेच्छतीति व्यवहारनयेनापुनर्बन्धकादयः स्थानादियोगस्वामिनः, निश्चयनयेन तु चारित्रिण एवेति विवेकः । तदिदमुक्तम्-अपुनर्बन्धकस्यायम्, व्यवहारेण तात्त्विकः । अध्यात्म-भावनारूपो, निश्चयेनोत्तरस्य तु ॥३६९॥ (यो०बिं०) अपुनर्बन्धकस्य उपलक्षणा-त्सम्यग्दृष्टेश्च 'व्यवहारेण' कारणे कार्यत्वोपचारेण 'तात्त्विकः', कारणस्यापि कथञ्चित्कार्यत्वात् । 'निश्चयेन'-उपचारपरिहारेण 'उत्तरस्य तु चारित्रिण एव । सकृद्बन्धकादीनां तु स्थानादिकमशुद्धपरिणामत्वान्निश्चयतो व्यवहारतश्च न योगः किन्तु योगाभास इत्यवधेयम् । उक्तं च–"सकृदावर्तनादीनामतात्त्विक उदाहृतः । प्रत्यपायफलप्रायस्तथा वेषादिमात्रतः ॥३७०॥" (यो० बिं०) सकृद्-एकवारमा-वर्तन्ते उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः, आदिशब्दाद् द्विरावर्त्तनादिग्रहः, 'अतात्त्विकः' व्यवहारतो निश्चयतश्चातत्त्वरूपः ॥३॥ (यो०विं० गा० ३) **27/2**

तदेवं स्थानादियोगस्वामित्वं विवेचितम्, अथैतेष्वेव प्रतिभेदानाह–

**[113] इक्किक्को य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो ।**
**इच्छा-पवित्ति-थिर-सिद्धिभेयओ समयनीईए ॥४॥**

'इक्किक्को य'त्ति । 'अत्र' स्थानादौ 'पुनः' कर्मज्ञानविभेदाभिधानापेक्षया भूयः एकैकश्चतुर्द्धा 'तत्त्वतः'-सामान्येन दृष्टावपि परमार्थतः 'समयनीत्या'-योगशास्त्रप्रति-पादितपरिपाट्या 'इच्छाप्रवृत्तिस्थिरसिद्धिभेदतः'-इच्छाप्रवृत्तिस्थिरसिद्धिभेदानाश्रित्य 'मुणेयव्वो' त्ति ज्ञातव्यः ॥४॥ (यो०विं०गा०४) **27/3**

**[114]** तानेव भेदान् विवरीषुराह–

**तज्जुत्तकहापीईइ, संगया विपरिणामिणी इच्छा ।**
**सव्वत्थुवसमसारं, तप्पालणमो पवत्ती उ ॥५॥**

'तज्जुत्तकहा' इत्यादि । तद्युक्तानां–स्थानादियोगयुक्तानां कथायां प्रीत्या अर्थ-बुभुत्सयाऽर्थबोधेन वा जनितो यो हर्षस्तल्लक्षणया संगता-सहिता 'विपरिणामिनी' विधिकर्तृबहुमानादिगर्भं स्वोल्लासमात्राद्यत्किञ्चिदभ्यासादिरूपं विचित्रं परिणाम-मादधाना **इच्छा** भवति, द्रव्यक्षेत्राद्यसामग्र्येणाङ्गसाकल्याभावेऽपि यथाविहित-स्थानादियोगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारूपमित्यर्थः । **प्रवृत्तिस्तु** 'सर्वत्र' सर्वावस्थायाम् 'उपशमसारम्' उपशमप्रधानं यथा स्यात्तथा–'तत्पालनं-यथाविहितस्थानादियोगपालनम्, 'ओ' त्ति प्राकृतत्वात् वीर्यातिशयाद् यथाशास्त्रमङ्ग-साकल्येन विधीयमानं स्थानादि प्रवृत्तिरूपमित्यर्थः ॥५॥ (यो०विं०गा० ५.) **27/4**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[115] तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं ।**
**सव्वं परत्थसाहगरूवं पुण होइ सिद्धि त्ति ।।६।।**

'तह चेव'त्ति । 'तथैव' प्रवृत्तिवदेव सर्वत्रोपशमसारं स्थानादिपालनमेतस्य पाल्यमानस्य स्थानादेर्बाधकचिन्तारहितं **स्थिरत्वं** ज्ञेयम् । प्रवृत्तिस्थिरयोगयोरेतावान् विशेषः-यदुत प्रवृत्तिरूपं स्थानादियोगविधानं सातिचारत्वाद्बाधकचिन्तासहितं भवति। स्थिररूपं त्वभ्याससौष्ठवेन निर्बाधकमेव जायमानं तज्जातीयत्वेन बाधकचिन्ताप्रतिघाताच्छुद्धिविशेषेण तदनुत्थानाच्च तद्रहितमेव भवतीति । 'सर्वं' स्थानादि स्वस्मिन्नुपशमविशेषादिफलं जनयदेव परार्थसाधकं—स्वसन्निहितानां स्थानादियोगशुद्ध्यभाववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृशफलसंपादकं पुनः **सिद्धिर्**भवति । अत एव सिद्धाऽहिंसानां समीपे हिंसाशीला अपि हिंसां कर्तुं नालम्, सिद्धसत्यानां च समीपेऽसत्यप्रिया अप्यसत्यमभिधातुं नालम् । एवं सर्वत्रापि ज्ञेयम् । 'इतिः' -इच्छादिभेदपरिसमाप्तिसूचकः । अत्रायं मत्कृतः संग्रहश्लोकः "इच्छा तद्वत्कथाप्रीतिः, पालनं शमसंयुतम् । पालनं (प्रवृत्तिः) दोषभीहानिः स्थैर्यं सिद्धिः परार्थता ।।१।।" इति ।।६।। (यो०विं० गा० ६) **27/4**

**[116] जं वाइद्धं वच्चामेलिअं हीणक्खरं अच्चक्खरं पयहीणं विणयहीणं घोसहीणं जोगहीणं सुट्ठुदिन्नं दुट्ठुपडिच्छियं अकाले कओ सज्झाओ, काले न कओ सज्झाओ, असज्झाए सज्झाइयं, सज्झाए न सज्झाइयं तस्स मिच्छा मि दुक्कडं ।**

एए चोद्दस सुत्ता पुव्विल्लिया य एगूणवीसंति एए तेत्तीसमासायणसुत्तत्ति । एतानि चतुर्दशसूत्राणि श्रुतक्रियाकालगोचरत्वात् न पुनरुक्तभाञ्जीति, तथा दोषदुष्टपदं श्रुतं यदधीतम्, तद्यथा-व्याविद्धं विपर्यस्तरत्नमालावद्, अनेन प्रकारेण याऽऽशातना तया हेतुभूतया योऽतिचारः कृतस्तस्य मिथ्यादुष्कृतमिति क्रिया, एवमन्यत्रापि योज्या । व्यत्याम्रेडितं कोलिकपायसवत्, हीनाक्षरम्-अक्षरन्यूनम्, अत्यक्षरम्-अधिकाक्षरम्, पदहीनं-पदेनैवोनम्, विनयहीनम्-अकृतोचितविनयम्, घोषहीनम्-उदात्तादिघोषरहितम्, योगरहितम्-सम्यगकृतयोगोपचारम्, सुष्ठुदत्तं गुरुणा, दुष्ठु प्रतीच्छितं कलुषितान्तरात्मनेति, अकाले कृतः स्वाध्यायो यो यस्य श्रुतस्य कालिकादेरकाल इति, काले न कृतः स्वाध्यायः-यो यस्यात्मीयोऽध्ययनकाल उक्त इति, अस्वाध्यायिके स्वाध्यायितम्, तथा स्वाध्यायिके-अस्वाध्यायिकविपर्ययलक्षणे न स्वाध्यायितम् । इत्थमाशातनया योऽतिचारः कृतस्तस्य मिथ्यादुष्कृतमिति पूर्ववत्। (आव०नि० पगामसिज्झा०) **27/5**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[117]** परतत्त्व दिदृक्षाया अनालम्बनयोगत्वे उपपत्तिमाह–

**तत्राऽप्रतिष्ठितोऽयं यतः प्रवृत्तश्च तत्त्वतस्तत्र ।**
**सर्वोत्तमानुजः खलु तेनाऽनालम्बनो गीतः ॥१५/९) ।**

तत्र–परतत्त्वे **अप्रतिष्ठितः**–अलब्धप्रतिष्ठः **अयं**–परमात्मदिदृक्षाख्यो योगो **यतः**–यस्मात् **प्रवृत्तश्च** ध्यानरूपेण **तत्त्वतः**–वस्तुतः **तत्र**–परतत्त्वें, तदाऽऽभिमुख्याऽप्रच्यवात् । **सर्वोत्तमस्य**–योगनिरोधाख्यनिखिलातिशायियोगस्य अनुजः–प्रागनन्तरवर्ती **खलु तेन** कारणेन **अनालम्बनः**–अनालम्बनयोगो **गीतः**–कथितः पुरा विद्वद्भिः ।

स्यादेतत् परतत्त्वदिदृक्षायाः परतत्त्वदर्शनं यावत् अनालम्बनत्वे अपरतत्त्वदिदृक्षायाः अप्यपरतत्त्वदर्शनं यावदनालम्बनत्वापत्तिः अपरतत्त्वस्य दृष्टत्वाभ्युपगमे च ध्यानानुपपत्तिरिति, मैवम्, अपरतत्त्वे प्रतिमाद्यालम्बनद्वारा सामान्यतो दृष्टेऽपि विशेषदर्शनाय ध्यानोपपत्तेः परम्परयाऽऽलम्बनवत्त्वेन च सालम्बनत्वव्यपदेशात्परतत्त्वे तु केनाऽपि द्वारेण दर्शनाभावादनालम्बनत्वोपपत्तेः ॥१५/९॥ [षोड० प्र०षो०१५ श्लो०९] **27/6**

**[118]** आलम्बनविधयैवानालम्बनस्वरूपमुपदर्शयन्नाह–

**आलंबणं पि एयं, रूवमरूवी य इत्थ परमु त्ति ।**
**तग्गुणपरिणइरूवो, सुहुमो अणालंबणो नाम ॥१९॥**

'आलंबणं पि' त्ति । आलम्बनमपि 'एतत्' प्राकरणिकबुद्धिसंनिहितम् 'अत्र'-योगविचारे 'रूपि'-समवसरणस्थजिनरूपतत्प्रतिमादिलक्षणम्, 'च' पुनः अरूपी-परमः-सिद्धात्मा इत्येवं द्विविधम् । तत्र तस्य अरूपिपरमात्मलक्षणस्यालम्बनस्य ये गुणाः-केवलज्ञानादयस्तेषां परिणतिः समापत्तिलक्षणा तया रूप्यत इति तद्गुणपरिणतिरूपः सूक्ष्मोऽतीन्द्रियविषयत्वादनालम्बनो नाम योगः, अरूप्यालम्बनस्येषदालम्बनत्वेन 'अलवणा यवागूः' इत्यत्रेवात्र नञ्पदप्रवृत्तेरविरोधात् । "सुहुमो आलंबणो नाम"त्ति क्वचित्पाठस्तत्रापि सूक्ष्मालम्बनो नामैष योगस्ततोऽनालम्बन एवेति भाव उन्नेयः, उक्तं चात्राधिकारे चतुर्दशषोडशके ग्रन्थकृतैव-"सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः । जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः ॥१॥" सहालम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तत इति सालम्बनः । आलम्बनात्-विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते तद्विषयो निरालम्बन इति यावत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनरूपस्य-समवसरणस्थस्य ध्यानं खलु 'आद्यः'-सालम्बनो योगः । तस्यैव-जिनस्य तत्त्वं-केवलजीवप्रदेशसंघातरूपं केवलज्ञानादिस्वभावं तस्मिन् गच्छतीति तत्तत्त्वगः, 'तुः' -एवार्थे, 'अपरः'-अनालम्बनः, अत्रारूपितत्त्वस्य स्फुटविषयत्वाभावादनालम्बनत्वमुक्तम् । अधिकृतग्रन्थगाथायां च विषयतामात्रेण तस्यालम्बनत्वमनूद्यापि तद्विषययोगस्येषदालम्बनत्वादनालम्बनत्वमेव प्रासाधीति फलतो न कश्चिद्विशेष इति स्मर्तव्यम् । अयं चानालम्बनयोगः "शास्त्रसंदर्शितोपायस्तदतिक्रान्तगोचरः शक्त्युद्रेकाद्विशेषेण सामर्थ्याख्योऽयमुत्तमः ॥५॥" (योग० समु०) इति श्लोकोक्तस्वरूपक्षपकश्रेणीद्वितीयापूर्वकरणभाविक्षायोपशमिकक्षान्त्यादिधर्म संन्यासरूपसामर्थ्ययोगतो निस्सङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा तल्लक्षणो मन्तव्यः । आह च–

'सामर्थ्ययोगतो या, तत्र दिदृक्षेत्यसङ्गशक्त्याढ्या ।
साऽनालम्बनयोगः, प्रोक्तस्तद्दर्शनं यावत् ॥ (षो० १५-८) ॥

'तत्र' -परत्वे द्रष्टुमिच्छा-दिदृक्षा 'इति' एवंस्वरूपा असङ्गशक्त्या-निरभिष्वङ्गाविच्छिन्नप्रवृत्त्या आढ्या-पूर्णा 'सा'-परमात्मदर्शनेच्छा अनालम्बनयोगः, परतत्त्वस्याऽदर्शनम्-अनुपलम्भं यावत्, परमात्मस्वरूपदर्शने तु केवलज्ञानेनानालम्बनयोगो न भवति; तस्य तदालम्बनत्वात् । अलब्धपरतत्त्वस्तल्लाभाय ध्यानरूपेण प्रवृत्तो ह्यनालम्बनयोगः, स च क्षपकेण धनुर्धरेण क्षपकश्रेण्याख्यधनुर्दण्डे लक्ष्यपरतत्त्वाभिमुखं तद्वेधाविसंवादितया व्यापारितो यो बाणस्तत्स्थानीयः यावत्तस्य न मोचनं तावदनालम्बनयोगव्यापारः, यदा तु ध्यानान्तरिकाख्यं तन्मोचनं तदाऽविसंवादितत्पतनमात्रादेव लक्ष्यवेध इतीषुपातकल्पः सालम्बनः केवलज्ञानप्रकाश एव भवति, न त्वनालम्बनयोगव्यापारः, फलस्य सिद्धत्वादिति निर्गलितार्थः । आह च "तत्राऽप्रतिष्ठितोऽयं यतः प्रवृत्तश्च तत्त्वतस्तत्र । सर्वोत्तमानुजः खलु, तेनानालम्बनो गीतः ॥९॥ द्रागस्मात्तद्दर्शनमिषुपातज्ञातमात्रतो ज्ञेयम् । एतच्च केवलं तत्, ज्ञानं यत्तत्परं ज्योतिः ॥१०॥' (षो० १५।९-१०) । 'तत्र' परतत्त्वे 'अप्रतिष्ठितः'-अलब्धप्रतिष्ठः सर्वोत्तमस्य योगस्य-अयोगाख्यस्य अनुजः-पृष्ठभावी ॥ 'तद्दर्शनं' परतत्त्वदर्शनम्, 'एतच्च' परतत्त्वदर्शनं 'केवलं' संपूर्णं 'तत्'-प्रसिद्धं ज्ञानं यत् तत् केवलज्ञानं 'परं' प्रकृष्टं ज्योतिः ॥ स्याद् अत्र कस्यचिदाशङ्का इषुपातज्ञातात्परतत्त्वदर्शने सति केवलज्ञानोत्तरमनालम्बनयोगप्रवृत्तिर्मा भूत्, सालम्बनयोगप्रवृत्तिस्तु विशिष्टतरा काचित्स्यादेव, केवलज्ञानस्य लब्धत्वेऽपि मोक्षस्याद्यापि योजनीयत्वात् । मैवम्-केवलिनः स्वात्मनि मोक्षस्य योजनीयत्वेऽपि ज्ञानाकाङ्क्षाया अविषयतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानानालम्बनत्वात् क्षपकश्रेणिकालसम्भवविविशिष्टतरयोगप्रयत्नाभावादावर्जी-करणोत्तरयोगनिरोधप्रयत्नाभावाच्चार्वाक्तनकेवलिव्यापारस्य ध्यानरूपत्वाभावा-दुक्तान्यतरयोगपरिणतेरेव ध्यानलक्षणत्वात् । आह च **महाभाष्यकारः—**

'सुदढ्ढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं । झाणं करणाण मयं ण उ चित्तणिरोहमित्तागं ॥१।' (विशेषावश्यक-गाथा ३०७१) इति । स्यादेतद्, यदि क्षपकश्रेणिद्वितीयापूर्वकरणभावी सामर्थ्ययोग एवानालम्बनयोगो ग्रन्थकृता-ऽभिहितस्तदा तदप्राप्तिमतामप्रमत्तगुणस्थानानामुपरतसकलविकल्पकल्लोलमालानां चिन्मात्रप्रतिबन्धोपलब्धरत्नत्रयसाम्राज्यानां जिनकल्पिकादीनामपि निरालम्बनध्यान-मसङ्गताभिधानं स्यादिति । मैवम्-यद्यपि तत्त्वतः परतत्त्वलक्ष्यवेधाभिमुखस्तदवि-संवादी सामर्थ्ययोग एव निरालम्बनस्तथापि परतत्त्वलक्ष्यवेधप्रगुणतापरिणति-मात्रादर्वाक्तनं परमात्मगुणध्यानमपि मुख्यनिरालम्बनप्रापकत्वादेकध्येयाकारपरिणति-शक्तियोगाच्च निरालम्बनमेव । अत एवावस्थात्रयभावने रूपातीतसिद्धगुणप्रणि-धानवेलायामप्रमत्तानां शुक्लध्यानांशो निरालम्बनोऽनुभवसिद्ध एव । संसार्यात्मनोऽपि च व्यवहारनयसिद्धमौपाधिकं रूपमाच्छाद्य शुद्धनिश्चयनयपरिकल्पितसहजात्मगुण-विभावने निरालम्बनध्यानं दुरपह्नवमेव, परमात्मतुल्यतयाऽऽत्मज्ञानस्यैव निरालम्बन-ध्यानांशत्वात्, तस्यैव च मोहनाशकत्वात् । आह च—"जो जाणइ अरिहंते, दव्वत्तगुणत्तपज्जवत्तेहिं । सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं' ॥ प्र० सा० १-८०॥" इति । तस्माद्रूपिद्रव्यविषयं ध्यानं सालम्बनम्, अरूपिविषयं च निरालम्बनमिति स्थितम् ॥१९॥ (यो०विं०गा०१९) **27/6**

**[119]** तत्राद्यस्वरूपमाह-

**यत्राऽऽदरोऽस्ति परमः, प्रीतिश्च हितोदया भवति कर्तुः ।**
**शेषत्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम् ॥१०/३॥**

यत्रेत्यादि । यत्र-अनुष्ठाने, आदरः—प्रयत्नातिशयोऽस्ति, प्रीतिश्च अभिरुचि-रूपा, हित उदयो यस्याः सा तथा भवति कर्तुः—अनुष्ठातुः शेषाणां प्रयोजनानां त्यागेन च तत्काले यच्च करोति तदेकमात्रनिष्ठतया तत्प्रीत्यनुष्ठानं ज्ञेयम् ॥१०/३॥ द्वितीयमाह—

**गौरवविशेषयोगाद्, बुद्धिमतो यद्विशुद्धतरयोगम् ।**
**क्रिययेतरतुल्यमपि ज्ञेयं तद्भक्त्यनुष्ठानम् ॥१०/४॥**

गौरवेत्यादि-गौरवं-गुरुत्वं-पूज्यत्वं तस्य विशेषयोगः-अधिकसम्बन्धः ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**बुद्धिमतः**-विशेषग्राहिधीशालिनः यदनुष्ठानं **विशुद्धतरयोगं**-परिशुद्धतरव्यापारं **क्रियया**-बाह्यकारणेन **इतरतुल्यमपि**-प्रीत्यनुष्ठानतुल्यमपि ज्ञेयं तत्-एवंविधं भक्त्यनुष्ठानम् ॥१०/४॥

कः पुनः प्रीतिभक्त्योर्विशेषः ? उच्यते-

**अत्यन्तवल्लभा खलु पत्नी तद्वद्धिता च जननीति ।**
**तुल्यमपि कृत्यमनोर्ज्ञातं स्यात् प्रीति-भक्तिगतम् ॥१०।५॥**

**अत्यन्ते**त्यादि । **अत्यन्तवल्लभा खलु**-अत्यन्तप्रियैव **पत्नी**-भार्या, **तद्वत्**-पत्नीवद् अत्यन्तेष्टैव **हिता च**- हितकारिणी **इति** कृत्वा **जननी**-माता **तुल्यमपि**-सदृशमपि **कृत्यं**-भोजनाच्छादनादि, **अनयोः**-जननीपत्न्योः **ज्ञातम्**-उदाहरणं **स्यात् प्रीतिभक्तिगतम्**-प्रीतिभक्तिविषयम् । प्रीत्या पत्न्याः क्रियते भक्त्या मातुरिती-यान् विशेष इति भावः । प्रीतित्व-भक्तित्वे क्रियागुणमानोरथिकहर्षगतौ जाति-विशेषाविति तर्कानुसारिणः ॥१०/५॥

तृतीयमाह→

**वचनात्मिका प्रवृत्तिः, सर्वत्रौचित्ययोगतो या तु ।**
**वचनानुष्ठानमिदम्, चारित्रवतो नियोगेन ॥१०/६॥**

'**वचने**'त्यादि । **वचनात्मिका**-आगमार्थानुस्मरणाऽविनाभाविनी **प्रवृत्तिः**-क्रियारूपा **सर्वत्र**-सर्वस्मिन् धर्मव्यापारे क्षान्तिप्रत्युपेक्षादौ **औचित्ययोगतः**-देश-काल-पुरुष-व्यवहाराद्यानुकूल्येन या तु भवति, **इदम्**-एवं प्रवृत्तिरूपं **वचनानुष्ठानं चारित्रवतः**-साधोः **नियोगेन**-नियमेन भवति, तस्यैव भवदुर्गलङ्घनं षष्ठगुणस्थाना-ऽवाप्तेस्तत्र च लोकसंज्ञाऽभावात्, नान्यस्य, विपर्ययात् । निश्चयनयमतमेतत् । व्यवहारतस्त्वन्यस्यापि मार्गानुसारिणो वचने प्रवर्त्तमानस्य देशत इदं भवत्येवेति द्रष्टव्यम् ॥१०/६॥

तुर्यस्वरूपमाह→

**यत्त्वभ्यासातिशयात्, सात्मीभूतमिव चेष्ट्यते सद्भिः ।**
**तदसङ्गनुष्ठानं, भवति त्वेतत्तदावेधात् ॥१०/७॥**

'**यत्त्वि**त्यादि । **यत्तु**-यत्पुनः **अभ्यासातिशयात्**-भूयो भूयः तदासेवनेन संस्कारविशेषात्, **सात्मीभूतमिव**-चन्दनगन्धन्यायेनाऽऽत्मसाद्भूतमिव **चेष्ट्यते**-क्रियते **सद्भिः**-सत्पुरुषैः जिनकल्पिकादिभिः **तत्**-एवंविधम् **असङ्गानुष्ठानम्** । **भवति तु एतत्**-जायते पुनरेतत् **तदावेधात्**-प्राथमिकवचनसंस्कारात् ॥१०/७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वचनाऽसङ्गानुष्ठानयोर्विशेषमाह—

**चक्रभ्रमणं दण्डात्तदभावे चैव यत्परं भवति ।**
**वचनासङ्गानुष्ठानयोस्तु तज्ज्ञापकं ज्ञेयम् ॥१०/८॥**

'**चक्रे**'त्यादि । **चक्रभ्रमणं**-कुम्भकारचक्रपरावर्त्तनं **दण्डात्**-दण्डसंयोगात् **तदभावे चैव यत् परम्**-अन्यत् **भवति, वचनासङ्गानुष्ठानयोः**-प्रस्तुतयोः **तु**-तदेव **ज्ञापकं**-उदाहरणं **ज्ञेयम्**। यथा चक्रभ्रमणमेकं दण्डसंयोगात्प्रयत्नपूर्वकाद् भवति एवं वचनानुष्ठानमप्यागमसंयोगात् प्रवर्तते । यथा चान्यच्चक्रभ्रमणं दण्डसंयोगाभावे केवलादेव संस्काराऽपरिक्षयात् सम्भवति एवमागमसंस्कारमात्रेण वस्तुतो वचननिरपेक्षमेव स्वाभाविकत्वेन यत्प्रवर्तते तदसङ्गानुष्ठानमितीयान् भेद इति भावः ॥१०/८॥

एषामेव चतुर्णामनुष्ठानानां **फल**विभागमाह-

**अभ्युदयफले चाऽऽद्ये, निःश्रेयससाधने तथा चरमे ।**
**एतदनुष्ठानानाम्, विज्ञेये इह गतापाये ॥१०।९॥**

**अभ्युदयेत्यादि अभ्युदयः**-स्वर्गः तत्फले एव **आद्ये**-प्रीतिभक्त्यनुष्ठाने । **निःश्रेयसं**-मोक्षः तत्साधने **तथा चरमे**-वचनासङ्गानुष्ठाने । एतेषामनुष्ठानानां मध्ये **विज्ञेये इह**-प्रक्रमे, **गतापाये**-विघ्नरहिते अत एव पूर्वसंयमः स्वर्गहेतुः अपूर्वसंयमश्च मोक्षहेतुरिति सिद्धान्तनयः ॥१०।९॥ (षोड०प्र०षो०१०, श्लो०३...९)

**27/7**

**[120]** नन्वविधिनाऽपि चैत्यवन्दनाद्यनुष्ठाने तीर्थप्रवृत्तिरव्यवच्छिन्ना स्यात्, विधेरेवान्वेषणे तु द्वित्राणामेव विधिपराणां लाभात् क्रमेण तीर्थोच्छेदः स्यादिति तदनुच्छेदायाविध्यनुष्ठानमप्यादरणीयमित्याशङ्कायामाह—

**तित्थस्सुच्छेयाइ वि, नालंबणमित्थ जं स एमेव ।**
**सुत्तकिरियाइ नासो, एसो असमंजसविहाणा ॥१४॥**

तित्थस्स इत्यादि । 'अत्र' अविध्यनुष्ठाने 'तीर्थोच्छेदाद्यपि नालम्बनं-' तीर्थानुच्छेदायाविध्यनुष्ठानमपि कर्तव्यमिति नालम्बनीयम् । 'यद्'-यस्मात् 'एवमेव' अविध्यनुष्ठाने क्रियमाण एव 'असमञ्जसविधानात्'-विहितान्यथाकरणादशुद्धपारम्पर्यप्रवृत्त्या सूत्रक्रियाया विनाशः 'स' एष तीर्थोच्छेदः । न हि तीर्थनाम्ना जनसमुदाय एव तीर्थम्, आज्ञारहितस्य तस्यास्थिसंघातरूपत्वप्रतिपादनात्, किन्तु सूत्रविहितयथोचितक्रियाविशिष्टसाधुसाध्वीश्रावकश्राविकासमुदायः । तथा चाविधि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणे सूत्रक्रियाविनाशात्परमार्थतस्तीर्थविनाश एवेति तीर्थोच्छेदालम्बनेनाविधिस्थापने लाभमिच्छतो मूलक्षतिरायातेत्यर्थः ॥१४॥ [यो०विं०गा० १४] **27/8**

सूत्रक्रियाविनाशस्यैवाहितावहतां स्पष्टयन्नाह—

**सो एस वंकओ चिय, न य सयमयमारियाणमविसेसो ।**
**एयं पि भावियव्वं, इह तित्थुच्छेयभीरूहिं ॥१५॥**

'सो एस' त्ति । 'स एष' सूत्रक्रियाविनाशः 'वक्र एव' तीर्थोच्छेदपर्यवसायितया दुरन्तदुःखफल एव । ननु शुद्धक्रियाया एव पक्षपाते क्रियमाणे शुद्धायास्तस्या अलाभादशुद्धायाश्चानङ्गीकारादानुश्रोतसिक्या वृत्त्याऽक्रियापरिणामस्य स्वत उपनिपातात्तीर्थोच्छेदः स्यादेव, यथाकथञ्चिदनुष्ठानावलम्बने च जैनक्रियाविशिष्टजनसमुदायरूपं तीर्थं न व्यवच्छिद्यते, न च कर्तुरविधिक्रियया गुरोरुपदेशकस्य कश्चिद्दोषः, अक्रियाकर्तुस्तस्य स्वपरिणामाधीनप्रवृत्तिकत्वात्, केवलं क्रियाप्रवर्तनेन गुरुस्तीर्थव्यवहाररक्षणाद् गुण एवेत्याशङ्कायामाह—'न च स्वयं मृतमारितयोरविशेषः, किन्तु विशेष एव' स्वयं मृते स्वदुष्टाशयस्यानिमित्तत्वात्, मारिते च मार्यमाणकर्मविपाकसमुपनिपातेऽपि स्वदुष्टाशयस्य निमित्तत्वात्, तद्वदिह स्वयमक्रियाप्रवृत्तं जीवमपेक्ष्य गुरोर्न दूषणम्, तदीयाविधिप्ररूपणमवलम्ब्य श्रोतुरविधिप्रवृत्तौ च तस्योन्मार्गप्रवर्तनपरिणामादवश्यं महादूषणमेव । तथा च श्रुतिकेवलिनो वचनम् 'जह सरणमुवगयाणं, जीवाण सिरो निकिंतए जो उ । एवं आयरिओ वि हु, उस्सुत्तं पण्णवेंतो य ॥ [उपदेशमाला-५१८] । न केवलमविधिप्ररूपणे दोषः, किन्त्वविधिप्ररूपणाभोगेऽ (?प्य) विधिनिषेधासम्भवात् तदाशंसनानुमोदनापत्तेः फलतस्तत्प्रवर्तकत्वाद् दोष एव । तस्मात् "स्वयमेतेऽविधिप्रवृत्ता नात्रास्माकं दोषो, वयं हि क्रियामेवोपदिशामो न त्वविधिम्" एतावन्मात्रमपुष्टालम्बनमवलम्ब्य नोदासितव्यं परहितनिरतेन धर्माचार्येण किन्तु सर्वोद्यमेनाविधिनिषेधेन विधावेव श्रोतारः प्रवर्तनीयाः, एवं हि ते मार्गे प्रवेशिताः, अन्यथा तून्मार्गप्रवेशनेन नाशिताः । एतदपि भावयितव्यमिह तीर्थोच्छेदभीरुभिः विधिव्यवस्थापनेनैव ह्येकस्यापि जीवस्य सम्यग्बोधिलाभे चतुर्दशरज्ज्वात्मकलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एवेति । यस्तु श्रोता विधिशास्त्रश्रवणकालेऽपि न संवेगभागी तस्य धर्मश्रावणेऽपि महादोष एव, तथा चोक्तं ग्रन्थकृतैव षोडशके—'यः श्रृण्वन् सिद्धान्तम्, विषयपिपासातिरेकतः पापः । प्राप्नोति न संवेगम्, तदापि यः सोऽचिकित्स्य इति ॥१।. नैवंविधस्य शस्तम्, मण्डल्युपवेशनप्रदानमपि । कुर्वन्नेतद् गुरुरपि, तदधिकदोषो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽवगन्तव्यः ॥२॥ (षो० १० श्लो० १४-१५) मण्डल्युपवेशनं सिद्धान्तदानेऽर्थ-मण्डल्युपवेशनम् । 'तदधिकदोषः' अयोग्यश्रोतुरधिकदोषः, पापकर्तुरपेक्षया तत्कारयितुर्महादोषत्वात् । तस्माद्विधिश्रवणरसिकं श्रोतारमुद्दिश्य विधिप्रापणेनैव गुरुस्तीर्थव्यवस्थापको भवति, विधिप्रवृत्त्यैव च तीर्थमव्यवच्छिन्नं भवतीति सिद्धम् ॥१५॥ (यो०विं०गा० १५) **27/8**

ननु किमेतावद्गूढार्थगवेषणया ? यद्बहुभिर्जनैः क्रियते तदेव कर्तव्यम्, 'महाजनो येन गतः स पन्थाः' इति वचनात्, जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेस्तस्यैवाऽऽतीर्थकालभावित्वेन तीर्थव्यवस्थापकत्वादित्याशङ्कायामाह-

**मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं ।**<br>**सम्मं पयट्टियव्वं, बुहेणमइनिउणबुद्धीए ॥१६॥**

'मुत्तूण'त्ति । मुक्त्वा ('लोकसंज्ञां'-) 'लोक एव प्रमाणं' इत्येवंरूपां शास्त्रनिरपेक्षां मतिं 'उड्ढूण य' त्ति-वोड्ढ्वा च 'साधुसमयसद्भावं-समीचीन-सिद्धान्तरहस्यं 'सम्यग्'-विधिनीत्या प्रवर्तितव्यं चैत्यवन्दनादौ 'बुधेन'-पण्डितेन 'अतिनिपुणबुद्ध्या'-अतिशयितसूक्ष्मभावानुधाविन्या मत्या । साधुसमयसद्-भावश्चायम्-'लोकमालम्ब्य कर्तव्यम्, कृतं बहुभिरेव चेत् । तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन ॥४॥ (ज्ञानसारे २३-४), स्तोका आर्या अनार्येभ्यः, स्तोका जैनाश्च तेष्वपि । सुश्राद्धास्तेष्वपि स्तोकाः, स्तोकास्तेष्वपि सत्क्रियाः ॥२॥ श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे च न । स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्मशोधकाः ॥३॥ (ज्ञानसारे २३-५) एकोऽपि शास्त्रनीत्या यो, वर्तते स महाजनः । किमज्ञसार्थैः शतमप्यन्धानां नैव पश्यति ॥४॥ यत्संविग्नजनाचीर्णम्, श्रुतवाक्यैरबाधितम् । तज्जीतं व्यवहाराख्यम्, पारम्पर्यविशुद्धिमत् ॥५॥ यदाचीर्ण-मसंविग्नैः, श्रुतार्थानवलम्बिभिः । न जीतं व्यवहारस्तदन्धसंततिसम्भवम् ॥६॥ आकल्पव्यवहारार्थम्, श्रुतं न व्यवहारकम् । इतिवक्तुर्महत्तन्त्रे, प्रायश्चित्तं प्रदर्शितम् ॥७॥ तस्माच्छ्रुतानुसारेण, विध्येकरसिकैर्जनैः । संविग्नजीतमालम्ब्यमित्याज्ञा पारमेश्वरी ॥८॥''

ननु यद्येवं सर्वादरेण विधिपक्षपातः क्रियते तदा-'अविहिकया वरमकयं, असूयवयणं भणंति सव्वन्नू । पायच्छित्तं जम्हा, अकए गुरुयं कए लहुअं ॥१॥ इत्यादि वचनानां का गतिः ? इति चेत्, नैतानि वचनानि मूलत एवाविधि-प्रवृत्तिविधायकानि, किन्तु विधिप्रवृत्तावप्यनाभोगादिनाऽविधिदोषश्छद्मस्थस्य भवतीति तद्भिया न क्रियात्यागो विधेयः प्रथमाभ्यासे तथाविधज्ञानाभावादन्यदपि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा प्रज्ञापनीयस्याविधिदोषो निरनुबन्ध इति तस्य तादृशानुष्ठानमपि न दोषाय, विधिबहुमानाद् गुर्वाज्ञायोगाच्च तस्य फलतो विधिरूपत्वादित्येतावन्मात्रप्रतिपादनपराणीति न कश्चिद्दोषः । अवोचाम चाध्यात्मसारप्रकरणे–'अशुद्धापि हि शुद्धायाः, क्रिया हेतुः सदाशयात् । ताम्रं रसानुवेधेन, स्वर्णत्वमुपगच्छति ॥१॥' (२-१६ श्लो०) यस्तु विध्यबहुमानादविधिक्रियामासेवते तत्कर्तुरपेक्षया विधिव्यवस्थापनरसिकस्तदकर्ताऽपि भव्य एव तदुक्तं योगदृष्टिसमुच्चये ग्रन्थकृतैव–'तात्त्विकः पक्षपातश्च, भावशून्या च या क्रिया । अनयोरन्तरं ज्ञेयम्, भानुखद्योतयोरिव ॥१॥' (२२१ श्लो०) इत्यादि । न चैवं तादृशषष्ठसप्तमगुणस्थानपरिणतिप्रयोज्यविधिव्यवहाराभावादस्मदादीनामिदानीन्तनमावश्यकाद्याचरणमकर्तव्यमेव प्रसक्तमिति शङ्कनीयम्, विकलानुष्ठानानामपि 'जा जा हविज्ज जयणा, सा सा से णिज्जरा होई ।' इत्यादिवचनप्रामाण्यात् यत्किञ्चिद्विध्यनुष्ठानस्येच्छायोगसंपादकतदितरस्यापि बालाद्यनुग्रहसम्पादकत्वेनाकर्तव्यत्वासिद्धेः । इच्छायोगवद्भिर्विकलानुष्ठायिभिर्गीतार्थैः सिद्धान्तविधिप्ररूपणे तु निर्भरो विधेयस्तस्यैव तेषां सकलकल्याणसम्पादकत्वात्, उक्तं च गच्छाचारप्रकीर्णके-'जइ वि ण सक्कं काउं, सम्मं जिणभासियं अणुट्ठाणं । तो सम्मं भासिज्जा, जह भणियं खीणरागेहिं ॥१॥ ओसन्नो वि विहारे, कम्मं सोहेइ सुलभबोही य । चरणकरणं विसुद्धम्, उववूहंतो परूविंतो ॥२॥ (गाथा २३-२४) इति । ये तु गीतार्थाज्ञानिरपेक्षा विध्यभिमानिन इदानीन्तनव्यवहारमुत्सृजन्ति, अन्यं च विशुद्धं व्यवहारं संपादयितुं न शक्नुवन्ति ते बीजमात्रमप्युच्छिन्दन्तो महादोषभाजो भवन्ति । विधिसम्पादकानां विधिव्यवस्थापकानां च दर्शनमपि प्रत्यूहव्यूहविनाशनमिति वयं वदामः ॥१६॥ (यो०विं०गा० १६) **27/8**

**[121]** प्रथमप्रश्नप्रतिवचनमुक्तम्, शेषप्रश्नप्रतिवचनमाह–

**सुसंवुडा पंचहिँ संवरेहिं, इह जीवियं अणवकंखमाणो ।**
**वोसट्ठकाओ सुइचत्तदेहो, महाजयं जयई जण्णसिट्ठं ॥४२॥**

सुष्ठु संवृतः–स्थगितसमस्ताश्रवद्वारः सुसंवृतः, कैः ? पञ्चभिः-पञ्चसङ्ख्यैः संवरैः-प्राणातिपातविरत्यादिव्रतैः 'इहे त्यस्मिन् मनुष्यजन्मनि, उपलक्षणत्वात्परत्र च 'जीवितं'-प्रस्तावादसंयमजीवितम् 'अनवकाङ्क्षन्'-अनिच्छन्, यद्वा अपेर्गम्यमानत्वाज्जीवितमपि-आयुरप्यास्तामन्यद्धनादि अनवकाङ्क्षन्, यत्र हि व्रतबाधा तत्रासौ जीवितमपि न गणयति, अत एव व्युत्सृष्टो-विविधैरुपायैर्विशेषेण वा परीषहोपसर्गसहिष्णुतालक्षणेनोत्सृष्टः-त्यक्तः कायः-शरीरमनेनेति व्युत्सृष्टकायः, शुचिः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अकलुषव्रतः स चासौ त्यक्तदेहश्च-अत्यन्तनिष्प्रतिकर्म्मतया शुचित्यक्तदेहो महान् जयः-कर्म्मशत्रुपराभवनलक्षणो यस्मिन् यज्ञश्रेष्ठेऽसौ महाजयस्तम्, क्रियाविशेषणं वा महाजयं यथा भवत्येवं यजते यतिरिति गम्यते, ततो भवन्तोऽप्येवमेव यजन्तामिति भावः, तिङ्वचनव्यत्ययेन वा 'जयइ'त्ति यजताम्, कमित्याह-'जण्णसेट्ठं'ति प्राकृतत्वाच्छ्रेष्ठयज्ञम्, श्रेष्ठवचनेन चैतद्यजन एव स्विष्टं कुशला वदन्ति, एष एव च कर्म्मप्रणोदनोपाय इत्युक्तं भवतीति सूत्रार्थः । यदीदृग्गुणः श्रेष्ठयज्ञं यजते अतस्त्वमपीदृग्गुण एव, तथा च तं यजमानस्य कान्युपकरणानि को वा यजन-विधिरित्यभिप्रायेण त एवमाहुः-

**के ते जोई के व ते जोइठाणा ?, का ते सूया किं च ते कारिसंगं ? ।**
**एहा य ते कयरा संति भिक्खू ? कयरेण होमेण हुणासि जोइं ? ॥४३॥**

किन्तु अयमर्थः-किंरूपं 'ते'-तव 'ज्योति'रिति-अग्निः 'के व ते जोइठाणे'त्ति किं वा ते-तव ज्योतिःस्थानं यत्र ज्योतिर्निधीयते, का श्रुवो ? घृतादिप्रक्षेपिका दर्व्यः, 'किं च'त्ति किं वा करीषः-प्रतीतः स एवाङ्गम्-अग्न्युद्दीपनकारणं करीषाङ्गं येनासौ सन्धुक्ष्यते, एधाश्च-समिधो यकाभिरग्निः प्रज्वाल्यते, 'ते'-तव कतरा इति काः ? 'संति' त्ति चस्य गम्यमानत्वाच्छान्तिश्च-दुरितोपशमनहेतुरध्ययनपद्धतिः कतरेति प्रक्रमो, 'भिक्षु' इति भिक्षो ! कतरेण 'होमेन'-हवनविधिना, समेत धावतीत्यादिवत् तृतीया, जुहोषि-आहुतिभिः प्रीणयसि, किं ? ज्योतिः-अग्निम्, षड्जीवनिकायसमारम्भनिषेधेन ह्यस्मदभिमतो होमः तदुपकरणानि च पूर्व्वं निषिद्धानीति कथं भवतो यजनसम्भवः ? इति सूत्रार्थः ॥ मुनिराह-

**तवो जोई जीवो जोइठाणं, जोगा सुया सरीरं कारिसंगं ।**
**कम्मं एहा संजभजोग संती, होमं हुणामी इसिणं पसत्थं ॥४४॥**

'तपो'-बाह्याभ्यन्तरभेदभिन्नं 'ज्योतिः'-अग्निः यथा हि ज्योतिरिन्धनानि-भस्मीकरोत्येवं तपोऽपि भावेन्धनानि-कर्म्माणि जीवो-जन्तुर्ज्योतिःस्थानम्, तपोज्योतिषस्तदाश्रयत्वात्, युज्यन्ते-सम्बध्यन्ते स्वकर्म्मणेति योगाः-मनोवाक्कायाः श्रुवः, ते हि शुभव्यापाराः स्नेहस्थानीयाः, तपोज्योतिषो ज्वलनहेतुभूताः तत्र संस्थाप्यन्त इति, शरीरं करीषाङ्गम्, तेनैव हि तपोज्योतिरुद्दीप्यते, तद्भावभावि-त्वात्तस्य, 'कर्म'-उक्तरूपम्, एधास्तस्यैव तपसा भस्मीभावनयनात्, 'संजमजोग' त्ति संयमयोगाः-संयमव्यापाराः-शान्तिः सर्व्वप्राण्युपद्रवापहारित्वात्तेषाम्, तथा 'होम'न्ति होमेन जुहोति तपोज्योतिरिति गम्यते, ऋषीणां-मुनीनां सम्बन्धिना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पसत्थं'ति प्रशस्तेन जीवोपघातरहितत्वेन विवेकिभिः श्लाघितेन सम्यक्चारित्रेणेति भावः, अनेन च कतरेण होमेन जुहोषि ज्योतिरिति प्रत्युक्तमिति सूत्रार्थः ॥ ४४ ॥ उत्तरा० अ०१२, गा०४२-४४) **28/1**

**[122] से बेमि जहा अणगारे उज्जुकडे नियागपडिवण्णे अमायं कुव्वमाणे वियाहिए । ( सू. १८ )**

**से बेमी**त्यादि अस्य चायमभिसंबन्धः-इहानन्तरोद्देशके परिसमाप्तिसूत्रे पृथिवीकायसमारम्भव्यावृत्तो मुनिरित्युक्तम्, न चैतावता सम्पूर्णो मुनिर्भवति, यथा च भवति तथा दर्शयति, तथाऽऽदिसूत्रेणायं सम्बन्धः-सुधर्मस्वामी इदमाह-श्रुतं मया भगवदन्तिके यत् प्राक् प्रतिपादितमन्त्यच्चेदमित्येवं परम्परसूत्र-सम्बन्धोऽपि प्राग्वद् वाच्यः । **से** शब्दस्तच्छब्दार्थः, स यथा पृथिवीकाय-समारम्भव्यावृत्त्युत्तरकालं सम्पूर्णानगारव्यपदेशभाग् भवति तदहं ब्रवीमि, अपिः समुच्चये, स यथा वानगारो न भवति तथा च ब्रवीमि अणगारा मोत्ति एगे पयवमाणेत्यादिनेति, न विद्यते अगारं गृहमस्येत्यनगारः, इह च यत्यादि-शब्दव्युदासेनानगारशब्दोपादानेनैतदाचष्टे-गृहपरित्यागः प्रधानं मुनित्वकारणम्, तथाश्रयत्वात् सावद्यानुष्ठानस्य, निरवद्यानुष्ठायी च मुनिरिति दर्शयति-**उज्जुकडेत्ति** ऋजुः-अकुटिलः संयमो-दुष्प्रणिहितमनोवाक्कायनिरोधः सर्व-सत्त्वसंरक्षणप्रवृत्तत्वाद् दयैकरूपः सर्वत्राकुटिलगतिरिति यावत्, यदिवा मोक्षस्थानगमनर्जुश्रेणिप्रतिपत्तिः सर्वसंवरसंयमात् कारणे कार्योपचारं कृत्वा संयम एव सप्तदशप्रकार ऋजुः, तं करोतीति ऋजुकृत्, ऋजुकारीत्यर्थः । अनेन चेदमुक्तं भवति - अशेषसंयमानुष्ठायी संपूर्णोऽनगारः, एवंविधश्चेदृग् भवतीति दर्शयति-**नियागपडिवण्णे** त्ति, यजनं-यागः नियतो निश्चितो वा यागो नियागो-मोक्षमार्गः, संगतार्थत्वाद् धातोः सम्यग्ज्ञानदर्शनचारित्रात्मतया गतं संगतमिति, तं नियागं-सम्यग्दर्शनज्ञानचारित्रात्मकं मोक्षमार्गं प्रतिपन्नो नियागप्रतिपन्नः, पाठान्तरं वा 'निकायप्रतिपन्नो' निर्गतः कायः- औदारिकादिर्यस्माद्-यस्मिन्वा सति स निकायो-मोक्षस्तं प्रतिपन्नो निकायप्रतिपन्नः । तत्कारणस्य सम्यग्दर्शनादेः स्वशक्त्यानुष्ठानात् स्वशक्त्यानुष्ठानं चामायाविनो भवतीति दर्शयति **अमायं कुव्वमाणे त्ति** माया-सर्वत्र स्ववीर्यनिगूहनम्, न माया अमाया, तां कुर्वाणः, अनिगूहितबलवीर्यः संयमानुष्ठाने पराक्रममाणोऽनगारो व्याख्यात इति अनेन च तज्जातीयोपादानादशेषकषायोपगमोऽपि द्रष्टव्य इति, उक्तं च-"सोही य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उज्जुभूयस्स धम्मो सुद्धस्स चिट्ठइ''त्ति । (आचा० श्रुत०१ अध्य०१ उ० ३ सू० १८) **28/1**

**[123]** अस्य चानुयोगद्वारचतुष्टयचर्चा प्राग्वद्यावन्नामनिष्पन्ननिक्षेपे यज्ञीयमिति नामातो यज्ञनिक्षेपायाह निर्युक्तिकृत्–

**निक्खेवो जन्नंमि अ चउक्कओ दुविहो य होइ दव्वंमि ।**
**आगमनोआगमओ, नोआगमओ अ सो तिविहो ॥४६०॥**

**जाणगसरीर भविए, तव्वइरित्ते अ माहणाईसुं ।**
**तव संजमेसु जयणा, भावे जन्नो मुणेयव्वो ॥४६१॥**

**जयघोसा अणगारा, विजयघोसस्स जन्नकिच्चंमि ।**
**तत्तो समुट्ठियमिणं, अज्झयणं जन्नइज्जंति ॥४६२॥**

निक्षेपो यज्ञे चतुष्कको- नामादिः, द्विविधो भवति द्रव्ये–आगमनोआगमतः, तत्रागमतः प्राग्वत्, नोआगमतश्च स इति यज्ञस्त्रिविधः ज्ञशरीरभव्यशरीरे तद्व्यतिरिक्तश्च, 'माहणाइसु'न्ति माहनादीनां प्रक्रमाद् यज्ञ आदिशब्दात् तथाविधनृपत्यादिपरिग्रहः, तैर्हि प्राणिहिंसोपलक्षित एवायं क्रियते, ततः स भावयज्ञफलाप्रसाधकत्वात्, द्रव्ययज्ञ उच्यते, भावयज्ञमाह–तपःसंयमेषु प्रसिद्धेष्वेव 'यतना'- तदनुष्ठानादरकरणरूपा भावे यज्ञः 'मुणितव्यः'–प्रतिज्ञातव्यः, अर्हाऽर्थे चायं कृत्यः ततः स्वर्गादियज्ञफलप्रसाधकतयैष एव यज्ञः प्रतिज्ञातुमुचितो, न त्वन्यः, तस्य प्रत्युतानर्थहेतुत्वात्, जयघोषादनगाराद् विजयघोषस्य यज्ञकृत्ये–यज्ञक्रियायामागतात् जातमिति शेषः, ततश्च यज्ञेस्यैव प्राधान्यविवक्षया ततः इति यज्ञात् समुत्थितमिदमध्ययनं यज्ञीयमिति तस्मादुच्यते इति शेषः इति गाथात्रयार्थः ॥ एवं तावन्निक्षेप उक्तः । (उत्तरा० अध्य० २५ निर्युक्ति गा० ४६०-६१-६२) **28/1**

**[124] अकसिणपवत्तयाणं, विरयाविरयाण एष खलु जुत्तो ।**
**संसारपयणुकरणो, दव्वथए कूवदिट्ठंतो ॥१२२४॥**

वृत्तिः–अकृत्स्नप्रवर्तकानां संयममधिकृत्य विरताविरतानां प्राणिनाम् एष खलु युक्तः स्वरूपेणैव संसारप्रतनुकरणः शुभानुबन्धात् 'द्रव्यस्तवः' तस्मिन् कूपदृष्टान्तोऽत्र प्रसिद्धकथानकगम्य इति गाथार्थः ॥१२२४॥ (पञ्चव०गा०१२२४) **28/4**

**[125] कति णं भंते ! भासज्जाया पण्णत्ता ? गोयमा ! चत्तारि भासज्जायां प० तं० सच्चमेगं भासज्जायं बितियं मोसं भासज्जातं तइयं सच्चामोसं भासज्जातं चउत्थं असच्चामोसं भासज्जातं, इच्चेइयाइं भंते !**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चत्तारि भासज्जायाइं भासमाणे किं आराहते विराहते ? गो० ! इच्चेइयाइं चत्तारि भासज्जायाइं आउत्तं भासमाणे आराहते नो विराहते, तेण परं असंजतअविरयअपडिहतअपच्चक्खायपावकम्मे सच्चं भासं भासंतो मोसं वा सच्चामोसं वा असच्चामोसं वा भासं भासमाणे नो आराहते विराहते ( सूत्र-१७४ )**

'कइ णं भंते ! भासज्जाया पण्णत्ता' इत्यादि सुगमम्, नवरं 'आउत्तं भासमाणे इति सम्यक् प्रवचनमालिन्यादिरक्षणपरतया भाषमाणः, तथाहि—प्रवचनोड्डाहरक्षणादिनिमित्तं गुरुलाघवपर्यालोचनेन मृषापि भाषमाणः साधुराराधक एवेति, तेण परमित्यादि, तत आयुक्तभाषमाणात्परोऽसंयतो—मनोवाक्कायसंयम-विकलोऽविरतो-विरमति स्म विरतो, न विरतोऽविरतः सावद्यव्यापारादनिवृत्तमना इत्यर्थः अत एव न प्रतिहतं—मिथ्यादुष्कृतदानप्रायश्चित्तप्रतिपत्त्यादिना न नाशित-मतीतं तथा न प्रत्याख्यातं भूयोऽकरणतया निषिद्धमनागतं पापकर्म येनासावप्रतिहता प्रत्याख्यातपापकर्मा, शेषं पाठसिद्धम् । (प्रज्ञा०प०११, सू०१७४) 28/4

**[126] जो जाणदि अरहंतं, दव्वत्तगुणत्तपज्जयत्तेहिं ।**
**सो जाणदि अप्पाणं, मोहो खलु जादि तस्स लयं ॥८०॥**

**यो जानात्यर्हन्तं द्रव्यत्वगुणत्वपर्ययत्वैः ।**
**स जानात्यात्मानं मोहः खलु याति तस्य लयम् ॥८०॥**

यो हि नामार्हन्तं द्रव्यत्वगुणत्वपर्ययत्वैः परिच्छिनत्ति स खल्वात्मानं परिच्छिनत्ति, उभयोरपि निश्चयेनाविशेषात् । अर्हतोऽपि पाककाष्ठागतकार्तस्वरस्येव परिस्पष्टमात्मरूपम्, ततस्तत्परिच्छेदे सर्वात्मपरिच्छेदः । तत्रान्वयो द्रव्यम्, अन्वय-विशेषणं गुणः, अन्वयव्यतिरेकाः पर्यायाः । तत्र भगवत्यर्हति सर्वतो विशुद्धे त्रिभूमिकमपि स्वमनसा समयमुत्पश्यन्ति । यश्चेतनोऽयमित्यन्वयस्तद्द्रव्यम्, यच्चान्वयाश्रितं चैतन्यमिति विशेषणं स गुणः, ये चैकसमयमात्रावधृतकाल-परिमाणतया परस्परपरावृत्ता अन्वयव्यतिरेकास्ते पर्यायाश्चिद्विवर्तनग्रन्थय इति यावत् । अथैवमस्य त्रिकालमप्येककालमाकलयतो मुक्ताफलानीव प्रलम्बे प्रालम्बे चिद्विवर्तांश्चेतन एव संक्षिप्य विशेषणविशेष्यत्ववासनान्तर्धानाद्धवलिमानमिव प्रालम्बे चेतन एव चैतन्यमन्तर्हितं विधाय केवलं प्रालम्बमिव केवलमात्मानं परिच्छिन्दत-स्तदुत्तरोत्तरक्षणक्षीयमानकर्तृकर्मक्रियाविभागतया निष्क्रियं चिन्मात्रं भावमधिगतस्य जातस्य मणेरिवाकम्पवृत्तनिर्मलालोकस्यावश्यमेव निराश्रयतया मोहतमः प्रलीयते । यद्येवं लब्धो मया मोहवाहिनीविजयोपायः ॥८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ "चत्तापावारंभं" इत्यादि सूत्रेण यदुक्तं शुद्धोपयोगाभावे मोहादिविनाशो न भवति, मोहादिविनाशाभावेन शुद्धात्मलाभो न भवति तदर्थमेवेदानीमुपायं समालोचयति—**जो जाणदि अरहंतं** यः कर्ता जानाति । कम् ? अर्हन्तम् । **कैः** कृत्वा? **दव्वत्तगुणत्तपज्जयत्तेहिं-** द्रव्यत्वगुणत्वपर्यायत्वैः, **सो जाणदि अप्पाणं** स पुरुषोऽर्हत्परिज्ञानात्पश्चादात्मानं जानाति, **मोहो खलु जाइ तस्स लयं** तत आत्मपरिज्ञानात्तस्य मोहो दर्शनमोहो लयं-विनाशं क्षयं यातीति । तद्यथा—केवलज्ञानादयो विशेषगुणा, अस्तित्वादयः सामान्यगुणाः, परमौदारिकशरीराकारेण यदात्मप्रदेशानामवस्थानं स व्यञ्जनपर्यायः, अगुरुलघुकगुणषड्वृद्धिहानिरूपेण प्रतिक्षणं प्रवर्तमाना अर्थपर्यायाः, एवं लक्षणगुणपर्यायाधारभूतममूर्तमसंख्यातप्रदेशं शुद्धचैतन्यान्वयरूपं द्रव्यं चेति, इत्थंभूतं द्रव्यगुणपर्यायस्वरूपं पूर्वमर्हदभिधाने परमात्मनि ज्ञात्वा पश्चान्निश्चयनयेन तदेवागमसारपदभूतयाऽध्यात्मभाषया निजशुद्धात्मभावनाभिमुखरूपेण सविकल्पस्वसंवेदज्ञानेन तथैवागमभाषयाधः-प्रवृत्तिकरणापूर्वकरणानिवृत्तकरणसंज्ञदर्शनमोहक्षपणसमर्थपरिणामविशेषबलेन पश्चादात्मनि योजयति । तदनन्तरमविकल्पस्वरूपे प्राप्ते, यथा पर्यायस्थानीयमुक्ताफलानि गुणस्थानीयं धवलत्वं चाभेदनयेन हार एव, तथा पूर्वोक्तद्रव्यगुणपर्याया अभेदनयेनात्मैवेति भावयतो दर्शनमोहान्धकारः प्रलीयते । इति भावार्थः ॥८०॥ (प्रव०सा० गा०८०)
**30/1**

**[127] मणेरिवाभिजातस्य क्षीणवृत्तेरसंशयम् ।**
**तात्स्थ्यात्तदञ्जनत्वाच्च समापत्तिः प्रकीर्तिता ॥ १० ॥**

**मणेरिवेति** । **मणेरिव**-स्फटिकादिरत्नस्येव **अभिजातस्य**-जात्यस्य **क्षीणवृत्तेः**-क्षीणमलस्य **असंशयं**-निश्चितं **तात्स्थ्यात्**-तत्रैकाग्रत्वात्, **तदञ्जनत्वाच्च**-तन्मयत्वात् । न्यग्भूते चित्ते विषयस्य भाव्यमानस्यैकत्वोत्कर्षात् । **समापत्तिः प्रकीर्तिता** । तदुक्तं-क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थ-तदञ्जनता समापत्तिः (यो०सू०१-४१) । यथा हि निर्मलस्फटिकमणेस्तद्रूपाश्रयवशात् तद्रूपतापत्तिरेवं निर्मलचित्तसत्त्वस्य तत्तद्भावनीयवस्तूपरागात्तद्रूपतापत्तिः ।

यद्यपि ग्रहीतृ-ग्रहण-ग्राह्येत्युक्तं तथापि भूमिकाक्रमवशेन व्यत्ययो बोध्यः । यतः प्रथमं ग्राह्यनिष्ठः, समाधिः, ततो ग्रहणनिष्ठः, ततोऽस्मितोपरागेण ग्रहीतृनिष्ठः, केवलस्य पुरुषस्य ग्रहीतुर्भाव्यत्वाऽसम्भवादिति बोध्यम् ॥ १० ॥ (द्वा०द्वा० २०-श्लो०१०) **30/3**

**[128] सूत्रम्-अर्पितानर्पितसिद्धेः ॥५-३१॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०-अपरेऽन्यथाकारं सूत्रसम्बन्धमभिदधते, ध्रौव्यस्य नित्यपर्यायत्वेन लक्षणमुक्तमुत्पादव्यययोरुच्यताम्, नोच्यते, तयोर्लोकप्रतीतत्वात्, सामर्थ्यगतेश्चासद-नित्यत्वादीनाम्, अतस्तल्लक्षणं न साक्षाद् वाच्यम्, किं कारणम् ?

**भा०-अर्पितानर्पितसिद्धेः ॥**

**टी०**-अर्पितं-निदर्शितमुपात्तम्, तद्विपरीतमनर्पितम्, सिद्धिः-ज्ञानम्, अर्पितेनानर्पितपरिज्ञानमर्पितानर्पितसिद्धिस्तस्याः-ततो हेतोरर्पितानर्पितसिद्धेः, विशेष्यं हि वस्तु नीलोत्पलादिवदुपादीयमानं नियमकारिविशेषणधर्मप्रत्यनीकपर्यायाश्रयता-मनुभवत्येवेति न्यायात्, एवमिहापि ध्रौव्यलक्षणेऽर्पितेऽनर्पितावपि साक्षात् तद्विपरीतावुत्पादव्ययौ सङ्गंस्येते, पूर्वमुत्तरं च पर्यायं ध्रौव्यमासादयति, न तूत्पाद-लक्षणः पर्यायो विनाशलक्षणो वा पूर्वोत्तरपर्यायानुभावी, तस्माद् विलक्षणावुत्पाद-व्ययाविति सुज्ञानम्, एवं सम्बन्धद्वयमभिधाय सूत्रार्थोऽभिधीयते, पूर्वकं सम्बन्ध-माश्रित्येदं भाष्यम्-

**भा०-सच्च त्रिविधमपि नित्यं चोभे अपि अर्पितानर्पितसिद्धेः ॥**

**टी०**-चशब्दः समुच्चये, अपिः सम्भावने । सत् त्रिविधमुत्पादव्यय-स्थितिलक्षणम्, नित्यं च द्वितीयसूत्रोक्तमुभयमप्येतदर्पणानर्पणाभ्यां सिद्धमव्याहतम् अनेकधर्माधर्मी, तत्र प्रयोजनवशात् कदाचित् कश्चिद् धर्मो वचनेनार्प्यते-विवक्ष्यते, सन्नपि च कश्चिन्न विवक्ष्यते प्रयोजनाभावात्, न पुनः स धर्मी विवक्षितधर्ममात्र एव । इत्यतः सत्पर्यायविवक्षायां सदुत्पादादिस्थित्यंशविवक्षायां नित्यमसदप्यु-त्पादाद्यनित्यं च, सत्त्वासत्त्वविशिष्टग्रहणात् सर्वदा वस्तुनः येन प्रमाणेन यद् वस्तु सद्विशिष्टं गृह्यते, तेनैव प्रमाणेन तदेव तदैव वाऽसद्विशिष्टमपि गृह्यते, अन्यथा त्वविविक्तग्रहणमेव स्यात्, विविक्ताश्च चक्षुरादिबुद्धयोऽनुभूयन्ते । यथैव हि स्वास्तित्वात् सद्विशेषणोल्लेखेन सद्बुद्धिरभिधावति, एवं असद्विशेषणावष्टम्भ-जनिताऽपीति ॥ न चोपहतेन्द्रियस्याव्यापृतेन्द्रियस्य वा वस्त्वन्तराभावविशिष्टं ग्रहणमुपजायते तत इन्द्रियव्यापारे सति भावादसद्विशिष्टस्य ग्रहणस्य नापह्नवो युज्यते, यथा प्रकाशकाः कृशानुभास्करादयः प्राकाश्यं वस्त्वन्तराभावविशिष्टमेव प्रकाशयन्ति, एवं प्रमाणमपि वस्तुपरिच्छेदहेतुत्वेन व्याप्रियमाणं वस्त्वन्तराभाव-विशिष्टमेव प्रकाशयति । प्रमाणं च यथावस्थितवस्तुस्वभावग्राहि । ततः प्रमाणपरिच्छिन्नेनार्थेन यथाप्रयोजनमर्पणादिव्यवहारः । तस्मात् सच्चासच्चैकमेव वस्तु, स्वरूपार्पणयोत्पादः सन् स्थितिविनाशाभावविशिष्टग्रहणादसन्, एवं स्थितिविनाशावपि वाच्यौ । एवं हि त्रिविधग्रहणं समर्थितं भवति ॥ तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वात्मापरित्यागार्पणान्नित्यम्, उत्पादव्ययार्पणात् तदेवानित्यम्, स्थित्यादयश्च सङ्ग्रहादेकीभावाद् वस्तु, न स्थितिरहितावुत्पादविनाशौ, नाप्युत्पादव्ययशून्या स्थितिः, अतः संसर्गलक्षणं वस्त्वेकमेव नित्यं चानित्यं च ॥ ननु चोत्पादव्यय-ध्रौव्ययुक्तं सदिति त्रिस्वभावमेव सत्त्वेनावधृतम्, भाष्यकारस्तु सच्च त्रिविध-मपीत्येव विवृण्वन्नेकैकस्य सत्त्वं प्रतिपादयति, नैष दोषः, अविभक्तेऽपि वस्तुनि स्वभावत्रयाख्यानमन्योन्यापरित्यागद्वारेणैव क्रियते, अन्यथा कथं कथ्येत प्रज्ञापना-गोचरः ? स्थित्यादयो हि परस्परावियोगिनः सर्वदा सदसदात्मकाभेदाभेद-लक्षणास्तेषु सत्त्वप्रज्ञापना न विरुध्यते, न ह्येकदेशोऽसद्वस्तुनो भवति पटादे-स्तन्त्वादिः, अथ नित्यं चेति किमर्थमुच्यते, सद्ग्रहणादेव तद्गृहीतेः पुनर्न किञ्चित् फलमस्ति सद्ग्रहणेनैव ध्रौव्यांशस्य लक्षितत्वात्, सच्च त्रिविधमपीत्येतावदेवा-भिधेयमिति, अत्रोच्यते-सत्यमेतदेवम्, तथाऽप्यर्थविशेषप्रतिपिपादयिषया पुनर्नित्य-ग्रहणम्, स विशेषो भाव्यते यदि ध्रौव्यांश एव नित्यः स्यात् न समस्तं वस्तु तत उत्पादव्ययावप्यनित्यौ न वस्तु सकलम्, एवं चान्याधारं नित्यत्वमन्याधारं चानित्यत्वं स्याद् अनिष्टं चैतद् व्यधिकरणत्वात्, यथा प्रवचनबाह्यानां नित्यं व्योमाऽनित्यो घट इति, अत्राप्येवं स्यादन्यन्नित्यमन्यच्चानित्यम्, इष्यते तु यदेव नित्यं तदेवानित्यमिति, तत्राऽमुना पुनर्नित्यग्रहणेन निरंशं वस्त्वर्प्यत एतद्विपक्षेण चानित्यं समस्तमेव वस्तूच्यते निर्विभागत्वात्, एवं हि तत् प्रज्ञाप्यते केवलं श्रोतृबुद्धिव्युत्पत्तये स्थित्यंशोऽयमिमावुत्पादव्ययांशाविति बुद्ध्या विभज्यते, न तु परमार्थतोऽस्ति विभाग इत्येवमैकाधिकरण्यम् । यथाऽऽह-

**अभिन्नांशं मतं वस्तु, तथोभयमयात्मकम् ।**
**प्रतिपत्तेरुपायेन, नयभेदेन कथ्यते ॥१॥"**

यत् तूक्तं नित्यता ह्युत्पादव्ययौ विरुणद्ध्युत्पादव्ययौ च नित्यतां विरुन्धाते, तत् प्रपञ्चयापोद्यते, कः पुनर्विरोधशब्दार्थः ? किं ययोरेकत्रावस्थानं न दृश्यते तौ विरुद्धावथ यावेकत्र कालान्तरं स्थितौ पश्चादन्यतरविनाश उभयविनाशो वा तौ विरुद्धाविति ? किञ्चातः, यदि प्राच्यः पक्षः कदाचिदपि यावेकत्र न दृष्टावेवं सति वध्यघातकभावलक्षणस्तावदहिनकुलयोरग्न्युदकयोर्वा न विरोधः, यतः संयोगे सत्येककालयोरहिनकुलयोरग्निजलयोर्वा स्थितयोर्विरोधः, संयोगस्यानेकाश्रयत्वात्, द्वित्वादिवत्, न चासंयुक्तो नकुलः सर्पविनाशे प्रभुः, यदि स्यात् ततः समस्त-त्रैलोक्योदरवर्तिसर्पाभावप्रसङ्गः, अग्निजलयोरप्येवमेव भावना, वाडवाग्नेर्वारिधि-वारिणश्चैकत्रावस्थानं दृष्टमिति चेत्, हन्त हतस्तर्हि विरोधः, प्रकृतमुच्यते-संयोगे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः क्षणमात्रावस्थायिनोरुत्तरकालमेकस्य बलवत्त्वाद् घातकत्वे सतीतरस्य दुर्बलत्वाद् वध्यत्वे स्याद् विरोधः, न चैवं सदसतोर्नित्यानित्ययोर्वा क्षणमात्रमप्येकत्र वृत्तिस्त्वयाऽभ्युपेयते, गुणविषये संयोगाभावान्नापि समवायवृत्तिविरोधाभावप्रसङ्गात्, तस्मान्न नित्यानित्यसदसदादीनामेकवस्त्वाश्रयतायां वध्यघातकभावलक्षणो विरोधः समस्ति, नाप्यसहावस्थानलक्षणो विरोधः, स हि शीतोष्णवत् फलवृन्तसंयोगविभागवदाम्रफलादिषु श्यामतापीततावद् वा, तथाहि शीतपर्यायोऽश्मादीनां प्राग् वा विद्यमानः पश्चादुपजायमानेनोष्णपर्यायेण सह नावतिष्ठते, तथोष्णः शीतेनोपजायमानेन सह विरुध्यते, न चैवं प्रागवस्थितं नित्यत्वमनित्यत्वेन पश्चात्कालभाविना विनाश्यते, तद्धि नित्यत्वमेव न स्यादध्रुवत्वात्, नापि नित्यत्वेनोत्पत्तिभाजा पूर्वावस्थितमनित्यत्वं विनाश्यते, तत् तु नित्यत्वमेव न स्यादुत्पद्यमानत्वात्, अपि च क्षणनश्वरेषु भावेषु न कदाचिदयं विरोधः समस्ति, नहि तत्रानित्यत्वस्य पूर्वमवस्थानम्, तेन ह्यनित्यत्वेन नाशिते वस्तुनि निराधारस्य नित्यत्वस्याभाव एव, अवश्यंतयाऽसहावस्थानलक्षणविरोधवादिना तत्रान्यतरस्योत्पद्यमानता अन्यतरस्य च पूर्वावस्थितिरभ्युपेया, अन्यथाऽसहावस्थानलक्षणविरोधवाद्येव न स्यात्, येषामपि किञ्चित् कालं स्थित्वा घटो विनश्यति तैरपीदं वक्तव्यम्-यावदसौ न विनश्यति तावत् किं नित्यः उतानित्य इति ? नित्यश्चेद् व्योमादिवदनुच्छेदप्रसङ्गः, इतरत्र त्वभावप्रसङ्गः, अवश्यमेव सता नित्येनानित्येन वा भवितव्यमेकान्तवादिनाम्, अनेकान्तवादिनां तूभयस्वभावत्वाद् वस्तुनो न किञ्चिदघटमानकम्, एवमेव फलवृन्तयोः संयोगविनाशे विभाग उपजायते फलादिषु श्यामताऽपैति पीततोत्पद्यत इति विकल्प्य निरसनीयम्, एवमेते विकल्पाः पूर्वकेण विरोधलक्षणेन सङ्गता अपीह स्यात्कारोपलाञ्छनप्रक्रियायां न सम्भवन्ति । अपि चैकत्रावस्थानं न दृश्यत इति किमेकस्मिन् धर्मिणि नास्ति, यद्येवं ततोऽसिद्धता, दृष्ट एक एवाश्मा शीतश्चोष्णश्च । अथ यत्र देशे शीतो न तत्रैवोष्ण इति, एतदप्यसत्, नहि शिशिरस्पर्शमुदकं भिन्नदेशवर्त्यसंयुक्तमेवाग्निं विध्यापयति, संयोगश्चैकदेशवर्तित्वे जलानलपरमाणूनां सिद्ध्यति, अन्यथा च त्रैलोक्येऽप्यग्न्यभावप्रसङ्गः, सति च संयोगे क्षणमात्रावस्थानमेकत्र दृष्टमेव तदा कुतो विरोधः ? उत्तरकालमदर्शनाद् विरोध इति चेत्, अत एव कदाचिद् विरोधः कदाचिदविरोध इति स्याद्वादाश्रयणमपदोषम् ॥ अथैकस्मिन्नेवाग्निद्रव्ये उष्णतानुष्णते युगपन्न स्तः, इत्येतदप्यसारम् । यतः स्पर्शपर्यायेणाग्निरुष्णोऽभिधीयते रूपपर्यायेण त्वनुष्ण एव । अथोष्णस्य प्रतियोगी शीत एवानुष्ण इति गृह्यते, रिक्तं शक्यमेतदपि, अनुष्णा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीतस्याप्युष्णग्रहणे प्रतिक्षिप्यमाणत्वात्, तस्मादुष्णपर्यायोऽनुष्णपर्यायेण प्रतिपक्षेण सहैकत्रैकदा च दृष्ट इति । न च वध्यघातकासहावस्थानविरोधयोर्विशेषः कश्चिदस्ति, अहिनकुलयोर्हि संयोगे योऽहेर्जीवनपर्यायः स मरणपर्यायेण सह नावतिष्ठते इत्यसहावस्थानलक्षण एव विरोधः, तथाऽग्निजलयोः सति संयोगे कदाचिदुष्णपर्यायस्य शीतपर्यायेण सहानवस्थानं बहुजलमध्यप्रक्षिप्तस्यैकस्याङ्गारशकलस्य, कदाचिच्छीतस्यानवस्थानं प्रवृद्धज्वलनज्वालाप्रतप्तवारिणीति । वध्यघातकलक्षणः प्राणिविषय इति चेत्, न, 'असहावस्थानलक्षणस्यापि कस्यचित् प्राणिविषयत्वेन दर्शनात् ॥ अथैककालविषययोर्वध्यघातकविरोध इति चेत्, न, असहावस्थानलक्षणेऽपि विरोधे यदा श्यामताऽपैति पीतता चोत्पद्यते तदा विगमप्रतिपत्त्योरेकः कालोऽतः शब्दार्थोऽपि न सङ्गच्छते सहानवस्थानमिति, तस्मान्नास्ति विरोधः ॥

अथ द्वितीयपक्षमाश्रयते-कालान्तरावस्थायित्वे सति दृष्टयोरेकत्रान्यतरस्यानवस्थानमुभयानवस्थानं वा विरोध इति, सोऽप्यसङ्गतः, कालान्तरावस्थायितायामेकत्र तावन्न विरोधः । उत्तरकालमनवस्थानोपलब्धेर्विरोध इति चेत्, एवं सति न कस्यचित् स्त्रीमनुष्यबलीवर्दादेर्विरोधः स्यात्, तस्मादुपेक्ष्यः । नापि प्रतिबन्ध्यप्रतिबन्धकभावलक्षणो विरोधः सदसतोर्नित्यानित्ययोर्वा, अभिन्नकालमेकत्रात्मद्रव्ये किल धर्माधर्मावुभावपि स्तः, तयोश्चैकस्य प्रधानभावोऽन्यस्य गुणभावः, प्रधानगुणभावे चैकत्र द्वयमप्यस्तीति को विरोधः ? ॥ अथैवं मन्येथाः-धर्मस्य फलमधर्मफलेन प्रतिबद्धमधर्मफलं च धर्मफलेन प्रतिबद्धमेष विरोध इति यदैकस्य प्रधानभावस्तदैव न तस्य गुणभावः , प्रधानता चोद्भूतविपाकावस्थया गुणभावोऽप्यनुद्भूतविपाकावस्थयेति, एतदप्ययुक्तम्, यस्मादेकत्रात्मन्येकदा धर्माधर्मफलोपभोगोऽभ्युपगम्यत एव जैनेन्द्रैः, धर्माधर्मौ पुण्यापुण्यलक्षणौ, पुण्यापुण्ये च पुद्गलात्मके, पुद्गलाश्च ज्ञानावरणादिभेदेन परिणताः, कर्म चतुर्विंशत्युत्तरप्रकृतिशतभेदम्, तत्र कर्मप्रकृतीनामशीतिर्द्व्यधिका पापमपुण्यमधर्म इति संज्ञाता, चत्वारिंशद् द्व्यधिका तु पुण्यं धर्म इति, तत्र कासाञ्चित् प्रकृतीनां पुण्याख्यानां पापप्रकृतीनां च युगपद् विपाकाभ्युपगमे कुतः प्रतिबन्ध्यप्रतिबन्धकभावलक्षणो विरोधः ? । अथापि स्यात् कासाञ्चित् प्रकृतीनां प्रतिबन्ध्यप्रतिबन्धकभावो यथा नरायुषः सुरायुषश्चैकदैकत्र विपाकाभावः, तत्रापि न कर्मणः सहावस्थानमनिष्टम्, किं तर्हि ? विपाकपर्याययोरसहावस्थितिः, नरायुर्विपाकपर्यायः सुरायुषो विपाकेन सह नावतिष्ठत इत्यसहावस्थानलक्षण एव, विगमप्रतिपत्त्योश्चैककालत्वाज्जातुचित् सहावस्थानमपीति । उपेत्य वा ब्रूमः-अस्त्वयं विरोधः प्रस्तुते वस्तुनि, न कश्चिद् दोषः, इष्यत एव द्रव्यपर्याययोरन्यतरस्य गुणप्रधानभावः, कदाचिद् द्रव्यं विवक्ष्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न पर्यायः, कदाचित् पर्यायो विवक्ष्यते, न द्रव्यम्, उभयं तु सम्भवति, त्वयाऽप्येककालयोरेव प्रतिबन्ध्यप्रतिबन्धकभावोऽभ्युपेयते, अन्यथा स एव न स्यात् प्रतिबन्धः, अतो न कश्चिद् विरोधः । सदसतोर्नित्यानित्ययोर्वा भिक्षुवर-**धर्मकीर्तिना**पि विरोध उक्तः **प्रमाणविनिश्चयादौ** स पुनरयं विरोधः कथं गम्यते, क्वचिदविकलकारणस्य भवतोऽन्यभावेऽभावाद् विरोधगतिर्भवति, यथा शीतोष्ण-स्पर्शयोरसहावस्थानम्, अन्योन्यपरिहारस्थितिलक्षणतया वा विरोधो नित्यानित्यवत् अन्योन्यं-परस्परं व्यवच्छेदः-परिहारस्तेनान्योन्यपरिहारेण स्थितिलक्षणोऽन्योन्य-व्यवच्छेदरूपः, परस्परपरिहारस्थितिलक्षणतया च विरोधिनोर्नित्यानित्ययोरेक-परिग्रहोऽपरत्यागनान्तरीयकः एकत्यागोऽप्यपरपरिग्रहाविनाभावी, तथा भावाभाव-योरेकत्राभावः, एष च प्रतियोगिव्यवच्छेदरूपः सामयिकोऽसहावस्थानभेद एव, पूर्वकस्तु शीतोष्णस्पर्शयोश्छायातपयोः प्रकाशतमसोश्च दृश्यात्मनोः परिनिष्पन्नयोरेक-त्राभावादनुपलब्धिलक्षण इत्येतावान् विशेष इति । अत्रोच्यते-तार्किकापशब्देन न किञ्चिदत्रातिरिक्तमपदिष्टम् ॥ यदप्यपादेशि तदप्यसमीचीनम्, यतोऽसहावस्थानलक्षण एव विरोधो द्विधा कल्प्यते, नामैव च लक्षणम्, न सहावस्थानं लक्षणं यस्य विरोधस्येत्यनेनैव शीतोष्णस्पर्शयोरिव नित्यानित्यविरोधस्यापि संगृहीतत्वाद् भेदेनाभिधाने प्रयोजनाभावाद् दुर्विदग्धतामात्रमेवावशिष्यते भिक्षुवरस्य । स्यादिय-मारेका, दृश्यपरिनिष्पन्नयोः प्राच्यः, इतरः परिकल्पितरूपयोः स्वसामान्यलक्षण-विषयत्वेन भेदप्रकाशनमिति, एतदप्यसङ्गतम्, स्वलक्षणभेदानामानन्त्यात् परिकल्प-बहुत्वाच्च कुतो द्वैविध्यम् । अपि च नित्यता भवतु परिकल्पः, अनित्यता पुनः संस्कृतलक्षणम्, "उत्पत्तिः स्थितिर्जराऽनित्यते" ति वचनात् । **दिग्नागेना**प्युक्तम्, "नित्यसमायां जातौ स एव तु भावोऽभूत्वा भवन् भूत्वा वाऽभवन्ननित्य इत्युच्यते, सा चावस्था भावप्रत्ययेनानित्यते"ति, एवं च न नित्यानित्ययोः सामान्य-लक्षणयोर्विरोधः, नापि स्वलक्षणासामान्यलक्षणयोः, स्वलक्षणोपादानत्वात् सामान्य-लक्षणस्य, परिकल्पितयोश्च खरतुरगविषाणयोर्विरोध इत्यद्भुतमपश्यद् भिक्षुवरः, तस्मात् स्वलक्षणविषय एव विरोधोऽस्तु, तत्रापि न स्वलक्षणमित्येव विरोधः, किन्तु द्रव्याणां द्विविधाः पर्यायाः-क्रमभुवः सहभुवश्च, युगपदवस्थायिनोऽयुग-पदवस्थायिनश्च, सूक्ष्माः स्थूलाश्च, साध्याः साधनानि च, व्यापृताश्चाव्यापृताश्च, यथा घटे सद्द्रव्यमूर्ताचेतनरूपरसगन्धस्पर्शसङ्ख्यासंस्थानादयः सहभुवो युगपद-वस्थायिनः, स्थूलाः सूक्ष्माश्च साधनानि साध्यानि च कार्यवशाद् व्यापृता-श्चोदकाद्याहरणादिषु मृत्पिण्ड-शिवक-स्थासक-कोशक-कुशूल-घट-कपाल-शकल-शर्करा-पांशुत्रुटिपरमाणवः क्रमभुवः, नहि मृदादिसामान्यव्यतिरेकेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिण्डादिधर्मा भवितुमुत्सहन्ते, न ह्यङ्गुलिभेदेनर्जुकुटिलतयोः सम्भवः, सैव हि साङ्गुलिः स्वांस्तु धर्मान् पारम्पर्यमात्रप्रतिलब्धवृत्ती क्रमेणोन्नमयति, मयूराण्डकरसवदुपारूढस्वरूपाख्येति वचनात् । एत एवासहावस्थायिनः सूक्ष्माः स्थूलाश्चापेक्षया नित्यानित्यादयः साध्याः साधनानि चाव्यापृता उदकाद्याहरणादिषु, तेषां को नामायं विरोधः ? ॥ ननु सहानवस्थानम्, तन्न, सहोत्पादावस्थानदर्शनादेकद्रव्यवृत्तित्वाच्च, द्रव्यमेव चक्षुरादिग्रहणापदेशविशेषाद् रूपादिव्यपदेश्यमेकपुरुषपितृपुत्रत्वादिवत्, न च रूपादीनां समुदायैकरूपताऽभ्युपगमनीया, रूपग्रहणे रसादिग्रहणप्रसङ्गादिन्द्रियान्तरवैयर्थ्यसङ्करादिदोषप्रसङ्गाच्च । न चाभावता, प्रमाणाभावात् प्रसिद्धिविरोधाच्च । स्वलक्षणविरोधोऽपि नास्त्येव, सामान्य-विशेषात्मैकलक्षणत्वात् स्याद्वादिपरिगृहीतस्य वस्तुनः, जात्यन्तरत्वाच्च नरसिंहवदेकान्तवादिपरिकल्पिताद् वस्तुन इति । स्यात् तु क्रमजन्मनां धर्माणामसहावस्थायिनां देवमनुष्यादीनां मृत्पिण्डशिवकादीनां च विरोधोऽसहावस्थानलक्षणः, सोऽपि द्रव्यास्तिकनयप्राधान्यादभेदे विवक्षिते पर्यायाणां द्रव्यव्यतिरेकेणानभ्युपगमान्नास्तीति न कश्चिद् विरोधोऽस्ति स्याद्वादिनः, तमःप्रकाशच्छायातपशीतोष्णविरोधोदाहरणनिरास उक्तविधिनाऽवगम्यः द्रव्यार्थतो नित्याः पुद्गलाः तमस्तया च क्रमजन्मानः परिणमन्ते पर्यायाः, सामान्यस्याभिन्नत्वादेकरूपा एवेति कः केन विरुध्यते? । इत्थमर्थस्य सामान्यविशेषात्मैकरूपत्वेऽन्योन्यापेक्षित्वेऽनेकान्तात्मकत्वे एकान्तवादिपरिकल्पिताज्जात्यन्तरत्वे च न कश्चिद् दोषः, तथा स्थित्यंसस्य नित्यत्वादुत्पादव्ययानित्यत्वादुभयस्याभिन्नस्वभाववस्तुतायां कथमिदं घटते नित्यानित्ययोरेकपरिग्रहोऽपरत्वागमनान्तरीयकः एकत्यागश्चापरपरिग्रहाविनाभावीति, प्रत्यक्षादिप्रमाणबाधितत्वादुन्मत्तकप्रलापमात्रमेतदवसीयत इति, तस्मान्न परिकल्पितविषयो विरोधो (न परिकल्पितापरिकल्पितविषयो) न सकलस्वलक्षणविषयो नापि सामयिकः, किं तर्हि ? पर्यायनयाभिप्रायेण क्रमजन्मपर्यायविषयः, स चैक एवासहावस्थानलक्षणः, सोऽपि द्रव्यार्थनयाभिप्रायेण नैवास्तीति भावितम् । एवं चैकवस्तुविषये सदसती नित्यानित्ये च अर्पितानर्पितसिद्धेरिति व्यवस्थितम् ॥ द्वितीयसम्बन्धाभिधानेऽपि सङ्गतार्थमेव भाष्यमुक्तेन विधिना, एतमेवार्थमधुना भाष्येण प्रपञ्चयति–

**भा० – अर्पितव्यावहारिकमनर्पितव्यावहारिकं चेत्यर्थः ॥**

टी० – अर्पितव्यावहारिकमित्यादिना, प्रक्रान्तं त्रिविधं सन्नित्यं च, तदपेक्षया नपुंसकलिङ्गनिर्देशः, आदिमदनादियुगपदयुगपद्भावित्रिकालविषयपर्यायार्पण–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भजनानेकान्तप्ररूपणो हि परिणामार्थः, तैः पर्यायैः प्रतिषेधसमग्रादेश-विकलादेशैः, स्वपरार्थशब्दपर्यायभजनया च स्वं स्वं तत्त्वं पुष्णातीति विस्तरेण चरितार्थमेतत्, तत्र स्थितिलक्षणोऽन्तरङ्गस्तत्परिणामरूपत्वात् तत्सहावस्थायित्वात्, बहिरङ्गावुत्पादव्ययौ विस्रसाप्रयोगेण च कादाचित्कौ द्रव्यादिभेदात् प्रतिपन्नानन्तभेदौ, एवं चार्थोऽर्पितानर्पित-धर्मात्मकस्तद्विषयः शब्दो व्यवहाराङ्गमतः शब्दव्यवहार एव प्राधान्येनाङ्गीक्रियते, अत्र प्रत्यर्थं च प्रतिपत्तिः शब्दात् साक्षाद् गम्यमानार्थतया च सर्वत्रैव, यतः सदेकनानानित्यानित्यादिधर्मकलापपरिकरमशेषमस्तिकायजालम्, तत्रान्यतमैकधर्मार्पणे शेषधर्माणां गम्यमानता, यतो न सद् असत्त्वादिभेदविविक्तम्, असद् वा सदादि-विकल्पशून्यम्, अन्योन्यापेक्षसत्ताकत्वात् सदादीनाम् एवं वस्तुनिश्चयः, अर्पितमुपनीतं वस्तु विवक्षितेन धर्मेण साक्षाद् वाचकेन शब्देनाभिहितं व्यवहारः प्रयोजनमस्येति व्यावहारिकम्, अर्पितं च तद् व्यावहारिकं चेत्यर्पितव्यावहारिकम् । एतदुक्तं भवति-किञ्चिद् वस्तु विशिष्टाभिधानार्पितं सद् व्यवहारं साधयत्यपरमनर्पितमेव साक्षाद् वाचकेन शब्देन प्रतीयमानं सद्व्यवहाराय व्याप्रियत इत्यत आह-**अनर्पितव्यावहारिकं चेत्यर्थः** । अथवाऽर्पितविषयो व्यवहारोऽर्पितव्यवहारः शब्दपरिप्रापितव्यवहार इत्यर्थः । सोऽस्य सतोऽस्ति नित्यस्य चेत्यर्पितव्यावहारिकं सन्नित्यं च, एवमनर्पितव्यावहारिक-मपि द्रष्टव्यमसदनित्यं च यदा चासदनित्ये शब्देन साक्षात् प्रतिपिपादयिषिते तदाऽर्पिते ते, इतरे तु सन्नित्ये गम्यमाने तत्रानर्पिते भवतः, तस्मादेकत्र वस्तुन्यर्पितधर्मपरिग्रहोऽ-नर्पितधर्मसत्तानान्तरीयकः, यथा कृतकत्वधर्माभ्युपगमोऽनित्यत्वसत्तानान्तरीयकः, एक-त्यागश्चापरपरित्यागाविनाभावी, यथा अनित्यत्वपरित्यागे कृतकत्वपरित्यागोऽवश्यं-भावीति, चशब्दः समुच्चिनोति सर्वान् विकल्पान्, इतिशब्दो हेतौ, यस्मादर्पित-धर्मविषयः शब्दव्यवहारस्तस्मादर्पितानर्पितसिद्धेः सन्नित्ये असदनित्ये च विवक्षावशात्, अवधारणे वा, एतावानेव शब्दव्यवहारो यदुतार्पितानर्पितधर्मविषयो नान्य इति, अर्थ इत्यभिधेयप्रतिपत्तिमाचष्टे, समासत एषोऽर्थः सूत्रस्येतियावत् । धर्मार्थकाममोक्षलक्षणः सकलः पुरुषार्थस्तद्योग्यव्यवहारार्पणाभ्यां यथावदधिगम्यत इति ॥

**भा०-तत्र सच्चतुर्विधम्, तद्यथा-द्रव्यास्तिकम्, मातृकापदास्तिकम्, उत्पन्नास्तिकम्, पर्यायास्तिकमिति ।**

**टी०**-तत्र सच्चतुर्विधमित्यादि । तत्र-तेषु सन्नित्यासदनित्येषु सतो भेदानाचष्टे, सच्चतुर्विधमेव, न त्रिधा न च पञ्चधा, तदुद्देशार्थमाह-द्रव्यास्तिकमित्यादि । उत्पादादिमूलभेदान्तःपात्येव, सविपर्ययद्रव्यादिभेदप्रपञ्चस्त्रैरूप्येऽप्येकस्य धर्मिणः परिणामसमूहस्वभावस्योत्तरोत्तरभेदप्रदर्शनार्थः, एवंविधोपन्यासे च सर्वतत्पर्यायाकाङ्क्षा, तावत्परिणामानुयायित्वात् तत्संज्ञासम्बन्धादीनाम्, तत्रादिमद्भिः पर्यायैरर्प्यमाणं सतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावाद् व्येति व्येष्यतीति चानित्यम्, अनाद्यैः पर्यायैरादिश्यमानं सत्त्व-द्रव्यत्व-संज्ञित्व-प्रमेयत्व-चेतनत्व-मूर्तामूर्तत्व-भौतिकत्वेतरत्व-ग्राह्यत्वादिभिरविनाशधर्मकत्वान्नित्यम्, तद्धि सूक्ष्मोत्पादभङ्गसन्ततिसम्भवेऽपि सत्त्वादिभिराकारैर्नोत्पद्यते नापि विनश्यति । तत्र **द्रव्यास्तिकं मातृकापदास्तिकं** च द्रव्यनयः, **उत्पन्नास्तिकं पर्यायास्तिकं** च पर्यायनयः । अस्ति मतिरस्येत्यास्तिकम्, सतः प्रस्तुतत्वात्, तदभिसम्बन्धे नपुंसकलिङ्गता, द्रव्ये आस्तिकं द्रव्यास्तिकम्, मयूरव्यंसकादावकृतलक्षणतत्पुरुषप्रक्षेपात्, अथवाऽधिकरणशेषभावविवक्षायां द्रव्यस्यास्तिकं द्रव्यास्तिकम्, अथवा आस्तिकमस्तिमति, किं तत् ? नयरूपं प्रतिपादयितृ, कस्य प्रतिपादकम्? द्रव्यस्य, अतः प्रतिपाद्यप्रतिपादकभावलक्षणसम्बन्धविवक्षायां षष्ठीसमासश्च । एवं मातृकापदास्तिकादिष्वपि योज्यम् । द्रव्यमेवाभेदं भिद्यते न पर्यायः, द्रव्यं भवनलक्षणं मयूराण्डकरसवदुपारूढसर्वभेदबीजं देशकालक्रमव्यङ्ग्यभेदसमरसावस्थमेकरूपं भवनं-भूतिः सत्त्वमाश्रितसत्तातिरिक्तं भेदप्रत्यवमर्शेनाभिन्नमपि भिन्नवदाभासते, तदेव चास्तीति मन्यते, तच्च द्रव्यास्तिकमसङ्कीर्णस्वभावं शुद्धप्रकृतिरूपमेकं प्रत्याख्याताशेषविशेषकदम्बकं द्रव्यात्मकं द्रव्यमात्रं सङ्ग्रहप्ररूपणाविषयमभिहितम्, अपरं नैगमव्यवहारप्ररूपणा विषयमशुद्धप्रकृति, यस्माद् द्रव्यपर्यायावुभाविच्छति नैगमः स्वतन्त्रः, सामान्यमर्थान्तरभूतमन्यदेवाश्रितं सदभिधानप्रत्ययहेतुस्तयोर्निर्निमित्तयोः सर्वथाऽनुपाख्ये प्रवृत्त्यभावात्, व्यावृत्तिबुद्धिहेतुर्भेदकरोऽन्य एव विशेष इति भेदाभ्युपगतेरशुद्धप्रकृतित्वम्, व्यवहारोऽप्यशुद्धप्रकृतिरेव, परस्परविभिन्नरूपैरर्थैः संव्यवहारः सिध्यतीत्यभिप्रायात्, नैगमस्य वा सङ्ग्रहव्यवहारानुप्रवेशाच्छुद्धाशुद्धप्रकृतित्वं द्रव्यास्तिकस्य, तत्र सङ्ग्रहाभिप्रायानुसारि द्रव्यास्तिकम् व्यवहारनयानुसारि मातृकापदास्तिकम्, शुद्धाशुद्धप्रकृतिद्वयसन्दर्शनार्थं द्विधोपादानम्, सर्ववस्तुसल्लक्षणत्वादसत्प्रतिषेधेन सर्वसङ्ग्रहादेशो द्रव्यास्तिकम्, नहि सता किञ्चिदनाविष्टमस्ति द्रव्येण वा, तच्च निर्भेदत्वाल्लोकयात्राप्रवृत्तिबहिर्मुखम्, अत एव व्यवहारप्रवृत्तिस्त्यागोपादानोपेक्षारूपेण वस्तुषु प्रायो भेदसमाश्रया, स च भेदो मातृकापदास्तिकनिबन्धनः, व्यवहारस्याशुद्धप्रकृतित्वाल्लोकव्यवहारप्रसाधनाय द्रव्यास्तिकं भिनत्ति व्यवहारनयः, किमन्यद्धर्माधर्माकाशपुद्गलजीवास्तिकायेभ्यस्तद् द्रव्यास्तिकं नाम ? ते चास्तिकायाः परस्परं भिन्नस्वभावास्तुल्येऽपि हि द्रव्यत्वे न धर्मास्तिकायो भवत्यधर्मास्तिकायः, पक्वापक्ववत्, तथेतरेऽपि विविक्ता एव लोकयात्रां वर्तयन्ति, सन्मात्रं शुद्धद्रव्यमात्रं वा विद्यमानमपि न जातुचिद् व्यवहारक्षमम्, अतः स्थूलकतिपयव्यवहारयोग्यविशेषप्रधानं मातृकापदास्तिकम्, एते च धर्मास्तिकायादयः समस्तसामान्यविशेषपर्यायाश्रयत्वान्मातृकापदशब्दवाच्याः, मातृका ह्यशेषवर्णपदवाक्यप्रकरणादिविकल्पानां योनिः, इत्थं धर्मादयोऽपि व्यवहारनिबन्धना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेकपर्यायोपघ्नास्तद्विपरीतपर्यायाश्रयाश्च तत्र तत्र व्यवह्रियन्ते व्यवहारार्थिभिः, अतो मातृकापदमेवास्ति व्यवहारयोग्यत्वात्, न शेषमिति व्यवहारनयाभिप्रायः । सङ्ग्रह-व्यवहारौ च प्रत्येकं शतभेदत्वादनेकमुखौ, व्यवहार इति चान्वर्थसंज्ञत्वादेवास्य नयस्य, अवहरणमवहारः, कस्य ? एकसत्त्वस्य, केन ? विशेषेण-घटादिना, नानासत्त्वेन लोकयात्रासिद्धेः ॥

अधुना द्रव्यास्तिकमातृकापदास्तिकाभिहिताविशिष्टवस्तुप्रतिपक्षेण भेदा एव वस्तुत्वेनावध्रियन्ते पर्यायनयेन, अनवरतोत्पादविनाशप्रवाहमात्रमेव वस्तु सकलव्यवहार-निबन्धनम्, न तु स्थितमस्ति किञ्चिद्, आत्मभावलक्षणानन्तरविनाशित्वान्न किञ्चित् केनचिदेकेनाभिन्नेन स्थित्यंशेनावबध्यमानं सम्भाव्यते, तत्राशेषस्थूलसूक्ष्मोत्पादकलापस्य प्रतिपादकमुत्पन्नास्तिकमुत्पन्नेऽस्तिमति, नानुत्पन्ने वान्ध्येयव्योमोत्पलादाविति, योऽप्या-त्मलाभक्षणोऽस्ति सन्नित्येवंविधशब्दवाच्यः सोऽप्यभूतप्रादुर्भावात्, प्राग् नासीत् पश्चाल्लब्धात्माऽस्ति सन्नित्यादिशब्दव्यपदेश्यः, न तु भूत्वाऽस्तित्वमनुभवन्नस्ती-त्याख्यायते, क्रियायाः कृतकत्वात् पचत्यादिवत्, कर्तुश्च तत्सम्बन्धेन कर्तृत्व-प्रतिलम्भस्य कृतकत्वान्न स्थितसत्ताकमेकमस्ति किञ्चित्, प्रथमक्षणविलक्षणा-श्चोत्तरोत्तरक्षणाः सन्तानाकारेणोपजनमासादयन्ति । तथा पर्यायास्तिकमित्युत्पत्तिमतोऽवश्यं विनश्वरत्वाद् यावन्त उत्पादास्तावन्त एव विनाशा इति विनाशेऽस्तिमति पर्यायास्तिकम्, पर्यायो भेदो विनाशलक्षणः सोऽस्त्येवोत्पन्नस्येति, पर्यायो हि विनाशपर्यायः, यथा प्राप्तपर्यायो देवदत्त इति, समस्तविस्रसाप्रयोगापादितविनाशसूचनाकारि च पर्याया-स्तिकम् । अपरे तु वर्णयन्त्यन्यथा उत्पन्नास्तिकं पर्यायास्तिकं च, तत्र सामग्री-ग्रहणादेकद्रव्यभाविनां पर्यायाणां कालतोऽर्थतो वाऽप्यव्यभिचारिणां यत्र व्यपदेश-स्तदुत्पन्नास्तिकं सिध्यमानसिद्धवत् यथा सिध्यमानः सिद्ध इति कालतोऽर्थतश्चा-व्यभिचारी शब्दः, तथैकद्रव्यभाविनां पर्यायाणामयुगपद्वृत्तीनां युगपदग्रहणात् सामग्री-ग्रहणाच्च यत्र व्यपदेशः स पर्यायदेशः, यथा स्पर्शादिमतां पुद्गलानामिन्द्रियैर्युगपद-ग्रहणादपि व्यपदेशः क्रियते स्पर्शरसगन्धवर्णवन्तः पुद्गला इति। अपरे व्याचक्षते-

"तेषामुत्पादसम्भक्ते-रुत्पन्नास्तिकदेशना ।
उत्पद्यमानाः पर्यायाः, पर्यायास्तिकमुच्यते ॥"

तेषामिति । द्रव्यमातृकापदास्तिकभेदानामुत्पादयोगादुत्पन्नास्तिकदेशना, पर्यायनयस्यानुत्पन्नेन व्यवहाराभावात् तदानीमेव सन्, न ह्यनुत्पन्नाः केचिद् द्रव्यादयः सन्ति, अतीतानागतवर्तमानेष्वविशेषात्, यदा पुनरुत्पादसमावेशिनो वर्तमानकालावच्छिन्नाः पर्याया विवक्ष्यन्ते तदोत्पद्यमानावस्थायां पर्यायास्तिकमुच्यते । अन्ये त्वभिदधति-न मातृकापदास्तिकं द्रव्यास्तिकाद् भिद्यत इति द्रव्यनयपरिग्रहः, पर्यायास्तिकं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोत्पन्नास्तिकाद् विविच्यत इति पर्यायनयपरिग्रहः, तदेवं चतुर्भिरपि विकल्पैर्नयद्वयी प्रतिपिपादयिषिता, एवं तर्हि द्रव्यादिचतुष्टयी किमर्थेति चेत्, तदुच्यते उभयनयस्वभावप्रदर्शनार्था चतुष्टयी । एवमेतान्यन्यव्याख्यानान्यालोच्य भाष्यं कथमपि गमनीयम्, स्वव्याख्यानानुसारेण तावदुच्यते पर्यायनयश्चोत्पादविनाशाद् द्वैविध्यप्रदिदर्शयिषया भाष्यकारेणोपचक्रमे, **उत्पन्नास्तिकं पर्यायास्तिकमिति** । स एष पर्यायनयमहाविटपी प्रौढदृढानवद्यर्जुसूत्रनयादभ्रस्कन्धः सुप्रतिष्ठिताधारनानागमगहनशब्दनयशाखस्तदाश्रयसमभिरूढैवंभूतविविधविकल्पप्रशाखोऽर्थशब्दज्ञानशून्यताङ्कुरपत्रपुष्पफलोपशोभितः पर्यायप्रधानत्वादुत्पादविनाशमात्रजलावसेकसंवर्धनीयः प्रतन्यते, तत्रर्जुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रमृजुं सूत्रयतिअन्यतो व्यवच्छिनत्ति सूत्रपातवत्, न ह्यतीतमनागतं वाऽस्ति, यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात्, न च पुत्रार्थिनी योषिदौपयाजिकादिविशिष्टदेवतासन्निधौ विदध्यात्, तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नाप्यतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पाद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः । एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तीत्येवमादयो न यथार्थाः, कथम् ? यतो नामशब्देनाविकृतरूपस्य द्रव्यस्याभिधानात्, क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात् न च विकाराविकारयोरैकाधिकरण्यमस्ति, विरुद्धत्वात्, अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन्नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति उक्तार्थसंवादी च श्लोको गीतः पुराविदा-

"पलालं न दहत्यग्नि-र्भिद्यते न घटः क्वचित् ।
नासंयतः प्रव्रजति, भव्योऽसिद्धो न सिद्ध्यति ॥"

पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते, अत्र वाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नाम शब्दः तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम्, अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात् पटवत्, तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यत इत्यनेन शब्देनोच्येत ? क्रियाशब्दस्य विकाराभिधायित्वात्, न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते, यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत्, विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तर-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाचित्वात्, तस्माद् यावत्, तत् पलालं तावन्न दह्यते, यदा दह्यते तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति ॥

एवं घटाद्युदाहरणभावना कार्या । एवं च सदेकक्षणवृत्त्येव, नित्यं पुनर्नैवास्ति वस्तु किञ्चिदिति । एवमृजुसूत्रनयेन निरूपिते वस्तुनि शब्दनयस्तद्व्यावृत्त्यर्थमाह-शब्दप्रयोगोऽर्थगत्यर्थः, तत्र वक्तुरर्थानुविधायी शब्दोऽर्थवशात् तस्य शब्दप्रयोगः, श्रोतुः पुनः शब्दवशादर्थप्रतिपत्तिरिति शब्दानुविधाय्यर्थः, शब्दनयाश्च शब्दानुरूपमर्थमिच्छन्ति, यथा शब्दस्तथाऽर्थोऽपि प्रतिपत्तव्यः, समनन्तरनयप्रतिपादितं वर्तमानरूपप्रवृत्तं वस्तु सूक्ष्मतरेण शब्देन भिद्यते, ऋजुसूत्रस्तु वर्तमानानेकधर्मरूपमपि घटशब्देनाभिधीयमानं सम्यगभ्युपैति, यथा मृद्घटोऽस्ति घटो द्रव्यं घट इति, यद्यसौ मृद्रूपेण द्रव्यतया च न स्यादमृद्द्रव्यं च घटः स्यात्, अतः सोऽसौ तेन रूपेण वृत्तत्वाद् वर्तमानरूपघटवदिति । शब्दनयस्तु वर्तमानकालवृत्तमपि लिङ्गसङ्ख्यापुरुषकालादिभिन्नमवस्त्वेव मन्यते, स्त्रीपुंनपुंसकलिङ्गानां गुणानां भिन्नत्वात् मृद्घटो द्रव्यमिति न सामानाधिकरण्यम्, यथा गौरश्वः संस्त्यानप्रसवस्थितिलक्षणाः परस्परविरुद्धाः खल्वेते गुणाः शीतोष्णादिवत् मृदादिशब्दाच्च भिन्नरूपप्रत्ययप्रसवो दृष्टः, पटकुटादिभिन्नध्वनिवत्, तस्माल्लिङ्गादिभिन्नमसम्यगभिधानम्, तस्यार्थस्य तेन रूपेणाभूतत्वात्, कातरे शूरशब्दप्रयोगवदिति, एवं चाभिन्नलिङ्गसङ्ख्याद्युच्यमानं वस्तु वस्तुतामधिवसति, तेन रूपेण वृत्तत्वात्, यथा शूरे शूरशब्दप्रयोगः, समानलिङ्गशब्दाभिधेयतायां च वस्तुनः पर्यायान्तरैः सामानाधिकरण्यं सिध्यति, घटः कुटो हस्ती दन्ती चेति ॥

एवं शब्दनयेनर्जुसूत्रे व्यावर्तिते वस्तुनि चाभिन्नलिङ्गादिशब्दवाच्ये प्रतिष्ठापिते वर्तमानस्याभिन्नलिङ्गादिकस्य वस्तुनः सूक्ष्मतरं भेदमभिधत्ते समभिरूढनयः । न जातुचित् पर्यायान्तरैकाधिकरण्येन शब्दैरुच्यमानं वस्तु यथावस्थितमुक्तं भवति, संज्ञानिमित्तभेदाद् । द्विविधा संज्ञा पारिभाषिकी नैमित्तिकी च, तत्र पारिभाषिकी नार्थतत्त्वं ब्रवीति, यदृच्छामात्रप्रवृत्तत्वात्, नैमित्तिकी तु सर्वैव संज्ञा युक्ता, यथाऽऽह-

"नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम् ।

यत्र विशेषपदार्थसमुत्थम्, प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥"

एवं च सर्वे क्रियानिमित्ताः शब्दाः धातुजत्वान्निमित्तभेदाच्चार्थभेदो दृष्टश्छत्रिदण्ड्यादिवत्, अतो यां यां संज्ञामभिधत्ते तां तां समभिरोहतीति समभिरूढस्तामेवैकामारोहति, द्वितीयां निमित्तान्तरवृत्तां न क्षमते, तस्माद् वर्तमानेनाभिन्नलिङ्गादिनाऽप्येकेनैव ध्वनिनाभिधीयमानोऽर्थः सम्यगुक्तो भवति, नान्यथेति ॥

क्रियाभेदादित्थं समभिरूढनयेन प्रतिपादिते वस्तुन्येवंभूतनयः तद्वस्तु सूक्ष्मतरभेदं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादयितुमुपक्रमते-यदि घटत इति घटः क्रियानिमित्तशब्दवाच्योऽभ्युपेतस्त्वया ततो यत् तन्निमित्तं सा क्रिया यदैव वर्तमाना तदैव नैमित्तिकः शब्दो युक्तश्चित्र-कारादिवत्, तस्माद् यदैव घटते-चेष्टते तदैव घटः, तन्निमित्ताभावे पटादिवदेवासौ न घटः, न चातीतानागतनिमित्तसम्बन्धः, तयोरभावात्, न ह्यतीतं भावि वा छत्रदण्डादि छत्रिदण्ड्यादीनां निमित्तं युज्यते, यदि स्यात्, त्रैलोक्यस्य छत्रिदण्डित्वप्रसङ्गः, अतो घटमान एव घटः, क्रियाविशिष्टस्यैव घटता, ततश्च घटशब्देनापि नैवासौ सर्वदा वाच्य इति, एवमेष पर्यायनयः (सूक्ष्म-) सूक्ष्मतरभेदस्तावदाधावति यावज्ज्ञानमात्र-मवशिष्यते शून्यता वा, न त्विह सकलक्रमभेदाख्यानं क्रियतेऽन्यत्र प्रपञ्चितत्वात् । एवमेतयोर्द्रव्यास्तिकपर्यायास्तिकयोर्वचनचतुष्टयोपात्तयोः परस्परापेक्षयोरर्पणानर्पणविशेषतः सम्भवद्भिर्विकल्पैर्भाष्यकृत् स्वयमेव सन्नित्यादिभेदभावनां करोति -

**भा०-एषामर्थपदानि द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत् । असन्नाम [१]नास्त्येव द्रव्यास्तिकस्य ।**

**टी०**-एषामर्थपदानीत्यादि । एषां-द्रव्यपर्यायनयभेदानां द्रव्यास्तिकादीनां चतुर्णाम् अर्थानि पदानि अर्थपदानि द्रव्यं वा द्रव्ये वा इत्यादीनि, द्रव्यास्तिकादीनां योऽर्थोऽभिधेयो वाच्यस्तत्प्रतिपादनप्रयोजनान्येकत्वादीनि युक्तानि द्रव्यादीनि, एभिर्हि द्रव्यास्तिकादीनि व्याख्यायन्ते विकल्पैस्तेषां चार्थाभिधानप्रत्ययभेदेन भिन्नानामन्तरङ्गा-भिधानप्रत्ययपदापेक्षया बहुविधविद्वज्जनाभिमतबहिरङ्गार्थपदचिन्ता क्रियते, तिष्ठतां तावदभिधानप्रत्ययावित्यर्थपदमेव प्राक् प्रदर्श्यत इत्यर्थः । तत्र द्रव्यं भव्यं योग्यं स्वपर्यायपरिणतेः सर्वं धर्मादि भेदवाद्यभिमतमभिन्नलक्षणार्पणयैकत्वेन विवक्ष्यते द्रव्यमिति द्रव्यस्वभावात्यागात्, न च द्रव्यव्यतिरिक्तं गुणकर्मादि किञ्चिदस्ति, रूपरसादयस्तद्द्रव्यद्वारेणैवोपलब्धिमार्गमवतरन्तो द्रव्यवृत्तिमात्रत्वेनावधार्यन्ते, न भिन्नजातीयत्वेन, चक्षुरादिग्रहणभेदात् तु वृत्तयस्तास्तस्य भिद्यन्ते, पितृपुत्रमातुलत्वाद्य-नेकसम्बन्धिसम्बन्धविशिष्टपुरुषवत्, अभिन्नस्यैकस्य जिनदत्तादेर्जन्यजनकाद्यनेक-सम्बन्धापेक्षाः पित्रादिव्यपदेशाः प्रवर्तन्ते, न तु तस्मात् पुरुषवस्तुनोऽर्थान्तरभूतं पितृत्वं नामार्थो जात्यन्तरमस्ति, पुरुषवृत्तिमात्रत्वात्, तथा द्रव्यमपि चक्षुर्ग्रहणादिविषय-भूयमासादयद् रूपादिव्यपदेशमनेकमासादयति, अतोऽनर्थान्तरं रूपरसादयो द्रव्यादिति, कर्मापि विस्रसाप्रयोगसापेक्षो द्रव्यपरिणामस्तद्भावलक्षणो द्रव्यादव्यतिरिच्यमानो द्रव्यमेव, सामान्यविशेषयोरपि तदग्रहे तद्बुद्ध्यभावात् द्रव्यमात्रतैवेति, एवमेकमेव द्रव्यं शुद्धप्रकृतेर्द्रव्यार्थस्य । अविशुद्धद्रव्यार्थभेदनैगमस्त्वभिन्नद्रव्येण व्यवहाराभावाद् भेदनिबन्धनद्वित्वादिसङ्ख्याव्यवहारः सकललोकयात्राक्षमः सिद्ध्यतीति द्रव्ये वा द्रव्याणि वेत्याह, अन्यथैकसङ्ख्याऽपि न स्याद्, व्यवहारस्य वा शतभेदत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कश्चिदंशः प्रतिपन्नदेशकालसङ्ख्याभेदः प्रतिमन्यते द्रव्ये वा द्रव्याणि वेति विकल्पसम्भवः, सच्च त्रिविधमुत्पादादि, तच्च द्रव्येणार्प्यमाणमङ्गीकृतसङ्ख्याभेदमेवात्मलाभं प्रतिपद्यते, द्रव्यं वा द्रव्ये वा द्रव्याणि वेति, न तु कदाचिद् वचनत्रयप्रतिपाद्यद्रव्यव्यतिरेकेणान्यत् किञ्चित् सदस्ति, यतो द्रव्यमित्यपदिष्टे सत् प्रतीयते, द्रव्ये इत्यपि सती, द्रव्याणि च सन्तीत्येवं व्यस्तेषु समस्तेषु च प्रतीयते द्रव्येष्वेव सत्, द्रव्यमात्रे नियतवृत्तित्वात्, द्रव्यव्यतिरिक्तपदार्थाभावाच्चान्यत्र नोपलभ्यते, यदि स्याद‌द्रव्यं किञ्चिद् गुणः कर्मादि वा तत्राप्याशङ्केत सतो वृत्तिः, तत् तु नैवास्तीत्ययमर्थोऽनेन भाष्यवचनेन प्रत्याय्यते-असन्नाम नास्ति, असदिति यस्य नाम संज्ञिनस्तत्संज्ञिरूपमसन्नामकं नास्ति, संज्ञिरूपाभावाद् वा संज्ञा नास्ति, परस्परापेक्षत्वात् संज्ञासंज्ञिनोः, एवं चासच्छब्देन गुणाद्यभाव एवोच्यते, स च गुणाद्यभावो द्रव्यमात्रमेव द्रव्यास्तिकस्येत्युक्तेन प्रकारेण द्रव्यार्थिकस्यार्थपदभावना । अन्ये भाष्यमेवं पठन्ति-असन्नाम नास्त्येव सावधारणोऽसतः प्रतिषेधः, सर्वं द्रव्यमिति सञ्जिघृक्षतो द्रव्यास्तिकस्य हि मातृकापदास्तिकाद्यपि सर्वमन्तर्वसतीति, तस्मात् सदित्युक्ते एषामेकत्वद्वित्वबहुत्वानामन्यतमोक्तौ तदवरोधः सन्मात्रत्वादिति । एवं सङ्ग्रहनयेन स्वाभिप्राये द्रव्यास्तिकमात्रतया प्रकाशिते व्यवहारनयः स्वाभिप्रायमाविष्करोति मातृकापदास्तिकोपन्यासेन-

**भा०-मातृकापदास्तिकस्यापि मातृकापदं वा मातृकापदे वा मातृकापदानि वा सत् । अमातृकापदं वा अमातृकापदे वा अमातृकापदानि वाऽसत् ।**

**टी०**-मातृकापदास्तिकस्यापीत्यादि । धर्मास्तिकायादीनामुद्देशमात्रं मातृकापदास्तिकलक्षणम्, एवं मन्यते व्यवहारः-न द्रव्यमात्रमभेदं सत् संज्ञास्वालक्षण्यादिशून्यं व्यवहर्तॄणां लौकिकपरीक्षकाणां धियं धिनोति, व्यवहारार्थश्च वस्त्वभ्युपगमः, स च भेदेन प्रायः साध्यते, त्वयाऽपि च भेद एव प्रदर्शितो द्रव्यं वा द्रव्ये वा द्रव्याणि वेति, एकस्मिन्नर्थे एकवचनं द्वयोरर्थयोर्द्विवचनं बहुष्वर्थेषु च बहुवचनमित्येवं सतो भेदका सङ्ख्या, न च द्रव्यसतोर्भेदस्तद्‌द्रव्यमेव सत्सदेव द्रव्यम्, यच्चैकसङ्ख्यावच्छिन्नं सत् तन्न द्वित्वादिसङ्ख्याऽऽश्रयितुं शक्यम्, न ह्येको द्वौ, द्वौ वा एक इत्येवं लोकव्यवहारप्रवणेन भेदोऽभ्युपेयः, किं तद् द्रव्यं धर्माधर्माकाशपुद्गलजीवभेदं गतिस्थित्यवगाहशरीरादिपरस्परोग्रहणाद्युपकारि संज्ञास्वलक्षणादिविविक्तं संव्यवहारप्रापणप्रत्यलं भवति ? निर्भेदं पुनर्वस्तु न काञ्चिद् व्यवहारमात्रामभिमुखीकरोति, भेदप्रधानतायां तु धर्मादीनामन्यतमैकविवक्षायां सत् मातृकापदम्, द्वित्वविवक्षायां सती मातृकापदे, त्रित्वादिविवक्षायां सन्ति मातृकापदानीति प्रतिविशिष्टव्यवहारप्रसिद्धिः, अतो धर्मादयः परस्परव्यावृत्तसत्त्वस्वभावार्पणयैव सन्ति, नान्यथा । धर्मास्तिकायस्वलक्षणं य(त् त) न्न जातुचिदधर्मास्तिकायलक्षणं भवति, अतो यदस्ति तन्मातृकापदं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेत्यादिना विकल्पत्रयेण सङ्गृहीतं धर्मादि पञ्चविधम्, सकलभेदजालप्रसूतिहेतुत्वान्मातृकापदं मातृकास्थानीयमुच्यते धर्मादि, नातोऽन्यदस्तीति, अमातृकापदं वेत्यादिना तामेव परस्परव्यावृत्तिमभिव्यनक्ति, यदि धर्मादिपञ्चकव्यतिरेकि किञ्चिद् भवेत् ततस्तन्मातृकापदं वेत्यादिव्यपदेशो युज्येत, संज्ञास्वालक्षण्याद्यभावात् तच्चासत्, तस्मात् धर्म एवाधर्मलक्षणाद् व्यावर्तमानस्तेनाधर्मस्वलक्षणरूपेणासन्नित्युच्यते। एवं शेषेष्वपि भावना विधेया ॥

सर्वसद्गतिविशेषाणां प्रसवहेतुत्वाद् धर्मास्तिकायो मातृकापदम्, स एव च सर्वसत्स्थितिविशेषप्रसवव्यावृत्त्यपेक्षया अमातृकापदम्, एवं द्विवचनबहुवचने विभावनीये । तस्मान्न द्रव्यास्तिकादि किञ्चिन्मातृकापदाव्यतिरेकि विद्यते, स्वभावासंक्रान्त्या तु परस्परापोहभावतः पदार्थव्यवस्थानम्, स चापोहः सल्लक्षणव्यवच्छेदेनैको यथा प्रमाणं प्रमेयं च सद्, यन्न प्रमाणं न प्रमेयं तदसदेव, अपरो धर्म्यन्तरस्य धर्म्यन्तरोत्पन्नवैशिष्ट्येनापोहः, तद्यथा-जीवोऽजीवो न भवत्यश्वो गौर्न भवतीति, तथाऽनपोहश्चेतनाचेतनयोर्द्रव्यदेशात्, परस्परापोहे च द्रव्यादेशात् सर्वेषां धर्मादीनामनपोह इत्येवं सामान्यविशेषांनेकधर्मत्वाद् धर्मादयोऽपोहानपोहरूपाः सर्वे मातृकापदास्तिकम्, एवं द्रव्यार्थनयाभिप्रायो द्रव्यास्तिकमातृकापदास्तिकाभ्यामाख्यातः । पर्यायार्थनयावसरे त्विदमुच्यते-

**भा०-उत्पन्नास्तिकस्य उत्पन्नं वा उत्पन्ने वा उत्पन्नानि वा सत् । अनुत्पन्नं वाऽनुत्पन्ने वाऽनुत्पन्नानि वाऽसत् ॥**

**टी०-उत्पन्नास्तिकस्येत्यादि** । पर्यायार्थस्य मूलमृजुसूत्रः, स च प्रत्युत्पन्नं वर्तमानक्षणमात्रं सर्वमेव धर्मादिद्रव्यं प्रतिजानीते, क्षणं क्षणं प्रत्युत्पन्नं पूर्वपूर्वक्षणविलक्षणम्, इदमेव च सतो लक्षणं यदुत्पद्यते प्रतिक्षणम्, उत्पादो हि वस्तुनो लक्षणम्, अनुत्पादाश्च व्योमोत्पलादयो न कथञ्चिल्लक्ष्यन्ते, तत्रात्मनां तावत् प्रतिक्षणमपरापरज्ञानदर्शनक्रियाद्युत्पादो लक्षणम्, पुद्गला वर्ण-गन्ध-रस-स्पर्श-शब्द-संस्थान-तम-श्छायाद्युत्पादलक्षणाः, धर्माधर्माकाशास्तु गन्तृस्थात्रवगाहमानगतिस्थित्यवगाहाकारोत्पादतः प्रतिक्षणमन्ये चान्ये च भवन्तीति, एषां च वर्तमानक्षण एव सत्यः, तस्मादेकमभिन्नं सकलभेदहेतुर्मातृकापदं नाम किञ्चिन्नास्ति व्यवहारनयपुरस्कृतम् । अपि च-व्यवहारोऽपि लौकिकः प्रत्युत्पन्नक्षणसाध्य एव, सतोऽर्थक्रियासामर्थ्यात् सँश्च वर्तमानक्षणः, क्रान्तानागतक्षणयोरसत्त्वान्नार्थक्रियासामर्थ्यं सम्भाव्यते, तस्मादुत्पन्न एवास्ति क्षणः, तस्मिँश्च नान्वयि किञ्चिद् द्रव्यत्वादि विद्यते, ततश्च भूतान्वेषिणो न द्रव्यास्तिकं न मातृकापदास्तिकं किञ्चिदस्ति, उत्पन्नास्तिकमेव तु सत् सन्तत्या द्रव्यं वा धर्मादि वाऽभिधीयते, न भूततस्तदस्ति, सन्तानस्य सांवृतत्वात्, ते च वर्तमानक्षणा भूयांसः, तत्रैकक्षणविवक्षायामुत्पन्नास्तिकं सदिति विकल्पः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वित्वविवक्षायामुत्पन्नास्तिके वा सती, त्रित्वादिविवक्षायामुत्पन्नास्तिकानि वेति, यत् तत् सदेवं विवक्षया नियम्यते सङ्ख्याभेदेन व्यवहारार्थम् । यच्च परेण द्रव्यास्तिकं मातृकापदास्तिकं वाऽभ्युपेतं तदुत्पन्नमनुत्पन्नं वा स्यात् ? यदि पूर्वः कल्पः अस्मत्समीहितसिद्धिः, अथोत्तरस्ततोऽसदेव द्रव्यास्तिकादि, कथञ्चिदप्युत्पादनेनायोगादत आह-अनुत्पन्नं वाऽनुत्पन्ने वाऽनुत्पन्नानि वा सर्वमसत् स्वलक्षणस्योत्पादस्याभावादिति । एवमुक्तेन प्रकारेण धर्मादि द्रव्यं स्यात् सत् स्यादसत् स्यान्नित्यं स्यादनित्यमिति प्रतिपाद्यत्वेन सूचितम्, अधुना विपञ्च्यते । तत्र द्रव्यार्थनयप्रधानतायां पर्यायनयगुणभावे च प्रथमविकल्पः, प्राधान्यं शब्देन विवक्षितत्वाच्छब्दाधीनम्, शब्दानुपात्तस्यार्थतो गम्यमानस्याप्रधानता १ । पर्यायनयप्रधानतायां द्रव्यनयगुणभावे च द्वितीयः २ । अर्पितेऽनुपनीते न वाच्यं सदित्यसदिति वेत्यनेन भाष्यवचनेन तृतीयविकल्पो विवक्ष्यते स्यादवक्तव्यमिति ३ । एते त्रयः सकलादेशाः । यदा त्वभिन्नमेकं वस्त्वनेकेन गुणरूपेणोच्यते, गुणिनां च गुणरूपमन्तरेण विशेषप्रतिपत्तेरभावादिहात्मादिरेकोऽर्थः सत्त्वादेरेकस्य गुणस्य रूपेणाभेदोपचारतो मतुब्लोपेन वा निरंशः सकलो व्याप्तो वक्तुमिष्यते, विभागनिमित्तस्य प्रतियोगिनो गुणान्तरस्यासत्त्वादेस्तत्रानाश्रयणात्, तत्र द्रव्यार्थाश्रयं सत्त्वगुणमाश्रित्य तदा स्यात् सन्नित्युच्यते सकलादेशः, गुणद्वयं तु गुणिनो भागवृत्ति भवत्युभयात्मकत्वाद् गुणिनः, न त्वेको गुणो भागवृत्तिरिति । एवं स्यान्नित्य इत्यपि वाच्यम् । तथा पर्यायनयाश्रयमसत्त्वमनित्यत्वं चाङ्गीकृत्य स्यादसत् स्यादनित्य आत्मेति वाच्यम् । युगपत् भावादुभयगुणयोरप्रधानतायां शब्देनाभिधेयतयाऽनुपात्तत्वात् स्यादवक्तव्यः ॥ का पुनर्भावना स्याद् सन्निति ? किमत्र भाव्यम् ? एकं द्रव्यमनन्तपर्यायमतीतानागतानन्तकालसम्बन्ध्यनेकार्थव्यञ्जनपर्यायात्मकतया विश्वरूपम्, तदेवंविधावस्थं वस्तु वर्तमानपर्यायवृत्तमपि येन येन शब्देनोच्यते तेन तेन रूपेण तदभिसम्बद्धम्, द्रव्यस्य पर्यायसचिवत्वात् पर्यायाणां च द्रव्यसहायत्वात्, अतोऽनेकान्तवादसामर्थ्याद् वस्तुनो यदुक्तसूक्तिका, न च व्यवहारविरोधिनी, यथा घटः पटादिरपि भवति स्यात्कारसंलाञ्छनशब्दाभिधेयतायामिति जैनेन्द्रो न्यायः । एवं न्यायव्यवस्थायामनन्तपर्याये पुरुषादौ सप्तधा वाचकः शब्दः प्रवर्तते स्यादस्त्येवेत्यादिः, यथा युवत्ववृत्तिः पुरुषः पुरुषत्वेनास्ति न तु बालवृत्त्या, ततः स्यादस्त्येव न पुनः सर्वात्मनैव पुरुषः द्रव्यार्थेनान्वयिना वर्तमानेन यौवनेन विद्यते, न तु तत्र सम्भविनान्येनापि पर्यायेण बालादिना, यदि पुनरस्त्येवेति नियमेनैवोच्यते तत आमरणकालवृत्तत्वात् पुरुषशब्दपुरुषार्थयोर्नास्तित्वनिरवकाशास्तित्वप्रतिज्ञावशात् यथा पुरुषत्वयौवनाभ्यां विद्यते तथा बालपुरुषतयाऽपि स्यादन्याभिश्च वृत्तिभिः सत्सङ्कीर्णवृत्तिर्भवेत्, नियतवृत्तिश्च दृश्यते, न वा बालता पुरुषस्वभाव एव भवतीत्यभ्युपेयम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चावस्थाहाने: पुरुषाभावप्रसङ्ग:, अतो बालापेक्षया स्यादस्त्येवेति भवति, तथैकान्तवादिनो नास्त्येवात्मेत्यवधारणेनोक्ते तथैवान्वयिना द्रव्यार्थपुरुषतया स नास्ति, एवमुत्पादविनाशप्रवाहरूपपर्यायात्मिकयाऽपि बालादिवृत्त्या न स्यात्, एवं चात्मनास्तित्वमस्तित्वनिरवकाशं भवेत्, ततश्चान्वयिना नैमित्तिकेन वा रूपेण नास्तित्वमात्मनो वान्ध्येयस्येव सर्वप्रकारमनुषक्तम्, अतस्तद्दोषापाकरणेन स्यान्नास्त्येवेत्युच्यते, स ह्यन्वयिन्या वृत्त्या न (?) विद्यते, न सर्वात्मनैव, यतो वर्तमानपर्याय: स्वात्मना बालादिरूपेणास्त्येव, पर्यायपरम्परायामपि वर्तमामपर्यायेणैवास्ति नातीतानागतपर्यायापेक्षणेनेत्यत: स्यान्नास्त्येवेति । ये त्वस्तित्वनास्तित्वैकान्तवादिनोऽवधारणमिष्टत: प्रयुञ्जतेऽस्त्येवात्मा नास्त्येव चात्मेति, तेषां शब्दशक्तिप्रापितत्वात् सर्वथाऽस्तित्वनास्तित्वप्रसङ्ग: । प्रथमविकल्पे तावत् सर्वप्रकारास्तित्वमात्मन: प्रसजति, प्रतिषेधनिरपेक्षत्वादस्तित्वेन स्ववशे व्यवस्थापितत्वादस्तित्वाभावे चात्माभावात्, नास्तित्वस्यापि स्वविषयेऽवधृतत्वात् सति घटे तदप्रसङ्गात्, एकाधिकरणयोश्च सदसतोर्विरोधात् परस्परविषयानाक्रान्ति:, अत: समस्तवस्तुरूपेणास्त्यात्मा नास्तित्वनिरवकाशास्तिशब्दवाच्यत्वादस्तित्वे स्वात्मवत्, अस्तित्वसामान्येन व्याप्तो न त्वस्तिविशेषै: पटादिभिरिति चेत् यथाऽनित्यमेव कृतकमनित्याभावे तदभावात्, साध्यधर्मसामान्येनेति वचनात्, अनित्यत्वसामान्यमनित्यव्यक्तिश्चेति द्विरूप: साध्यधर्म:, साधनधर्मोऽपि हि द्विप्रकार:, तत्तुल्योऽपि हितानामे(?)त्यादिवचनात्, तथास्वं येन रूपेणेत्याद्यभिधानात् सामान्यानित्यतया व्याप्तिर्न विशेषानित्यतया, हन्त भवतैव तर्हि प्रतिपन्न: साध्यधर्मभेदस्तथा चावधारणवैयर्थ्यम्, अनित्यत्वे हि सर्वप्रकारे सत्यवधारणसाफल्यं स्यात्, यदा तु विशेषानित्यतया न भवत्यनित्यं वस्तु तदा व्यर्थमवधारणम् । स्वगतेनापि विशेषेणानित्यं भवत्येवेति चेत्, तन्न, तत्रापि स्वगतेनेति विशेषणसामर्थ्यात् परगतविशेषानित्यत्वाभाव:, पुनरप्यफलमेवावधारणम् । न चानवधारणो वाक्यप्रयोग: पण्डितजनमन:प्रीतिहेतु:, सर्ववाक्यानां सावधारणत्वादिष्टतश्चावधारणप्रकल्पनादवश्यंतयाऽवधारणमभ्युपेयम्, अन्यथा त्वनित्यं कृतकमनित्यत्वस्यानवधृतत्वान्नित्यत्वप्रसक्तिरपि ॥ अपरे त्वेवंविधप्रसङ्गभीत्या त्रिधाऽवधारणफलं वर्णयन्ति अयोगान्ययोगात्यन्तायोगत्यवच्छेदद्वारेण, क्वचिदेवकारप्रयोगादयोगव्यवच्छेद:, क्वचिदन्ययोगनिरास: क्वचिदत्यन्तायोगव्युदास:, तत्रायोगोऽसम्बन्धस्तदवच्छेदफलं विशेषणमस्त्येव घट इत्यादावस्तिना सह घटस्यायोगो नास्त्ययोगमात्रं व्यवच्छिद्यते, यथा चैत्रो धनुर्धर:, चैत्रे हि धनुर्धरतायामाशङ्क्यमानायां चैत्रो धनुर्धर एवेत्यवधार्यमाणेनान्येभ्यो धनुर्धरता व्यावर्तते, तद्वदिहापि प्रकृतवस्तुनीति, स्यात् त्वेष दोषो यद्यन्ययोगव्यवच्छेदेन विशेषणं क्रियेत, यथा पार्थो धनुर्धर: पार्थे धनुर्धरतायां प्रतीतायां तादृशी किमन्यत्राप्यस्तीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तायां पार्थ एव धनुर्धरो नान्य इति प्रतिविशिष्टधनुर्धरतायां सहान्यैर्योगो व्यवच्छिद्यत इति । क्वचिदत्यन्तायोगव्यवच्छेदो नीलमेव सरोजमित्यत्र, न सरोजं सकलद्रव्यभाविनीलगुणमात्मसात्करोति, तथा नीलत्वमपि न समस्तसरोजाक्षेपि, अत एवोभयव्यभिचारादुभयविशेषणत्वम्, अत्र च नीलतायाः किलात्यन्तमयोगो व्यवच्छिद्यते, नात्यन्तमयोगः-असम्बन्धः सरोजेन सह नीलतायाः । सर्वत्र चैवकारस्य विवक्षावशात् साक्षादप्रयोगेऽपि व्यवच्छेदार्थप्रतीतिरतो निरन्वयदोषाभावस्तदयोगव्यवच्छेदेन विशेषणादिति । अत्रोच्यते-सर्वमेतद् व्यामोहभाषितं दुर्बुद्धेरुद्धरतः परप्रयुक्तदूषणानि, यस्मादयोगे व्यवच्छिन्नेऽपि प्रागेतन(?) दोषसम्पातो न निवर्तते, अयोगव्यवच्छेदेन ह्यस्तिना योग इष्यते, स च योगः किं सामान्यरूपेणास्तिना प्रत्याय्यतेऽथ विशेषरूपेण उतोभयरूपेणेति सर्वथा प्राक्तनदोषप्रसङ्गः, व्यवच्छेदोऽप्यस्तित्वसामान्यायोगस्य वाऽस्तित्वविशेषायोगस्य वा उभयायोगस्य वा ? यद्यस्तित्वसामान्यायोगव्यवच्छेदः, ततोऽस्तित्वविशेषायोगव्यवच्छेदाभाव प्रसङ्गस्तस्मिंश्चाव्यवच्छिन्ने सर्वास्तित्वविशेष स्वभाव आत्मादिः प्रसक्तः अथास्तित्वविशेषायोगव्यवच्छेद इष्टः, एवं तर्ह्यस्तित्वसामान्ययोगव्यवच्छेदाभावप्रसङ्गः, ततः प्रागेतनदोषव्रातस्तदवस्थः, अथोभयायोगव्यवच्छेदः, तथापि सामान्यविशेषास्तित्वोभयस्वभावः आत्मादिरभ्युपेतः स्यात्, ततश्च निष्फलमवधारणम्, सामान्यास्तित्वेन चास्त्यात्मादिर्विशेषास्तित्वेन च, ततश्च स्वगतविशेषास्तित्वेनास्ति परगतविशेषास्तित्वेन नास्ति वस्तु स्यादस्ति स्यान्नास्तीति सिद्धम्, अनेकान्तरूपमेव समस्तवस्तु व्यवहारास्पदतामानयन्तस्तत्कारिणस्तद्द्वेषिणश्च केचिज्जायन्ते जगत्प्रकारणाविष्कृतमत्सरप्रसराः खलु दुर्जनाः । यत्राप्यन्ययोगव्यवच्छेदोऽभिप्रेतस्तत्रापि योगविशेषो व्यवच्छिद्यते न योगसामान्यम्, यादृक् पार्थे धनुर्धरता तादृगन्यत्र नास्तीति । अत्यन्तायोगव्यवच्छेदेऽपि अत्यन्तमयोगो नास्ति योग एव सर्वथा अथवा कदाचिदस्ति कदाचिन्नास्तीत्येवं च विकल्पद्वयेऽपि प्राच्य एव प्रसङ्गो योज्यः ॥ प्रकृतमनुस्रियते-सर्वथा सामान्यविशेषरूपत्वात् प्रकारवदस्तित्वमतः सामान्यास्तित्वेनास्ति विशेषास्तित्वेन नास्त्यात्मा स्यादस्ति स्यान्नास्तीति, तथा यदस्ति तन्नियमेन द्रव्यक्षेत्रकालभावरूपेणैवात्मलाभं लभते, यथाआत्मा जीवद्रव्यतया, क्षेत्रत इह क्षेत्रतया, कालतो वर्तमानकालसम्बन्धितया, भावतो ज्ञानदर्शनोपयोगमनुष्यगतितयेति प्रतिपादिते गम्यत इदं-द्रव्यक्षेत्रकालभावान्तर सम्बन्धितया नास्त्यात्मा । यदि च सर्वद्रव्यतयाऽऽत्मा स्याद्, आत्मैवासौ न भवेत्, द्रव्यत्ववत्, सर्ववृत्तितया वा, तद्रूपतया च सर्वकालसम्बन्धित्वाद् व्योमवन्मनुष्यभावे वा समस्तनारकादिभावप्रसङ्ग एकान्तवादिनाम्, अतोऽवश्यं स्वद्रव्यादित्वेनैवास्तित्वमभ्युपेयम्, नान्यद्रव्यादित्वेन ॥ ततश्च स्वैरस्तित्वात् परैश्च नास्तित्वात् स्यादस्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यान्नास्तीति, स्वपरमात्रभावाभावोभयाधीनत्वादात्मास्तित्वस्य, यथैव स्वास्तित्वादस्तीत्युच्यते, तथैव परनास्तित्वान्नास्तीत्यपि वाच्यम्, न च प्रकारान्तरमस्ति किञ्चिदेकान्तवादिनां यदाश्रयणेनावष्टम्भो दृढप्रतिबन्धः स्यादिति नास्तित्वमस्तित्वानपेक्षमत्यन्तशून्यं वस्तु प्रतिपादयेदन्वयाप्रतिलम्भाद् अस्तित्वमपि नास्तित्वानपेक्षं सर्वरूपं वस्तु गमयेत् व्यतिरेकाप्रतिलम्भात्, न च सता सर्वाभावरूपेण सकलभावरूपेण वा भूयते, अतः सर्वदाऽस्तित्वं नास्तित्वसापेक्षं नास्तित्वं चास्तित्वापेक्षमेवात्मलाभमासादयति, एवं चात्मनि नाप्रसक्ता घटादिसत्ता निषिध्यते अर्थात् प्रकरणाद् वा, घटादिसत्तानिषेधश्चात्मनो धर्मस्तदधीनत्वादात्मस्वभावस्य, स एव च परेण विशेष्यमाणत्वात् परपर्याय उच्यते, गव्यनश्वत्ववत्, आत्मना विशेष्यमाणत्वादात्मपर्यायः, स्वपरविशेषणायत्तं हि वस्तुस्वरूपप्रकाशनम्, अनेकान्तवादे च स्यादस्त्यात्मेत्यादिभिः सप्तभिर्वाक्यैरभिधीयते वस्तु प्रत्येकक्रियापदप्रयोगेणार्थपरिसमाप्तेः, आत्मेति द्रव्यवाची विशेष्यत्वात्, अस्तीति गुणाभिधायी विशेषणत्वात्, शब्दशक्तिस्वाभाव्याच्च तथा प्रतीतेः, बुद्ध्यारूढस्योपचरितसत्ताकस्य मुख्यसत्त्वविशेषणत्वेनोपात्तस्य धर्मिण उपादानादसत्त्वे इव, स्याच्छब्दस्तु द्रव्यधर्मलिङ्गसङ्ख्याभेदवियुक्तत्वादसिप्रकृतिर्विध्यादिविषयस(म?)द्विभक्तिप्रथमपुरुषैकवचनान्तप्रतिरूपको निपातो विधिविचारणास्तित्वविवादाऽनेकान्तसंशयाद्यर्थवृत्तिः, तस्य चानेकान्तावद्योतनमेवार्थो विवक्षितः, केवलस्य च सामान्यविषयत्वावद्योतकत्वाद् विवक्षितार्थप्रतिपादनाय द्रव्यधर्मविशेषोपादानं, तन्नान्तरीयकत्वात्, निपातानां चापरिमितत्वादनेकान्तद्योतकतया विवक्षितत्वादिति, स्याच्छब्देनानेकान्ताभिधानादाक्षेपेऽपि सप्तभङ्ग्याः पुनर्भेदेनोपादानं विशिष्टार्थप्रतिपादनाय, यथा वृक्षशब्देन सामान्यविषयेणाक्षेपेऽपि धवादीनां विशेषप्रतिपिपादयिषया धवादिशब्दोपादानम्, एवमेतदपि दृश्यम्, भेदाप्रतिपत्तेर्विवक्षितभेदप्रतिपादनाय भेदपरिमाणनियमाभिधानाय वा सामान्यलक्षणप्रपञ्चव्याख्यानाय वा सङ्क्षेपव्यासाभिधानम्, तत्रास्तित्वनास्तित्वैकान्तनिवारणाय प्रथमद्वितीयौ, एकान्तरूपस्यार्थस्यावस्तुत्वादिति । तृतीयविकल्पाभिधित्सया भाष्यकृदाह-

**भा०-अर्पितेऽनुपनीते न वाच्यं सदित्यसदिति वा ।**

**टी०**-युगपदात्मन्यस्तित्वनास्तित्वधर्माभ्यामर्पिते विवक्षिते क्रमेण चानुपनीते क्रमेणाभिधातुमविवक्षिते वाच्यं न जातुचित् सदात्मतत्त्वमसदात्मतत्त्वमिति वा । वाशब्दो विकल्पार्थः, अर्पितं विशेष्यते, कीदृशेऽर्पिते ? अनुपनीते, कथमनुपनीते ? सामर्थ्यात् क्रमेणाविशेषिते, क्रमेण त्वर्पणे प्राच्यविकल्पावेव स्याताम्, अतोऽवश्यंतया युगपदभिन्ने काले द्वाभ्यां गुणाभ्यामेकस्यैवार्थस्याभिन्नस्य प्रतियोगिभ्यामभेदरूपेणैकेन शब्देनावधारणात्मकाभ्यां वक्तुमिष्टत्वादवाच्यम्, तद्विधस्यार्थस्य शब्दस्य चाभावात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं च विकल्पस्तत्त्वान्यत्वसत्त्वासम्भवात् किलावक्तव्यमेवेत्येवंविधैकान्तव्यावर्तनार्थः स्यादवक्तव्य एवात्मा, अवक्तव्यशब्देनान्यैश्च षडभिर्वचनैर्द्रव्यपर्यायविशेषैश्च वक्तव्य एव, अन्यथा सर्वप्रकारवक्तव्यतायामवक्तव्यादिशब्दैरप्यवाच्यत्वादनुपाख्यः स्यात्, अतीतविकल्पद्वयं त्वेकान्तास्तित्वैकान्तनास्तित्वप्रतिपक्षनिराकरणद्वारेण स्यादस्ति स्यान्नास्तीति स्वपरपर्यायान्तरैकधर्मसम्बन्धार्पणात् कालभेदेनोक्तम्, अधुना युगपद् विरुद्धधर्मद्वयसम्बन्धार्पितस्य च वस्तुरूपस्याभिधानात् कीदृशः शब्दप्रयोगो भवतीति ? उच्यते-न खलु तादृशः शब्दोऽस्ति यस्तादृशीं विवक्षां प्रतिपूरयेत्, यतोऽर्थान्तरवृत्तैः पर्यायैरवर्तमानमननुभवंस्तान् पर्यायान् द्रव्यं ब्रवीतीत्येका विवक्षा, अपरा तु विवक्षा, निजैः पर्यायैः स्वात्मनि वृत्तैर्वर्तमानमनुभवन् स्वान् पर्यायान् द्रव्यमभिदधातीति, एवमेतयोर्विवक्षयोः परस्परविलक्षणत्वाद् विरुद्धत्वाच्च द्वाभ्यामपि युगपदादेशे पुरुषस्यैकस्यैकत्र द्रव्ये नास्ति सम्भवो वंचनविशेषातीतत्वाच्चावक्तव्यं वाचकशब्दाभावात् । एतदुक्तं भवति-अस्तित्वनास्तित्वयोर्विरुद्धयोरेकत्राधिकरणे काले च सम्भव एव नास्तीत्यतस्तद्विधस्यार्थस्याभावात् तस्य वाचकः शब्दोऽपि नास्त्येवेति १ ॥ तथा कालाद्यभेदेन वर्तनं गुणानां युगपद्भावस्तच्च यौगपद्यमेकान्तवादे नास्ति, यतः कालात्मरूपार्थसम्बन्धोपकारगुणिदेशसंसर्गशब्दद्वारेण गुणानां वस्तुनि वृत्तिः स्यात्, तत्रैकान्तवादे विरुद्धानां गुणानामेकस्मिन् काले न क्वचिदेकत्रात्मनि वृत्तिर्दृष्टा, न जातुचित् प्रविभक्ते सदसत्त्वे स्त एकत्रात्मन्यसंसर्गरूपे येनात्मा तथोच्येत, ताभ्यां विविक्तश्च परस्परगुणानामात्मस्वभावो नान्योन्यात्मनि वर्तते, ततश्च नास्ति युगपदभेदेनाभिधानम् २ ॥ न चैकत्रार्थे विरुद्धाः सदसत्त्वादयो वर्तन्ते, यतोऽह्यभिन्नैकात्माधारत्वेनाभेदे सति सदसत्त्वे युगपदुच्येयाताम् ३ ॥ न च सम्बन्धाद् गुणानामभेदः, सम्बन्धस्य भिन्नत्वात्, छत्रदेवदत्तसम्बन्धाद्धि दण्डदेवदत्तसम्बन्धोऽन्यः, सम्बधिनोः कारणयोर्भिन्नत्वात्, न तावेकेन सम्बन्धेनाभिन्नावेव, सदसतोरात्मना सह सम्बन्धस्य भिन्नत्वात्, न सम्बन्धकृतं यौगपद्यमस्ति, तदभावाच्च नैकशब्दवाच्यत्वम् ४ ॥ न चोपकारकृतो गुणानामभेदः, यस्मान्नीलरक्ताद्युपकर्तृगुणाधीन उपकारः, ते च स्वरूपेण भिन्नाः सन्तो नीलनीलतररक्तरक्ततरादिना द्रव्यं रञ्जयन्ति विविक्तोपकारभाजः । एवं सदसत्त्वयोर्भेदात् सत्त्वेनोपरोक्तं सत्, असत्त्वोपरक्तमसदिति दूरापेतमुपकारसारूप्यम्, यतस्तदभेदेन शब्दो वाचकः स्यादिति ५ ॥ नाप्येकदेशे गुणिन आत्मन उपकारः समस्ति, येनैकदेशोपकारेण सहभावो भवेत्, गुणगुणिनोरुपकारकोपकार्यत्वे नीलादिगुणः सकल उपकारकः समस्तश्च घटादिरूपकार्यः, न चैकदेशे गुणो गुणी वा, यतो देशसहभावात् कश्चित् शब्दो वाचकः कल्प्येत ६ ॥ न चैकान्तवादिनां सदसत्त्वयोः संसृष्टमनेकान्तात्मकं रूपमस्ति, अवधृतैकान्तरूपत्वात्, यथैव हि शबलरूपव्यतिरिक्तौ

शुक्लकृष्णावसंसृष्टौ नैकस्मिन्नर्थे वर्तितुं समर्थौ, एवं सदसत्त्वाभ्यां संसर्गाभावान्न युगपदभिधानमस्ति, नाप्येकशब्दः शुद्धः समासजो वाक्यात्मको वाऽस्ति गुणद्वयस्य सहवाचकः, क्रमेण सदसच्छब्दयोः प्रयोगे यद्यसच्छब्दः सदसत्त्वे यौगपद्येन ब्रवीति, एवं तर्हि स्वार्थवत् सत्त्वमप्यसत् कुर्यात्, तथैव सच्छब्दोऽपि स्वार्थवदसदपि सत् कुर्यात्, विशेषशब्दत्वाच्च सदित्युक्ते नासदभिधीयते, न चासदित्युक्ते सदित्युक्तं भवति, अतो युगपदवाचक एकशब्दः । अथ युगपत् सदसच्छब्दौ गुणद्वयस्य वाचकाविष्येते, ततः समासवाक्यमाख्यातादिपदसमुदायवाक्यं वा भवेत् तत्र च समासवाक्यं न वाचकम्, द्वन्द्वस्तावदुभयपदार्थप्रधानः प्लक्षन्यग्रोधवद्, अस्त्यादिभिः क्रियाभिस्तुल्ययोगित्वात्, क्रियाश्रयत्वाच्च द्रव्यस्य प्राधान्यं न गुणत्वम्, यश्च गुणक्रियाशब्दानां द्वन्द्वो रूपरसादीनामुत्क्षेपणावक्षेपणादीनां च, तत्रापि गुणाः शब्दशक्तिस्वाभाव्याद् द्रव्यरूपा एवोच्यन्तेऽस्त्यादिक्रियायोगित्वात्, अन्यथा द्वन्द्वाभावात् । अत्र चात्मा विशेष्यद्रव्यं सदसतोर्गुणवचनत्वमतो गुणस्य गुण्यभेदोपचारेणाभिधानम्, सन्नात्माऽसन्नात्मेत्यतो न द्वन्द्वः ॥ ननु च द्रव्येऽपि स्याद्वादोऽस्ति, न गुणविषय एव, यथा स्याद् घटः स्यादघट इति, अत्रापि हि द्रव्यं गुणरूपोपपन्नमेवोच्यते, शब्दशक्तिस्वाभाव्याद् विशेषणविशेष्यभावापत्तेर्द्रव्यस्य विशेष्यत्वात्, स्याद् घट इदं वस्त्विति वाक्यं च वृत्तेरभिन्नार्थं केवलं विभक्तिश्रवणाद् रूपेण भिद्यते, अतो वाक्येनापि युगपत् प्रयोगासम्भवः । समानाधिकरणसमासवाक्यमपि न सम्भवति, तत्र हि द्रव्यगुणयोः सामान्यविशेषभावे सति द्रव्यशब्दतायां सामानाधिकरण्यं नीलोत्पलादिवत्, अत्र च सदसतोर्गुणत्वात् परस्परं भेदे सति न सामानाधिकरण्यमद्रव्यशब्दत्वात् सामान्यविशेषरूपेणास्थितत्वान्नास्तिविशेषणाविशेष्यसमानाधिकरणसमासः कर्मधारयश्चार्थयोरिष्यते, न चान्यत् प्रतिपदविहितं समासलक्षणमस्ति, तस्मात् समासाभावाद् युगपत् प्रयोगाभावस्तद्वाक्येऽपि सामर्थ्याभावाद् वृत्त्यनुरोधिवाक्यत्वाच्चातो न कर्मधारयः । नाप्याख्यातादिपदसमुदायो वाक्यं संश्चासंश्चात्मेति, भवत्यादिक्रियासम्बन्धात्, तत्र सामान्यशब्दो युगपदनेकमर्थमभिदध्यात् न चाभिदधीत, "अभिहितानां सामान्यशब्देन विशेषाणां नियमार्था पुनः श्रुतिः" इति न्यायात्, न वा ब्रूयादनेकमर्थमभिधानोपायासम्भवात्, "तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन चोज्झितः" इति न्यायात् सामान्यशब्देष्वेवं न विशेषशब्देषु धवखदिरादिषु, विशेषशब्दास्तु वाक्ये प्रयुज्यमानाः केवलाः स्वार्थमेव ब्रुवते संश्चासंश्चेति, न त्वनेकमर्थं स्वार्थमात्राभिधानान्न सहगुणद्वयाभिधायिता ॥ ननु च वाक्ये द्वयोरपि शब्दयोरेकतया युगपद्भावः, तन्न, पदेभ्यो वाक्यशब्दस्य शब्दान्तरत्वात्, एक एव हि शब्द इष्यते वाक्यम्, तस्य चार्थान्तरेणैकेनैव प्रतिभारूपेण भाव्यम्, अतोऽत्रापि गुणद्वयवचनस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युगपच्छब्दद्वयस्यासम्भव इति । एवमुक्तात् कालादियुगपद्भावासम्भवात् समासस्य न्य-लौकिकवाक्ये युगपच्छब्दयोर्द्वयोरर्थयोश्च वृत्त्यसम्भवाद् युगपद्विवक्षायामवाच्य इत्यवं सर्वैकान्तावक्तव्यप्रतिषेधद्वारेण भाष्यकृता तृतीयविकल्पप्रणयनमकारि प्रेक्षापूर्वकारिणा कथञ्चिदवक्तव्यः, कथञ्चिद् वक्तव्योऽवक्तव्यादिशब्दैरात्मेति निरूपितम्। एतदेव च विकल्पत्रयमधुना भाष्यकारः स्फुटतरं भाष्येण दर्शयति । स्याद्वादो हि धर्मसमाश्रयः स्वसिद्धसत्ताकस्य च धर्मिणः सत्त्वासत्त्वनित्यत्वानित्यत्वाद्यनेकविरुद्धाविरुद्धधर्म-कदम्बकाभ्युपगमे सति सप्तभङ्गीसम्भवः, तत्र सङ्ग्रहव्यवहाराभिप्रायात् त्रयः सकला-देशाः, चत्वारस्तु विकलादेशाः समवसेयाः ऋजुसूत्रशब्दसमभिरूढैवंभूतनयाभिप्रायेण । तत्रातीतविकल्पत्रयस्वरूपभावनायेदमुच्यते—

**भा०-पर्यायास्तिकस्य सद्भावपर्याये वा, सद्भावपर्याययोर्वा, सद्भाव-पर्यायेषु वा आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वा सत् ।**

**टी०**-पर्यायास्तिकस्येत्यादि । पर्यायास्तिकग्रहणं धर्मविषयस्याद्वादप्रतिपत्त्यर्थम्, धर्मास्त्वरूपित्वसत्त्वमूर्तत्वादिरूपा धर्मिणः परिणामिनो नात्यन्तव्यतिरिक्ता इत्य-तस्तत्प्रणाडिकया धर्मिविषयत्वमपि द्रव्यपर्याययोः संसृष्टत्वादेवं (देवमेव), अत्र च द्रव्यास्तिकपर्यायास्तिकनयद्वयमात्रवस्तुसमाश्रयः सिद्ध्यति स्याद्वादः, अन्यथा पर्यायनयाश्रय एव विकल्पसप्तकेन सकलवस्तुव्यापी स्यात् स्याद्वादः, सतो भवनं भावस्तद्भावलक्षणः परिणामः, स चानेकरूपः क्रमयुगपद्भावित्वात्, सुरमनुष्यादेर्ज्ञान-दर्शनादेश्चात्मनः सद्भावपर्यायत्वम्, शेषधर्मादिद्रव्यवृत्ताः, पुनरसद्भावपर्यायाः, वर्तमान-कालावधिकाः पर्यायाः सद्भावलक्षणाः, ततोऽन्येऽतीतानागतवर्तमानकालविशिष्टास्त्व-सद्भावपर्यायाः, तावत् परिणामपर्यायकलापाश्चात्मादयः पदार्थाः, स्वपरपर्यायानन्त-स्वभावमेकं द्रव्यं सत्तारूपेण विवक्षितम्, चेतनाचेतनाह्वं महासामान्यमुत्सर्गः, पर्यायाः शक्तयोऽनन्ताः, तत्र स्वपर्यायान्वयवत् परपर्यायव्यतिरेकोऽपि वस्तुस्वभावावगतेरङ्गम्, तन्निवृत्त्यग्रहणे वस्तुसद्भावाग्रहणाद् विनिवृत्तिद्वारेणैवासद्भावपर्यायोपयोगः, न निवृत्ति-रभावः, स एव हि तथा स्वभावो विनिवृत्ताशेषान्यविशेषलक्षणो निवृत्तिशब्दवाच्यः, तदेवमन्वयव्यतिरेकयोर्विधिप्रतिषेधविषययोरनियमातिप्रसङ्गपरिहारार्थं चिदुत्तरकिंवृत्ताव-द्योत्यविषयं स्याच्छब्दाग्रेसरमपि शब्दसहितं तथाविधान्यतमशब्दविशिष्टं वा धर्मधर्मि-निर्देशवाक्यं प्रयुज्यतेऽन्तर्भूतैवकारं गुणप्रधानभावव्यक्तिप्रकृत्यर्थं प्रयुक्तान्यतरैवकारं वा परप्रतिपन्नैकान्तधर्मविशिष्टं वस्तु कथञ्चित् नियमकारिधर्मप्रत्यनीकपर्यायधर्मसम्बन्धीति स्यात् सत् स्यादनित्यनित्यादिधर्मात्मकमित्थं धर्म्यपीति वा स्याद्वादिभिः प्रतिज्ञायते, सुलभहेतुदृष्टान्तत्वात्, अतो द्रव्यास्तिकनयार्पणात् सोऽयं धर्म्यभेदेनैव व्यपदेशः प्रत्यभिज्ञानप्रधानत्वात्, पर्यायार्थिकनिर्देशादस्येदमिति भेदभाक्त्वम्, एकवचनादिप्रदर्शनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैकस्यैव सत्त्वस्यासत्त्वस्य वा भजनाप्रभावितमनेकत्वमिति प्रतिपादनार्थम्, तत्र सद्भावपर्यायनिमित्तेनादेशेनार्पितमात्मरूपद्रव्यमित्येव सद्द्रव्यत्वमेव हि सद्भावपर्यायः, तद्धि द्रवति पर्यायान् द्रूयते वा तैर्द्रव्यमनेनाकारेणार्पितं स्यादस्तीत्युच्यते, तस्य द्रव्यत्वादेः पर्यायस्यात्मपरिणामिकारणप्रभावितत्वात् ताद्रूप्याच्च, तच्चास्तित्वं शेषषड्विकल्पापेक्षमेव सङ्गतिमनुभवति, सद्भावपर्यायद्वयनिमित्तादेव ज्ञानदर्शनोपयोग-द्वयकारणक आदेशो द्रव्यम्, वक्ष्यत्युपरिद्रव्याश्रया निर्गुणा गुणाः (अ० ५, सू० ४०) इति । तथा गणतिथसद्भावपर्यायकारणो वाऽयमादेशश्चैतन्यज्ञान-दर्शनोपयोगाश्रयो द्रव्यमिति, एवं द्वे द्रव्ये बहूनि वाऽप्युक्तेन प्रकारेणार्पितानि सद्भावपर्यायापेक्षया सद्व्यपदेशभाञ्जि भवन्ति, अथवैकस्मिन् सद्भावपर्यायविषयेऽर्पितमादिष्टं द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत् तथा द्वयोर्बहुषु विभाव्यम्, अविशिष्टस्य वा द्रव्यपदार्थ-स्यैकत्वद्वित्वबहुत्वपर्यायाः, तथा च तदर्प्यमाणं स्यादस्त्येकत्वेनार्पितमेक-सङ्ख्याविशेषरूपतयैवास्ति न द्वित्वबहुत्वाकारेण, अनेकधर्मिणो हि वस्तुनः कदाचित् किञ्चिद् विवक्ष्यते, युगपद्भूरिवक्तृविवक्षायामप्येकत्वादयो यौगपद्येनार्पणावशादुपलभ्यन्ते, सकलपर्यायशक्तिसङ्गतेः परिणामिनः, एकपुरुषाधारमातुलभ्रातृभागिनेयादिशक्तिवत्, एकेन वक्त्रा विवक्षिते प्रयोजनवशादेकत्वद्वित्वादि च सम्भवदप्युपेक्षितं प्रयोजनाभावात्, अतस्तस्य तेनैव विवक्षिताकारेण कार्यसिद्धेः स्यादस्त्यात्मेत्युच्यते, न सर्वपर्यायार्पणया तदा तदस्ति तस्य वक्तुरिति प्रथमविकल्पभावना ॥

**भा०-असद्भावपर्याये वा, असद्भावपर्याययोर्वा, असद्भावपर्यायेषु वा, आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वाऽसत् ।**

**टी०**-असद्भावपर्याये वेत्यादिना द्वितीयविकल्पं भावयति । आत्मनो ज्ञानदर्शनादिव्यतिरिक्ता गतिस्थित्यवगाहोपकारस्पर्शादयोऽसद्भावपर्याया वर्तमानजन्मनो वाऽतीतानागतास्तज्जन्मनि वाऽतिक्रान्तागामिनः सर्वेऽप्यसद्भावपर्यायाः तदर्पणया स्यान्नास्त्येवात्मेति, न सर्वथा नास्तित्वप्रतिपत्तिः, यदाऽऽत्मा गत्युपकारकपर्यायेणार्पित-स्तदाऽऽत्मद्रव्यमसत्, तत्स्वभावकत्वेन तस्याद्रवणात्, सद्भावपर्यायप्रभावितं वा द्रव्यं स्वपरिणामिप्रभाविता वा पर्यायास्तत्र चैकमपि नास्तीत्यतोऽसदित्युच्यते, परपर्यायार्पणया नास्ति तदित्यर्थः । शेषं पूर्ववद् विभाव्यम् ॥

इदानीमवक्तव्यताविभावनायाह –

**भा०-तदुभयपर्याये वा, तदुभयपर्याययोर्वा, तदुभयपर्यायेषु वा, आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वा, न वाच्यं सदसदिति वा ।**

**टी०**-तदुभयपर्याये वेत्यादि । तदित्यतिक्रान्तद्वयपरामर्शः, सद्भावासद्भाव-पर्यायद्वयसम्परिग्रहार्थः, उभयश्चासौ पर्यायश्च उभयपर्यायोऽस्तित्वनास्तित्वलक्षणः स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चासावुभयपर्यायश्च तदुभयपर्यायस्तदुभयपर्यायनिमित्तस्तद्विषयो वाऽप्यादेशस्तेनार्पित मात्मतत्त्वमस्तिनास्तिरूपेण युगपद्विवक्षायामुक्तप्रकारभावनया न शक्यं वक्तुमित्यवाच्यम्, ताभ्यामुभयपर्यायाभ्यामादिष्टं युगपदात्मरूपं द्रव्यं वेत्यादि विकल्प्यते, **न वाच्यं सदित्यसदिति वा सद्** द्रव्यमसद् वा द्रव्यं न वक्तव्यम्, क्रमेण त्वादेशे भवत्येतदेवम्, सहभावार्पणायां तु न सच्छब्दवाच्यं नासच्छब्दाभिधेयम्, एकस्मिन् काले तादृग्विध-वाचकशब्दाभावात् ॥ ननु च तदुभयपर्याये वेत्येकवचनमुपपन्नम्, एकपर्याय-विवक्षायामवक्तव्याभावात् । अत्रोच्यते-उभयग्रहणाद् द्वयमत्र गृह्यते । एवं तर्हि तदुभयपर्याययोर्वेत्यस्मादविशेषः, नैतदेवम्, यतस्तदुभयपर्याये विशेषविवक्षयाऽस्तित्वं हि स्वपर्यायविषयं परपर्यायविषयं चेत्युभयपर्यायस्तत् तु स्वपर्यायेणावच्छिद्य-मानमिहास्तीति गृह्यते, तदेव च परपर्यायेणावच्छिद्यमानमात्मनि नास्तीति ग्राह्य-मिदानीमुभयपर्यायो युगपदर्पणायां भवत्यवक्तव्यः, इतरत्र तु प्रधानभेदव्याख्यायां द्विवचनादिनिर्देशः समीचीनः, जातिविवक्षायां वा जातेरेकत्वादेकवचनसिद्धिरिति ॥

एवमेते त्रयः सकलादेशा भाष्येणैव विभाविताः सङ्ग्रहव्यवहारानुसारिण आत्मद्रव्ये, सम्प्रति विकलादेशाश्चत्वारः पर्यायनयाश्रया वक्तव्यास्तत्प्रतिपादनार्थमाह भाष्यकारः —

**भा०-देशादेशेन विकल्पयितव्यमिति ।**

**टी०**-इतिकरणो विकल्पेयत्ताप्रतिपादनार्थः । पर्यायास्तिकमिति नपुंसकलिङ्ग-प्रक्रान्तेर्विकल्पयितव्यमित्याह, किं पुनः कारणं भाष्यकृता सकलादेशत्रयवदितरेऽपि चत्वारो विकलादेशा भाष्येण नोक्ता इति ? । अयमभिप्रायो भाष्यकारस्य लक्ष्यते-सकलादेशसंयोगाच्चतुर्णां निष्पत्तिरिति सुज्ञानाः, तत्राद्यद्वितीयविकल्पसंयोगे तुर्यविकल्पनिष्पत्तिः स्यादस्ति च नास्ति चेति । प्रथमतृतीयविकल्पसंयोगे पञ्चमविकल्पनिष्पत्तिः स्यादस्ति चावक्तव्यश्चेति । द्वितीयतृतीयविकल्पसंयोगे षष्ठविकल्पनिष्पत्तिः स्यान्नास्ति चावक्तव्यश्चेति । प्रथमद्वितीयतृतीयविकल्पसंयोगे सप्तमविकल्पनिष्पत्तिः स्यादस्ति च नास्ति चावक्तव्यश्चेति । तत्राद्येषु त्रिषु विकल्पेषु सकलमेव द्रव्यमादिश्यते, चतुर्थादिषु पुनर्विकल्पीकृतं खण्डश आदिश्यते । तदाह-देशादेशेनेत्यादि । सकलस्य वस्तुनो बुद्धिच्छेदविभक्तोऽवयवो देशस्तस्मिन् देशे आदेशो देशादेशस्तेन देशादेशेन विकल्पनीयं-व्याख्येयम्, आत्मादितत्त्वमित्येवं विकल्पचतुष्टयस्यापि ग्रहणम् । तत्र चतुर्थ उभयप्रधानो विकल्पः, क्रमेणोभयस्यापि-शब्देनाभिधेयत्वात्, देशादेशो हि विकलादेशस्तस्य वस्तुनो वैकल्यम्, स्वेन तत्त्वेनाप्रविभक्तस्यापि विविक्तं गुणरूपं स्वरूपेणोपरञ्जकमपेक्ष्य प्रतिकल्पितमंशभेदं कृत्वाऽनेकान्तात्मकैकत्वव्यवस्थायां नरसिंहनरसिंहत्ववत् समुदायात्मकमात्मरूप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मभ्युपगम्याभिधानं विकलादेशः, न तु केवलसिंहसिंहत्ववदेकात्मकैकत्वपरिग्रहात्, यथा च प्रतिपादनोपायार्थपरिकल्पितानेकनीलपीतादिभागा निर्विभागमनेकात्मकमेकं चित्रं सामान्यरूपमुच्यते, तथा वस्त्वप्यनेकधर्मस्वभावमेकम्, दृष्टश्चाभिन्नात्मनोऽर्थस्य भिन्नो गुणो भेदकः, परुद्भवान् पटुरासीत् पटुतर एष सोऽन्य एवाभिसंवृत्तः, पटुत्वातिशयो गुणः सामान्यपाटवाद् गुणादन्यः, स वस्तुनो भेदं कल्पयति, भिन्नप्रयोजनार्थिना तथाश्रितत्वात्, अनेकात्मकं चैकत्वमात्मादेः, यतोऽनेकं शुद्धाशुद्धं द्रव्यार्थमाश्रित्य पर्यायनयं चैकात्मनो वृत्तिस्तथात्मकोऽसौ तद्भावभावित्वाद्, घटमृदात्मकत्ववत् पुरुषपाण्याद्यात्मकत्ववद् वा, अतस्ते तस्यारम्भकत्वाद् भागाः पुरुषस्येव पाण्यादयो वस्त्वंशमनुभवन्ति क्रमेण वृत्ताः क्रमयौगपद्याभ्यां वा, चतुर्थे तावत् समुच्चयात्मके न क्रमेण वृत्ताः, पञ्चमषष्ठयोरपचितक्रमयुगपद् वृत्ताः, सप्तमे प्रचितक्रमयौगपद्याभ्यां वृत्ताः संश्चासंश्चावक्तव्यश्चेत्यनेकबुद्धिबुद्धित्वाद् अनेकबुद्धिर्हि बुद्धिर्भवति द्रव्यपर्यायेषु सत्सु त्र्यात्मिका, यतोऽनेकां सद्रूपामसद्रूपामवक्तव्यरूपां च बुद्धिं भिन्नामिव क्रमवतीमिवाश्रित्याभिन्नैकाक्रमावस्तुरूपा वाक्यार्थबुद्धिर्भवति, तस्माद् भेदक्रमप्रतिभासविज्ञानहेतुत्वाद् भागास्ते भवन्त्यत्राविभक्तस्यैकस्यापि वस्तुनः । एवं चानेकस्वभावेऽर्थे सति वक्तुरिच्छावशात् कदाचित् केनचिद् रूपेण वक्तुमिष्यते, विवक्षायत्ता च वचसः सकलादेशता विकलादेशता च द्रष्टव्या, द्रव्यार्थजात्यभेदात् तु सर्वद्रव्यार्थभेदानेवैकं द्रव्यार्थं मन्यते, यदा पर्यायजात्यभेदाश्चैकं पर्यायार्थं सर्वपर्यायभेदान् प्रतिपद्यते तदा त्वविवक्षितस्वजातिभेदत्वात् सकलं वस्त्वेकद्रव्या- र्थाभिन्नमेकपर्यायार्थाभेदोपचरितं तद्विशेषैकाभेदोपचरितं वा तन्मात्रमेकमद्वितीयांशं ब्रुवन् सकलादेशः स्यान्नित्य इत्यादिस्त्रिविधोऽपि नित्यत्वानित्यत्वयुगपद्भावैकत्वरूपैकार्थाभिधायी, यदा तु द्रव्यपर्यायसामान्याभ्यां तद्विशेषाभ्यां वा तद्यौगपद्येन वा वस्तुन एकत्वं तदतदात्मकं समुच्चयाश्रयं चतुर्थविकल्पे स्वांशयुगपद्वृत्तं क्रमवृत्तं च पञ्चमषष्ठसप्तमेषूच्यते तथाविवक्षावशात् तदा तु तथाप्रतिपादयन् विकलादेशः, ते हि द्रव्यपर्यायास्तस्य देशाः तदादेशेनादेश एको ह्यनेकदेश आत्माऽभिधीयते, तत्र द्रव्यार्थसामान्येन तावद् वस्तुत्वेन सन्नात्मा, पर्यायसामान्येनावस्तुत्वेनासन्निति, विशेषस्त्वात्मनि स्वद्रव्यत्वात्मत्वचेतनत्वद्रष्टृत्वज्ञातृत्वमनुष्यत्वादिरनेको द्रव्यार्थभेदः, तथा श्रुतप्रतियोगिनः पर्याया असत्त्वाद्रव्यत्वानात्मत्वाचेतनत्वादयः, तद्द्रव्यक्षेत्रकालभावसम्बन्धजनिताश्च द्रव्यपर्यायवृत्तिभेदाः, तत्र द्रव्यार्थादेशात् स्वद्रव्यतया द्रव्यत्वम्, पृथिव्यादित्वेनाद्रव्यत्वं तद्विशेषैश्च घटादिभिः, क्षेत्रतोऽसङ्ख्याताकाशदेशव्यापितया, न सर्वव्यापितया, कालतः स्वजात्यनुच्छेदादभिन्नकालता, पर्यायादेशाद् घटादिविज्ञानदर्शनभेदाः क्रोधाद्युत्कर्षापकर्षभेदाश्च, तथाऽनन्तकालवृत्तस्ववर्तनाभेदात् कालभेदः, भावतो ज्ञत्वं क्रोधादिमत्त्वं च, एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहवो द्रव्यार्थपर्यायार्थयोर्वृत्तिभेदाः सर्वेऽपि तस्यांशाः, तैर्द्रव्यपर्यायरूपैर्वक्तुमिष्यमाणो नानारूप आत्मोच्यते । भावना तु स्यादस्ति च नास्ति च, द्रव्यार्थभेदेन चैतन्य-सामान्येनास्ति, चैतन्यविशेषविवक्षायां वाऽस्त्येकोपयोगत्वात्, पर्यायतस्तु अचैतन्येन नास्ति, घटोपयोगकाले वा पटाद्युपयोगेनासन्, चैतन्येन तद्विशेषेण वा वर्तमान एव तदभावेन तद्विशेषाभावेन वर्तते इत्युभयाधीनस्तस्यात्मा, अन्यथाऽऽत्माभाव एव स्यात् । एवं सर्वसिद्धान्तेषु पदार्थाः परस्पर-विरुद्धार्थत्वात् तदतद्रूपसमुच्चयात्मकाश्चतुर्थ-विकल्पोदाहरणीयाः ॥

पञ्चमविकल्पस्तु स्यादस्ति चावक्तव्यश्चात्मेति, तत्रानेकद्रव्यपर्यायात्मकस्य सतः कश्चिद् द्रव्यार्थविशेषमाश्रित्यास्तीत्यात्मनो व्यपदेशः, तस्यैवान्यात्मद्रव्यसामान्यं तद्विशेषं द्वयं वाऽङ्गीकृत्य युगपद्विवक्षायामवक्तव्यता, स्फुटतरमेतद् विभाव्यते, स्यादस्त्यात्मा द्रव्यत्वेन द्रव्यविशेषेण वा जीवत्वेन मनुष्यत्वादिना वा द्रव्यपर्यायसामान्यमुरीकृत्य, वस्तुत्वावस्तुत्वसत्त्वासत्त्वादिना विशेषेण वा मनुष्यत्वामनुष्यत्वादिना युगपदभेद-विवक्षायामवाच्यः, यतः सर्वेऽपि तस्यैकस्यात्मनस्तदैव विकल्पाः सम्भवन्तीति ॥

षष्ठविकल्पोऽपि त्रिभिरात्मभिर्द्व्यंशः स्यान्नास्ति चावक्तव्यश्चात्मेति, नान्तरेणात्मभेदं वस्तुगतं नास्तित्वमवक्तव्यरूपानुविद्धं शक्यं कल्पयितुं वस्तुनः, तथापि सद्भावात् तत्र नास्तित्वं पर्यायाश्रयम्, स च पर्यायो युगपद्वृत्तः क्रमप्रवृत्तो वा, सहावस्थाय्यविरोधादात्मनो धर्म एककाल एव, यथा चेतनोपयोगवेदनाहर्षसम्यक्त्व-हास्यरतिपुरुषवेदायुर्गतिजात्यादिसत्त्वद्रव्यत्वामूर्तत्वकर्तृत्वभोक्तृत्वान्यत्वानादित्वा-सङ्ख्यातप्रदेशत्वनित्यत्वादिः, क्रमवर्ती तु क्रोधादिदेवत्वादिबालत्वादिज्ञानितादिः स्वस्थानेऽनेकभेदवृत्तः, तत्रैकोऽवस्थितो द्रव्यार्थो जीवनामा नैवास्ति कश्चिच्चेतनाव्यति-रिक्तः क्रोधादिक्रमवृत्तधर्मरूपनैरन्तर्यमात्रव्यतिरिक्तो वा, अत एव तु धर्मास्तथासन्निविष्टाः सत्त्वव्यपदेश-व्यवहारभाजो भवन्तीति, अतो नास्ति पर्यायार्थादेवंविधो द्रव्यार्थस्य कश्चिदंशो नास्तीति तेन रूपेणाभावात्, न पुनः सर्वथैव नास्तित्वम्, विशिष्टस्याभावस्य विवक्षितत्वात्, पर्यायांशः सर्वार्थज्ञातृत्वासत्सर्वव्यापारविनियोगात् सर्ववस्तुत्वेन सन्निति द्रव्यार्थांशः, आभ्यां सह विवक्षायामवाच्य इति द्वितीयोऽंशः ॥

अधुना सप्तमविकल्पश्चतुर्भिरंशैस्त्र्यंशः । कश्चिद् द्रव्यार्थविशेषमाश्रित्यास्तित्वं पर्यायविशेषं च कश्चिदङ्गीकृत्य नास्तित्वं समुच्चितरूपं भवति, द्वयोरपि प्राधान्येन विवक्षितत्वात्, य(त)था द्रव्यसामान्येन पर्यायसामान्येन च युगपदवक्तव्यः, स्यादस्ति च नास्ति चावक्तव्यश्चात्मेति । भावना तु द्रव्यार्थात् सति द्रव्यत्वे देहेन्द्रियादिव्यति-रिक्तात्मत्वेन विशेषेण नास्तित्वमतोऽस्ति च नास्ति च स एवात्मा, द्रव्यपर्यायसामान्य-सदसत्त्वाभ्यां युगपदवाच्य इति । एवमर्थानुरोधाद् विवक्षावशाच्च सप्तधैव वचनप्रवृत्तिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्यथाऽपि, प्रवृत्तिनिमित्ताभावात्, एष च मार्गो द्रव्यार्थपर्यायार्थाश्रयः, तौ च सङ्ग्रहाद्यात्मकौ, सङ्ग्रहादयश्चार्थशब्दनयरूपेण प्रधाविताः, तत्र सङ्ग्रहव्यवहारर्जुसूत्रैरर्थनयैर्यौ द्रव्यार्थपर्यायार्थौ तदाश्रयैषा सप्तभङ्गी । तत्र अनपेक्षितोपदेशकशब्दव्यापारमिन्द्रियानिन्द्रियनिमित्तमर्थरूपोत्पादितं मतिज्ञानम्, अर्थनया वक्तृपरिच्छेदविषयाः, ते त्वर्थपृष्टेनैवार्थं गमयन्ति । शब्दनयास्तु साम्प्रतिकसमभिरूढैवंभूतनयाः श्रोतृविषयाः श्रुतज्ञानात्मकाः शब्दरूपरूपिताविज्ञानत्वाच्छब्दप्रमाणकाः, यच्छब्द आह यथा च तथैवार्थ इति शब्दपृष्टेनार्थपरिच्छेदं कुर्वन्ति, अत एवैतेष्वभिधानस्वरूपशुद्धिपरा चिन्ता, चक्षुर्विमलीकरणाञ्जनवत् । तत्रार्थनयाः सत्त्वासत्त्ववर्तमानसत्त्वमात्रैषिणः प्रत्येकात्मकाः संयुक्ताश्च सप्तविधवचननिर्वचनप्रत्यलाः । विविक्तसत्त्वमात्रपरिग्रहात् सत्त्वसङ्ग्रहः, अन्यासत्त्वमेव सत्त्वमिति व्यवहारः वर्तमानप्रधानत्वाद् वर्तमानमेव सत्त्वमृजुसूत्रः । तत्र स्यादस्तीति सङ्ग्रहः १ स्यान्नास्तीति व्यवहारः २ सङ्ग्रहव्यवहारयोगात् स्यादवक्तव्यः ३ सङ्ग्रहव्यवहारविभागसंयोगादेव स्यादस्ति च नास्ति च ४ स्यादस्त्यवक्तव्यश्चेत्यत्र सङ्ग्रहः सङ्ग्रहव्यवहारौ चाविभक्तौ ५ स्यान्नास्त्यवक्तव्यश्चेत्यत्र व्यवहारः सङ्ग्रहव्यवहारौ चाविभक्तौ ६ स्यादस्ति नास्त्यवक्तव्यश्चेत्यत्र विभक्तौ सङ्ग्रहव्यवहारावविभक्तौ वा ७, इत्येवमर्थपर्यायैः सप्तधा वचनव्यवहारः । व्यञ्जनपर्यायाः शब्दनयास्ते त्वभेदभेदद्वारेण वचनमिच्छन्ति, शब्दनयस्तावत् समानलिङ्गानां समानवचनानां च शब्दानामिन्द्रशक्रपुरन्दरादीनां वाच्यं भावार्थमेवाभिन्नमभ्युपैति, न जातुचिद् भिनलिङ्गं भिन्नवचनं वा शब्दं स्त्री दारास्तथाऽऽपो जलमिति, समभिरूढस्तु प्रत्यर्थं शब्दनिवेशादिन्द्रशक्रादीनां पर्यायशब्दत्वं न प्रतिजानीते, अत्यन्तभिन्नप्रवृत्तिनिमित्तत्वाद् भिन्नार्थत्वमेवानुमन्यते, घटशक्रादिशब्दानामिवेति, एवंभूतः पुनर्यथासद्भावं वस्तु वचसो गोचरमापृच्छतीच्छति, चेष्टाविष्ट एवार्थो घटशब्दवाच्यश्चित्रालेखनोपयोगपरिणतश्च चित्रकारः, चेष्टारहितस्तिष्ठन् घटो न घटशब्दवाच्यः, तच्छब्दार्थरहितत्वात्, कुटशब्दवाच्यार्थवत्, नापि भुञ्जानः शयानो वा चित्रकाराभिधानाभिधेयश्चित्रज्ञानोपयोगपरिणतिशून्यत्वाद् गोपालादिवत्, एवमभेदभेदार्थवाचिनोऽनेकैकशब्दवाच्यार्थावलम्बिनश्च शब्दप्रधाना अर्थोपसर्जनाः शब्दनयाः प्रदीपवदर्थस्य प्रतिभासकाः व्यञ्जनपर्यायसंज्ञकाः । तदेवमर्थव्यञ्जनपर्यायार्पणानर्पणद्वारैकानेकात्मकैकार्थनिरूपणवदभिधानप्रत्ययविषयाऽपि भावनाऽभिधेया । तत्र पुद्गलद्रव्यपरिणतिविशेषः शब्दोऽभिधानः, पुद्गलद्रव्यं चातीतवर्तमानागामिभूरिपर्यायपरिणाम्यर्पितभजनापेक्षया सदसन्नित्यानित्याद्यनेकधर्मात्कम्, प्रत्ययोऽपि हि ग्रहणलक्षणात्मद्रव्यांशापेक्षया सङ्ख्यापरिमाणाकाराद्यनेकरूपपर्यायापेक्षया च सदसन्नित्यानित्यादिस्वभाव इत्येवं सदसन्नित्यानित्यादिस्वभावं जगत् पञ्चास्तिकायात्मकमर्पितानर्पितलक्षणसकलशास्त्रगर्भत्रिसूत्रीविन्यासस्याद्वादप्रक्रियासङ्गतेः सिद्धम् ॥३१॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भा०-अत्राह-उक्तं भवता ( अ० ५, सू० २६ )-सङ्घातभेदेभ्यः स्कन्धा उत्पद्यन्ते इति । तत् किं संयोगमात्रादेव सङ्घातो भवति, आहोस्विदस्ति कश्चिद् विशेष इति ? । अत्रोच्यते-**

**टी०-अत्राह**-उक्तं भवतेत्यादिः सम्बन्धग्रन्थः । प्रतिपादितार्थस्मारणप्रश्नेनाज्ञः प्रकृतार्थशेषसम्बन्धमभिधापयति, कारणायत्तजन्मा कार्यप्रसवः, **सङ्घातात् स्कन्धाः समुत्पद्यन्ते**, इतिशब्दो यस्मादर्थः, तच्छब्दस्तस्मादर्थः, यस्मात् सङ्घातात् स्कन्धानामुत्पत्तिः प्रतिधीयते तस्मात् सन्देहः, किं संयोगमात्रादेव द्व्यणुकादिलक्षणः स्कन्धो भवति, आहोस्विदस्त्यत्र कश्चित् संयोगविशेष इति, मात्रग्रहणं सेनावनादिवत् केवलसंसक्तिप्रतिपादनार्थम्, संयोगमात्रं न तु संयोगविशेषाः, इतिशब्दः आशङ्क्यत्ता-प्रतिपत्तये, आचार्यस्यापि चित्तपरिवर्ती संयोगविशेषस्तत्प्रतिपादनायात्रोच्यते इत्याह, अत्रेति प्रश्नविषयाभिसम्बन्धः यत्पृष्टस्तन्निश्चीयते विधीयत इति, मनीषितसंयोग-विशेषाभिव्यक्त्यर्थमाह-

**भा०-सति संयोगे बद्धस्य सङ्घातो भवतीति । अत्राह-अथ कथं बन्धो भवतीति ? । अत्राह-**

**टी०**-सतीत्यादि । सति परस्परसङ्घट्टलक्षणे संयोगे बद्धस्यैव एकत्वपरिणति-भाजः सङ्घातात् स्कन्धोत्पत्तिः, एवकारार्थमितिकरणम्, पुद्गलानां पर्यायानन्त्येऽपि स्वजात्यनतिक्रमेण परस्परविलक्षणपरिणामाहितसामर्थ्यात् सति संयोगविशेषे केषाञ्चिदेव बन्धो न सर्वेषामिति निश्चितमेतत्, संयोगविशेषात् स्कन्धोत्पादः, न पुनर्व्यज्ञायि स्वरूपेण संयोगविशेषः, तत्परिज्ञानाय प्रश्नेनोपक्रमं पुनः परस्य प्रकटयति-अत्राहेति। सति सङ्घाते बन्धस्य सतः स्कन्धपरिणाम इति बन्धमेव पृच्छति-अथ बन्धः कथं भवतीति । अथेत्यानन्तर्यार्थः, बद्धस्य स्कन्धपरिणामो भवतीत्युक्तेऽनन्तरं च य एव जिज्ञास्यते बन्धः-एकत्वपरिणाम स कथं-केन प्रकारेणाण्वोरणूनां वा जायत इति, किं परस्परानुप्रवेशेनाहोस्वित् सार्वात्म्येन प्रवेशाभावेऽपीति ? अत्रोच्यते-परस्परानु-प्रवेशस्तावन्नैवेष्यतेऽण्वोरणूनां वा शुषिराभावात्, प्राक्चैतन्निर्णीतं प्रपञ्चतः, स्थापितं चेदं-परिणतिविशेषादणूनां सर्वात्मना बन्धो भवति, अयस्पिण्डतेजसोरिवान्योन्य-प्रदेशाभावेऽपि गुणविशेषात् सार्वात्म्येनेष्यते बन्धः । (तत्त्वा०स्वो०भा०टी०अ०५, सू०३१) **32/1**

**[129] सव्वेसिं पि नयाणं, बहुविहवत्तव्वयं निसामेत्ता ।**
**तं सव्वनयविशुद्धं, जं चरणगुणट्ठिओ साहू ॥१४१॥**

ते चेव णेगमादीया सत्त णया चरणगुणठितिमेरिसं पडिवज्जंति-**सव्वेसिं** ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाधा । **सव्वे** त्ति मूल साहप्पसाहभेदिणो । अप्पप्पणो अभिप्पाएण वत्थुस्सरूवं णयंतीति **णया । बहुविधा**-अणेगप्पगारा । एगस्स णयस्स भेदा जे ते **वत्तव्वया** भण्णति, अहवा एगस्स वत्थुणो पज्जवा जे ते **वत्तव्वता,** अधवा **वत्तव्वगं** तं जीवादितत्त्वं सप्रभेदं णायव्वं । **णिसामेत्ता** सोतुं अवधारितुं वा **णिसामित्तुं** । एतम्मि बहुविहणय वत्तव्वय पज्जयम्मि किं सव्वणयविसुद्धं ? उच्यते-**तं सव्व** इत्यादि । चरणमेव गुणो **चरणगुणो,** अहवा **चरणं**-चारित्तं, गुणा-खमादिया अणेगविधा, एतेसु जो जह**ट्ठितो साधू** सो सव्वणयसम्मतो भवतीति !

(हा०) इत्थं ज्ञानक्रियास्वरूपं श्रुत्वाऽविदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह-किमत्र तत्त्वम्, पक्षद्वयेऽपि युक्तिसंभवात् ? । आचार्यः पुनराह-**सव्वेसिं पि** गाहा, अथवा ज्ञानक्रियानयमतं प्रत्येकमभिधायाधुना स्थितपक्षमुपदर्शयन्नाह-**सव्वेसिं पि** गाहा, **सर्वेषामिति** मूलनयानाम्, **अपि**- शब्दात् तद्भेदानां च नयानां द्रव्यास्तिकादीनां **बहुविधवक्तव्यतां** सामान्यमेव विशेषा एव उभयमेव वाऽनपेक्षमित्यादिरूपाम्, अथवा नामादीनां नयानां कः कं साधुमिच्छतीत्यादिरूपां **निशम्य**-श्रुत्वा तत् **सर्वनयविशुद्धं** सर्वनयसंमतं वचनं **यच्चरणगुणस्थितः साधुः**, यस्मात् सर्वनया एव भावनिक्षेपमिच्छन्तीति गाथार्थः ।

**(हे०)** ननु पक्षद्वयेऽपि युक्तिदर्शनात् किमिह तत्त्वमिति न जानीम इति शिष्यजनसम्मोहमाशङ्क्य ज्ञान-क्रियानयमतप्रदर्शनानन्तरं स्थितपक्षं दर्शयन्नाह-**सव्वेसिंपि** गाहा, व्याख्या-न केवलमनन्तरोक्तनयद्वयस्य, किं तर्हि ? सर्वेषामपि स्वतन्त्रसामान्य-विशेषवादिनां नाम-स्थापनादिवादिनां वा **नयानां वक्तव्यतां** परस्परविरोधिनीं प्रोक्तिं **निशम्य**-श्रुत्वा **तदिह सर्वनयविशुद्धं**- सर्वनयसम्मतं तत्त्वरूपतया ग्राह्यम्, यत् किमित्याह-यच्चरणगुणस्थितः साधुः, चरणं चारित्रक्रिया, गुणोऽत्र ज्ञानम्, तयोस्तिष्ठतीति चरणगुणस्थः, ज्ञान-क्रियाभ्यां द्वाभ्यामपि युक्त एव साधुः मुक्तिसाधको न पुनरेकेन केनचिदिति भावः । तथाहि-यत्तावज्ज्ञानवादिना प्रोक्तं यद्येन विना न भवति तत्तन्निबन्धनमेवेत्यादि, तत्र तदविनाभावित्वलक्षणो हेतुरसिद्ध एव, ज्ञानमात्राविनाभाविन्यां पुरुषार्थसिद्धेः क्वाप्यदर्शनात्, न हि दाह-पाकाद्यर्थिनां दहनपरिज्ञानमात्रादेव तत्सिद्धिर्भवति, किन्तु तदानयन-सन्धुक्षण-ज्वलनादिक्रियानुष्ठानादपि, न च तीर्थकरोऽपि केवलज्ञानमात्रान्मुक्तिं साधयति, किन्तु यथाख्यातचारित्रक्रियातोऽपि, तस्मात् सर्वत्र ज्ञान-क्रियाऽविनाभाविन्येव पुरुषार्थसिद्धिः, ततस्तदविनाभावित्वलक्षणो हेतुर्यथा पुरुषार्थसिद्धेर्ज्ञाननिबन्धनत्वं साधयति तथा क्रियानिबन्धनत्वमपि, तामप्यन्तरेण तदसिद्धेरित्यनैकान्तिकोऽप्यसाविति । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियावादिनाऽपि यद् यत्समन्तरभावि तत् तत्कारणमित्यादिप्रयोगे यस्तदनन्तरभावित्वलक्षणो हेतुरुक्तः सोऽप्यसिद्धोऽनैकान्तिकश्च तथाहि-स्त्री-भक्ष्य-भोगादिक्रियाकालेऽपि ज्ञानमस्ति, तदन्तरेण तत्र प्रवृत्तेरेवायोगाद्, एवं शैलेश्यवस्थायां सर्वसंवररूपक्रियाकालेऽपि केवलज्ञानमस्ति, तदन्तरेण तस्या एवाप्राप्तेः, तस्मात् केवलक्रियानन्तरभावित्वेन पुरुषार्थस्य क्वाप्यसिद्धेरसिद्धो हेतुः, यथा च तदनन्तरभावित्वलक्षणो हेतुः क्रियाकरणत्वं मुक्त्यादिपुरुषार्थस्य साधयति तथा ज्ञानकारणत्वमपि, तदप्यन्तरेण तस्य कदाचिदप्यभावादित्यनैकान्तिकताऽप्यस्येति, तस्माद् ज्ञान-क्रियोभयसाध्यैव मुक्त्यादिसिद्धिः, उक्तं च-

हयं नाणं कियाहीणं हया अन्नाणओ किया ।
पासंतो पंगुलो दड्ढो धावमाणो य अंधओ ॥१॥
संयोगसिद्धीए फलं वयंति न हु एगचक्केण रहो पयाइ ।
अंधो य पंगू य वणे समेच्चा ते संपउत्ता नयरं पविट्ठा ॥२॥

(आवश्यकनि० १०१-१०२) इत्यादि ।

अत्राह-नन्वेवं ज्ञान-क्रिययोर्मुक्त्यवापिका शक्तिः प्रत्येकमसती समुदायेऽपि कथं स्यात् ? न हि यद् येषु प्रत्येकं नास्ति तत् तेषु समुदितेष्वपि भवति, यथा प्रत्येकमसत् समुदितेष्वपि सिकताकणेषु तैलम्, प्रत्येकमसती च ज्ञान-क्रिययोर्मुक्त्यवापिका शक्तिः, उक्तं च-

पत्तेयमभावाओ निव्वाणं समुदियासु वि न जुत्तं ।
नाण-किरियासु वोत्तुं सिकतासमुदायतेल्लं व ॥१॥

[विशेषावश्यकभा० ११६३]

उच्यते-स्यादेतद् यदि सर्वथा प्रत्येकं तयोर्मुक्त्यनुपकारिताऽभिधीयते, यदा तु तयोः प्रत्येकं देशोपकारिता समुदाये तु सम्पूर्णा हेतुता तदा न कश्चिद्दोषः, आह च-

वीसुं न सव्वहच्चिय सिकतातेल्लं व साहणाभावो ।
देसोवगारिया जा सा समवायंमि संपुण्णा ॥१॥

[विशेषा० भा० ११६४]

अतः स्थितमिदं ज्ञान-क्रिये समुदिते एव मुक्तिकारणम्, न प्रत्येकमिति तत्त्वम् । तथा च पूज्याः-

नाणाहीणं सव्वं नाणनओ भणइ किं व किरियाए ? ।
किरियाए चरणनओ तदुभयगाहो य सम्मत्तं ॥१॥

[विशेषा०भा० ३५९१]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्माद्भावसाधुः सर्वैरपि नयैरिष्यत एव स च ज्ञान-क्रियायुक्त एवेत्यतो व्यवस्थितमिदं **तत् सर्वनयविशुद्धं यच्चरणगुणव्यवस्थितः साधुरिति** । ·(अनु०द्वा०सू०६०६, गा० १४१) **32/1**

**[130]** अधुना परदर्शनानां परस्परविरुद्धार्थसमर्थकतया मत्सरित्वं प्रकाशयन् सर्वज्ञोपज्ञसिद्धान्तस्यान्योऽन्यानुगतसर्वनयमयतया मात्सर्याभावमाविर्भावयति—

**अन्योऽन्यपक्षप्रतिपक्षभावाद्, यथा परे मत्सरिणः प्रवादाः ।**
**नयानशेषानविशेषमिच्छन्, न पक्षपाती समयस्तथा ते ॥३०॥**

प्रकर्षेण उद्यते-प्रतिपाद्यते स्वाभ्युपगतोऽर्थो यैरिति प्रवादाः । यथा—येन प्रकारेण । परे-भवच्छासनाद् अन्ये । प्रवादाः-दर्शनानि । मत्सरिणः-अतिशायने मत्वर्थीय-इनविधानात् सातिशयासहनताशालिनः क्रोधकषायकलुषितान्तःकरणाः सन्तः पक्षपातिनः, इतरपक्षतिरस्कारेण स्वकक्षीकृतपक्षव्यवस्थापनप्रवणा वर्तन्ते । कस्मात् हेतोर्मत्सरिण इत्याह—अन्योऽन्यपक्षप्रतिपक्षभावात् । पच्यते-व्यक्तीक्रियते साध्यधर्मवैशिष्ट्येन हेत्वादिभिरिति पक्षः-कक्षीकृतधर्मप्रतिष्ठापनाय साधनोपन्यासः । तस्य प्रतिकूलः पक्षः प्रतिपक्षः । पक्षस्य प्रतिपक्षो-विरोधी पक्षः प्रतिपक्षः । तस्य भावः पक्षप्रतिपक्षभावः । अन्योऽन्यं-परस्परं यः पक्षप्रतिपक्षभावः-पक्षप्रतिपक्षत्व-मन्योऽन्यपक्षप्रतिपक्षभावस्तस्मात् ।

तथाहि—य एव मीमांसकानां नित्यः शब्द इति पक्षः, स एव सौगतानां प्रतिपक्षः । तन्मते शब्दस्यानित्यत्वात् । य एव सौगतानामनित्यः शब्द इति पक्षः, स एव मीमांसकानां प्रतिपक्षः । एवं सर्वप्रयोगेषु योज्यम् । तथा—तेन प्रकारेण, ते-तव । सम्यग् एति-गच्छति शब्दोऽर्थमनेन इति पुन्नाम्निघः [सि० है० ५।३।१३०] समयः-संकेतः । यद्वा सम्यग् अवैपरीत्येन इयन्ते-ज्ञायन्ते जीवाजीवादयोऽर्था अनेन इति समयः-सिद्धान्तः, अथवा सम्यग् अयन्ते-गच्छन्ति जीवादयः पदार्थाः स्वस्मिन् स्वरूपे प्रतिष्ठां प्राप्नुवन्ति अस्मिन् इति समयः-आगमः । न पक्षपाती-नैकपक्षानुरागी । पक्षपातित्वस्य हि कारणं मत्सरित्वं परप्रवादेषु उक्तम् । त्वत्समयस्य च मत्सरित्वाभावाद् न पक्षपातित्वम् । पक्षपातित्वं हि मत्सरित्वेन व्याप्तम्, व्यापकं च निवर्तमानं व्याप्यमपि निवर्तयति इति मत्सरित्वे निवर्तमाने पक्षपातित्वमपि निवर्तत इति भावः । तव समय इति वाच्यवाचकभावलक्षणे सम्बन्धे षष्ठी । सूत्रापेक्षया गणधरकर्तृकत्वेऽपि समयस्य अर्थापेक्षया भगवत्कर्तृक-त्वात् वाच्य-वाचकभावो न विरुध्यते । अत्थं भासइ अरहा सुत्तं गंथंति गणहरा णिउणं इति वचनात् । अथवा उत्पाद-व्यय-ध्रौव्यप्रपञ्चः-समयः । तेषां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवता साक्षान्मातृकापदरूपतयाभिधानात् । तथा **चार्षम्**-उपन्नेइ वा विगमेइ वा धुवेइ वा' इत्यदोषः ।

मत्सरित्वाभावमेव विशेषणद्वारेण समर्थयति । नयानशेषानविशेषमिच्छन् इति । अशेषान्-समस्तान् नयान्-नैगमादीन् अविशेषं-निर्विशेषं यथा भवति, एवम् इच्छन्-आकाङ्क्षन् सर्वनयात्मकत्वादनेकान्तवादस्य । यथा विशकलितानां मुक्तामणीनामेकसूत्रानुस्यूतानां हारव्यपदेशः । एवं पृथगभिसन्धीनां नयानां स्याद्वादलक्षणैकसूत्रप्रोतानां श्रुताख्यप्रमाणव्यपदेश इति । ननु प्रत्येकं नयानां विरुद्धत्वे कथं समुदितानां निर्विरोधिता ? उच्यते- यथा हि समीचीनं मध्यस्थं न्यायनिर्णेतारमासाद्य परस्परं विवदमाना अपि वादिनो विवादात् विरमन्ति, एवं नया अन्योऽन्यं वैरायमाणा अपि सर्वज्ञशासनमुपेत्य स्याच्छब्दप्रयोगोपशमित विप्रतिपत्तयः सन्तः परस्परमत्यन्तं सुहृद्भूयावतिष्ठन्ते । एवं च सर्वनयात्मकत्वे भगवत्समयस्य सर्वदर्शनमयत्वमविरुद्धमेव, नयरूपत्वाद् दर्शनानाम् ।

न च वाच्यं तर्हि भगवत्समयस्तेषु कथं नोपलभ्यते इति । समुद्रस्य सर्वसरिन्मयत्वेऽपि विभक्तासु तासु अनुपलम्भात् । तथा च वक्तृवचनयोरैक्य-मध्यवस्य **श्रीसिद्धसेनदिवाकरपादाः**-

उदधाविव सर्वसिन्धवः, समुदीर्णास्त्वयि नाथ ! दृष्टयः ।
न च तासु भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्विवोदधिः ॥

अन्ये त्वेवं व्याचक्षते । यथा अन्योऽन्यपक्षप्रतिपक्षभावात् परे प्रवादा मत्सरिणस्तथा । तव समयः सर्वनयान् मध्यस्थतयाङ्गीकुर्वाणो न मत्सरी । यतः कथंभूतः ? पक्षपाती-पक्षमेकपक्षाभिनिवेशम् पातयति तिरस्करोतीति पक्षपाती, रागस्य जीवनाशं नष्टत्वात् । अत्र च व्याख्याने मत्सरीति विधेयपदम् पूर्वस्मिश्च पक्षपातीति विशेषः । अत्र च क्लिष्टाक्लिष्टव्याख्यानविवेको विवेकिभिः स्वयं कार्यः । इति काव्यार्थः ॥३०॥ (स्याद्वा०मं० गा० ३०) **32/2**

**[131]** सर्वनयमये भगवत्प्रवचने सर्वाणि दर्शनानि सन्निविष्टानि, एवमपि ततः भक्तेष्वेकान्तताकलुषितेषु न भवतो दर्शनम्, समुद्रान्तः सन्निविष्टानां नदीनां ततः प्रविभक्तावस्थायां तासु समुद्रादर्शनमिवेत्याह—

**उदधाविव सर्वसिन्धवः, समुदीर्णास्त्वयि सर्वदृष्टयः ।**
**न च तासु भवानुदीक्ष्यते, प्रविभक्तासु सरित्स्विवोदधिः ॥१५॥**

उदधाविवेति— उदधौ सर्वसिन्धव इव त्वयि सर्वदृष्टयः समुदीर्णाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रविभक्तासु तासु भवान् न चोदीक्ष्यते, प्रविभक्तासु सरित्सु उदधिरिव इत्यन्वयः । उदधौ-समुद्रे, सर्वसिन्धवः-सर्वा नद्यः, इव-यथा, समुदीर्णाः-सम्मिलितास्तथा, त्वयि-हे वीर ! तवागमे आगमरूपकार्यजिनरूपकारणयोरभेदोपचारात् सर्वदृष्टयः-सर्वदर्शनानि, समुदीर्णाः-सम्यग्मिलिताः, अपेक्षाभेदेन सर्वदर्शनविषया भवदागमे प्रसङ्गत उपदर्शिताः, एवं सत्यपि प्रविभक्तासु-पृथग्भूय तत्तन्नयावलम्बनेन तत्तद्वादिपरिगृहीतासु, तासु-दृष्टिषु,भवान्-भवदभिमतानेकान्तवादः, न च नैव उदीक्ष्यते-अवलोक्यते, प्रविभक्तासु-पृथक् पृथक् प्रवाहचलितासु सरित्सु-सिन्धुषु, उदधिः-समुद्रः, इव-यथा न दृश्यते तथा । सर्वदृष्टय इत्यस्य स्थाने नाथ! दृष्टयः इति पाठोऽपि ग्रन्थान्तरे दृश्यते ॥१५॥ (सिद्ध०द्वा०द्वा०४, गा० १५) **32/2**

**[132]** [उभयारब्धतृतीयनयाभावेऽपि द्वयोरेव नययोरन्योन्यसव्यपेक्षयोः सम्यक्त्वप्रतिपादनम्]

स्यादेतत् भवतु परस्परनिरपेक्षयोर्मिथ्यात्वम्, उभयनयारब्धस्त्वेकः सम्यग्दृष्टि-र्भविष्यतीत्याह—

**ण य तइओ अत्थि णओ, ण य सम्मत्तं ण तेसु पडिपुण्णं ।**
**जेण दुवे एगन्ता विभज्जमाणा अणेगन्तो ॥१४॥**

न च तृतीयः परस्परसापेक्षोभयग्राही अस्ति नयः कश्चित् तथाभूतार्थस्याने-कान्तात्मकत्वात् तद्ग्राहिणः प्रत्ययस्य नयात्मकत्वाऽनुपपत्तेः । न च सम्यक्त्वं न तयोः प्रतिपूर्णं प्रतिषेधद्वयेन प्रकृतार्थावगतेः । अशेषं हि प्रामाण्यं सापेक्षं गृह्यमाणयोरनयोरेवं विषययोर्व्यवस्थितं येन द्वावपि एकान्तरूपतया व्यवस्थितौ मिथ्यात्वनिबन्धनम् तत्परित्यागेनाऽन्वयव्यतिरेकौ विशेषेण परस्परात्यागरूपेण भज्यमानौ गृह्यमाणावनेकान्तो भवतीति सम्यक्त्वहेतुत्वमेतयोरिति ॥१४॥

[निरपेक्षग्राहित्वे मूलनयवदुत्तरनयानामपि मिथ्यात्ववर्णनम्]

एवं सापेक्षद्वयग्राहिणो नयत्वानुपपत्तेस्तृतीयनयाभावः प्रदर्शितः, निरपेक्ष-ग्राहिणां तु मिथ्यात्वं दर्शयितुमाह—

**जह एए तह अण्णे, पत्तेयं दुण्णया णया सव्वे ।**
**हंदि हु मूलणयाणं, पण्णवणे वावडा ते वि ॥१५॥**

यथा एतौ निरपेक्षद्वयग्राहिणौ मूलनयौ मिथ्यादृष्टी तथा उभयवादरूपेण व्यवस्थितानामपि परस्परनिरपेक्षत्वस्य मिथ्यात्वनिबन्धनस्य तुल्यत्वात् प्रत्येकम् इतरानपेक्षा अन्येऽपि दुर्नयाः न च प्रकृतनयद्वयव्यतिरिक्तनयान्तरारब्धत्वादुभय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वादस्य नयानामपि वैचित्र्यादन्यत्रारोपयितुमशक्यत्वात् तद्रूपस्यान्ये सम्यक्प्रत्यया भविष्यन्तीति वक्तव्यम्, यतः हंदि इत्येवं गृह्यताम् हुः इति हेतौ मूलनय-द्वयपरिच्छिन्नवस्तुन्येव व्यापृतास्तेऽपि तद्विषयव्यतिरिक्तविषयान्तराभावात् सर्वनय-वादानां च सामान्यविशेषोभयैकान्तविषयत्वात् । तन्न नयान्तरसद्भावः यतः तदारब्धोभयवादे नयान्तरं भवेत् ॥१५॥ (सन्म०कां०१, गा० १४-१५) **32/2**

[संग्रहादीनां मूलनयग्राह्यग्राहित्वान्नोभयवादप्रज्ञापकत्वमिति प्रदर्शनम्]

ननु संग्रहादिनयसद्भावात् कथं तद्व्यतिरिक्तनयान्तराभावः सत्यम्, सन्ति संग्रहादयः किन्तु तद्विषयव्यतिरिक्तविषयान्तराभावतस्तद्द्वितयविषयास्तेऽपि तद्दूषणेनैव दूषिताः यतो न मूलच्छेदे तच्छाखास्तदवस्थाः संभवन्तीत्याह—

**सव्वणयसमूहम्मि वि णत्थि णओ उभयवायपण्णवओ ।**
**मूलणयाण उ आणं, पत्तेय विसेसियं बिंति ॥१६॥**

संग्रहादिसकलनयसमूहेऽपि नास्ति कश्चिद् नय उभयवादप्ररूपकः, यतः मूलनयाभ्यामेव यत् प्रतिज्ञातं वस्तु तदेव आश्रित्य प्रत्येकरूपाः संग्रहादयः पूर्वपूर्वनयाधिगतांशविशिष्टमंशान्तरमधिगच्छन्तीति न विषयान्तरगोचराः । अतो व्यवस्थितं परस्परात्यागप्रवृत्तसामान्यविशेषविषयसंग्रहाद्यात्मकनयद्वयाधिगम्या-त्मकत्वात् वस्त्वप्युभयात्मकम् ॥१६॥ (सन्म०कां०१, गा० १६) **32/2**

**[133] सुत्तत्थो खलु पढमो, बीओ निज्जुत्ति-मीसओ भणिओ ।**
**तइओ य निरवसेसो, एस विही भणिअ अणुओगे ॥२४॥**

व्याख्या—सूत्रस्यार्थः सूत्रार्थः, सूत्रार्थः एव केवलः-प्रतिपाद्यते यस्मिन्ननुयोगे असौ सूत्रार्थ इत्युच्यते, सूत्रार्थमात्रप्रतिपादनप्रधानोवा सूत्रार्थः, खलुशब्द-स्त्वेवकारार्थः, स चावधारणे, एतदुक्तं भवति-गुरुणा सूत्रार्थमात्राभिधानलक्षण एव प्रथमोऽनुयोगः कार्यः, मा भूत् प्राथमिकविनेयानां मतिसंमोहः, द्वितीयः अनुयोगः सूत्रस्पर्शिकनिर्युक्तिमिश्रकः कार्यः, इत्येवंभूतो भणितो जिनैश्चतुर्दशपूर्वधरैश्च तृतीयश्च निरवशेषः प्रसक्तानुप्रसक्तमप्युच्यते यस्मिन् स एवंलक्षणो निरवशेषः कार्य इति, स एष उक्तलक्षणो विधानं विधिः-प्रकार इत्यर्थः भणितः-प्रतिपादितः, जिनादिभिः क्व ? सूत्रस्य निजेन अभिधेयेन सार्धम् अनुकूलो योगः अनुयोगः सूत्रव्याख्यान मित्यर्थः । तस्मिन्ननुयोगेऽनुयोगविषय इति, अयं गाथार्थः ॥२४॥ आ०नि०गा० २४) **32/3**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[134] अपरिच्छिय सुयनिहसस्स, केवलमभिन्नसुत्तचारिस्स ।**
**सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडइ ॥४१५॥**

अपरि० गाहा-अपरिनिश्चितः-सम्यगपरिच्छिन्नः श्रुतनिकष-आगमसद्भावो येन स तथा तस्य, केवलमभिन्नमविवृत्तार्थं यत् सूत्रं विशिष्टव्याख्यानरहितं सूत्रमात्रमित्यर्थः, तेन चरितुं तदनुसारेणानुष्ठानं कर्तुं धर्मो यस्यासौ अभिन्नसूत्रचारी, तस्य सर्वोद्यमेनापि-समस्तयत्नेनापि कृतमनुष्ठानमज्ञानतपसि-पञ्चाग्निसेवनादिरूपे बहु पतति । स्वल्पमेवागमानुसारि भवति, विषयविभागज्ञानशून्यत्वात्, तथाहि-सूत्रेषूक्तोऽप्यर्थो व्याख्यानतो विशेषोऽवस्थाप्यते, उत्सर्गसूत्राणामपवादसूत्रैर्विरोधाद्यदि पुनः सूत्रमात्रमेव कार्यकारि स्यात् तदानुयोगोऽनर्थकः स्यात् तथा चोक्तम्-

जं जह सुत्ते भणियं, तं तह जइ तव्वियारणा नत्थि ।

किंकालियाणुओगो, दिट्ठो दिट्ठिप्पहाणेहिं ॥ इत्यादि (उप०मा० गा०४१५)
**32/3**

**[135]** ननु एवमन्यथा प्रतिपन्नमूलागमैकदेशगर्भपरतन्त्रे द्वेषः कार्यो न वेत्याशङ्कायामाह-

**तत्राऽपि च न द्वेषः कार्यो विषयस्तु यत्नतो मृग्यः ।**
**तस्यापि न सद्वचनं सर्वं यत्प्रवचनादन्यत् ॥१३॥**

तत्रापीत्यादि । तत्रापि-तदेकदेशभूताऽऽगमान्तरेऽपि न द्वेषः कार्यः, तु-पुनः विषयो यत्नतो मृग्यः-तदर्थानुपपत्तिपरिहारो यत्नतः कर्तव्यः गुणग्रहरसिकानां परवचनानुपपत्तिपरिहारप्रवणस्वभावत्वात् । ननु वस्तुत उपपन्नार्थवचनस्यानुपपत्तिशङ्का परिहार्या, न तु सर्वथाऽनुपपन्नस्येति निर्विषयोऽयमुपदेश इत्यत आह-तस्यापि आगमान्तरस्य सद्वचनं-शोभनं वचनं सर्वं यत्-यस्मात् प्रवचनात्-मूलागमात् अन्यत् न किन्तु तदनुपात्येव । तथा च तस्य मूलागमेनैकवाक्यतामापाद्योपपत्तिरेव कर्त्तव्या । इत्थमेव सम्यग्दृष्टिपरिगृहीतस्य मिथ्याश्रुतस्यापि सम्यक्श्रुतत्वसिद्धेः तदरुचिस्तु तत्त्वतो दृष्टिवादाऽरुचिपर्यवसायिनीति सुप्रसिद्धमुपदेशपदादौ ॥१३॥ (षोड०प्र०षो० १६ श्लो०१३) **32/3**

**[136]** सदाद्येकान्तवादवत् कालाद्येकान्तवादेऽपि मिथ्यात्वमेवेत्याह-

[कालैकान्तवादनिरसनम्]

**कालो सहाव णियई पुव्वकयं पुरिसकारणेगंता ।**
**मिच्छत्तं ते चेव समासओ होंति सम्मत्तं ॥५३॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काल-स्वभाव-नियति-पूर्वकृत-पुरुषकारणरूपा एकान्ताः सर्वेऽपि एकका मिथ्यात्वम्, त एव समुदिताः परस्पराऽजहद्वृत्तयः सम्यक्त्वरूपतां प्रतिपद्यन्ते इति तात्पर्यार्थः ।

तत्र काल एवैकान्तेन जगतः कारणमिति कालवादिनः प्राहुः । तथाहि—सर्वस्य शीतोष्णवर्ष-वनस्पति-पुरुषादेर्जगतः प्रभव-स्थिति-विनाशेषु ग्रहोपराग-युतियुद्धोदयास्तमयगतिगमनागमनादौ च कालः कारणम्, तमन्तरेण सर्वस्याऽस्याऽन्यकारणत्वाभिमतभावसद्भावेऽप्यभावात् तत्सद्भावे च भावात् । तदुक्तम्—

काल: पचति भूतानि, कालः संहरति प्रजाः ।

कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः ॥ (महाभा० आदिपर्व अ० १ श्लो० २७३)

असदेतत्—तत्कालसद्भावेऽपि वृष्ट्यादेः कदाचिद् दर्शनात् । न च तदभवनमपि तद्विशेषकृतमेव नित्यैकरूपतया तस्य विशेषाभावात् । विशेषे वा तज्जननाऽजननस्वभावतया तस्य नित्यत्वव्यतिक्रमात् स्वभावभेदाद् भेदसिद्धेः । न च ग्रहमण्डलादिकृतो वर्षादेर्विशेषः, तस्यापि अहेतुकतयाऽभावात्न च काल एव तस्य हेतुः, इतरेतराश्रयदोषप्रसक्तेः—सति कालभेदे वर्षादिभेदहेतोर्ग्रहमण्डलादेर्भेदः तद्भेदाच्च कालभेद इति परिस्फुटमितरेतराश्रयत्वम् । अन्यतः कारणाद् वर्षादिभेदे न काल एव एकः कारणं भवेद्—इत्यभ्युपगमविरोधः । कालस्य च कुतश्चिद् भेदाभ्युपगमे अनित्यत्वमित्युक्तम् । तत्र च प्रभव-स्थिति-विनाशेषु यद्यपरः कालः कारणम्, तदा तत्रापि स एव पर्यनुयोग इत्यनवस्थानान्न वर्षादिकार्योत्पत्तिः स्यात् । न चैकस्य कारणत्वं युक्तम्, क्रम-यौगपद्याभ्यां तद्विरोधात् । तन्न काल एव एकः कारणं जगतः ।

(स्वभावैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः ।)

अपरे तु—'स्वभावत एव भावा जायन्ते' इति वर्णयन्ति । अत्र यदि 'स्वभावकारणा भावाः' इति तेषामभ्युपगमस्तदा स्वात्मनि क्रियाविरोधो दोषः । न ह्यनुत्पन्नानां तेषां स्वभावः समस्ति । उत्पन्नानां तु स्वभावसंगतावपि प्राक् स्वभावाऽभावेऽपि उत्पत्तेर्निर्वृत्तत्वाद् न स्वभावस्तत्र कारणं भवेत् । अथ 'कारणमन्तरेण भावा भवन्ति स्व-परकारणनिमित्तजन्मनिरपेक्षतया सर्वहेतुनिराशंस-स्वभावाः भावाः । तथा चात्र स्वभाववादिभिर्युक्तिः प्रदर्श्यते—यदनुपलभ्य-मानसत्ताकं तत् प्रेक्षावतामसद्व्यवहारविषयः यथा शशशृङ्गम्, अनुपलभ्यमानसत्ताकं च भावानां कारणमिति स्वभावानुपलब्धिः । न चायमसिद्धो हेतुः कण्टकादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तैक्ष्ण्यादेर्निमित्तभूतस्य कस्यचिदध्यक्षादिनाऽसंवेदनात् । तदुक्तम्–

क: कण्टकानां प्रकरोति तैक्ष्ण्यम्, विचित्रभावं मृगपक्षिणां वा ।
स्वभावत: सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुत: प्रयत्न: ? ॥ ( )

अथापि स्यात्–भवतु बाह्यानां भावानां कारणानुपलब्धेरहेतुकत्वम् आध्यात्मिकानां तु कुतो निर्हेतुकत्वसिद्धि: ? असदेतत्–यतो यदि नाम दु:खादीनामध्यक्षतो निर्हेतुकत्वमसिद्धं तथापि अनुमानतस्तत् तेषां सिद्धमेव । तथाहि–यत् कादाचित्कं तद् निर्हेतुकम् यथा कण्टकादेस्तैक्ष्ण्यम् कादाचित्कं च सुखादिकमिति स्वभावहेतु: । न च यस्य भावाऽभावयोर्नियमेन यस्य भावाभावौ तत्तस्य कारणम्, व्यभिचारात् । तथाहि–स्पर्शसद्भाव एव चक्षुर्विज्ञानम् तदभावे न तत् कदाचित्, न च स्पर्श: तत्कारणम् । तन्नैतत् कारणभावलक्षणम् व्यभिचारित्वात् । अत: सर्वहेतुनिराशंसं जन्म भावानामिति सिद्धम् ।

असदेतत्–कण्टकादितैक्ष्ण्यादेरपि निर्हेतुकत्वाऽसिद्धे: । तथाहि–अध्यक्षाऽनुपलम्भाभ्यामन्वयव्यतिरेकतो बीजादिकं तत्कारणत्वेन निश्चितमेव । यस्य हि यस्मिन् सत्येव (यस्य ?) भाव: यस्य च विकाराद् यस्य विकार: तत् तस्य कारणमुच्यते । उत्सूनादिविशिष्टावस्थाप्राप्तं च बीजं कण्टकादितैक्ष्ण्यादेरन्वय-व्यतिरेकाद् अध्यक्षानुपलम्भाभ्यां कारणतया निश्चितमिति 'अनुपलभ्यमानसत्ताकं च कारणम्' इत्यसिद्धो हेतु: । यदपि 'कार्यकारणभावलक्षणं व्यभिचारि' इत्युक्तम्, तदपि असिद्धम्, स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञाने निमित्ततयेष्टत्वात् तमन्तरेण रूपस्यैव विशिष्टावस्थस्याऽसम्भवात् । न च व्यतिरेकमात्रं कार्यकारणभाव-निबन्धनत्वेनाऽभ्युपगम्यते तद्वादिभि: किन्तु तद्विशेष एव । तथाहि–समर्थेषु सत्सु येषु कार्यं भवदुपलब्धम् तेषां मध्येऽन्यतमस्यापि अभावे तद् अभवत् तत्कारणं तद् इति व्यवस्थाप्यते न तु 'यस्याभावे यन्न भवति' इति व्यतिरेकमात्रत:, अन्यथा मातृविवाहोचितपारसीकदेशप्रभवस्य पिण्डखर्जूरस्य तद्विवाहाभावेऽभावादव्यभिचार: स्यात् । न चैवंभूतस्य व्यतिरेकस्य स्पर्शेन व्यभिचार:, न हि रूपादिसंनिधान-मुपदर्श्य स्पर्शस्यैकस्याभावात् चक्षुर्विज्ञानं न भवतीति शक्यं दर्शयितुमिति कुतो व्यभिचार: कार्यकारणभावलक्षणस्य ?

न केवलं बीजादि: कारणत्वेन भावानां निश्चित: किन्तु देशकालादिरपि । तथाहि–यदि प्रतिनियतदेशकालहेतुता कण्टकादेस्तैक्ष्ण्यादेर्न स्यात् तदा येयमतद्देश-कालपरिहारेण प्रतिनियतदेशकालता तेषामुपलम्भगोचरचारिणी सा न स्यात्, तन्निरपेक्षत्वात् तद्वदन्यदेशकाला अपि ते भवेयु:, न चैवम् अत: प्रतिनियतदेशादौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्त्तमानास्तदपेक्षास्त इति सिद्धम् । तथा च तत्कार्या अपेक्षालक्षणत्वाद् तत्कार्यत्वस्य नियतदेशतया च तेषां वृत्तिरध्यक्षत एव सिद्धेति कथं न तत्कार्यतावगतिः ?

यदपि 'कादाचित्कत्वात्' इति साधनम् तदपि विरुद्धम्, साध्यविपर्ययसाधनादहेतोः कादाचित्कत्वानुपपत्तेः । साध्यविकलश्च दृष्टान्तः अहेतुकत्वस्य तत्राप्यभावात् । एवमनुपलभ्यमानसत्ताकं भावानां कारणमिति हेतोरसिद्धता प्रतिज्ञायाश्च प्रत्यक्षविरोधो व्यवस्थितः ।

सिद्धत्वेऽपि चास्य हेतोरनैकान्तिकत्वम् । तथाहि—यद्यनुपलम्भमात्रं हेतुत्वेनोपादीयते तदा प्रमाणाभावात् कारणसत्ताभावाऽसिद्धेः कथं नानैकान्तिकता ? तथाहि—कारणं व्यापकं वा निवर्त्तमानं कार्यं व्याप्यं वाऽऽदाय निवर्त्तते । न च प्रमाणमर्थसत्ताया व्यापकं वृक्षत्ववत् शिंशपायाः अभिन्नस्यैव व्यापकत्वात् । न च प्रमाण-प्रमेययोरभेदः भिन्नप्रतिभासविषयत्वात् । नापि प्रमाणं कारणमर्थस्य व्याभिचारात्, देशकालादिविप्रकृष्टानां भावानां प्रमाणाऽविषयीकरणेऽपि सत्ताऽविरोधात् । न च यदन्तरेणापि यद् भवति तत्तस्य कारणमतिप्रसङ्गात्, कारणत्वाभ्युपगमे स्वाभ्युपगमव्याघातात् । न च प्रमाणात् प्रमेयप्रभवः अपि तु प्रमेयात् प्रमाणस्य, अन्यथा तेन तद्ग्रहणाऽयोगात् । न च प्रमाणमप्रतिबद्धमपि अर्थसत्तानिवर्त्तकमतिप्रसङ्गात् गोनिवृत्तावश्वनिवृत्तिप्रसक्तेः ।

किञ्चानुपलब्धिर्हेतुत्वेनोपादीयमाना स्वोपलम्भनिवृत्तिरूपा वोपादीयेत, सर्वपुरुषोपलम्भनिवृत्तिस्वभावा वा ? तत्र न तावद् आद्यः पक्षः खल-बिलाद्यन्तर्गतस्य बीजादेः स्वोपलम्भनिवृत्तावपि सत्ताऽनिवृत्तेर्हेतोरनैकान्तिकत्वात् । अथ द्वितीयः पक्षः सोऽपि न युक्तः हेतोरसिद्धेः । न हि मयूरचन्द्रकादेः सर्वपुरुषैरदृष्टं कारणं नोपलभ्यत इत्यर्वाग्दृशा निश्चेतुं शक्यम् । किञ्च, 'निर्हेतुका भावाः' इत्यत्र हेतुरुपादीयते आहोस्विद् नेति ? यदि नोपादीयते तदा न स्वपक्षसिद्धिः प्रमाणमन्तरेण तस्या अयोगात् । अथ हेतुरुपादीयते तदा स्वाभ्युपगमविरोधः प्रमाणजन्यतया स्वपक्षसिद्धेरभ्युपगमात् । तदुक्तम्—

न हेतुरस्तीति वदन् सहेतुकं, ननु प्रतिज्ञां स्वयमेव बाधते ।
अथापि हेतुप्रणयालसो भवेत्, प्रतिज्ञया केवलयाऽस्य किं भवेत् ॥ ( ) इति

न च ज्ञापकहेतूपन्यासेऽपि कारकहेतुप्रतिक्षेपवादिनो न स्वपक्षबाधेति वक्तव्यम् यतो लिङ्गं तत्प्रतिपादकं वा वचो यदि पक्षसिद्धेरुत्पादकं न भवेत् कथं तस्य ज्ञापकहेतुता स्यात्, अन्यथा सर्वस्य सर्वं प्रति ज्ञापकता प्रसज्येत । न चैवं कारक-ज्ञापकहेत्वोरविशेषः साध्यानुत्पादकस्य ज्ञापकहेतुत्वात्, तदुत्पादकस्य तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारकहेतुशब्दवाच्यत्वात् । अनुमानबाधितत्वं च प्रतिज्ञायाः स्पष्टमेव । तथाहि—प्रतिनियतभावसंनिधौ ये प्रतिनियतजन्मानः ते सहेतुकाः यथा भवत्प्रयुक्तसाधन-संनिधिभावि तत्साध्यार्थज्ञानम् । तथा च मयूरचन्द्रकादयो भावाः इति स्वभावहेतुः । तन्न स्वभावैकान्तवादाभ्युपगमो युक्तिसंगतः ।

[नियत्येककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

सर्वस्य वस्तुनः तथा तथा नियतरूपेण भवनाद् नियतिरेव कारणमिति केचित् । तथाहि—तीक्ष्णशस्त्राद्युपहता अपि तथामरणनियतताऽभावे जीवन्त एव दृश्यन्ते, नियते च मरणकाले शस्त्रादिघातमन्तरेणापि मृत्युभाज उपलभ्यन्ते । न च नियतिमन्तरेण स्वभावः कालो वा कश्चिद् हेतुः, यतः कण्टकादयोऽपि नियत्यैव तीक्ष्णादितया नियताः समुपजायन्ते न कुण्ठादितया । कालोऽपि शीतादेर्भावस्य तथानियततयैव तदा तदा तत्र तत्र तथा तथा निर्वर्त्तकः । तथा चोक्तम्-

'प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने, नाऽभाव्यं भवति न भाविनोऽस्ति नाशः ॥ ( )
इत्यादि ।

असदेतत्—शास्त्रोपदेशवैयर्थ्यप्रसक्तेः तदुपदेशमन्तरेणापि अर्थेषु नियतिकृतत्व-बुद्धेर्नियत्यैव भावात् दृष्टाऽदृष्टफलशास्त्रप्रतिपादितशुभाशुभक्रियाफलनियमाभावश्च अथ तथैव नियतिः कारणमिति नायं दोषः, न, नियतेरेकस्वभावत्वाभ्युपगमे विसंवादाऽविसंवादादिभेदाभाव प्रसक्तेः अनियमेन नियतेः कारणत्वाद् अयमदोष' इति चेत्, न, अनियमे कारणाभावान्न नियतिरेव कारणम् नियतेर्नित्यत्वे कारकत्वायोगात् अनित्यत्वेऽपि तद्योग एव । किञ्च, नियतेरनित्यत्वे कार्यत्वं कार्यं च कारणादुत्पत्तिमदिति तदुत्पत्तौ कारणं वाच्यम्, न च नियतिरेव कारणम्, तत्रापि पूर्ववत् पर्यनुयोगाऽनिवृत्तेः । न च नियतिरात्मानमुत्पादयितुं समर्था स्वात्मनि क्रियाविरोधात् । न च कालादिकं नियतेः कारणम् तस्य निषिद्धत्वात् न चाऽहेतुका सा युक्ता नियतरूपताऽनुपपत्तेः । न च स्वतोऽनियता अन्यभाव-नियतत्वकारणम् शशशृङ्गादेस्तद्रूपताऽनुपलम्भात् । तन्न नियतिरपि प्रतिनियत-भावोत्पत्तिहेतुः ।

[कर्मैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

जन्मान्तरोपात्तमिष्टानिष्टफलदं कर्म सर्वजगद्वैचित्र्यकारणमिति कर्मवादिनः । तथा चाहुः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवाऽवतिष्ठते ।
तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्त्तते ॥ ( )

तथा च—

स्वकर्मणा युक्त एव, सर्वो ह्युत्पद्यते नरः ।
स तथाऽऽकृष्यते तेन, न यथा स्वयमिच्छति ॥ ( )

तथाहि—समानमीहमानानां समानदेश-काल-कुलाऽऽकारादिमतामर्थप्राप्त्यप्राप्ती नाऽनिमित्ते युक्ते अनिमित्तस्य देशादिप्रतिनियमाऽयोगात् । न च परिदृश्यमान-कारणप्रभवे, तस्य समानतयोपलम्भात् न चैकरूपात् कारणात् कार्यभेदः तस्याहेतुकत्वप्रसक्तेः अहेतुकत्वे च तस्य कार्यस्यापि तद्रूपतापत्तेः भेदाऽभेद-व्यतिरिक्तस्य तस्यासत्त्वात् । ततो यन्निमित्ते एते तद् दृष्टकारणव्यतिरिक्तमदृष्टं कारणं कर्मेति ।

असदेतत्—कुलालादेर्घटादिकारणत्वेनाध्यक्षतः प्रतीयमानस्य परिहारेणाऽपरा-ऽदृष्टकारणप्रकल्पनायां तत्परिहारेणापरापराऽदृष्टकारणकल्पनयाऽनवस्थाप्रसङ्गतः क्वचिदपि कारणप्रतिनियमानुपपत्तेः । न च स्वतन्त्रं कर्म जगद्वैचित्र्यकारणमुपपद्यते तस्य कर्त्रधीनत्वात् । न चैकस्वभावात् ततो जगद्वैचित्र्यमुपपत्तिमत् कारणवैचित्र्य-मन्तरेण कार्यवैचित्र्यायोगात्, वैचित्र्ये वा तदेककार्यताप्रच्युतेः, अनेक-स्वभावत्वे च कर्मणो नाममात्रनिबन्धनैव विप्रतिपत्तिः, पुरुष-काल-स्वभावादेरपि जगद्वैचित्र्य-कारणत्वेनाऽर्थतोऽभ्युपगमात्, न च तेन चेतनवताऽनधिष्ठितमचेतनत्वात् वास्यादिवत् कर्म प्रवर्त्तते । अथ तदधिष्ठायकः पुरुषोऽभ्युपगम्यते न तर्हि कर्मैकान्तवादः, पुरुषस्यापि तदधिष्ठायकत्वेन जगद्वैचित्र्यकारणत्वोपपत्तेः । न च केवलं किंचिद् वस्तु नित्यमनित्यं वा कार्यकृत् सम्भवतीत्यसकृत् प्रतिपादितम् । तन्न कर्मैकान्त-वादोऽपि युक्तिसंगतः ।

[पुरुषैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

अन्यस्त्वाह—'पुरुष एवैकः सकललोकस्थिति-सर्ग-प्रलयहेतुः प्रलयेऽपि अलुप्तज्ञानातिशयशक्तिः इति । तथा चोक्तम्—

ऊर्णनाभ इवांशूनाम्, चन्द्रकान्तः इवाऽम्भसाम् ।
प्ररोहाणामिव प्लक्षः, स हेतुः सर्वजन्मिनाम् ॥३॥

तथा, 'पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्' ( ) इत्यादि । ऊर्णनाभोऽत्र मर्कटको व्याख्यातः । अत्र सकललोकस्थितिसर्ग-प्रलयहेतुतेश्वरस्येव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषत्वादिभिः पुरुषस्येष्टा । विशेषस्तु समवायाद्यपरकारणसव्यपेक्ष ईश्वरो जगद् निर्वर्त्तयति, अयं तु केवल एव ।

अस्य चेश्वरस्येव जगद्धेतुताऽसंगता । तथाहि—

पुरुषो जन्मिनां हेतुर्नोत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत् ॥ ( )

किञ्च, प्रेक्षापूर्वकारिप्रवृत्तिः प्रयोजनवत्तया व्याप्तेति किं प्रयोजनमुद्दिश्याऽयं जगत्करणे प्रवर्त्तते ? नेश्वरादिप्रेरणात् अस्वातन्त्र्यप्रसक्तेः । न परानुग्रहार्थम् अनुकम्पया दुःखितसत्त्वनिर्वर्त्तनानुपपत्तेः । न तत्कर्मक्षयार्थं दुःखितसत्त्वनिर्माणे प्रवृत्तिः, तत्कर्मणोऽपि तत्कृतत्वेन तत्प्रक्षयार्थं तन्निर्माणप्रवृत्तावप्रेक्षापूर्वकारिताऽऽपत्तेः । न च प्राक् सृष्टेरनुकम्पनीयसत्त्वसद्भाव इति निरालम्बनाया अनुकम्पाया अयोगात् नाऽतोऽपि जगत्करणे प्रवृत्तिर्युक्ता । न चानुकम्पातः प्रवृत्तौ सुखिसत्त्वप्रक्षयार्थं प्रवृत्तिर्युक्तेति देवादीनां प्रलयानुपपत्तिर्भवेत् । न च समर्थस्य दुःखकारणमधर्मादिकमपेक्ष्य कृपालोर्दुःखितसत्त्वनिर्वर्त्तनं युक्तम् कृपापरतन्त्रतया दुःखप्रदे कर्मण्यावधा (?धी) रणोपपत्तेः । न हि कृपालवः परदुःखहेतुत्वमेवेच्छन्ति परदुःखवियोगेच्छयैव तेषां सर्वदा प्रवृत्तेः । न च क्रीडयापि तत्र तस्य प्रवृत्तिर्युक्ता, क्रीडोत्पादेऽपि जगदुत्पादापेक्षया तस्याऽस्वातन्त्र्योपपत्तेः । जगदुत्पत्ति-स्थिति-प्रलयात्मकस्य विचित्रक्रीडोपायस्य तदुत्पत्तावपेक्षणात् । यदि विचित्रक्रीडोपायोत्पादने तस्य प्रागेव शक्तिः तदा युगपदशेषजगदुत्पत्ति-स्थिति-प्रलयान् विदध्यात् । अथादौ न तत्र शक्तिस्तदाऽशक्तावस्थाया अविशिष्टत्वात् क्रमेणापि न तान् विदध्यात्। एकत्रैकस्य शक्ताऽशक्तत्वलक्षणविरुद्धधर्मद्वयाऽयोगात् । अयं च दोष ईश्वरवादिनामपि समान इति ।

''परानुग्रहार्थमीश्वरः प्रवर्त्तते यथा कश्चित् कृतार्थो मुनिरात्महिताऽहितप्राप्ति परिहारार्थाऽसम्भवेऽपि परहितार्थमुपदेशादिकं करोति तथेश्वरोऽप्यात्मीयामैश्वर्यविभूतिं विख्याप्य प्राणिनोऽनुग्रहीष्यन् प्रवर्त्तत इति । अथवा शक्तिस्वाभाव्यात्, यथा कालस्य वसन्तादीनां पर्यायेणाभिव्यक्तौ स्थावर-जङ्गमविकारोत्पत्तिः स्वभावतः तथैवेश्वरस्याप्याविर्भावानुग्रहसंहारशक्तीनां पर्यायेणाभिव्यक्तौ प्राणिनामुत्पत्ति-स्थितिप्रलयहेतुत्वम्''—इति यदुक्तं प्रशस्तमतिना तदपि प्रतिक्षिप्तं द्रष्टव्यम् । तथाहि-यद्यसावनुग्रहप्रवृत्तस्तदा सर्वमेकान्तसुखिनं प्राणिगणं विदध्यात् इत्युक्तम् । शक्तिस्वाभाव्यात् करणे उत्पत्ति-स्थित्युपसंहारान् जगतो युगपत् कुर्यात् इत्यादिकमपि उक्तमेव दूषणम्। तथा चाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्ग-स्थित्युपसंहारान्, युगपद् व्यक्तशक्तितः ।
युगपच्च जगत् कुर्यात्, नो चेत् सोऽव्यक्तशक्तिकः ॥
न व्यक्तशक्तिरीशोऽयम्, क्रमेणाप्युपपद्यते ।
व्यक्तशक्तिरतोऽन्यश्चेत्, भावो ह्येकः कथं भवेत् ॥ ( )

एवं कालस्यापि पर्यायेण वसन्ताद्यभिव्यक्तिप्रवृत्तावयमेव दोषः । भावास्तु शीतोष्णादिपरिणतिभाजः प्रतिक्षणविशरारवः कथंचित् काल इत्यभिधानाभिधेयाः प्राग् व्यवस्थापिताः । अथ न क्रीडाद्यर्था भगवतः प्रवृत्तिः किन्तु पृथिव्यादि-महाभूतानां यथा स्वकार्येषु स्वभावत एव प्रवृत्तिः तथेश्वरस्यापीति, अयुक्तमेतत्, एवं हि तद्व्यापारमात्रभाविनामशेषभावानां युगपद् भावो भवेत् अविकलकारणत्वात् सहकार्यपेक्षापि न नित्यस्य संगता इत्युक्तम् । पुरुषवादिनां तु केवलस्यैव पुरुषस्य जगत्कारणत्वेनाभ्युपगमात्तदपेक्षा दूरापास्तैव । पृथिव्यादिमहाभूतानां तु स्वहेतु-बलायाताऽपरापरस्वभावसद्भावान्न तदुत्पाद्यकार्यस्य युगपदुत्पत्त्यादिदोषः संभवी ।

न च यथोर्णनाभः स्वभावतः प्रवृत्तोऽपि न स्वकार्याणि युगपद् निर्वर्त्तयति तथा पुरुषोऽपीति वाच्यम्, यत ऊर्णनाभस्यापि प्राणिभक्षणलाम्पट्यात् स्वकार्ये प्रवृत्तिर्न स्वभावतः, अन्यथा तत्राप्यस्य दोषस्य समानत्वात् । न ह्यसौ नित्यैक-स्वभावः अपि तु स्वहेतुबलभाव्यपरापरकादाचित्कशक्तिमानिति । तद्भाविनः कार्यस्य क्रमप्रवृत्तिरुपपन्नैव । न च यथा कथंचिदबुद्धिपूर्वकमेव पुरुषो जगन्निर्वर्त्तने प्रवर्तते प्राकृतपुरुषादप्येवमस्य हीनतया प्रेक्षापूर्वकारिणामनवधेयवचनताप्रसक्तेः । एवं प्रजापतिप्रभृतीनामपि जगत्कारणत्वेनाभीष्टानां निरासो द्रष्टव्यः न्यायस्य समानत्वात् । तन्न कालाद्येकान्ताः प्रमाणतः सम्भवन्तीति तद्वादो मिथ्यावाद इति स्थितम् । त एवान्योन्यसव्यपेक्षा नित्याद्येकान्तव्यपोहेनैकानेकस्वभावाः कार्यनिर्वर्त्तनपटवः प्रमाण-विषयतया परमार्थसन्त इति तत्प्रतिपादकस्य शास्त्रस्यापि सम्यक्त्वमिति तद्वादः सम्यग्वादतया व्यवस्थितः ॥५३॥ (सन्म०कां०३, गा०५३) **32/4**

**[137] शुष्कवादो विवादश्च, धर्मवादस्तथापरः ।**
**इत्येष त्रिविधो वादः, कीर्तितः परमर्षिभिः ॥१॥**

वृत्तिः- शुष्क इव शुष्को नीरसः, गलतालुशोषमात्रफल इत्यर्थः, स चासौ वादश्च कमपि विप्रतिपत्तिविषयमाश्रित्य प्रतिवादिना सह वदनं "शुष्कवादः" तथा विरूपो जयप्राप्तावपि परलोकादिबाधको वादः 'विवादः' 'चशब्दः-' उक्तसमुच्चये, तथा धर्मप्रधानो वादो 'धर्मवादः' 'तथा' तेनात्यन्तमाध्यस्थादिना धर्महेमकषादि-परीक्षालक्षणेन वा प्रकारेण, समुच्चयार्थो वा 'तथाशब्दः', 'परः' प्रधानः, अपरो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा उक्तवादाभ्यामन्यः, 'इति' अनेन प्रकारेण, 'एषो'ऽन्तरोक्तः, तिस्रो विधाः-प्रकारा यस्य स 'त्रिविधः' 'कीर्तितः'-संशब्दितः, 'परमर्षिभिः'-प्रधानमुनिभिरिति ॥१॥ (हारि०अष्ट०प्र० अष्ट०१२,श्लो०१) **32/5**

**[138]** तान् आत्मानं च दुर्गतौ क्षिपतीति निगमयन्नाह-

**सावज्जजोगपरिवज्जणाए, सव्वुत्तमो जइधम्मो ।**
**बीओ सावगधम्मो, तइओ संविग्गपक्खपहो ॥५११॥**

'सावज्ज०' गाहा, तस्मात् स्थितमेतत् सावद्ययोगपरिवर्जनया सपापव्यापार-परिहारलक्षणया हेतुभूतया सर्वोत्तमो यतिधर्मः साध्वाचारो मोक्षमार्ग इति शेषः, द्वितीयः श्रावकधर्मस्तृतीयः संविग्नपक्षपथः, तद्धेतुत्वात् तावपि मोक्षमार्गाविति ॥५११॥

अधुना तयोरेवापिशब्दसूचितस्य संविग्नपाक्षिकमार्गस्य स्वकार्यसाधकत्वं दर्शयन्नाह-

**सुज्झइ जई सुचरणो सुज्झइ सुस्सावओ वि गुणकलिओ ।**
**ओसन्नचरणकरणो, सुज्झइ संविग्गपक्खरुई ॥५१३॥**

'सुज्झइ०' गाहा, शुद्ध्यत्यशेषकर्ममलकलङ्कप्रक्षालनेन निर्मलो भवति यतिः सुचरणो दृढचारित्रः शुद्ध्यति सुश्रावकोऽपि गुणकलितः सम्यग्दर्शनाणुव्रतादिषु सुप्रतिष्ठः, अवसन्नचरणकरणः शिथिलोऽपि स्वयम्, अपिशब्दोऽत्रापि सम्बध्यते, शुद्ध्यति, किंभूतः सन्नित्याह-संविग्ना मोक्षाभिलाषिणः सुसाधवः तत्पक्षे तदनुष्ठाने रुचिरभिलाषो यस्याऽसौ संविग्नपक्षरुचिरिति, बहुशः क्रियाभिधानं शुद्धेर्भेद-दर्शनार्थम्, तथाहि-यतेः साक्षाच्छुद्धिरन्यथेतरयोरिति ॥५१३॥ ते तर्हि संविग्नपक्ष-रुचयः कथं लक्ष्यन्त इत्याह-

**संविग्गपक्खियाणं, लक्खणमेयं समासओ भणियं ।**
**ओसन्नचरणकरणा, वि जेण कम्मं विसोहिंति ॥५१४॥**

'संविग्ग०' गाहा, संविग्नपक्षे मोक्षाभिलाषिसुसाधुवर्गे सुन्दरबुद्धिर्विद्यते येषां ते संविग्नपाक्षिकास्तेषाम्, लक्ष्यतेऽनेनेति लक्षणं पररूपव्यावर्त्तको धर्मः, तदेतद् वक्ष्यमाणं समासतः संक्षेपेण भणितमुक्तं गणधरादिभिः, अवसन्नचरणकरणा अपि स्वयं कर्मपरतन्त्रतया प्रमादिनोऽपि प्राणिनो येन लक्षणेन सता कर्म ज्ञानावरणादि विशोधयन्ति प्रतिक्षणं क्षालयन्तीति ॥५१४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र 'बहुवचनोद्देशेऽप्येकवचननिर्देशो भवती'ति न्यायं दर्शयन् तदेव लक्षणमभिधित्सुराह–

**सुद्धं सुसाहुधम्मं, कहेइ निंदइ य निययमायारं ।**
**सुतवस्सियाण पुरओ, होइ य सव्वोमराइणिओ ॥५१५॥**

'सुद्धं' गाहा, स संविग्नपाक्षिकः, शुद्धं निष्कलङ्कं सुसाधुधर्मं यथोक्तकारि यत्याचारं कथयति लोकेभ्यः प्रतिपादयति, निन्दति च जुगुप्सते निज एव निजकस्तमात्मीयमाचारमनुष्ठानं, तथा सुतपस्विनां शोभनसाधूनां पुरतोऽग्रतः कथञ्चित् तन्मध्यापन्न इत्यर्थः । भवति च भवत्येव सर्वोत्तमरत्नाधिकोऽद्यदिनदीक्षितेभ्योऽप्यात्मानं न्यूनं विधत्त इत्यर्थः ॥५१५॥ तथा–

**वंदइ न य वंदावइ, किइकम्मं कुणइ कारवइ नेव ।**
**अतट्ठा न वि दिक्खे, देइ सुसाहूण बोहेउं ॥५१६॥**

'वंदइ' गाहा वन्दते सुसाधून् स्वयं न च नैव वन्दयति तान्, न तद् वन्दनं प्रतीच्छतीत्यर्थः, कृतिकर्मविश्रामणादिकं स्वयं करोति तेषां कारयत्यात्मनस्तान्न च नैव तथात्मार्थं स्वनिमित्तमुपस्थितमपि शिष्यं नापि नैव दीक्षयति प्रव्राजयति, किं तर्हि ? ददाति प्रयच्छति सुसाधुभ्यो बोधयित्वा धर्मदेशनयेति ॥५१६॥ (उप०मा० गा०५१३-१६) **32/6**

**[139]** त्यागमधिकृत्याह–

**बान्धवधनेन्द्रियसुखत्यागात् त्यक्तभयविग्रहः साधुः ।**
**त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहंकारममकारः ॥१७३॥**

टीका—बान्धवाः-स्वजनकाः, धनं-हिरण्यसुवर्णादि, इन्द्रियाणि-स्पर्शनादीनि, तद्विषयं सुखम् । एषां त्यागादिन्द्रियसंबन्धिसुखत्यागः । प्राप्तेषु विषयेषु स्पर्शादिषु माध्यस्थ्यम् । त्यक्तभयविग्रहः साधुः भयमिहपरलोकादानादि सप्तविधम्, विग्रहः-शरीरं तस्य त्यागो निष्प्रतिकर्मशरीरता, कलहः-द्वन्द्वादिर्वाविग्रहः । त्यक्तात्मा असंयमपरिणामलक्षण आत्मा । अष्टविधग्रन्थविजयप्रवृत्तो निर्ग्रन्थः । त्यक्ताहंकारममकार इति अरक्तद्विष्ट इत्यर्थः ॥१७३॥

अवचूर्णिः—बान्धवाः-स्वजनाः, धनं-हिरण्यादि, पञ्चेन्द्रियविषयसुखम्, एतेषां त्यागात् । भयमिहलोकादि सप्तविधम्, विग्रहः-शरीरं प्रतिकर्मणां त्यागात्साधुर्मुनिः त्यक्तात्मा-परिहृतासंयमपरिणामः अष्टविधग्रन्थविजयप्रवृत्तः परिहृताभिमानममत्वभावोऽरक्तद्विष्टस्त्यागी ॥१७३॥ (प्रशम० गा० १७३) उपसंहार गा० 1

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[140]** अनन्तरपृष्टस्यैवोत्तरमाह—

**सामाइयमाईयं सुयनाणं जाव बिंदुसाराओ ।**
**तस्स वि सारो चरणं सारो चरणस्स निव्वाणं ॥११२६॥**

तच्च श्रुतज्ञानं सामायिकादि वर्तते, चरणप्रतिपत्तिकाले सामायिकस्यैवादौ प्रदानात् । यावद् बिन्दुसारादिति बिन्दुसाराभिधानचतुर्दशपूर्वपर्यन्तमित्यर्थः, यावच्छब्दादेव च द्व्यनेकद्वादशपरिमाणं तद् वेदितव्यम् । तस्यापि श्रुतज्ञानस्य सारश्चरणम् सारशब्दोऽत्रप्रधानवचनः, फलवचनश्च मन्तव्यः, तस्मादपि श्रुतज्ञानाच्चारित्रं प्रधानम्, तस्य फलं च तदित्यर्थः । अपिशब्दात् सम्यक्त्वस्यापि साररश्चरणमेव । अथवा, अपिशब्दस्य व्यवहितः संबन्धः, तस्य श्रुतज्ञानस्य सारश्चरणमपि, अपिशब्दात् निर्वाणमपीत्यर्थः, अन्यथा ज्ञानस्य निर्वाणहेतुत्वं न स्यात्, किन्तु चरणस्यैव ज्ञानरहितस्यापि तत् स्यात्, अनिष्टं चैतत्, "सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः" तथा, "नाण-किरियाहिं मोक्खो" इत्यादिवचनादिति । इह तु ज्ञान-चरणयोः समानेऽपि निर्वाणहेतुत्वे गुण-प्रधानभावख्यापनार्थमित्थ-मुपन्यासः 'तस्स वि सारो चरणं' इति । 'सारो चरणस्स निव्वाणं ति' अत्र सारशब्दः फलवचनः, चरणस्य संयम-तपो-रूपस्य सारः फलं निर्वाणमित्यर्थः । इहापि शैलेश्यवस्थाभाविसर्वसंवररूपचारित्रमन्तरेण निर्वाणस्याऽभावात्, तद्भावे चावश्यंभावादित्थमुक्तम्, अन्यथा सम्यग्दर्शनादित्रयस्य समुदितस्यैव निर्वाण-हेतुत्वमवगन्तव्यम्, शैलेश्यवस्थायामपि क्षायिकदर्शन-ज्ञानयोरवश्यं सद्भावात् । इति निर्युक्तिगाथार्थः ॥११२६॥ (विशेषा० गा० ११२६) उपसंहार गा०5

**[141] रायगिहे नगरे जाव एवं वयासी-अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव एवं परूवेंति-एवं खलु सीलं सेयं १ सुयं सेयं २ सुयं सेयं ३ सीलं सेयं ४, से कहमेयं भंते ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया एवमाइक्खंति जाव जे ते एवमाहंसु मिच्छा ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि, एवं खलु मए चत्तारि पुरिसजाया पण्णत्ता, तंजहा-सीलसंपन्ने णाआमं एगे णो सुयसंपन्ने १ सुयसंपन्ने नामं एगे नो सीलसंपन्ने २ एगे सीलसंपन्नेवि सुयसंपन्नेवि ३ एगे णो सीलसंपन्ने नो सुयसंपन्ने ४, तत्थ णं जे से पढमे पुरिसजाए से णं पुरिसे सीलवं असुयवं, उवरए अविन्नायधम्मे, एस णं गोयमा ! मए पुरिसे देसाराहए पण्णत्ते, तत्थ णं जे से दोच्चे पुरिसजाए से णं पुरिसे असीलवं सुयवं, अणुवरए विन्नायधम्मे, एस णं गोयमा ! मए पुरिसे देसविराहए पण्णत्ते, तत्थ णं जे से तच्चे पुरिसजाए से णं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पुरिसे सीलवं सुयवं, उवरए विन्नायधम्मे, एस णं गोयमा ! मए पुरिसे सव्वाराहए पन्नत्ते, तत्थ णं जे से चउत्थे पुरिसजाए से णं पुरिसे असीलवं असुतवं, अणुवरए अविण्णायधम्मे, एस णं गोयमा ? मए पुरिसे सव्वविराहए पन्नत्ते ॥ ( सूत्रं ३५४ ) ॥**

'रायगिहे'इत्यादि, तत्र च 'एवं खलु सीलं सेयं १ सुयं सेयं २ सुयं सेयं ३ सीलं सेयं ४' इत्येतस्य चूर्ण्यनुसारेणव्याख्या-'एवं' लोकसिद्धन्यायेन 'खलु' निश्चयेन इहान्यूथिकाः केचित् क्रियामात्रादेवाभीष्टार्थसिद्धिमिच्छन्ति न च किञ्चिदपि ज्ञानेन प्रयोजनं, निश्चेष्टत्वात्, घटादिकरणप्रवृत्त ? आकाशादिपदार्थवत्, पठ्यते च- "क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥१॥" तथा-"जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स । एवं खु नाणी चरणेण हीणो, नाणस्स भागी नहु सोगईए ॥१॥" [यथा चन्दनभारवाही खरो भारभाग् न चैव चन्दनस्य । एवं चरणहीनो ज्ञानी ज्ञानभाग् न तु सुगतेः ॥१॥] अतस्ते प्ररूपयन्ति-शीलं श्रेयः प्राणातिपातादि-विरमणध्यानाध्ययनादिरूपा क्रियैव श्रेयः-अतिशयेन प्रशस्यं श्लाघ्यं पुरुषार्थ-साधकत्वात्, श्रेयं वा-समाश्रयणीयं पुरुषार्थविशेषार्थिना, अन्ये तु ज्ञानादेवेष्टार्थ-सिद्धिमिच्छन्ति न क्रियातः, ज्ञानविकलस्य क्रियावतोऽपि फलसिद्ध्यदर्शनात्, अधीयते च-"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता । मिथ्याज्ञानात्प्रवृत्तस्य, फलासंवाददर्शनात् ॥१॥" तथा-पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए । अन्नाणी किं काही किं वा नाहीइ छेयपावयं ॥१॥" [प्रथमं ज्ञानं ततो दयैवं सर्वसंयतेषु तिष्ठति अज्ञानी किं करिष्यति किं वा ज्ञास्यति छेकं पापकं वा ॥१॥] अतस्ते प्ररूपयन्ति-श्रुतं श्रेयः, श्रुतं-श्रुतज्ञानं तदेव श्रेयः-अतिप्रशस्यमाश्रयणीयं वा पुरुषार्थसिद्धिहेतुत्वात् न तु शीलमिति, अन्ये तु ज्ञानक्रियाभ्यामन्योऽन्यनिरपेक्षाभ्यां फलमिच्छन्ति, ज्ञानं क्रियाविकलमेवोपसर्जनीभूतक्रियं वा फलदं क्रियाऽपि ज्ञानविकला उपसर्जनीभूतज्ञाना वा फलदेति भावः, भणन्ति च-"किञ्चिद्वेदमयं पात्रम्, किञ्चित्पात्रं तपोमयम् । आगमिष्यति तत्पात्रम्, यत्पात्रं तारयिष्यति ॥१॥" अतस्ते प्ररूपयन्ति-श्रुतं श्रेयः तथा शीलं श्रेयः ३, द्वयोरपि प्रत्येकं पुरुषस्य पवित्रतानिबन्धनत्वादिति, अन्ये तु व्याचक्षते-शीलं श्रेयस्तावन्मुख्यवृत्त्या तथा श्रुतः-श्रुतमपि श्रेयो गौणवृत्त्या तदुपकारित्वादित्यर्थः इत्येकीयं मतम्, अन्यदीयमतं तु श्रुतं श्रेयस्तावत्तथा शीलमपि श्रेयो गौणवृत्त्या तदुपकारित्वादित्यर्थः, अयं चार्थ इह सूत्रे काकुपाठाल्लभ्यते, एतस्य च प्रथमव्याख्यानेऽन्ययूथिकमतस्य मिथ्यात्वम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्तपक्षत्रयस्यापि फलसिद्धावनङ्गत्वात् समुदायपक्षस्यैव च फलसिद्धिकरणत्वात्, आह च-"णाणं पयासयं सोहओ तवो संजमो य गुत्तिकरो । तिण्हंपि समाओगे मोक्खो जिणसासणे भणिओ ॥१॥" [ज्ञानं प्रकाशकं तपः शोधकं संयमश्च गुप्तिकरः । त्रयाणामपि समायोगे जिनशासने मोक्षो भणितः ॥१॥] तपःसंयमौ च शीलमेव, तथा-"संयोगसिद्धीइ फलं वयंति, न हु एगचक्केण रहो पयाइ । अंधो य पंगू य वणे समिच्चा, ते संपउत्ता नगरं पविट्ठा ॥१॥ इति, [फलं संयोगसिद्ध्या वदन्ति एकचक्रेण न रथः प्रयाति । वनेऽन्धः पङ्गुश्च समेत्य तौ संप्रयुक्तौ नगरं प्रविष्टौ ॥१॥] द्वितीयव्याख्यानपक्षेऽपि मिथ्यात्वम्, संयोगतः फलसिद्धेर्दृष्टत्वाद्, एकैकस्य प्रधानेतरविवक्षयाऽसङ्गतत्वादिति, अहं पुनर्गौतम ! एवमाख्यामि यावत्प्ररूपयामीत्यत्र श्रुतयुक्तं शीलं श्रेयः इत्येतावान् वाक्यशेषो दृश्यः, अथ कस्मादेवं ?, अत्रोच्यते-'एवं'मित्यादि, एवं' वक्ष्यमाणन्यायेन-'पुरिसजाय'त्ति पुरुषप्रकाराः 'सीलवं असुयवं'ति कोऽर्थः ?, 'उवरए अविन्नाय-धम्मे'त्ति 'उपरतः' निवृत्तः स्वबुद्ध्या पापात् 'अविज्ञातधर्मा' भावतोऽनधिगत-श्रुतज्ञानो बालतपस्वीत्यर्थः, गीतार्थानिश्रिततपश्चरणनिरतोऽगीतार्थ इत्यन्ये, 'देसाराहए'त्ति देशं स्तोकमंशं मोक्षमार्गस्याराधयतीत्यर्थः, सम्यग्बोधरहितत्वात् क्रियापरत्वाच्चेति, 'असीलवं सुयवं'ति, कोऽर्थः ?-'अणुवरए विन्नायधम्मे'त्ति पापादनिवृत्तो विज्ञातधर्मा चाविरतिसम्यग्दृष्टिरितिभावः, 'देसविराहए'त्ति देशं-स्तोकमंशं ज्ञानादित्रयरूपस्य मोक्षमार्गस्य तृतीयभागरूपं चारित्रं विराधयतीत्यर्थः, प्राप्तस्य तस्यापालनादप्राप्तेर्वा, 'सव्वाराहए'त्ति सर्व्वं त्रिप्रकारमपि मोक्षमार्गमाराधय-तीत्यर्थः, श्रुतशब्देन ज्ञानदर्शनयोः सङ्गृहीतत्वात्, न हि मिथ्यादृष्टिर्विज्ञातधर्मा तत्त्वतो भवतीति, एतेन समुदितयोः शीलश्रुतयोः श्रेयस्त्वमुक्तमिति 'सव्वाराहए'-त्युक्तम् ॥ (भग०श०८, उ०१०, सू०३५४) उपसंहार गा०9

**[142] से णं भंते ! तहा सजोगी सिज्झिहिए जाव अंतं करेहिइ ? णो इणट्ठे समट्ठे, से णं पुव्वामेव संण्णिस्स पंचिंदियस्स पज्जत्तगस्स जहण्णजोगस्स हेट्ठा असंखेज्जगुणपरिहीणं पढमं मणजोगं निरूंभइ, तयाणंतरं च णं बिंदियस्स पज्जत्तगस्स जहण्णजोगस्स हेट्ठा असंखेज्जगुणपरिहीणं बिइयं वइजोगं निरुंभइ, तयाणंतरं च णं सुहुमस्स पणगजीवस्स अपज्जत्तगस्स जहण्णजोगस्स हेट्ठा असंखेज्जगुणपरिहीणं तइयं कायजोगं णिरुंभइ, से णं एएणं उवाएणं पढममजोगं णिरुंभइ मणजोगं णिरुंभित्ता वयजोगं णिरुंभइ, वयजोगं णिरुंभित्ता कायजोगं णिरुंभइ, कायजोगं णिरुंभित्ता जोगनिरोहं करेइ, जोगनिरोहं करेत्ता अजोगत्तं पाउणति, अजोगत्तं पाउणित्ता**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इसिंहस्सपंचक्खरउच्चारणद्धार असंखेज्जसमइअं अंतोमुहुत्तिअं सेलेसिं पडिवज्जइ, पुव्वरइयगुणसेढीयं च णं कम्मं तीसे सेलेसिमद्धाए असंखेज्जाहिं गुणसेढीहिं अजंते कम्मंसे खवेंति वेयणिज्जाउयणामगुत्ते इच्चेते चत्तारि कम्मंसे जुगवं खवेइ वेदणिज्जा ।**

**ओरालियतेयाकम्माइं सव्वाहिं विप्पयहणाहिं विप्पजहइ, ओरालियतेया कम्माइं सव्वाहिं विप्पयहणाहिं विप्पजहित्ता उज्जूसेढीपडिवन्ने अफूसमाणगई उड्ढं एक्कसमएणं अविग्गहेणं गंता सागरोवउत्ते सिज्झिहिइ । तेणं तत्थ सिद्धाहवंति सादीया अपज्जवसिया असरीरा जीवघणा दंसणनाणोवउत्ता निट्ठियत्ता निरेयणा नीरया निम्मला वितिमिरा विसुद्धा सासयमणागयद्धं कालं चिट्ठंति ॥ (सू०४३) ॥**

**से णं पुव्वामेव सन्निस्से**'त्यादि, अस्यायमर्थः-स-केवली, णमित्यलङ्कारे, '**पूर्वमेव**' आदावेव योगनिरोधावस्थायाः संज्ञिनो-मनोलब्धिमतः पञ्चेन्द्रियस्येति स्वरूपविशेषणं, यतः संज्ञी पञ्चेन्द्रिय एव भवति, **पज्जत्तस्स**'त्ति मनःपर्याप्त्या पर्याप्तस्य, तदन्यस्य मनोलब्धिमतोऽपि मनसोऽभाव एवेति पर्याप्तस्येत्युक्तं, स च मध्यमादिमनोयोगोऽपि स्यादित्याह-'**जहण्णजोगिस्स**'त्ति जघन्यमनोयोगवतः '**हेट्ठ**'त्ति अधो यो मनोयोग इति गम्यते, जघन्यमनोयोगसमानो यो न भवतीत्यर्थः, मनोयोगाश्च-मनोद्रव्याणि तद्व्यापारश्चेति, जघन्यमनोयोगाधोभागवर्तित्वमेव दर्शयन्नाह-'**असंखेज्जगुणपरिहीणं**'ति असङ्ख्यातगुणेन परिहीणो यः स तथा तं जघन्यमनोयोगस्यासङ्ख्येयभागमात्रं मनोयोगं निरुणद्धि, ततः क्रमेणानया मात्रया समये समये तं निरुन्धानः सर्वमनोयोगं निरुणद्धि, अनुत्तरेणाचिन्त्येन अकरण-वीर्येणेति, एतदेवाह-'**पढमं मणजोगं निरुंभइ**'त्ति प्रथमं-शेषवागादियोगापेक्षया प्राथम्येन-आदितो मनोयोगं निरुणद्धीति उक्तं च- "**पज्जत्तमेत्तसन्निस्स जत्तियाइं जहन्नजोगिस्स । होंति मणोदव्वाइं तव्वावारो य जम्मत्तो ॥१॥ तदसंखगुणविहीणं समए समए निरुंभमाणो सो । मणसो सव्वनिरोहं करेअसंखेज्जसमएहिं ॥२॥**"ति, एवमन्यदपि सूत्रद्वयं नेयम्, '**अजोगयं पाउणइ**'त्ति अयोगतां प्राप्नोतीति, '**ईसिंहस्सपंचक्खरुच्चारणद्धाए**'त्ति ईसिति-ईषत्स्पृष्टानि ह्रस्वानि यानि पञ्चाक्षराणि तेषां यदुच्चारणं तस्य याऽद्धा-कालः सा तथा तस्याम्, इदं चोच्चारणं न विलम्बितं द्रुतं वा, किन्तु मध्यममेव गृह्यते, यत आह-"**हस्सक्खराइं मज्झेण जेण कालेण पंच भण्णंति । अच्छइ सेलेसिंगओ तत्तियमेत्तं तओ कालं ॥१॥**" शैलेशो-मेरुस्तस्येव स्थिरतासाम्याद्याऽवस्था स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

